PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 8

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA
VYĀKHYĀNĀNI

VIII

Adhyāya 5 Pāda 1-4

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1981

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

(Vol. VIII)

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 8

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

VIII

Adhyāya 5 Pāda 1-4

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1981

© Institut Français d'Indologie 1981

Imprimerie de Sri Aurobindo Ashram
Pondichéry, Inde

उपोद्घातः

महाभाष्यप्रदीपव्याख्यानानां प्राचीनानां प्रकाशनाख्ये कार्यविशेषेऽस्मिन् विमर्शालये १९८० सन्संवत्सरे चतुर्थाध्यायान्तो भागः प्राकाश्यमनीयत। ऐषमः १९८१ सन्संवत्सरे पञ्चमाध्यायभागः प्रकाश्यते। पञ्चमाध्यायभागस्यास्योपलब्धानि व्याख्यानानि त्रीणि — श्रीरामचन्द्रसरस्वतीविरचितं **महाभाष्यप्रदीपविवरणम्**, श्रीमदन्नंभट्टकृतं **महाभाष्यप्रदीपोद्द्योतनम्**, श्रीनारायणप्रणीतं **भाष्यप्रदीपविवरणं** चेति। तत्रैतद्भागोपयुक्ताः श्रीरामचन्द्रसरस्वतीकृतविवरणस्य द्वे मातृके, उद्द्योतनस्य तिस्रो मातृकाः, नारायणीयविवरणस्य द्वे मातृके चोपलब्धाः।

अत्रोपयुक्तमातृकाणां संकेतादिनिर्देशः

अ. अडैयार्कोशागाराल्लिखितास्माकीनकोशालये T. No. 155 संकेतिता। इयमुद्द्योतनमातृका प्रथमाध्यायप्रथमपादतृतीयाह्निकारम्भे किंचिद्भागहीना पञ्चमाध्याये 'रजःकृषि' (५.२.११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तभागहीना च॥

ऋ. G. O. M. L. R. No. 2248. Vol I देवनागरीलिपिमयी श्वेतपत्रलिखितोद्द्योतनमातृका। अत्र प्रथमाध्यायद्वितीयपादारम्भात् प्रभृति द्वितीयाध्यायसमाप्त्यन्तं वर्तते। षष्टयुत्तरचतुश्शती पत्राण्यस्यां सन्ति। प्रतिपुटं विंशतिः पङ्क्तयो वर्तन्ते।
R. No. 2248. Vol II अत्र तृतीयाध्यायात् प्रभृति 'केशाद्वोऽन्यतरस्याम्' (५.२.१०९) इति सूत्रपर्यन्तं वर्तते त्रिनवतिचतुश्शतीपुटान्ते। 'रजःकृषि' (५.२.११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तो भागो नास्ति। द्वितीयाह्निकात् षष्ठाध्यायसमाप्त्यन्तं वर्तते। पञ्चनवत्युत्तरषट्शती पुटान्यत्र कोशे सन्ति।
R. No. 2248. Vol III षण्णवत्युत्तरषट्शतीतः पुटात् प्रभृति नवोत्तरशतसहस्रपुटपर्यन्तेऽस्मिन् कोशे सप्तमाष्टमाध्यायौ विद्येते॥

लृ. (a) बडोदा O. 1. No. 7778 अङ्किता तालपत्रकोशात्मिकोद्द्योतनमातृकान्ध्रलिपिमयी। अस्यां तृतीयाध्यायारम्भात् षष्ठाध्यायतृतीयपादान्तमुपलभ्यते। द्व्युत्तरशती पुटान्यत्र सन्ति। प्रतिपुटं सप्त पङ्क्तयश्च। त्रयोदशसहस्री ग्रन्थाः सन्त्यत्र।
(b) No. 6257 अङ्कितस्तालपत्रकोश आन्ध्रलिपिमयः। अत्र विंशत्युत्तरद्विशती पत्राणि सन्ति। प्रतिपुटं सप्त पङ्क्तयः। सप्तशत्युत्तरसप्तसहस्री ग्रन्था अत्र वर्तन्ते। षष्ठाध्यायचतुर्थपादात् प्रभृत्यष्टमाध्यायान्तमत्र विद्यते॥

घ. T. No. 633 आस्माकीनकोशागारे संकेतिता नारायणभट्टकृतमहाभाष्यप्रदीपविवरणस्यैषा मातृका होशियार्पूर्विश्वेश्वरानन्दवैदिकशोधसंस्थानत आनीतात् 4424 अङ्कितात् तालपत्रकोशाल्लिखिता। अस्मिन् तालपत्रकोशे 297 पत्राणि सन्ति, येषु प्रतिपुटं दश पङ्क्तयः। प्रायो ग्रन्थलिप्यां स्थलद्वये मलयाललिप्यां च लिखिता। ग्रन्थारम्भे तालपत्रं भग्नम्, अन्ते तु निगमनपूर्वकं समाप्तिरस्ति। मातृकायामस्यां तृतीयाध्यायात् प्रभृत्यष्टमाध्यायान्तं वर्तते॥

ङ. आस्माककोशालये T. No. 528 संकेतिता नारायणीयभाष्यप्रदीपविवरणमातृका। अस्यां तृतीयाध्यायारम्भादष्टमाध्यायान्तं वर्तते। 'एको गोत्रे' (४.१.९३) इति सूत्रमध्यभागपर्यन्तमस्ति। उपरि चतुर्थाध्यायान्तं नास्ति। पञ्चमाध्याये 'छेदादिभ्यो नित्यम्' (५.१.६४) इति सूत्रमध्यात् प्रभृति पञ्चमाध्यायान्तं नास्ति॥

ल. महीशूरपुरीत आनीता छायाप्रतिकृतिरूपा देवनागरीलिपिमयी श्रीरामचन्द्रसरस्वतीकृतस्य विवरणस्येयं मातृका। ग्रन्थलाघवादिदं लघुविवरणमिति भाति। अत्र तृतीयाध्यायान्तिमभागः किंचित्, चतुर्थाध्यायः, पञ्चमाध्यायारम्भे कियांश्चिद् भागश्चास्ति॥

व. नेपालादानीता देवनागरीलिपिमयी पाण्डुपत्रलिखिता (माईक्रोफ्लिम्) सूक्ष्मपटलरूपा मातृका श्रीरामचन्द्रसरस्वतीकृतविवरणस्येयम्। अत्र पञ्चमाध्यायः षष्टाध्यायचतुर्थपादमध्यभागान्तं चास्ति॥

एतद्ग्रन्थमातृकादाननोपकृतवतां बडोदाकोशागार—अडैयार्कोशागार-मद्रपुरीराजकीयकोशागार-महीशूरपुरीकोशागार-होशियार्पूर्विश्वेश्वरानन्दवैदिकशोधसंस्थान —नेपालकोशागाराध्यक्षमहाशयानां कृते नितान्तं कृतज्ञतां निवेदयामः। इति शम्॥

इत्थम् उभयवेदान्तविद्वान् M. S. नरसिंहाचार्यः व्याकरणशिरोमणिः॥

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

महाभाष्यप्रदीपव्याख्यानानि

(पञ्चमाध्याये १–४ पादाः)

पञ्चमाध्यायस्य प्रथमपादे प्रथममाह्निकम्

प्राक् क्रीताच्छः ५.१.१.

[४, १–६]

(विवरणम्) ननु 'क्रीताच्छः' इत्येवोच्यमाने क्रीतशब्दाच्छो भवतीति विज्ञायेत। तन्मा विज्ञायीति प्राग्ग्रहणं कर्तव्यमित्यत आह — **छ इत्येवेति**। नन्वस्मिन् प्राग्वचने यद् वक्तव्यं तस्यान्यत्राभिधानमस्य व्याख्येयत्वेनासंनिधानादसंगतमित्यत आह — **न्यायस्येति**। अधिकारेणापि विधीयमानश्छो [1]वाक्यभेदभयात् सकृदेव वक्ष्यमाणेष्वर्थेषु विधास्यते, [2]न त्वेकैकस्मिन् पुनः-पुनरित्यत आह — **प्राक् क्रीतादिति**। प्रतिशब्दस्यार्थनिर्देशसूत्रशब्देन वीप्सायामव्ययीभावः। आकाङ्क्षाभावान्न [3]'उगवादिभ्यः' इत्यत्र छस्य संबन्ध इत्यत आह — **नदीति**। ननु [4]प्रकृति-विशेषाच्छो न प्राप्नोतीत्यधिकदोषसद्भावात् [5]'स एव' इत्ययुक्तम्, अत आह — **तस्मै हित-मित्यादिष्विति**। अर्थस्य प्राधान्येन निर्देशेऽप्यर्था एवावधिमन्त इति कुत इत्यत आह — **यथेति**। वेत्यस्य वचनं वावचनमिति भ्रमं व्युदस्यति — **विकल्पेति**। ननु 'प्राक् ठञ्ः' इत्युच्यमाने [6]'लोकसर्वलोकाट्ठञ्' इत्यतः प्राक् छस्याधिकारः स्यादित्यत आह — **प्राग् वतेरिति**॥

[४, १–६]

(उद्द्योतनम्) संपूर्णसूत्राक्षेपशङ्कां निराह — **छ इति**। नन्वधिकारोऽयं न विधिः, अत आह — **प्राक् क्रीताद्येऽर्था इति**। [7]विहितद्वयस्य पौनरुक्त्यं निराह — **पुनः श्रुत्येति**। लाघवं प्रकर्ष इत्यर्थः। **असतीति**। सूत्रस्यैवाकरणे सतीत्यर्थः। 'प्रत्यर्थनिर्देशसूत्रम्' इति वीप्सार्थे-ऽव्ययीभावः। सूत्राकरणे कस्याधिकारः, अत आह — **छ इति**। अवधिवैयर्थ्यं दृष्टान्तेनाह — **यथेति**। प्रतियोगम्, योगे योगे, इत्यनयोः पौनरुक्त्यं निराह — **प्रतियोगमित्यनेनेति**। ननु [8]'यतः प्रकृतेः प्रत्ययान्तरं न विधीयते तत एव छो भविष्यति, अत आह — **नदीति**। 'उगवा-दिभ्यो यत्, छश्च' इति भाष्येऽनुपपत्तिमाह — **केचिदिति**। **पारार्थ्यादिति**। [9]'गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्' इति न्यायादिति भावः। उपलक्ष्यमाह — **इदं त्विति**। ननु प्रकृतिपक्षे [10]'तस्मै हितम्' इत्यत्र प्रकृतिनिर्देशाभावात् 'वत्सेभ्यो हितो वत्सीयो गोधुक्' इत्यत्र छो न स्यादिति शङ्कां निराकुर्वन् अपवादे छप्रसङ्गमुदाहरति — **तस्मै हितमित्यादिष्विति**। ननु

---

[1] वाक्यभेदात् — ल.
[2] न त्वेकैकस्य — ल.
[3] पा. सू. ५.१.२.
[4] प्रकृत्यन्तराच्छः — व.
[5] स एवेत्यनुपपन्नम् — व.
[6] पा. सू. ५.१.४४. प्रकृष्टे ठञ् इत्यतः — व.
[7] विहितशब्दद्वयस्येत्यर्थः।
[8] यस्याः प्रकृतेरित्यर्थः।
[9] मीमांसासूत्रम् ३.१.२२.
[10] पा. सू. ५.१.५.

विरोधाभावात् कथं बाधः, अत आह — **तत्कर्मिवेति**। नन्वर्थस्यावधित्वेऽपि [1]शब्दस्यावधिमत्त्वमस्तु। विजातीयानामेकपङ्क्त्युपविष्टानां 'यज्ञदत्तात् पूर्व आनेयः' इत्युक्ते क्षत्रियस्याप्यानयनदर्शनेनावध्यवधिमतोस्तुल्यजातीयत्वनियमाभावात्, अत आह — **यथाजातीय इति**। तदुदाहरति — **यथेति**। [2]देवदत्तात् पूर्वः क्षत्रिय एवास्तीति तस्यैवानयनं युक्तम्, [3]मनुष्यत्वजातेस्तत्रैकत्वात्, अत एव तत्पूर्वो लोष्टादिर्नानीयत इति भावः। **आ परिखाया इति**। तत्र छयतोः पूर्णोऽधिकारः। ततः परं 'प्राग्वतेष्ठञ्' इत्यधिकारः। 'मासात् परः' इत्याद्युक्तानुरोधादाह — **अभ्युपगम्येति**। **नन्विति**। अर्थस्यावधिमत्त्वासंभवादित्यर्थः। **ततश्चेति**। अनिर्दिष्टार्थत्वादित्यर्थः। **नैष इति**। आकाङ्क्षायोग्यतासंनिधिवशादर्थस्य छेन संबन्धसंभव इत्यर्थः। विभाषाग्रहणं तत्रास्ति, न वाग्रहणम्, अत आह — **विकल्पेति**। वाशब्दोऽर्थपर इति भावः। **अर्थः प्रकृतिर्वा छस्येत्यादिः**। [4]द्व्यक्षरापेक्षयैकाक्षरत्वाल्लाघवम्। लोकसर्वलोकाट्ठञो ग्रहणं वारयति — **प्राग्वतेष्ठञ्जिति**। शीघ्रोपस्थितिकत्वात् तस्यैव ग्रहणं युक्तमित्यर्थः। **तेन** अर्थे प्रत्ययविधानेन। **ज्ञापकेति**। विभाषाग्रहणरूपेत्यादिः। **न्यायेन** तक्रकौण्डिन्यन्यायेन। 'प्राक् ठञ्' इति [5]सूत्रकरणेऽर्थेष्वयं विधिरिति निश्चयो नास्तीति ज्ञापकमाश्रयणीयमिति गौरवं स्यादित्याह — **प्राक् ठञ् इति**। **तुल्यजातीयस्येति**। अर्थानां प्रकृतीनां च ठञ्प्रत्ययेन तुल्यजातीयत्वाभावाद् विजातीयग्रहणावश्यकत्वे विनिगमनाविरहादर्थानां प्रकृतीनां वा ग्रहणं स्यात्। तत्र ज्ञापकमाश्रयणीयम्। अर्थग्रहणे तु न ज्ञापकापेक्षा, न्यायेनैवापवादविषये छस्याप्रवृत्तिसिद्धेरित्यर्थः॥

[४, १–६]

(नारायणीयम्) प्राग्वचनाक्षेपद्वारेणावधिनिर्देश एवाक्षिप्यत इत्याह — **छ इत्येवेति**। अत्रावधिनिर्देशे यत् प्रयोजनं वक्तव्यं तदन्यत्रोक्तं द्रष्टव्यमिति वार्तिकं योजयन्नाह — **अस्मिन्निति**। ननु 'विहितो विहितः' इति पुनरुक्तमित्यत्राह — **पुनःश्रुत्येति**। किमत्र सौष्ठवमित्याह[6] — **लाघवेनेति**। योगशब्देनार्थनिर्देशसूत्राण्येवोच्यन्त इत्याह — **असतीति**। नन्ववधिविशेषानुपादाने क्रीताद्यर्थेष्वप्यधिकारः स्यादित्यत आह — **यथैवेति**। 'प्रतियोगम्' इत्यादिभाष्यपौनरुक्त्याशङ्कां परिहरति — **प्रतियोगमित्यनेनेति**। ननु [7]'उगवादिभ्यो यत्' इत्यादौ प्रत्ययान्तरस्योपादानान्निराकाङ्क्षत्वात् छ इत्येतन्न संबध्यत इति चेन्नेत्याह — **नदीस्रोतोन्यायेनेति**। ननु [8]'वा'वचनस्य ज्ञापकत्वं वार्तिककृतोक्तम्, [9]भाष्यकृता तु विभाषाग्रहणस्येति कथं संगच्छत इत्यत आह — **विकल्पवचनादिति**। वाशब्देन तदर्थो लक्ष्यत इत्यर्थः। **प्रकृतिर्वेति**। प्रत्ययान्तरेण संबन्धप्रतिपादनात् छसंबन्धयोग्या प्रकृतिर्नास्तीत्यर्थः। **लाघवार्थमिति**। प्रतिपत्तिलाघवार्थं मात्रालाघवार्थं चेत्यर्थः। **प्रत्यासन्नष्ठञ्जिति**। न तु विप्रकृष्टो [10]'लोकसर्वलोकाट्ठञ्' इत्यादिः। **ज्ञापकाश्रयणमन्तरेणेति**। ज्ञापकाश्रयणाभावात् प्रतिपत्तिलाघवं भवतीत्यर्थः। **अर्थाः प्रकृतयो**

---

[1] शब्दस्यावधित्वमस्तु — अ, ऋ, लृ.
[2] पूर्वोक्तयज्ञदत्तशब्दस्थानेऽत्र देवदत्तशब्दप्रयोगः।
[3] मनुष्यजातेः — अ.
[4] क्रीतशब्दस्य द्व्यक्षरत्वं ठञ्शब्दस्यैकाक्षरत्वमित्याशयः।
[5] सूत्राकरणे — अ.
[6] इत्यत आहेत्यर्थः।
[7] पा. सू. ५.१.२.
[8] वावचनज्ञापकत्वं — ङ.
[9] भाष्यकारेण तु — ङ.
[10] पा. सू. ५.१.४४.

वेति। तत्र यदा प्रकृतयोऽवधिमत्त्वेनाश्रीयन्ते तदा ज्ञापकाश्रयणाद् गौरवं भवेदिति तत्परिहाराय सूत्रकृतार्थोऽवधित्वेनाश्रित इत्यर्थः॥

उगवादिभ्यो यत् ५.१.२.

[४, ६–१०]

(विवरणम्) [१]'विभाषा हविः' इत्यत्र हविर्विशेषग्रहणे हविर्विषयविप्रतिषेधो युज्यते। तत्र हविरिति स्वरूपग्रहणं कस्मान्न भवतीत्यत आह — **स्वरूपेति**। असंजातविरोधित्वात् 'उगवादिभ्यः' इत्यत्र [२]'स्वं रूपम्' इत्युपस्थितौ हविरिति [३]स्वरूपग्रहणम्। यदि चेदानीं [४]'विभाषा हविः' इत्यत्रापि हविरिति स्वरूपग्रहणं स्यात् ततोऽयं नित्यविकल्पयोर्विरोधः स्यादिति तत्र हविर्विशेषग्रहणमिति भावः। ननु चरुशब्दस्य पात्रविशेष[वाचि]त्वात् हविर्विशेषवाचित्वाभावात् कस्मादुभयप्राप्तिरित्यत आह — **चर्वधिकरणमिति**। बहुव्रीहिः। **प्रपञ्चार्थश्चायमिति**। [५]सति 'अन्नविकारेभ्यश्च' इत्यस्मिन् वार्तिके 'सूत्रपाठानुपूर्वीप्रदर्शनार्थमपूपादिग्रहणम्' इत्युक्तमिति न विरोधः। [६]**सामर्थ्यादिति**। अपूपादिष्वन्नविकारव्यतिरिक्तस्योकारान्तत्वाभावादित्यर्थः। **अनिर्धारितेति**। अन्नविकारग्रहणे हेतुः। निर्धारितविशेषे तु प्रतिपदविधानं स्यात्। ननु [७]'तस्मै हितम्' इत्यत्र विकृतेः प्रकृताविति नियमाभावात् हितार्थे नभ्यमिति सिध्यतीति न वक्तव्यं प्रत्ययविधानानुपपत्तिरितीत्याशङ्क्य न सामान्येन प्रत्ययविधानानुपपत्तिश्चोद्यते, किं तर्हि, नाभिशब्दात् तदर्थमित्यत्रेत्याह — **यद्यपीत्यादिना**। प्रसङ्गादाह — **यस्त्विति**। ननु भेदाभावादवयवावयविभावेऽपि षष्ठ्यनुपपन्नेत्यत आह — **मण्डलाकारमिति**। ननु नाभेश्चक्रस्य च प्रकृतिविकारभावाभावात् 'नभ्यं चक्रम्' इति न स्यादिति यच्चोद्यं तस्य किमुत्तरम्, अत आह — **तत्रेत्यादिना**॥

[४, ६–१०]

(उद्द्योतनम्) **छापवादानां** यञ्ञ्याञ्नाम्। 'उगवादिभ्यो यत्' [८]'ऋषभोपानहोर्ञ्यः' [९]'चर्मणोऽञ्'। शङ्कवे इदमिति [१०]'तदर्थं विकृतेः प्रकृतौ' इत्यर्थे उवर्णान्ताद्यत्, शङ्कव्यम्।

त्यादिना।

[१] पा. सू. ५.१.४.
[२] पा. सू. १.१.६८.
[३] 'स्वरूपग्रहणम्' इत्यादि 'हविरिति' इत्यन्तं नास्ति — ल.
[४] पा. सू. ५.१.४.
[५] कैयटस्य पूर्वापरविरोधं परिहरति — सती-
[६] 'सामर्थ्यादिति' इत्यादि 'प्रतिपदविधानं स्यात्' इत्यन्तं नास्ति — ल.
[७] पा. सू. ५.१.५.
[८] पा. सू. ५.१.१४.
[९] पा. सू. ५.१.१५.
[१०] पा. सू. ५.१.१२.

एवं [1]परशव्यम्, पिचव्यम्। [2]वार्ध्रीवरत्राशब्दौ चर्मविकारविशेषवाचकौ। ताभ्यामुक्तेऽर्थे [3]'चर्मणोऽञ्'। उपानहे इदमौपानह्यम्, [4]'ऋषभोपानहोर्न्यः'। छदिषे इमानि छादिषेयाणि, [5]'छदिरुपधिबलेर्ढञ्'। गृहादेस्तृणेनाच्छादनं छदिरुच्यते, न तु चर्मविकारः, अत आह — **छादनमिति**। चर्मविकारेणापि छादनसंभवादित्यर्थः। ढञ्ञ्ययोरजा विप्रतिषेधो [6]न संभवति, प्रतिपद[7]विहितत्वेनाधिकबलत्वादित्याह — **अत्राहुरिति**। **प्रतिपदमिति**। छदिषो ढञ्, उपानहो ञ्यः। छदिरुपानहोः स्वरूप[8]ग्रहणात् प्रतिपदविधिः। [9]'चर्मणोऽञ्' इत्यत्र न स्वरूपग्रहणम्, किं तु चर्मविकारसामान्यग्रहणमिति न प्रतिपदविधानम्। 'विभाषाः हविषः' इति वक्तव्येऽपूपादिग्रहणं किमर्थम्, अत आह — **हविरिति**। 'उगवादि' सूत्रापेक्षया परत्वप्रदर्शनार्थमित्यर्थः। विप्रतिषेधेऽनुपयोगमाह — **न हीति**। अभ्युपेत्याह — **पाठेऽपीति**। **असौ** विभाषा। नन्वपूपादिवत् हविषोऽपि स्वरूपग्रहणात् प्रतिपदविधानाद्विप्रतिषेधानुपपत्तिः, अत आह — **गवादिगण इति**। अत्र सूत्रे स्वरूपग्रहणे गवादिपाठानर्थक्यप्रसङ्गात् तत्र स्वरूपग्रहणम्, इह विशेषग्रहणम्। न च तत्र विशेषग्रहणमिह स्वरूपग्रहणमिति वैपरीत्यम्, तत्र गवादिपाठसाहचर्यवदत्राप्यपूपादिपाठसाहचर्यसत्त्वादिति वाच्यम्; तत्र विरोधानुपस्थित्या [10]'स्वं रूपम्' इत्यस्य बाधायोगादत्रैव तद्बाध इति भावः। ननु चरुशब्दस्य स्थालीवचनत्वात् तण्डुलानां कथं तदर्थत्वम्, अत आह — **चर्वधिकरणमिति**। बहुव्रीहिः। यद्यपि [11]'चरुर्हविर्विकारः स्यादिज्यासंयोगात्' इति दाशमिकाधिकरणे चरुशब्दस्यौदनवाचित्वं स्थाल्यां तु लक्षणेति स्थापितम्,, तथापि लोके स्थाल्यामेव व्यवहारात्[12] तदनुसारेणैवमुक्तमिति मन्तव्यम्। अन्नविकारेभ्यो विभाषा न सूत्रोक्तेति विप्रतिषेधवचनं निर्विषयम्, अत आह — **अपूपादिष्विति**। तर्हि 'हविरपूपादिभ्यो विभाषाया यत्' इत्यनेन गतार्थत्वादिदं व्यर्थम्, अत आह — **प्रपञ्चार्थ इति**। तत्र हेतुः — **हविरिति**। ननु तस्मिन् विप्रतिषेधवचनेऽन्नविकाराभावात् 'अन्नविकारेभ्यश्च' इत्यस्य कथं तत्रप्रपञ्चार्थत्वम्, अत आह — **तत्रेति**। 'हविरपूपादिभ्यो विभाषाया यत्' इत्यत्रेत्यर्थः। **सामर्थ्यादिति**। अपूपादिषूवर्णान्तपाठाभावेन स्वपरत्वेऽनुपयोगादन्नविकाराभिप्रायमेव तद्ग्रहणमित्यर्थः। **अनिर्धारितेति**। अपूपत्वादिविशेषविवक्षारहिता इत्यर्थः। पूर्वमपूपादिषु स्वरूपपरेषु प्रयोजनाभाव उक्तः, इदानीं तदङ्गीकृत्यैवान्नविकारपरत्वेन सार्थक्यमुक्तमित्यविरोधः। अतः 'अन्नविकारेभ्यश्च'

---

[1] भाष्ये 'शङ्क्व्यं, पिचव्यम्' इत्येव दृश्यते। 'परशव्यम्' इत्यपि मध्येऽन्नंभट्टोपलब्धः स्यादिति ज्ञायते।

[2] अत्र 'वर्धावरत्रशब्दौ' इति 'अ' कोशे, 'वध्रवरत्रशब्दौ' इति 'ऋ, लृ' कोशयोर्दृश्यते। अत्र तत्त्वबोधिन्यां "'वृधिवपिभ्याम्' इति रन्प्रत्यये वर्ध्रशब्द आद्युदात्तश्चर्मवाची, तस्य विकार इत्यण्, टिड्ढेति ङीप्, वार्ध्री रज्जुः, तस्यै। वधेरौणादिके ष्ट्रनि तु 'वध्री' इति भवति। ततोऽञ्जि तु वाध्रम्। 'नध्री वध्री वरत्रा स्यात्' इत्यमरः" इत्युक्तम्। प्रकृते भाष्ये 'वार्ध्रम्' इत्युपलभ्यते, कौमुद्यां च। अतो 'वार्ध्रीवरत्रा' इत्येवोचितं भाति। तथैवात्र निवेश्यते।

[3] पा. सू. ५.१.१५.

[4] पा. सू. ५.१.१४.

[5] पा. सू. ५.१.१३.

[6] 'न संभवति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — अ, ऋ, लृ.

[7] विहितेनाधिक — अ.

[8] ग्रहणं प्रतिपद — अ.

[9] पा. सू. ५.१.१५.

[10] पा. सू. १.१.६८.

[11] मीमांसासूत्रम् १०.१.३४.

[12] वकारमेलनेन 'चरुवम्' इति द्रमिडभाषायां पात्रे व्यवह्रियते। गकारवकारादिमेलनेन देशभाषायां तथा व्यवहार इति न्यायमालायाम्।

इत्यस्य तत्प्रपञ्चत्वमुपपन्नम्। यद्यप्यन्नविकारत्वेनैव सिद्धेऽपूपादिग्रहणमन्नविकारतत्सदृशपरम्, तथाप्यन्नविकारोपलक्षणत्वादविरोधः। उदाहरणान्तरे नभादेशोपपत्तिं शङ्कते — **यद्यपीति**। नभ्यमिति[1] चक्रनाभिरत्र गृह्यते। उदाहरणविशेषविषयः प्रश्न इत्याह — **तथापीति**। **अवयविन इति**। अवयवोऽवयव्यर्थः, न तु वैपरीत्यमित्यर्थः। तेन नभभावो नास्तीत्याह — **गवादियतेति**। प्रकृतिसामान्यनिषेधमाक्षिपति — **यद्यपीति**। प्रकृतिविशेषनिषेधपरत्वेन संगमयति — **तथापीति**। यत्र चक्रे नभ्यमिति प्रयुज्यते तस्य नाभिं प्रति प्रकृतित्वं नास्तीति भाष्याभिप्रायः। षष्ठ्या अनन्वयं शङ्कते — **नेयमिति**। **न हीति**। गवां कृष्णा गौः संपन्नक्षीरेति तु भवतीत्यर्थः। अवयवषष्ठीति समाधत्ते — **तस्मादिति**। नन्वभेदे [2]सापि कथम्, अत आह — **मण्डलाकारमिति**। उक्तेऽर्थे भाष्यं संगमयति — **तच्चेति**। **प्रकृतिर्न भवतीति**। नाभेस्तदवयवत्वेन तद्विकृतित्वाभावादित्यर्थः। भाष्ये **शाखादिष्विति**। चक्रे नभ्यमिति सिद्ध्यर्थं शाखादिषु 'नाभेर्ह्रस्वत्वं च' इति पठनीयम्। तेनेवार्थे यप्रत्यये सति नाभिरिव नभ्यमिति चक्रेऽपि प्रयोगः सेत्स्यतीत्यर्थः। **अवयवेति**। तन्तुपटयोरिवाकारभेदेन नाभिचक्र्योरपि सादृश्यं नास्तीत्यर्थः। **इतर इति**। आकारभेदेऽपि क्रियासाम्येन देवदत्तो यज्ञदत्तसदृश इति व्यवहारदर्शनादित्यर्थः। **परिवर्तते** भ्रमति। **एवमिति**। चक्रस्याप्यक्षधारणं परिवर्तनं चास्तीत्यर्थः। **अञ्जनमिति**। अञ्जनोपाञ्जनयोर्नाभिचक्रसाधारण्यमित्यर्थः। **नभ्य इति**। नाभये हितमित्यर्थे यत्प्रत्ययः। प्रकृतिरस्तीति भाष्यमुपपादयति — [3]**अरवत्सु चेति**। 'अरवन्ति' इत्यस्य व्यावर्त्यमाह — **अररहितमिति**। लाघवाद् बहुव्रीहिणा सिद्धे मतुपः प्रयोजनमाह — **अनराणीति**। अन्वयव्यतिरेकाभ्यां मतुपा तत्प्रतीतिमाह — **अनराणीति**। भाष्यस्य प्रकृतोपयोगमाह — **नन्विति**। नाभिं प्रति चक्रस्य प्रकृतित्वं वक्तुं तयोर्भेदः कथ्यत इत्यर्थः। **भेदेनापीति**। वाक्षौ शाखेत्यादौ। **न केवलमिति**। शाखादिसमुदायो वृक्ष इत्येवम्। **नन्विति**। अवयवावयविनोर्भेदेऽपि प्रकृतिविकारभावो न संभवतीति प्रत्ययाप्रसङ्ग [4]इत्यर्थः। नाभिद्वारा चक्रस्य नाभिप्रकृतित्वं वक्तुं नाभेर्गुणान्तरयुक्तनाभिप्रकृतित्वमाह — **तत्रावयव इति**। ननु प्रकृतिप्रकृतौ प्रकृतिव्यपदेशः कथम्, अत आह — **दृश्यत इति**। यथावयवदाहः पटे व्यपदिश्यते, एवमवयवनिष्ठं नाभिप्रकृतित्वं चक्रे व्यपदिश्यत इत्यर्थः। एवं चक्रस्य नाभिप्रकृतित्वे सिद्धे शाखादिपाठं विनात्रैव चक्रेऽपि नभ्यशब्दः सिद्ध इत्याह — [5]**तदत्रेति**। अञ्जनादेः प्रागपि चक्रे नभ्यशब्दोपपादनाय 'बुद्धि' इत्याद्युक्तम्। नभ्यन्यायमुदाहरणान्तरेऽप्यतिदिशति — **अनेनेति**॥

[४, ६–१०]

(नारायणीयम्) छादनमिति। छाद्यतेऽनेनेति छादनम्। **छदिरिति**। [6]'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः'। [7]'इस्मन्त्रन्क्विषु च' इति ह्रस्वत्वम्। 'पाठे[ऽपि]वा' इत्यभ्युपगम्यवादः सर्वथा विप्रतिषेधाभावप्रतिपादनार्थः। ननु [8]'विभाषा हविः' इत्यत्र [9]'स्वं रूपम्' इति वचनात्

---

[1] नभ्यमित्यत्र प्रकृतिभूतनाभिशब्देनेत्याशयः।
[2] अवयवषष्ठ्यपीत्यर्थः।
[3] भाष्ये 'अरवत्सु चक्रेषु' इत्यत्र 'अरवत्सु च चक्रेषु' इत्यन्नंभट्टपाठ इति भाति।
[4] 'इत्यर्थः' इति नास्ति — लृ.
[5] प्रदीपे 'तत्र बुद्धिपरिगृहीत' इत्यत्र तदत्र बुद्धिपरिगृहीत' इत्यन्नंभट्टपाठ इति भाति।
[6] उणादिसूत्रम् २७३.
[7] पा. सू. ६.४.९७.
[8] पा. सू. ५.१.४.
[9] पा. सू. १.१.६८.

स्वरूपस्यैव ग्रहणं युक्तमिति कथं हविर्विशेषवाचिग्रहणमित्यत आह — **गवादिगण इति**। **स्वरूपग्रहणाच्चेति**। असंजातविरोधित्वात् स्वरूपग्रहणस्य न्याय्यत्वात्। [1]'विभाषा हविः' इत्यत्र तु यदि स्वरूपग्रहणं[2] नित्यविधिरनर्थकः स्यादिति विरोधिसद्भावात् सामर्थ्यात् तद्विशेषग्रहणसिद्धिरित्याह — **विभाषा हविरिति**। उक्तं च न्यायविद्भिः —

[3]पूर्वः परमजातत्वादबाधित्वैव जायते।
परस्यानन्यथोत्पादान्नाद्याबाधेन संभवः' इति।

ननु चरुशब्देन स्थाल्या अभिधानात् तस्याश्च तण्डुलविकृतित्वायोगात् कथमत्र प्रत्ययप्राप्तिरित्यत्राह — **चर्वधिकरणमिति**। 'अनिर्धारितविशेषाः' इत्यनेन विप्रतिषेधोपपत्तिरुक्ता, प्रतिपदपठितानां विप्रतिषेधस्यायुक्तताया उक्तत्वात्। 'अन्नविकारेभ्यश्च' इति पृथक्पाठादपूपादिग्रहणस्यानुपूर्वीप्रदर्शनार्थत्वं पूर्वमुक्तम्। असत्यपि पृथक्पाठेऽपूपादिग्रहणेनैव सिद्धत्वात् प्रपञ्चार्थत्वं पाठस्येदानीमुक्तमित्यविरोधः। 'नभ्यं चक्रम्' इति प्रयोगे [4]प्रत्ययानुपपत्तिरुक्ता, न तु सर्वत्रेति प्रदर्शयितुं 'प्रकृत्यभावात्' इत्युक्तमिति व्याचष्टे — **यद्यपीति**। तैलं हि स्नेहनत्वान्नाभये हितं भवति। तथा लोहबन्धोऽप्यशिथिलीकरणात्। **अवयव इति**। छिद्रवान् प्रदेश इत्यर्थः। यच्छिद्रानुप्रविष्टोऽक्षाख्यः काष्ठविशेषोऽवतिष्ठते। **अवयविनोऽवयवार्थत्वाभावादिति**। प्रत्युतावयव्यर्था [5]अवयवा आरम्भकत्वाद् भवन्ति। 'नाभ्यं तैलम्' इत्यत्र नभभावः कस्मान्न भवतीत्यत आह — **गवादीति**। न सर्वथा प्रकृत्यभावः 'न च' इत्यादिभाष्ये विवक्षित इत्याह — **यद्यपीति**। 'मण्डलचक्राणाम्' इति समानाधिकरणसमासो निर्धारणे च षष्ठीति भ्रान्तिः स्यात्, तन्निराकरणायाह — **नेयमिति**। **एवं चक्रमपीति**। अवयविनो धारणादिक्रियाभावेऽवयवस्यापि तदभावप्रसङ्गात्। **समीपाभ्यङ्ग इति**। नाभिसमीपे यद्वर्तते तस्याप्यञ्जनं कुर्वन्ति। [6]**नभ्यो वृक्ष इति**। नाभिसंज्ञकचक्रावयवनिर्माणयोग्य इत्यर्थः। [7]'तदस्य तदस्मिन् स्यात्' इत्यत्रार्थे प्रत्ययः। कः पुनररवत्सु चक्रेषु विशेष इत्यत आह — **अरवत्स्विति**। अरनिर्माणसौकर्यार्थं पृथग्भूतैः काष्ठैस्तेष्ववयवान् निष्पादयन्ति रथकाराः। तत्र नाभेः पृथक् प्रकृतिभूतकाष्ठसद्भावात् 'नभ्यं काष्ठम्' इति मुख्यप्रकृतिविकारभाव उपपद्यत इत्यर्थः। ननु नञ्समासमत्वर्थीयाभ्यां बहुव्रीहिर्लघुत्वान्न्याय्य इति 'अनराणि' इत्येव वक्तव्यम्, न तु 'अनरवन्ति' इति। तत्राह — **अनराणीति वक्तव्य इति**। **भेदेनापीति**। अत एव केचित् कार्यकारणयोर्जातितद्वतोर्गुणगुणिनोरवयवावयविनोश्च भेदाभेदौ प्रतिजानते। **अञ्जनादीति**। अञ्जनादिगुणयुक्तस्य नाभिसंज्ञस्यावयवस्य तद्रहितः प्रकृतिरित्यर्थः। **तद्द्वारेणेति**। अवयवस्य [8]नाभिप्रकृतित्वादवयविनश्चक्रस्यापि तत्प्रकृतित्वमित्यर्थः। कथं पुनरवयवधर्मः समुदाये व्यपदिश्येतेत्यत्राह — **दृश्यते हीति**। एतदेव विशदयति — **तत्र बुद्धिपरिगृहीतेति**। बुद्ध्या परिगृहीतो भावी यो विकारस्तदपेक्षया लब्धः प्रकृतिव्यपदेशो येन स नाभिलक्षणोऽवयवो द्वारमुपायो यस्य नभ्यव्यपदेशस्य स तथा॥

---

[1] पा. सू. ५.१.४.

[2] तदेति शेषः।

[3] तन्त्रवार्तिकम् ३.३.७.१४. आनन्दाश्रममुद्रितेऽस्मिन् 'पूर्वं परमजातत्वात्' इति प्रथमपादे, 'न त्वबाधेन संभवः' इति चतुर्थपादे च पाठो दृश्यते।

[4] प्रत्ययानुत्पत्तिः — ङ.

[5] 'अवयवाः' इत्यस्यानन्तरमितिशब्दोऽधिकः — ङ.

[6] प्रदीपे 'नभ्योऽक्षः' इत्यत्र 'नभ्यो वृक्षः' इति पाठोऽभिमत इति भाति।

[7] पा. सू. ५.१.१६.

[8] नाभिप्रकृतिकत्वात् — ङ.

कम्बलाच्च संज्ञायाम् ५.१.३.

[४, १०]

(विवरणम्) [1]एकद्रव्योपनिवेशित्वाभावात् न परिमाणं संज्ञेत्यत आह — **संज्ञायत इति** ॥

[४, १०]

(उद्द्योतनम्) ननु यदन्तत्वाभावे कम्बल्यशब्दस्यान्तस्वरितत्वं कथं लभ्यम्, अत आह — **अन्तस्वरितेति**। **यदन्तत्वमिति**। यदन्तकार्यमपि निपातनादेव सिद्धमित्यर्थः। यद्वा निपातनेन यत्प्रत्ययार्थः कथं लभ्यते, अत आह — **अन्तस्वरितेति**। पर्युदासेन कम्बल्यशब्दस्य परिमाणपरत्वमुपपादयति — **अपरिमाणान्तादिति**। कम्बल्यशब्दस्य परिमाणवाचित्वाभावे तदन्तात् 'अपरिमाण' इत्येव [2]ङीबभावसिद्धेः परिमाणार्थमेतद्ग्रहणमित्यर्थः। ननु परिमाणं संज्ञि, न तु संज्ञा, अत आह — **संज्ञायत इति** ॥

[४, १०]

(नारायणीयम्) ननु निपातनेन कम्बल्यशब्दः साधुरित्येतावद् गम्यते, न तु स्वरविशेष इति तदर्थं यद्विधेय इत्यत आह — **अन्तस्वरितेति**। ननु परिमाणमर्थः, संज्ञा शब्द इति कथं तयोः सामानाधिकरण्यमित्यत्राह — **संज्ञायत इति**। रूढ्या गम्यत इत्यर्थः ॥

विभाषा हविरपूपादिभ्यः ५.१.४.

[४, १०]

(उद्द्योतनम्) विचारस्य गतार्थत्वमाशङ्क्य समाधत्ते — **यद्यपीति** ॥

[४, १०]

(नारायणीयम्) **शिष्याणां सुखावबोधनायेति**। पूर्वविप्रतिषेधकथनेनार्थादप्राप्तविभाषात्वावगतिः, मुखतस्तु कथने साक्षादिति स्पष्टतरावगत्यर्थोऽयमुपन्यास इत्यर्थः ॥

शरीरावयवाद्यत् ५.१.६.

[४, ११]

(विवरणम्) ननु [3]'उगवादिभ्यः' इत्यत्रेदमुपसंख्यानं कर्तुमुचितम्। तथा च गवादिषु रथशब्दपाठकर्तव्यत्वसूचनेन वचनविशेषकरणाभावाल्लाघवं भवतीत्यत आह — **हितार्थ एवेति** ॥

---

[1] एकद्रव्योपदेशित्वाभावात् — लृ.
[2] ङीबभावे सिद्धे — अ.
[3] पा. सू. ५.१.२.
[4] कर्तव्यतासूचनेन — व.

[४, ११]

(उद्द्योतनम्) [1]'उगवादि' सूत्र एवेदं कुतो न पठितम्, अत आह — **हितार्थ एवेति**। न तु [2]'तदर्थं विकृतेः प्रकृतौ' इत्यत्रेत्यर्थः। रथाद्धितार्थयद्विधौ तदन्तविधिं केचिदिच्छन्तीत्याह — **केचिद्रथेति**। [3]'येन विधिस्तदन्तस्य' इत्यस्य प्रयोजनवार्तिकमिदम्। मतान्तरमाह — **अन्ये त्विति**। [4]'मतजनहलात्' इत्यत्र हलशब्दः, [5]'नौवयोधर्म' इत्यत्र सीताशब्दः। तत्साहचर्यात् [6]'रथाद्यत्' इति विहितयत्येव तदन्तविधिर्नात्रेति [7]परमरथाय हितेति वाक्यमेव, न यत्प्रत्यय इत्यर्थः॥

[४, ११]

(नारायणीयम्) ननु प्रथमातिक्रमे कारणाभावात् "उगवादिभ्यो यत्' इत्यत्रैवेदमुपसंख्यानं कर्तव्यमित्यत आह — **हितार्थ एवेति**॥

खलयवमाषतिलवृषब्रह्मणश्च ५.१.७.

[४, ११–१२]

(विवरणम्) नन्वन्तर्वर्तिविभक्तिनिबन्धनपदत्वेन नलोपे नकारान्तस्याप्येष एव निर्देश इति कथमकारान्तग्रहणनिश्चय इत्यत आह — **न त्विति**। **स्वरूपेति**। स्वयमनान्तोऽपि निमित्तान्तरवशात् कश्चिन्नान्ततां प्रतिपद्यते, यथा [9]'पचन्' इत्यादिः, नैवमयमिति प्रदर्शनायेति भावः॥

[४, ११–१२]

(उद्द्योतनम्) ननु वृषन्शब्दस्यापि कृतनकारलोपस्य [10]'राजाहः' इत्यत्र राजन्शब्दस्येव ग्रहणसंभवात् कथमकारान्तत्वनिश्चयः, अत आह — **न त्विति**। अकारान्तराजशब्दस्याभावात् तत्र राजन्शब्दस्यैव ग्रहणं युक्तमिति भावः। वृषन्शब्दोऽप्यस्तीति वाच्ये 'नकारान्तः' इत्यधिकम्, अत आह — **उच्चारणादेवेति**। **स्वरूपेति**। स्पष्टप्रतिपत्त्यर्थमित्यर्थः। उपसंख्यानाभावेऽनिष्टमाह — **अन्यथेति**। आदेशाभावे बाधकमाह — **अन्यथा ये चेति**। वृषवृषन्शब्दयोः प्रयोगमनुक्त्वा ब्रह्मन्ब्राह्मणशब्दयोः प्रयोगोक्तौ प्रयोजनमाह — **ब्रह्मन्शब्दस्येति**। वेद-

---

[1] पा. सू. ५.१.२.
[2] पा. सू. ५.१.१२.
[3] पा. सू. १.१.७२.
[4] पा. सू. ४.४.९७. अत्र 'हलसीरादित्यत्र' इति 'अ, ऋ, लृ' मातृकासु दृश्यते। तेन सूत्रेण यत्प्रत्ययस्याविधानात् येन विधिरिति सूत्रीयोद्द्योतनानुरोधेन च 'मतजनहलादित्यत्र' इति निवेशितम्।
[5] पा. सू. ४.४.९१.
[6] पा. सू. ४.३.१२१.
[7] परमरथाय विहितेति — अ, ऋ, लृ.
[8] पा. सू. ५.१.२.
[9] अत्र पचच्छब्दस्तकारान्तः 'उगिदचाम्' इत्यनेन नुमागमे सुलोपसंयोगान्तलोपयोः 'पचन्' इति नकारान्तो भवति॥ चञ्चन् — ल.
[10] पा. सू. ५.४.९१.

परमात्मादिवाचकत्वमेव प्रसिद्धमिति भावः। 'एकेन विग्रहः' इत्युक्ते द्वितीयेन नास्तीति प्रतीयते। तन्निरस्यति — **विग्रह एवेति**। क्त्वानुपपत्तिं शङ्कते — **भिन्नेति**। विग्रहः पुरुषकर्तृकः, उत्पत्तिः प्रत्ययकर्तृका। **नैष इति**। उत्पादनं पुरुषकर्तृकमिति समानकर्तृकता। [1]पदेर्ण्यर्थलक्षणामसहमान आह — **परेति**। परेण पूर्वस्य [2]अवरेण च परस्य योगे गम्यमाने धातोः समानकर्तृकत्वाभावेऽपि[3] क्त्वा भवति। अत्र प्रकृतिपरत्वं प्रत्ययस्य गम्यत इति [4]क्त्वोपपत्तिरित्यर्थः। 'वाक्यमेव' इत्यत्र हेतुमाह — **वृषन्निति**। **छप्रत्यय इति**। अनेन यदभावेऽपि छः किं न स्यादिति शङ्का निरस्ता॥

[४, ११–१२]

(नारायणीयम्) 'अकारान्तः' इत्यस्य व्यावर्त्यमाह — **न त्विति**। अत्र हेतुमाह — **अन्यथेति**। 'नकारान्तः' इत्येतत्तु नान्यव्यावृत्त्यर्थमुक्तम्। किं तर्हि, [5]स्वरूपावच्छेदार्थमेवेत्याह — **उच्चारणादेवेति**। ननु वृषशब्दादेशो न वक्तव्यः, [6]'नस्तद्धिते' इति टिलोपेन 'वृष्यम्' इति [7]रूपस्य सिद्धत्वादित्यत आह — **अन्यथेति**। ननु ब्रह्मन्शब्दस्य ब्राह्मणपर्यायत्वमेव किं व्युत्पाद्यते, न तु वृषशब्दस्य वृषन्शब्दार्थत्वमपीत्यत आह — **ब्रह्मन्शब्दस्यानेकार्थत्वादिति**। कमलासनादिष्वपि वर्तनादित्यर्थः। **एकेन विग्रह एवेति**। न त्वेकेनैव विग्रह इति, कुत [8]इत्याह — **विग्रहस्त्विति**। **भिन्नकर्तृकत्वादिति**। विग्रहे प्रयोक्तुः कर्तृत्वम्, उत्पत्तौ प्रत्ययस्येति। **उत्पत्तिशब्देनेति**। ततश्च विग्रहोत्पादनयोरेककर्तृकत्वात्[9] क्त्वाप्रत्ययोपपत्तिः। नन्वेवमपि 'वृष्णे हितमिति विगृह्य वाक्यमेव' इत्यादौ कथं समानकर्तृकत्वमित्यत्राह — **परावरयोगे चेति**। [10]चेत्यवरवाक्य[11]योगेन परः प्रत्ययो विशेष्यते। [12]अयं भावः — परावरयोगः कालिको दैशिकश्च। तथा चात्रायमर्थः — पूर्वं विगृह्य तदनन्तरमुत्पादनमित्यर्थः। एतेन [13]'अतिक्रमोऽत्र कीदृश इति चिन्त्यम्' इति हरदत्तोक्तमपि पराहतम्। यथातिक्रम्य पर्वतं नदीति। तत्र देशकृतः परावरयोगः, इह तु कालकृत इति विशेषः। फलितमर्थमाह — **वृषन्ब्राह्मणशब्दाभ्यामिति**॥

आत्मन्विश्वजनभोगोत्तरपदात् खः ५.१.९.

[४, १२–१५]

(विवरणम्) भोगोत्तरपदात् खविधाने कथमिव तत्वं न भवतीत्यत आह — **भकारादावितिति**। कथमिव तदादिविधिरित्यत उक्तम् — **प्रत्यय इति**। एतदपि कथं लभ्यत इत्यत

---

[1] पदे व्यर्थलक्षणां — अ; पदे ण्यर्थलक्षणां — ऋ, लृ.
[2] अपरेण च — अ, ऋ, लृ.
[3] अपिशब्दो नास्ति — अ.
[4] क्त्वोत्पत्तिः — अ.
[5] स्वरूपावच्छेदार्थमित्याह — ङ.
[6] पा. सू. ६.४.१४४.
[7] 'रूपस्य' इति नास्ति — ङ.
[8] इत्यत आहेत्यर्थः।
[9] एककर्तृत्वात् — ङ.
[10] वेति — घ.
[11] योगे परः — घ.
[12] 'अयं भावः' इत्यादि 'पराहतम्' इत्यन्तं नास्ति — घ.
[13] इदं परावरयोगे चेति सूत्रे पदमञ्जर्यामुक्तम्।

उक्तम् — **अङ्गस्येति**। अत्र 'समानाधिकरण' इति वक्तव्यम्' इति कस्मान्नोक्तमित्यत आह — **महाजनशब्दश्चेति** ॥

[४, १२–१५]

(**उद्द्योतनम्**) कस्य निर्देशस्यानिर्देशत्वम्, अत आह — **योऽयमिति**। अप्रत्यायकत्वेऽपि निर्देशस्यानिर्देशत्वं कथम्, अत आह — **तत्कार्येति**। तस्मिन्नंशे निर्देशकार्याभावादनिर्दिष्टप्राय इत्यर्थः। कार्याभावमेवाह — **तथा हीति**। भाष्ये **भोगीनर्प्रत्यय इति**। रित्करणं [१]खसमानस्वरार्थम्। [२]'आयन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम्' इति 'पितृभोगीणः' इति गकारोपरीकारस्योदात्तत्वम्। [३]'उपोत्तमं रिति'। रित्प्रत्ययान्तस्योपोत्तममुदात्तमितीकारस्योदात्तत्वम्। यथान्यासे तु वावचनं विनापीष्टसिद्धिरित्याह — **भोगोत्तरपदादिति**। **सामर्थ्यमिति**। संकोचकपदाभावेन नित्यग्रहणस्य [४]प्रत्ययद्वयविषयत्वं सामर्थ्यम्, लिङ्गं च संनिधेर्बलवदित्यर्थः। [५]खपक्षे नित्यग्रहणेन छस्यानिवृत्तिं शङ्कते — **नन्विति**। भोगोत्तरपदात् खस्य नित्यत्वेऽपि केवलात् छनिवृत्तिर्न सिध्यतीत्यर्थः। पाठमेवाह — **राजेति**। यद्यप्यस्मिन् पाठे भोगीनर्प्रत्ययो न संगृहीतः, तथापि खप्रत्ययस्यैव सिद्धान्तत्वात् [६]तदसंग्रहे न दोषः। अन्ये तु भोगोत्तरपदाभ्यां राजाचार्याभ्यां खस्य विकल्पाप्रसङ्गान्नित्यग्रहणं तदन्ताभ्यामेव प्रत्ययनियमार्थम्, भोगीनरि तु विकल्पनिरासार्थमित्युभय[७]साधारण्यमाहुः। खप्रत्ययपक्षे ह्रस्वः सिध्यतीत्याह — **ग्रामण्य इति**। भोगीनरः प्रत्ययत्वात् ह्रस्वो न सिध्यतीत्यर्थः। ननु "अपो भि' इति भकारे परतो विधीयमानं तत्वं तदादिप्रत्यये कथं स्यात्, अत आह — **भकारादाविति**। [९]'यस्मिन् विधिस्तदादौ' इति परिभाषयाङ्गाधिकाराच्च तदादिप्रत्ययग्रहणमित्यर्थः। सुखाद्यनुभववचनस्य भोगशब्दस्य भावे व्युत्पन्नस्य कथं द्रव्यवचनत्वम्, अत आह — [१०]**भुज्यत इति**। ननु 'भोगवान्' इत्यत्रापि धनवानेव ब्राह्मण उच्यताम्, कथं क्रियावाचित्वनिश्चयः, अत आह — **धनवानपीति**। द्रव्यपक्षेऽपि संबन्धात् प्रत्ययोऽस्तु, अत आह — **यस्त्विति**। पितुरेवैतद्धनमिति मत्वा यो रक्षति स पित्रे हितो भवतीति भाष्यार्थमभिप्रेत्य ममैतद् भविष्यतीति मन्यमानस्य तदभावमाह — **यस्त्विति**। ततश्च तस्य पितृधनहितत्वाभावान्न प्रत्यय इत्यर्थः। भोगशब्दस्य फणे प्रयोगो लोके दृश्यते, न तु शरीरे, अत आह — **समुदाय इति**। [११]फणवाचित्वमेवेति मतं निरस्यति — **केचिदिति**। **अनन्तत्वादिति**। क्वचित् प्रयोगं दृष्ट्वैव भाष्यकृतोक्तमित्यर्थः। अवयवावयविनोरुभयत्र प्रयोगे [ञे]केष्ववयवेष्वनेकशक्तिकल्पनापेक्षयैकस्मिन्नवयविनि शक्तिः, तत्संबन्धादेवावयवेषु प्रयोग इति कल्पना ज्यायसी। विनिगमकाभावेऽपि शरीरे शक्तिरवश्यंभाविनीति भावः। पञ्चजनशब्दार्थमाह — **मनुष्या इति**। द्विगुत्वे ङीपा भाव्यम्, अत आह — **दिक्संख्ये इति**। तद्धितार्थादावेव संख्यापूर्वो द्विगुसंज्ञः,

---

[१] खप्रत्ययसमानेत्यर्थः।
[२] का. वा. ७.१.२–१.
[३] पा. सू. ६.१.२१७.
[४] पदद्वय — अ.
[५] खप्रत्ययपक्ष इत्यर्थः।
[६] तदसंग्रहो न दोषः — ऋ.
[७] साधारण्यमित्याहुः — अ.
[८] पा. सू. ७.४.४८.
[९] का. वा. १.१.७२–२९.
[१०] प्रदीपपुस्तकेषु 'भोगो धनमुच्यते' इत्येव पाठो दृश्यते। 'भुज्यत इति भोगो धनमुच्यते' इत्यन्नंभट्टपाठ इति भाति।
[११] फणिवाचित्वमेवेति — अ.

नायमित्यर्थः। तर्ह्येकवचनं कथम्, अत आह — **समुदाय इति**। तत्र दृष्टान्तः — **यथेति**। षष्ठीसमासमाक्षिपति — **नन्विति**। सापेक्षत्वमेवाह — **संख्या हीति**। **व्यतिरेकः** संबन्धः। **नैष इति**। यदा पञ्चशब्दस्य संख्येयविशेषपरत्वनिश्चयस्तदा समास इत्यर्थः। समानाधिकरण-समासे प्रत्यय इष्यत इति तमाह — **पूर्वेति**। सर्वेषां क्वचित्क्वचिन्नियतत्वात् कः साधारणः, अत आह — **वेश्येति**। विकल्पाप्रसङ्गान्नित्यग्रहणं व्यर्थम्, अत आह — **नित्यग्रहणमिति**। ननु तत्पुरुष इत्युच्यमाने षष्ठीसमासादपि प्रत्ययः स्यात्, अत आह — **महाजनशब्दश्चेति**। षष्ठी-समासे 'महज्जनः' इति स्यात्। महाजनशब्दाद् विधीयमानस्ततो न प्राप्नोतीत्यर्थः॥

[४, १२–१५]

(नारायणीयम्) तत्कार्याकरणादिति। यथा 'अलोमिका एडका' इति लोमकार्याकरणाद् व्यपदेशस्तथात्रापीत्यर्थः। विवक्षितार्थप्रत्यायनासामर्थ्यमुपपादयति — **तथा हीति**। **सामर्थ्यं बलवदिति**। श्रुतिलिङ्गाधिकरणे प्रकरणात् सामर्थ्यस्य बलीयस्त्वस्य निर्णीतत्वात्। **छस्य निवृत्तिर्न सिध्यतीति**। नित्यमित्यस्य प्रत्ययेन संबन्धाद् राजाचार्याभ्यां भोगोत्तरपदाभ्यां नित्यं खो भवतीत्यर्थविज्ञानात् केवलाभ्यां छस्य निवृत्तिरिष्यमाणा न स्यादित्यर्थः। भोगीनर् इति रित्त्वेन [1]'उपोत्तमं रिति' इत्यनेनोपोत्तमोदात्तत्वं सिध्यति। यथा[व]स्थितेऽपि ईनादेशेकारस्यैव प्रत्यय-स्वरेणोदात्तत्वस्येष्टत्वात्। **तथा पाठ इति**। तथा योजना कार्येत्यर्थः। **राजाचार्याभ्यामिति**। यदि राजाचार्याभ्यां हितार्थे प्रत्ययो भवति नित्यं, भोगोत्तरपदाभ्यामेव, न केवलाभ्यामित्येकं वाक्यम्। स च ख एवेति द्वितीयमितीष्टसिद्धिरित्यर्थः। ननु 'भोगवानयं ब्राह्मणः' इत्यत्र धनवाचिनो ग्रहणं कस्मान्न भवतीत्यत आह — **धनवानपि कृपण इति**। यः कार्पण्याद्विद्यमाने-नापि धनेनोपभोगं न करोति स भोगवानिति नोच्यत इत्युपभोगक्रियैवात्र भोगशब्देन भावसाधने-नोच्यत इत्यर्थः। धनवाचिभोगशब्दग्रहणे संबन्धात् पित्रादिहितत्वाभावमुपपादयति — **यस्त्विति**। **नासौ पितुरिति**। तत्र पित्रादिना धनस्य विशेषणमयुक्तं स्यादिति तद्बलाद्यः पितुरेतद्धनम्, तन्मया पितृहितार्थं रक्षणीयमिति बुद्ध्या रक्षति स पितृभोगीण इत्युच्यत इति भावः। ननु [2]'अहिरिव' इत्यत्र कृत्स्नं सर्पशरीरं भोगशब्देनोच्यते। अयं ह्यस्यार्थः — [3]यथाहिर्ग्रीवाप्रदेशे गृहीतो भोगैः शरीरभागैः परिवेष्टयति तद्वत् हस्तघ्नो गोधाङ्गुलित्रादिपर्यायो धानुष्कस्य बाहुं परिवेष्टयतीति। ततश्च कथं फणे प्रयोग इत्यत्राह — **समुदाये वृत्त इति**। **भुजङ्गाङ्गमेवेति**। तथा नैघण्टुका आहुः — [4]'भोगः सुखे [5]स्त्र्यादिभृतावहेश्च फणकाययोः' इति। **अनन्तत्वादिति**। अत एव भाष्ये 'भोगशब्दः शरीरवाच्यपि' इति सामान्येनोक्तम्। नैघण्टुकानां तु वचनं प्रसिद्ध-तरत्वादिति बोद्धव्यम्। **रथकारपञ्चमा इति**। रथकारशब्देनानुलोमा उग्रनिषादादयः, प्रति-लोमाः सूतमागधादयः सर्वे गृह्यन्ते, न तु तक्षाण एव। **समुदाये वृत्तस्येति**। पञ्चजनशब्दस्य मनुष्यपर्यायत्वात्। यथा मनुष्यशब्दात् कस्यांचिद् व्यक्तौ वृत्तावेकवचनं भवति, एवं पञ्चजन-शब्दादपीत्यर्थः। **यदा सप्तर्षिरिति**। अत्रापि [6]'दिक्संख्ये संज्ञायाम्' इति समासः। **यदा विशिष्टसंख्येयेति**। अत एवोच्यते [7]'आदशभ्यः संख्याः संख्येये वर्तन्ते' इति। ननु 'महाजनात्'

---

[1] पा. सू. ६.१.२१७.
[2] तै. सं. ४.६.६.
[3] यथा, अहिरिति छेदः।
[4] अमरकोशे नानार्थवर्गे श्लो. २३.
[5] स्त्र्यादिभुक्तौ — घ, ङ.
[6] पा. सू. २.१.५०.
[7] संख्यायाः संज्ञासंघेति सूत्रे कैयटे इदमुक्तम्।

इत्यत्र 'तत्पुरुषे' इति सामान्येनोक्ते व्यधिकरणे षष्ठीसमासे प्रत्ययनिवृत्तिः [1]'कुतस्त्येत्यत्राह — **महाजनशब्दश्चेति** ॥

सर्वपुरुषाभ्यां णढजौ ५.१.१०.

[४, १५–१६]

(उद्द्योतनम्) 'सर्वस्मात्' इति वाच्यम्, 'सर्वात्' इति कथम्, अत आह — **अनुकरणत्वादिति**। तथापि [2]"प्रकृतिवदनुकरणम्' इत्यतिदेशात् सर्वनामकार्यं स्यात्, अत आह — **सर्वनामानीति**। अर्थसहितसर्वशब्दानुकरणे स एव दोषः, अत आह — **अनाश्रितेति**। **प्रत्ययार्थेति**। प्रत्ययार्थस्य प्रकृत्यर्थान्वयो वाच्यः, वधस्य भावरूपस्य षष्ठ्यन्तेनैवान्वययोग्यत्वादित्यर्थः। **उपात्तैवेति**। 'पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्' इत्यत्रेत्यर्थः। केचित्तु वधे [3]'तस्येदम्' इत्यणः, विकारे प्राण्यङ्गः, समूहकृतग्रन्थयोः प्राग्दीव्यतीयाणश्चापवादोऽयम्। ततश्च समर्थविभक्तिः सूत्रान्तरैरेव लभ्यते। [4]'तेनैकदिक्' इयतः [5]'कृते ग्रन्थे' इत्यत्र तेनेत्यनुवर्तनाभिप्रायेण 'उपात्तैव' इत्युक्तमिति प्रदीपाशय इत्याहुः। पुरुषशब्दः शरीरपर इत्याह — **पुरुषश्चेति** ॥

[४, १५–१६]

(नारायणीयम्) अनुकरणत्वादिति। अनुकरणस्य ह्यनुकार्यमर्थः। सच शब्द एवेति कात्स्न्र्यवृत्तित्वाभावात् सर्वनामत्वाभावः। ननु [6]'प्रकृतिवदनुकरणं भवति' इत्यतिदेशात् सर्वनामकार्यं स्यादिति चेत्, तदपि नेत्याह — **अनाश्रितार्थस्येति**। [7]शब्दमात्रप्रतिपादनपरत्वादनुकार्येऽप्यर्थो नाश्रीयत इत्यर्थः। **प्रत्ययार्थेति**। तत्र वधे [8]"तस्येदम्' इत्यणोऽपवादः, विकारे [9]'प्राणिरजतादिभ्योऽञ्' इत्यञ्नः, समूहे [10]'तस्य समूहः' इत्यणः। 'तेनकृतेषु' इति वार्तिककारवचनाद् द्वन्द्वमध्ये तेनेत्यस्य निवेशः। तत्र ग्रन्थात्मके [11]'कृते ग्रन्थे' इत्यणोऽपवादः। प्रासादादौ तु न कस्यचित्। **न तु सांख्यादीति**। तत्र सांख्याः — यदुपभोगाय प्रधानं प्रवर्तते स साक्षी प्रकृतिविकृतितामनापन्नस्तत्त्वचतुर्विंशतेरतिरिक्तः पुरुष इत्याहुः। नैयायिकादिमते तु पृथिव्यादीनां सावयवत्वेनोत्पत्तिमत्त्वेऽवश्याश्रयणीये तत्कर्तृत्वेन यः सर्वज्ञ ईश्वरः कल्प्यते, स पुरुषशब्दवाच्यः। अद्वैतनये तु परमात्मैव पुरुषः। यथोक्तम् —

सुखदुःखोपभोगार्थं [12]पुरमात्मा हि शीयते।
शरीरं गच्छतीत्यर्थो गमनं प्राप्तिरिष्यते ॥ इति।

---

[1] कुत इत्यत्राह — ङ.
[2] परिभाषा ३६.
[3] पा. सू. ४.३.१२०.
[4] पा. सू. ४.३.११२.
[5] पा. सू . ४.३.११६.
[6] परिभाषा ३६.
[7] शाब्दमात्र — ङ.
[8] पा. सू. ४.३.१२०.
[9] पा. सू. ४.३.१५४.
[10] पा. सू. ४. २.३७.
[11] पा. सू. ४.३.११६.
[12] परमात्मा हि गीयते — ङ.

तदर्थं विकृतेः प्रकृतौ ५.१.१२.

[४, १६]

(विवरणम्) कृत्यसंज्ञकप्रत्ययाभिधानभ्रमं व्युदस्यति — **अवश्येति**। नामग्रहणाच्च प्रकृतिमात्रग्रहणमिति भावः॥

[४, १६]

(उद्द्योतनम्) [1]तव्यदादिनामग्रहणशङ्कां निराह — **अवश्येति**। ननु प्रयोजनं फलमुच्यते, इन्द्रमहश्च फलसाधनम्, न फलम्, अत आह — **प्रयुज्यत इति**। फलसिद्ध्यर्थं स्वसाधने साधकस्यापि प्रवर्तकत्वात् प्रयोजनत्वमित्यर्थः॥

[४, १६]

(नारायणीयम्) **अवश्यकर्तव्यत्वादिति**। आवश्यकेऽर्हे वा क्यप्प्रत्यय इत्यर्थः। **प्रयुज्यत इति**। अत्र [2]फलस्य ग्रहणमिति भावः। तथा च पारमर्षं सूत्रम् — [3]'यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्' इति॥

छदिरुपधिबलेर्ढञ् ५.१.१३.

[४, १७–१९]

(विवरणम्) स्वरूपेणोपधिशब्दस्य[4] तदर्थस्य वाभावो वक्तुमयुक्त इत्यत आह — **उपधिशब्द इति**। [5]कर्माविवक्षादेर्भवेऽपि यतः संभवादाह — **कर्मेति**। भाष्ये **अयमुपधिशब्द इति**। [6]'उपसर्गे घोः किः' इत्यत्र [7]'भावे, [8]'अकर्तरि च कारके' इति 'चाधिकारादिति भावः। ननु रथाङ्गविशेषनिर्वर्त्यत्वादुपधान[9]क्रियायास्तद्वाच्युपधि[10]शब्दो विकृतिवचन इति 'विकृतेः प्रकृतौ' इत्यनुवृत्तावपि न कश्चिद्दोष इत्यत आह — **यद्यपीति**। 'विशिष्ट एव' इति यदुक्तं तद्विवृणोति — **यत्रेति**। प्रकृत्युच्छेदाभावात् प्रकृतिविकृतिभावो नास्तीत्यभिप्रायेणाह — **न त्विति**। प्रकृतिविकारभावस्याप्रसिद्धत्वे हेतुमाह — **आमेति**। प्रत्ययाभावेऽपि तं प्रदर्शयत्यनेन। ननु

---

[1] तव्यादादीनामग्रहण — अ, ऋ, लृ.
[2] फलस्याग्रहणमिति — ङ.
[3] न्यायसूत्रम्. १.१.२४.
[4] उपाधिशब्दस्य — ल.
[5] 'कर्माविवक्षादेः' इत्यादि 'अयमुपधिशब्दइति' इत्यन्तं नास्ति — ल.
[6] पा. सू. ३.३.९२.
[7] पा. सू. ३.३.१८.
[8] पा. सू. ३.३.१९.
[9] उपाधान — ल.
[10] उपाधिशब्दः — ल.

स्वार्थे ताविति चेत्, न भाववाचिनो ढञि द्रव्यप्रतीतिः स्यात्, अत आह — **कर्मेति** । न च रथाङ्गविकारे भस्मादौ प्रत्ययो भवत्विति [1]वाच्यमित्याह — **उपधीति** ॥

[४, १७–१९]

(**उद्द्योतनम्**) उपधेः रथाङ्गविशेषस्य सद्भावात् 'उपध्यभावात्' इत्ययुक्तम्, अत आह — **उपधिशब्द इति** । 'कृदन्तस्य' इत्येतद्व्याचष्टे — **उपधेयेति** । [2]'अचो यत्' [3]'ईद्यति' [4]'सार्वधातुक' इति गुणः । भावसाधनस्य ग्रहणे सूत्रेणैव प्रत्ययसिद्धिमाह — **तत्र हीति** । ननु क्रियाया अपि विकारत्वात् 'एवमपि' इत्ययुक्तम्, अत आह — **यद्यपीति** । लोके क्रियायामपि विकारशब्दोऽस्ति । प्रकृते विकारविशेष एव गृह्यत इति शङ्क्येयमित्यर्थः । [5]विशेषमेवाह — **यत्रेति** । **उच्छेदः** भस्मादौ । **रूपान्तरापत्तिः** यूपादौ । क्रिया च तद्भिन्ना, अतो न गृह्यत इति भावः । प्रकृतिविकारभावाभावे हेतुः — **बल्यवस्थायामपीति** । यत्र तण्डुलैर्हुत्वा तण्डलैर्बलिर्विधीयते तत्रेत्यर्थः । ननु वत्सस्यावस्थान्तरमापन्नस्य ऋषभत्वात् प्रकृतिविकारभावोऽत्रास्ति, अत आह — — **यथेति** । **तत्त्वेन** प्रसिद्धमित्यनुषङ्गः । तदर्थग्रहणविचारस्य प्रकृतोपयोगमाह — **तदर्थग्रहणेति** । **स्वार्थ इति** । अनिर्दिष्टार्थत्वादित्यर्थः । तदर्थमित्यस्याननुवृत्तौ 'आर्षभ्यः' इत्यादौ कथं प्रत्ययसिद्धिः, अत आह — **ऋषभेति** । वरत्राशब्दश्चर्मविकारवाची [6]चर्मणोऽञ्विषयः । **तादर्थ्यादिति** । वृत्तिविषये ऋषभार्थो [7]वत्स ऋषभशब्देनोच्यते । स्वार्थे ञ्यप्रत्यये 'आर्षभ्यो वत्सः' इति सिध्यति । एवम् औपानह्यम् वारत्रमित्यर्थः । ननु प्रासादस्य देवदत्तार्थत्वात् तदर्थमित्यनुवृत्तावपि प्रत्ययः स्यात्, अत आह — **अत्रेति** । 'स्यात्' इति "संभावनेऽलम्' इत्यनेन संभावने लिङ् । नन्वितिकरणस्य सर्वातिप्रसङ्गनिरासार्थत्वात् कथमत्र प्रसङ्गः, अत आह — **इति करणेति** । तदर्थे प्रत्ययविधावव्याप्तिं शङ्कते — **यदीति** । फलोपहितं तादर्थ्यं नास्तीति शङ्काभिप्रायः । **अरणीयमिति** । अरणियोग्यमित्यर्थे [9]'प्राक् क्रीताच्छः' । **अत्रापीति** । बुद्धिकल्पितं फलोपधानं तत्रापि प्रत्ययप्रयोजकमिति समाधानाभिप्रायः । आहुरित्यस्वरसबीजं तु 'प्रासादो देवदत्तस्य स्यात्' इत्यत्रापि बौद्धफलोपधानसंभवात् प्रत्ययप्रसङ्गः, तस्मादितिकरण एव शरणीकरणीय इति ॥ तण्डुलेषु बल्यवस्थायां ततः पूर्वं च गुणभेदमाह — **बल्यवस्थायामिति** । **संनिवेशेति** । बलीनां संनिवेशविशेषेण स्थापनीयत्वात् । बलिविशेषे रक्तादीनामप्युपयोगाभिप्रायेणाह — **लाक्षेति** । [10]**तदपेक्षयेति** । बल्यवस्था[11]गुणापेक्षयेत्यर्थः । वत्से गुणान्तरमाह — [12]**संजातेति** । [13]तर्ह्यम्रविकारत्वं पक्वस्यास्ति, तत्रापि प्रत्ययप्रसङ्गः, अत आह — **आम्रं त्विति** । वत्सर्षभयोरपि प्रकृतिविकारभावो [14]न लोकसिद्ध इत्याशङ्क्य वैषम्यान्तरमाह — **आमपक्वेति** । विकारार्थे वृद्धलक्षणस्य

---

[1] वाच्यमत आह — उपाधीति — ल.
[2] पा. सू. ३.१.९७.
[3] पा. सू. ६.४.६५.
[4] पा. सू. ७.३.८४.
[5] विशेषमाह — अ.
[6] 'चर्मणोऽञ्' इति सूत्रानुकरणम् ।
[7] 'वत्सः' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — अ.
[8] पा. सू. ३.३.१५४.
[9] पा. सू. ५.१.१.
[10] तदपेक्षेति — लृ; अयं प्रतीको न दृश्यते — अ, ऋ.
[11] गुणापेक्षेत्यर्थः — अ, ऋ, लृ .
[12] प्रदीपे 'सुजातावयवः' इत्यत्र 'संजातावयवः' इत्यन्नंभट्टपाठ इति भाति ।
[13] तर्ह्यामविकारत्वं — अ, ऋ, लृ.
[14] न लोके सिद्धः — अ.

मयटः [1]'फले लुक्' इति लुक्याम्रशब्द आमपक्वफलसाधारणः। यथा 'आर्षभ्यो वत्सः' इत्युक्ते [2]ऋषभार्थत्वं वत्सस्य प्रतीयते, नैवम् 'आम्रोऽयमाम्रम्' इत्युक्ते पक्वफलार्थत्वमामफलस्य[3] गम्यत इति प्रत्ययाभाव इत्यर्थः। ननूपधिशब्दस्य भाववचनस्य ग्रहणे तादर्थ्यसंभवस्योक्तत्वात् कथमुपधेयासिद्धिः, अत आह — **सत्यपीति**। [4]**क्रियापेक्षे** • उपधानक्रियापेक्षे। **द्रव्यस्य** रथाङ्गविशेषस्य। प्रकृत्युपमर्दपूर्वत्वस्य गुणान्तरयुक्तत्वस्य वा [5]विकारत्वस्य क्रियायामभावादिति भावः। ननु भावव्युत्पन्नोपधिशब्दात् स्वार्थे प्रत्यये कथं रथाङ्गप्रतीतिः, अत आह — **कर्मेति**। [6]'उपसर्गे घोः' [7]'कर्मण्यधिकरणे [8]च' इति किप्रत्ययः। ननूपध्यौपधेयशब्दयोरर्थभेदप्रतीतेः कथं स्वार्थिकत्वम्, अत आह — **उपधीति**। अर्थभेदासंभवात् पर्यायत्वमेव युक्तमित्याह — **एकस्येति**॥

[४, १७–१९]

(नारायणीयम्) 'उपध्यभावात्' इत्यनन्वयमाशङ्क्य सोपस्कारं व्याचष्टे — **उपधिशब्द इति**। **उपधानक्रियार्थत्वादिति**। कर्मकारकस्यापि क्रियां प्रति साधकत्वात्। **विशिष्ट एवेति**। यो लोके प्रसिद्धतरः। तमेव दर्शयति — [9]**यत्र चेति**। ननु वत्सर्षभयोरवस्थाभेदस्य [10]स्फुटत्वात् प्रकृतिविकारभावोऽस्त्येवेत्यत आह — **यथा पक्वमिति**। ननु तदर्थग्रहणाननुवृत्तौ कस्येष्टस्य संग्रहः, यतस्तत्संभावना स्यादित्यत आह — **तदर्थेति**। ननु बहूनामनुग्रहायानु[11]वृत्तिरेव युक्ता, [12]'त्यजेदेकं कुलस्यार्थे' इति न्यायादित्यत आह — **ऋषभेति**। नन्वितिकरणादतिप्रसङ्गनिवृत्तेः सिद्धत्वात् किं तदर्थग्रहणानुवृत्त्येत्यत आह — **इतिकरणेति**। **अरणीयं सूनाकाष्ठमिति**। सूनाकाष्ठस्यारण्यर्थत्वं शास्त्रे प्रतिषिद्धमिति तादर्थ्याभावः। **बुद्धिपरिकल्पितेति**। काष्ठत्वसामान्याद् बुद्ध्या परिकल्पितम्, अत एवारोपितं यत् तादर्थ्यं [13]तदाश्रयण इत्यर्थः। ऋषभार्थत्वं वत्सस्य स्फोरयति — **सुजातेति**। **संहननवानिति**। अशिथिलसंधियुक्त इत्यर्थः। **महाप्राणः** महाबलः। नन्वेवं तादर्थ्यसंभवेऽपि प्रकृतिविकारभावो नास्तीत्युक्तमाम्रफलदृष्टान्तेनेत्याशङ्क्य तद्वैधर्म्यमाह — **आम्रं त्विति**। [14]प्रख्याया अभेदात् [15]प्रकृतिविकाराभावमुक्त्वोपाख्याया[16] अप्यभेदादाह — **आमपक्वेति**। **वत्सऋषभ[शब्द]वदिति**। अत्र हि प्रख्योपाख्ययोर्भेदात् प्रकृतिविकारभाव उपपद्यत इत्यर्थः। **कर्मसाधनकिप्रत्ययान्तादिति**। उपधीयत इत्युपधिः। [17]'उपसर्गे घोः किः' इति कर्मणि किप्रत्ययः। वचनसामर्थ्यात् स्वार्थे [18]प्रत्ययस्य सिद्धिमुपपादयति — **उपधीति**॥

---

[1] पा. सू. ४.३.१६३.
[2] ऋषभत्वं — अ.
[3] आम्रफलस्य — अ.
[4] प्रदीपे 'क्रियापेक्षद्रव्यस्य' इत्यत्र 'क्रियापेक्षे द्रव्यस्य' इति चौखाम्बामुद्रिते पाठः।
[5] विकारित्वस्य — अ.
[6] पा. सू. ३.३.९२.
[7] पा. सू. ३.३.९३.
[8] अत्र 'उपसर्गे घोः किः' इत्यस्यैवोपयोगः। 'कर्मण्यधिकरणे च' इति सूत्रोपादानं तु प्रसङ्गादिति बोध्यम्।
[9] प्रदीपे 'यत्र प्रकृत्युच्छेदः' इति चकाररहित पाठ उपलभ्यते।
[10] स्पष्टत्वात् — ङ.
[11] वृत्तिरुक्ता — ङ.
[12] चाणक्यनीतिः २.१०.
[13] तदन्ताश्रयेणेत्यर्थः—घ; तदाश्रयेणेत्यर्थः—ङ.
[14] प्रतीतेरित्यर्थः।
[15] प्रकृतिविकारभावाभावमित्यर्थः।
[16] वाचकशब्दस्येत्यर्थः।
[17] पा. सू. ३.३.९२.
[18] प्रत्ययसिद्धिम् — ङ.

तदस्य तदस्मिन् स्यादिति ५.१.१६.

[४, १९–२१]

(**विवरणम्**) ननु यत्र स्याद्ग्रहणान्नातिप्रसङ्गनिवृत्तिस्तत्रेतिकरणादतिप्रसङ्गनिवृत्तिर्भविष्यतीत्यत आह — **इतिकरणादेवेति**। यदुक्तं 'बुद्धिकृतं तादर्थ्यमाश्रित्य' इति, तत्राह — **न चेति**। भाष्ये लिङिति दर्शनाल्लिङग्रहणमपि कर्तव्यमिति कश्चिद् भ्राम्येत्, अत उक्तम् — **स्यादिति**॥

[४, १९–२१]

(**उद्द्योतनम्**) **नैवेति**। प्रासादो देवदत्तस्य स्यादित्यादावित्यर्थः। **इतिकरणादिति**। अतिप्रसङ्गनिरासायैव [१]तदुपादानादित्यर्थः। **स्वस्वामीति**। मत्वर्थे प्रत्ययविधिपर्यवसानादित्यर्थः। सूत्रेण स्वस्वामिसंबन्धप्राप्तिमाह — **अस्येति**। मात्रशब्दः सामान्यवाची। तर्हि संबन्धविशेषे कथं [२]प्रत्ययापादनम्, अत आह — **सामान्ये चेति**। अनुवृत्तौ भगवत्संमतिमाह — **तथा चेति**। **असतीति**। देवदत्तस्य सामुद्रिकलक्षणादिना प्रासादार्हत्वज्ञाने प्रासादस्य देवदत्तार्थत्वज्ञानात् प्रत्ययप्रसङ्गः। स्याद्ग्रहणे तु दरिद्रस्य देवदत्तस्य प्रासादो न संभाव्यत इति प्रत्ययाप्रसङ्गः। यद्वा, देवदत्तस्यापि प्रासादार्थत्वसंभवाद् देवदत्तीयः प्रासाद इत्यपि स्यादित्यर्थः। तादर्थ्यमेवाह — **योग्योऽयमिति**। प्रासादलाभ इति सप्तम्यन्तम्। ननु दरिद्रस्य देवदत्तस्य स्यादर्थप्रकारसंभावनाविरहात् कथं [३]प्रत्ययापादनम्, अत आह — **यदेति**। तदर्थग्रहणानुवृत्तिमाश्रित्य शङ्कते — **नन्विति**। संभावनामात्रम्, न तु तादर्थ्यप्रत्यय इत्यर्थः। **एवं तर्हीति**। प्रभोर्देवदत्तस्य प्रासादलाभः संभावितः, तादर्थ्यं नास्तीत्यर्थः। इदं व्याख्यानं 'प्रासादो देवदत्तस्य स्यात्' इति भाष्यविरुद्धम्। देवदत्तस्यैतत्प्रासादलाभयोग्यतापि नास्ति वस्तुतोऽन्यदीयत्वास्पदत्वात्, प्रासादस्य, अत आह — **अथवेति**। तर्हि तदनुवृत्तिकथनं भाष्यविरुद्धम्, अत आह — **पूर्वसूत्र इति। प्रसङ्गान्तरेण** तदनुवृत्तौ पूर्वसूत्रेषु 'ऋषभार्थो घासः' इत्यादावतिप्रसङ्गापादनायेत्यर्थः। असिद्धान्तत्वे हेतुः — **तथा चेति**। तादर्थ्यप्रतीतिरपि नास्ति, अन्यार्थत्वप्रतीतेरित्याह — **न च प्रतीयत इति। स्याच्छक्यार्थ इति**। सूत्रस्थस्याच्छब्दः शक्यार्थ इति वक्तव्यमित्यर्थः। व्यवहितेऽपीदानीमुक्ति[४] संगमयति — **चिरेति**। व्यवधानमेवाह — **उपदेश इति**। तत्रत्यं भाष्यं लिखति — **प्रायग्रहणादिति**। उपदेशशब्दस्य करणे घञन्तत्वे उक्ते ल्युटा बाधमाशङ्क्य परत्वात् [५]'हलश्च' इत्यनेन ल्युटं बाधित्वा घञेव भविष्यतीत्युक्ते [६]'हलश्च' इत्यत्र संज्ञायामित्यनुवृत्तेरुपदेशशब्दस्य संज्ञात्वाभावात् तेन घञ् न प्राप्नोतीत्युक्तेऽसंज्ञायामपि घञ् भविष्यतीति [७]शङ्कार्थं [८]'प्रायग्रहणात्' इति भाष्यम्। [९]'पुसि संज्ञायां घः प्रायेण' इत्यतः [१०]'हलश्च' इत्यत्र प्रायेण संज्ञाया-

---

[१] तदुपपादनादित्यर्थः — अ.
[२] प्रत्ययोपादानम् — अ, ऋ, लृ.
[३] प्रत्ययोपादानम् — अ.
[४] इदानीमित्युक्तिमित्यर्थः
[५] पा. सू. ३.३.१२१. ल्युटं परत्वाद् बाधित्वा हलश्चेत्यनेन घञेव भवष्यितीत्यन्वयः।
[६] पा. सू. ३.३.१२१.
[७] 'शङ्कार्थम्' इत्यादि 'संज्ञया संबन्धादसंज्ञायामपि घञ् भविष्यतीति' इत्यन्तं नास्ति — अ.
[८] महाभाष्यम् १.३.२. प्रायवचनादित्यस्यार्थतोऽनुवादः।
[९] पा. सू. ३.३.११८.
[१०] पा. सू. ३.३.१२१.

मित्यनुवर्तते। ततश्च प्रायग्रहणस्य संज्ञया संबन्धादसंज्ञायामपि घञ् भविष्यतीति शङ्कार्थः। तत्समाधानार्थं 'प्रायवचनात्' इति [1]भाष्यम्। प्रायवचनं संज्ञया न संबध्यते, किं तु [2]घञैव, उपाधेरुपाध्यन्तराभावादिति। तदर्थं तदुपपादयति — **तत्र[हि]घञ्जिति**। संज्ञाविशेषणत्वाभावे हेतुः — **परार्थस्येति**। [3]'गुणानां च परार्थत्वात्' इति न्यायादिति भावः। संज्ञायामिति सप्तमीनिर्देशात् शब्दतस्तावत् संज्ञायाः प्राधान्यं न प्रतीयत इत्याह — [4]**शब्देनेति**। वाक्यभेदापत्त्यार्थतोऽपि नास्तीत्याह — **एकवाक्यत्वाच्चेति**। प्रायेण घञ् भवति, स च प्रायेण संज्ञायामित्यन्वयभेदादित्यर्थः। ननूपाधि[5]विशेषणयोरभेदेन व्यवहारो दृश्यते, प्रत्ययसूत्रे [6]'प्रकृत्युपपदोपाधीनाम्' इति भाष्ये उपाधिपदेन विशेषणस्यापि विवक्षितत्वात्। अतः कथं भेदः, अत आह — **उपाधिविशेषणयोरिति**। **क्वचित्** [7]'न ह्युपाधेरुपाधिः' इत्यादौ। भेद एव सिद्धान्त इत्याह — **तदुक्तमिति**। **तदन्तवाच्यः** प्रत्ययान्तवाच्यः। अत एव समानः पर्यायः शब्दो यस्यार्थस्य। **अतोऽन्यः** प्रत्ययान्तवाच्यादन्यः, **अनुपाधिः** उपाधिभिन्नोऽर्थः, विशेषणम्। तदुदाहरति — **श्लाघादीति**। [8]'श्लाघात्याकारतदेवेतेषु' इत्यत्र श्लाघादि विशेषणम्। [9]'हरतेर्दृतिनाथयोः पशौ' इत्यत्र पशुरुपाधिः। अधिकं प्रत्ययसूत्रोद्द्योतनेऽनुसंधेयम्। 'न ह्युपाधेः' इति न्यायं प्रकृते योजयति — **तत्र स्यादिति**। **नन्विति**। शक्यार्थ[10]विशिष्टस्यादर्थस्य प्रकृत्यर्थविशेषत्वमस्त्वित्यर्थः। **नैतदस्तीति**। [11]वाजपेयाधिकरणन्यायेन विरुद्धत्रिकद्वयापत्त्या स्यादर्थस्य वाक्यभेदं विना युगपत्प्रकृत्यर्थविशेषणत्वं शक्यार्थविशेष्यत्वं च प्रत्येतुमशक्यमित्यर्थः। [12]'न हि' इति दोषोद्धरणायोभयोरपि प्रकृत्यर्थविशेषणत्वं शङ्कते — **अथेति**। [13]**उपाधिद्वयेन** शक्यार्थेन स्यादर्थेन चेत्यर्थः। अतिप्रसङ्गेन दूषयति — [14]**तदिति**। ननु सिद्धस्य प्रासादस्य कर्तुमशक्यत्वात् कथं शक्यत्वं प्रासादस्य विशेषणम्, अत आह — **तत्र ज्ञातुमिति**। स्यादर्थविशेषणत्वे त्वन्यदीयप्रासादस्य देवदत्तसंबन्धित्वेन परिभावयितुमशक्यत्वात् प्रत्ययो न स्यात्, तच्च न संभवतीति 'इदानीम्' इति भाष्यमित्येकं त्रिकम्, उपादेयत्वं विधेयत्वं गुणत्वमित्यपरं त्रिकम्। 'वाजेन यागं भावयेत्' इत्येकं वाक्यम्, 'यागेन स्वाराज्यं भावयेत्' इत्यपरं वाक्यं कल्पनीयम्। तत्र उद्देश्यत्वादयस्त्रयः स्वाराज्यरूपफलनिष्ठा धर्माः, उपादेयत्वादयस्त्रयः साधनभूतयागनिष्ठा धर्माः। फलमुद्दिश्य याग उपादीयते, फलमनूद्य यागो विधीयते, फलं प्रधानं यागो गुण इति यागे उपादेयत्वादिकं त्रिकं सिद्धम्। पुनश्च यागमुद्दिश्य वाज उपादीयते, यागमनूद्य वाजो विधीयते, यागः प्रधानं वाजो गुण इति यागे एवोद्देश्यत्वादिकं त्रिकं प्राप्नोतीति यागे विरुद्धं त्रिकद्वयं प्राप्तं भवति, तच्चानिष्टम्, इति तत्रत्या प्रक्रिया।

---

[1] महाभाष्यम् १.३.२.
[2] घञेव — अ, ऋ, लृ.
[3] मीमांसासूत्रम् ३.१.२२.
[4] न शब्देनैवेति — अ, ऋ, लृ. प्रदीपपुस्तकेषु 'शब्देन पारार्थ्यापन्नस्यैव' इति दृश्यते। 'शब्देनैव पारार्थ्यापन्नस्य' इत्यन्नंभट्टपाठे सत्यपि 'शब्देनैवेति' इति प्रतीको युक्तः।
[5] विशेषणयोरर्थभेदेन — अ.
[6] महाभाष्यम् ३.१.१.
[7] महाभाष्यम् १.३.२.
[8] पा. सू. ५.१.१३४.
[9] पा. सू. ३.२.२५.
[10] विशिष्टस्य स्यादर्थस्य — अ.
[11] मीमांसाप्रथमाध्यायचतुर्थपादषष्ठाधिकरणे 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यत्र वाजरूपगुणविधित्वपक्षे यागे विरुद्धं त्रिकद्वयं प्राप्नोति — उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वमित्येकं त्रिकम्, उपादेयत्वं विधेयत्वं गुणत्वमित्यपरं त्रिकम्। 'वाजेन यागं भावयेत्' इत्येकं वाक्यम्, 'यागेन स्वाराज्यं भावयेत्' इत्यपरं वाक्यं कल्पनीयम्। तत्र उद्देश्यत्वादयस्त्रयः स्वाराज्यरूपफलनिष्ठा धर्माः, उपादेयत्वादयस्त्रयः साधनभूतयागनिष्ठा धर्माः। फलमुद्दिश्य याग उपादीयते, फलमनूद्य यागो विधीयते, फलं प्रधानं यागो गुण इति यागे उपादेयत्वादिकं त्रिकं सिद्धम्। पुनश्च यागमुद्दिश्य वाज उपादीयते, यागमनूद्य वाजो विधीयते, यागः प्रधानं वाजो गुण इति यागे एवोद्देश्यत्वादिकं त्रिकं प्राप्नोतीति यागे विरुद्धं त्रिकद्वयं प्राप्तं भवति, तच्चानिष्टम्, इति तत्रत्या प्रक्रिया।
[12] न ह्युपाधेरुपाधिर्भवतीति दोषोद्धरणायेत्यर्थः।
[13] 'उपाधिद्वयेन' इत्यादि 'दूषयति' इत्यन्तं नास्ति — अ.
[14] तथेति — ऋ, लृ; अयं प्रतीको नास्ति — अ.

तात्पर्यम्। भाष्ये **इतिकरण इति**। करोतीति कर्तरि ल्युट्, बहुलग्रहणात्। इतिश्चासौ करणश्चेति कर्मधारयः। सर्वातिप्रसङ्गनिरासकृदितिशब्दः प्रयुज्यत इत्यर्थः। भाष्ये [1]"प्रयोक्तृविवक्षा' इत्यत्र शब्दविशेषानभिज्ञः प्रयोक्ताभिमतः। 'मृदून्' इत्यादिविशेषणैर्यथेच्छं प्रयोग उक्तः। तदाह — **अपभ्रंशानिति**। प्रायशब्दो वैयाकरणतुल्यजनपर इत्याह — **समग्रेति**। अनेन लब्धमर्थमाह — **तस्मादिति**। नन्वेवमितिकरणवैयर्थ्यम्, सर्वत्र [2]व्याकरणे प्रयोगस्यानुसर्तव्यत्वात्, अत आह — **अयमेवेति**। प्रयोगमूलत्वन्याय एवेत्यर्थः। नन्वितिकरणस्य न्यायद्योतकत्वे 'ततश्चेद्विवक्षा' इति कथं भाष्यम्, अत आह — **तत्रेतिशब्द इति**। सूत्र इत्यर्थः। विवक्षानुसरणमेवाह — **योऽयमिति**। इतिशब्दस्य हेत्वर्थत्वं प्रसिद्धमङ्गीकृत्य विवक्षां विना प्रयोगहेतुत्वासंभवादर्थाद्विवक्षाक्षेपकत्वमुक्तम्। इदानीं निपातानामनेकार्थत्वादितिशब्दस्य विवक्षार्थकत्वमेवेत्याह — **अथवेति**। 'यद्येवं नार्थः स्याद्ग्रहणेन' इति भाष्यतात्पर्यमाह — **न चेति**। ननु 'प्रासादीयो देवदत्तः' इति प्रयोगस्य का गतिः, अत आह — **भवाद्यर्थेति**। तत्र [3]"वृद्धाच्छः'॥

[४, १९–२१]

(नारायणीयम्) सिद्धान्तोपक्रमं भाष्यमिति दर्शयति — **क्रियमाणेऽपीति**। **इतिकरणादेव चेति**। तस्माद्व्यापकत्वादितिकरणमेव वक्तव्यम्, न तु स्याद्ग्रहणमित्यर्थः। ननु तदर्थग्रहणाननुवृत्तिकथनं भाष्यविरुद्धमिति, तत्राह — **पूर्वसूत्र इति**। **प्रसङ्गान्तरेणेति**। प्रसक्तानुप्रसक्त्या [4]प्रौढिवादेनेत्यर्थः। ननु न 'शक्यार्थे लिङ्' इति वक्तव्यम्, [5]"शकि लिङ् च' इति सूत्रेणैव सिद्धत्वादित्यत आह — **स्याच्छक्यार्थ इति**। नन्वत्र प्रदेशे 'नोपाधेः' इत्यादि नोक्तमिति किमुच्यते 'इदानीमेव' इति, तत्राह — **चिरवृत्तमपीति**। **उपदेशेऽजनुनासिक इति**। तत्र हि, उपदिश्यतेऽनेनेत्युपदेशः शास्त्रम्, [6]"हलश्च' इति करणे घञ्त्युक्ते, संज्ञायामिति वर्तते, न चैषा संज्ञेत्युक्तम्। तत्रोत्तरं "प्रायवचनादसंज्ञायामपि। [7]"हलश्च' इत्यत्र संज्ञायां प्रायेणेति चानुवर्तते। संज्ञया च प्रायग्रहणं संबध्यते — प्रायेण संज्ञायां घञ् भवति, क्वचिदसंज्ञायाम्" इति। एतन्निराकरोति — **प्रायवचनादिति**। परार्थत्वे हेतुः — **शब्देन पारार्थ्येति**। **तत्र हेतुरेकवाक्यत्वादिति**। 'क्रियाभावशब्दयोरिव' इति पूर्वत्र परत्र च संबध्यते। **तदन्तवाच्य इति**। प्रत्ययान्तवाच्यः, अत एव समानशब्दः। यथा दृतिहरिरिति पशुः कर्ता प्रत्ययेनाभिधीयत इत्युपाधिः। **अतोऽन्यः** [8]'प्रत्ययेनावाच्यः, अतश्च व्यधिकरणशब्दः, यथा गार्गिकया श्लाघत इति श्लाघा वुञा नाभिधीयत इति विशेषणम्। उक्तमर्थं प्रकृते योजयति — **तत्र स्यादित्येतदिति**। प्रकृत्यर्थविशेषणायोपात्तत्वात् परतन्त्रत्वम्, तस्मात् संबन्धायोग्यत्वम्। अयमर्थः — तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे च यथाविहितं प्रत्ययो भवतीत्येकं वाक्यम्। यत्तत् प्रथमा [9]समर्थं, स्याच्चेत् तद् भवतीति द्वितीयम्। तत्र द्वितीये वाक्ये प्रकृत्यर्थो विशेष्यत्वात् प्रधानम्, स्यादित्येतद् विशेषणत्वादप्रधानमिति तस्य विशेषणान्तरेणायोगात्। **ननु विशेषणेति**।

---

[1] 'प्रायोक्त्री विवक्षा' इत्यस्यार्थानुवादः।
[2] व्याकरणप्रयोगस्यानु — अ.
[3] पा. सू. ४.२.११४.
[4] प्रौढवादेनेत्यर्थः — घ.
[5] पा. सू. ३.३.१७२.
[6] पा. सू. ३.३.१२१.
[7] पा. सू. ३.३.१२१.
[8] प्रत्ययेन वाच्यः — ङ.
[9] समर्थं चेत् तत् स्यादिति द्वितीयम् — ङ.

'गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते' इति न्यायात्। एकवाक्यत्वे तन्न्यायानवतरमाह — **विशेषणसंबन्धानुभव इति**। **अथोपाधिद्वयेनेति**। यद्यप्ययं पक्षो युक्तः, एकस्य प्रधानस्यानेकेनोपकारकेण संबन्धस्य संभवात्, तथापीष्टं न सिध्यतीत्यर्थः। **अपभ्रंशानिति**। येषां मार्दवादिगुणयोगस्तानेव शब्दान् लौकिकाः प्रयुञ्जते। तेनासाधवोऽपि लोके प्रयुज्यन्त इत्यर्थः। तेन प्रायेक्त्र्या विवक्षाया हेयत्वेनात्रोपन्यास इति दर्शयति — **तस्मादिति**। **समग्रकल्पस्येति**। शास्त्रपरिशीलनादिशालिनः केचिदेव साधून् प्रयुञ्जते, न सर्वं इत्यर्थः। **अयमेव न्याय इति**। न त्वितिकरणेनापूर्वोऽर्थः प्रतिपाद्यते, किं तर्हि, न्यायसिद्धार्थानुवाद एव क्वचिद् विस्पष्टप्रतिपत्त्यर्थं क्रियत इत्यर्थः। हेत्वर्थेनेतिकरणेन विवक्षानुसरणप्रकारमुपस्कारप्रदर्शनेनाचष्टे — **योऽयमिति**॥

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ५.१.१९.

[४, २२–२७]

(विवरणम्) ननु संख्यायाः परिमाणं पृथग्गुणत्वेन सिद्धम्, अतः कथं संख्या परिमाणमेवेत्यत आह — **परिमीयतेऽनेनेति**। **बह्वच इति**। [1]'बह्वच इञः प्राच्यभरतेषु' इत्यत्र। ननु [2]'अध्यर्धपूर्व' इति वर्तमाने [3]'पणपाद' इत्यनेन द्वाभ्यां शताभ्यामिति विगृह्य यत्प्रत्यये कृते तद्विधानसामर्थ्यादेव लुगभावात् 'द्विशत्या' इति भाव्यम्, कथं द्विशतेत्यत आह — **पणपादेति**। **असमासग्रहणानुवृत्त्या** ठन्यतोरभावादित्यध्याहारः। **संख्यालक्षणस्येति**। [4]'संख्याया अतिशदन्तायाः' इति विहितस्येत्यर्थः। **यथा पङ्कजशब्द इति**। पङ्काज्जातमिति यौगिकोऽपीति शेषः। **अपचितपरिमाणं** न्यूनपरिमाणम्। ननु संख्या स्वगुणिनं परिच्छिनत्ति। न चापरिमाणं गुणादि गण्यते। अतो न तत्परिच्छेदकत्वमित्यत आह — **अमूर्तमपीति**। मूर्तिभेदाय दिष्टिप्रस्थसुवर्णादि कल्पते, कालस्तु क्रियाभेदाय, संख्या तु सर्वस्य भेदिकेति योजना। 'हास्तिनम्' इत्यत्र [5]'पुरुषहस्तिभ्याम्' इत्यण्। गोसंघस्य प्रत्ययार्थत्वाद् विशेषणपरिच्छेदद्वारा प्रत्ययार्थस्य परिच्छेदिका संख्या पञ्चक इति गोसंघ इत्यस्य विवक्षितत्वे। प्रकृत्यर्थस्य परिच्छेदिका संख्या पञ्च गावो यस्य संघस्येति विवेकः॥

[४, २२–२७]

(उद्द्योतनम्) परिमाणशब्दो योगरूढ्या [6]'प्रस्थादिवचनः, न संख्यावचनः, अत आह — **परिमीयत इति**। केवलयोग एव लाघवार्थं ग्राह्य इत्यर्थः। 'यत्तावत्' इत्यादिना दूष्यत्वादाह — **आचार्यदेशीय इति**। सामान्यसंनिधौ विशेषग्रहणस्यान्यत्र सामान्यग्रहणे तद्विशेषाग्रहणज्ञापकत्वं सदृष्टान्तमाह — **यथेति**। [7]'बह्वच इञः प्राच्यभरतेषु'। बह्वच्कादुत्पन्नस्येञः प्राच्यगोत्रभरतगोत्रवाचिनस्तत्कृते बहुत्वे [8]'लुक्'। तस्य प्रयोजनमाह — **तेनेति**। प्राचां गोत्रे य इञ्

---

[1] पा. सू. २.४.६६.
[2] पा. सू. ५.१.२८. अस्य लुगभावादित्यनेनान्वयः।
[3] पा. सू. ५.१.३४.
[4] पा. सू. ५.१.२२.
[5] पा. सू. ५.२.३८.
[6] प्रस्थादिपरिमाणवचनः — अ.
[7] पा. सू. २.४.६६.
[8] लुप् — अ.

तदन्ताद्युवप्रत्ययस्य लुक्। उद्दालकस्यापत्यमिति गोत्रे [1]'अत इञ्', औद्दालकिः। तस्मात् [2]'यञिञोश्च' इति फक्, औद्दालकायनः। 'अपरिमाणबिस्ताचित' इति भाष्यं व्याचष्टे — **तेनेति**। अपरिमाणान्तात् प्रतिषेधे दृष्टान्तः — **यथेति**। पञ्चभिरश्वैः क्रीतेत्यत्र [3]'तेन क्रीतम्' इति ठकः [4]'अध्यर्धपूर्व' इति लुक्। [5]'अपरिमाणबिस्ताचित' इति ङीब्निषेधे टाप्। ननु 'द्विशता' इत्यत्र कस्य तद्धितस्य लुक्। न तावत् [6]'शताच्च ठन्यतौ' इति विहितयोः, तत्रासमासग्रहणानुवृत्त्या समासात् तयोरप्राप्तेः। नापि [7]'पणपाद' इति विहितस्य यतः, विधानसामर्थ्यात् तस्य लुगनङ्गीकारात्, अत आह — **पणपादेति नित्य इति**। शतशब्दादित्यादिः। यदभावपक्षे संख्यालक्षणस्य कनो लुकीत्यन्वयः। ठन्यतोर्लुक्शङ्कानिरासाय 'शताच्च' इत्युक्तम्। 'यत्तावत्' इत्याचार्यवचनं, नेदमित्याह — **शिष्य इति**। योगरूढ्या परिहार इत्याह — **परिमाणशब्द इति**। भेदशब्दार्थमाह — **भेदः पदार्थानामिति**। वैलक्षण्यं स्वरूपभेदः, तत्र हेतुः — **मूर्तेति**। मूर्तामूर्तग्रहणं संख्येयमात्रोपलक्षणम्। द्वित्वादिसंख्यायाः स्वाश्रयभेदसमानाधिकरणत्वनियमात् [8]'संख्येयभेदप्रतीतिः, न तु द्व्यादिशब्दा भेदवाचका इति ज्ञेयम्। नन्वेकशब्दस्य संख्याशब्दस्य न भेदप्रतिपादकत्वम्, अत आह — **एक इति**। एक एव न द्वाविति द्वित्वावच्छिन्नप्रतियोगिको भेदस्तत्र भासत इति भावः। नन्वतिसूक्ष्मस्य परमाणोः सत्त्वादिषीकान्तमिति कथम्, अत आह — **अपचितेति**। वाक्यार्थमाह — **तेनेति**। गणनमेवाह — **सप्तेति**। **अमूर्तमपीति**। 'आकाशकालदिगात्मानश्चत्वारो विभवः' इत्यादौ। नन्वात्मादावपि परममहत्त्वं परिमाणमस्ति, अत आह — **उन्मानेति**। उन्मानादिकमनुपदं व्यक्तम्। आत्मादौ लोकप्रसिद्धं परिमाणं नास्तीति भावः। संख्यायाः सर्वपरिच्छेदकत्वे हरिसंमतिमाह — **दिष्टीति**। **आरोहेति**। धान्याद्यारोपणानुकूलत्वमारोहः, मध्ये विस्तारविशेषः परिणाहः। [9]सामान्यनिषेधशङ्कां निराह — **संख्ययैवेति**। 'समानाकृतेः' इत्यस्य समानसंनिवेशस्येत्यर्थं वदन् तस्य प्रयोजनमाह — **भिन्नेति**। भिन्नसंनिवेशप्रस्थद्वयस्य 'इदं हस्तद्वयपरिमितम्, इदं किंचिदूनहस्तपरिमितम्' इति परिच्छेदः संभवति। समानसंनिवेशस्य तु स न संभवतीत्यर्थः। **प्रसङ्गेन** परिमाणप्रसङ्गेन। **ऊर्ध्वेति**। पृथिव्यामूर्ध्वदिक्संबन्धितया स्थितमित्यर्थः। **हास्तिनमिति**। हस्ती प्रमाणमस्य, [10]'पुरुषहस्तिभ्याम्' इत्यण्। [11]'इनण्यनपत्ये' इति प्रकृतिभावः। **प्रमाण एवेति**। प्रमाणे प्रत्ययविधानात्। द्रव्यान्तरेण परिच्छिन्नं गुरुत्वं यस्य पाषाणादेस्तेनेति विग्रहः। तस्मिन्नूर्ध्वशब्दप्रवृत्तिं दर्शयति — **तच्चेति**। हस्तादावायामशब्दप्रवृत्तिनिमित्तमाह — **तच्चायामेति**। **मानं** परिच्छेदकम्। नैरपेक्ष्यमेवाह — **तथा हीति**। गवाश्ववद्विरुद्धयोः कथं सामानाधिकरण्यपक्षः, अत आह — **रूढीति**। परिमाणशब्दयोगाश्रयणे संख्यायाः परिच्छेदकत्वाव्यभिचारात् परिमाणमिति विशेषणं व्यर्थमिति शङ्कते — **नन्विति**। **एवमपि** योगाश्रयणे सति। [12]संख्याया विशेषण-

---

[1] पा. सू. ४.१.९५.
[2] पा. सू. ४.१.१०१.
[3] पा. सू. ५.१.३७.
[4] पा. सू. ५.१.२८.
[5] पा. सू. ४.१.२२.
[6] पा. सू. ५.१.२१.
[7] पा. सू. ५.१.३४.
[8] संख्येयाभेद — अ, ऋ, लृ.
[9] 'प्रस्थस्य न कुतश्चिद्विशेषो गम्यते' इति भाष्ये कुतश्चिदित्यनेन संख्याया अपि ग्रहणे सामान्यनिषेधः स्यात्, तन्नास्तीति भावः।
[10] पा. सू. ५.२.३८.
[11] पा. सू. ६.४.१६४.
[12] प्रदीपे 'संख्याया विशेषणमनर्थकम्' इत्यत्र 'संख्याविशेषणमनर्थकम्' इत्यन्नंभट्टपाठ इति भाति।

मिति विग्रहः। **पञ्चक इति**। पञ्च परिमाणमस्य संघस्येति [1]'संख्यायाः संज्ञा' इति सूत्रोक्ते संघेऽर्थे [2]'संख्याया अतिशदन्तायाः' इति कनप्रत्ययः। ननु संघस्य [3]पञ्चसंख्यावच्छिन्नत्वे एकवचनानुपपत्तिः। अत्राहुः — संख्या यथा संख्येयद्वारा संघपरिच्छेदिका पञ्चानामेवायं संघ इति, तत्र प्रत्ययः। यत्र तु गवाश्वादीनां बहूनां संघे पञ्च गावः सन्ति, अन्येऽश्वादयः, तत्र पञ्च गावोऽस्य संघस्येत्यत्र प्रत्ययो न भवतीति। परिमाणादिति त्यक्त्वा संख्याया इति वक्तव्यमिति भ्रमं वारयति — **लक्ष्यसिद्धय इति**। यद्यप्यत्रापि योगाश्रयणे संख्यापि परिमाणग्रहणेन संगृह्यते, तथापि परिमाणस्य तत्र संख्याविशेषणत्वात्, 'पङ्कजं कुमुदम्' इतिवद् योगाश्रयणं युक्तम्, नात्र रूढित्यागे मानमस्तीति भावः। संशयबीजमाह — **किमिति**। **अत्र** सूत्रभाष्ययोः। **वस्न**शब्दो मूल्यवचनः। ननु शतमर्हति 'शत्यो ब्राह्मणः' इत्यादौ कथं वस्नेनान्यथासिद्धिः, अत आह — **पटादेरिति**। तत्रैवायं साधुरित्यभिमानः। तत्रापि वस्नेनान्यथासिद्धिशङ्कां निराह — **न हीति**। 'अस्मै' इति कथमुक्तम्, अत आह — **अधिकरणत्वमिति**। यस्मै दीयते तस्य दीयमानवस्त्वधिकरणत्वसंभवात् संप्रदानत्वविवक्षा प्रकृते संभवतीति भावः। ननु तत्र वृद्ध्यादिपञ्चकस्य दानकर्मत्वे प्रत्ययः। न च मांसौदनादिस्तदन्तर्गतः, अत आह — **तदस्मिन्निति**। 'तदस्मिन्, वृद्ध्यायलाभशुल्कोपदाः, दीयते' इति योगत्रयम्। उत्तमर्णायाधमर्णेन मूलधनादधिकं यद्दीयते सा **वृद्धिः**। ग्रामादिषु स्वामिग्राह्यो भागः **आयः**। पटादीनामुपादानमूल्यादधिकं द्रव्यं **लाभः**। रक्षानिर्वेशो राजभागः **शुल्कः**। उत्कोचः **उपदा**। प्रथमेनैव सर्वेष्टसिद्धौ द्वितीयस्य किं प्रयोजनम्, अत आह — **पूर्वयोगस्येति**। योगविभागस्येष्टसिद्धिमात्रं प्रयोजनमिति भावः। सूत्रे 'अस्मिन्' इति वर्तते, 'अस्मै' इति कथं लभ्यते, अत आह — **तदस्मा इति**। ननु [4]"तदर्हम्' इत्यनेन योग्यतामात्रे स्यात् प्रत्ययः, अनेन दाने सत्येवेति कथमनेनान्यथासिद्धिः, अत आह — **यद्यपीति**॥

[४, २२–२७]

(**नारायणीयम्**) **आचार्यदेशीय इति**। आचार्यकल्पः, न त्वाचार्य एव[5], हेयत्वादस्य पक्षस्य। **औद्दालकायन इति**। [6]'यञिञोश्च' इति यूनि फक्। [7]**यदभावपक्ष इति**। [8]'यतस्तु वचनसामर्थ्याल्लुगभावः। ठन्यतावप्यत्र न संभवत इत्याह — **शताच्चेति**। **रूढो न संख्यामिति**। [9]'रूढिर्योगमपहरति' इति न्यायात्। एतदेवोपपादयति — **यथेति**। ननु भेदगणनं संख्येति लक्षणमेकत्वे न व्याप्नोतीत्यत आह — **एक इति**। **अमूर्तमपीति**। एक आत्मा, बहवश्चात्मानः, एकमाकाशमित्यादि। **दिष्टिप्रस्थेति**। असर्वगतद्रव्यपरिमाणं मूर्तिः, तत्परिच्छेदाय दिष्ट्यादि[10]प्रमाणं प्रस्थादि परिमाणं सुवर्णाद्युन्मानं [11]च भवति। तेन मूर्तद्रव्यविषयाण्युन्मानादीनीत्युक्तं भवति। कालस्त्वमूर्तक्रियापरिच्छेदहेतुः, यथा मासमधीते संवत्सरमधीत इति।

---

[1] पा. सू. ५.१.५८.
[2] पा. सू. ५.१.२२.
[3] पञ्चसंख्यापरिच्छिन्नत्वे — ऋ.
[4] पा. सू. ५.१.६३. 'तदर्हति' इति सूत्रं विवक्षितम्।
[5] एवकारो नास्ति — ङ.
[6] पा. सू. ४.१.१०१.
[7] प्रदीपे 'यत्प्रत्ययाभावात् पक्षे' इत्यत्र 'यदभावपक्षे' इति पाठोऽभिमत इति भाति।
[8] यत्प्रत्ययस्य त्वित्यर्थः।
[9] लौ. न्या. द्वितीयभागे पृष्ठम् ७०.
[10] परिमाणं — ङ.
[11] चकारो नास्ति — ङ.

संख्या तु मूर्तामूर्तस्य सर्वस्य परिच्छेदं करोति, प्रमाणादेश्च — एका वितस्तिः, चत्वारः प्रस्थ पञ्च पलानीत्यादि। 'न कुतश्चित्' इत्यत्र संख्याया अन्यतः कुतश्चिदित्यर्थो विवक्षित इत्य — **संख्ययैवेति**। 'समानाकृतेः' इति विशेषणकृत्यं दर्शयति — **भिन्नसंनिवेशस्येति**। प्रस्थान्त दारोहपरिणाहाभ्यां विलक्षणस्येत्यर्थः। **हस्त्यादेः प्रमाण एवेति**। अत एव प्रमाणाधिका विहितः [1]'पुरुषहस्तिभ्यामण् च' इत्यण् भवति 'हास्तिनमुदकम्' इति। **द्रव्यान्तरेति**। प्रसि परिमाणेन द्रव्यान्तरेण गुञ्जादिना परिच्छिन्नं गुरुत्वं यस्य तेनेत्यर्थः। **ऊर्ध्वारोपणादिति** पाषाणादिकं हि तुलादण्डादावूर्ध्वमारोप्य सुवर्णादेर्गुरुत्वं तेन परिच्छिद्यते। 'दारुवस्त्रादीना इत्यादिशब्देनोर्ध्वाधरदिगवस्थितस्योदकादेर्ग्रहणम्। **प्रत्ययार्थस्येति**। पञ्च गावोऽस्य गोसंघस 'पञ्चको गोसंघः' इत्यत्र प्रकृत्यर्थस्यैव वस्तुतः प्रत्ययार्थत्वात् प्रत्ययार्थ एव संख्यया परिच्छिद्यते **अस्य संघस्येति**। ब्राह्मणादिसंघस्येत्यर्थः। **अर्हतिशब्दैकदेशानुकरणमिति**। [2]'तदर्हम्' इत्य त्ववधिर्न भवति, लक्ष्यमूलाद्व्याख्यानात्। ननु [3]'तदस्मिन् वृद्ध्याय' इत्यादिना वृद्ध्याद्युपाधिका प्रत्ययो विधीयत इति मांसौदनिकादौ न स्यादित्यत आह — **तत्र तदस्मिन्निति**। **विशिष्टस्व रूपनित्यशब्दव्युत्पत्तिरिति**। येन केनचिदुपायेनार्थरूपाविरोधेन नित्यः शब्दो व्युत्पाद्यः, उपायान नियमाभावादित्यर्थः॥

असमासे निष्कादिभ्यः ५.१.२०.

[४, २७–३०]

(विवरणम्) ठगभावे कथं परमनैष्किकसिद्धिरित्यत आह — **ठञेवेति**। [4]'परिमाणान्तस्य' इत्युत्तरपदवृद्धिः। ननु ठञ्प्रतिषेधायासमासग्रहणं चेत् असमर्थसमासपरिहाराय 'न समासे' इति वक्तव्यमित्यत आह — **निष्कशब्दस्येति**। **प्रयोजनानीति**। 'एवं तर्हि' इत्यादिना भाष्ये- णेति शेषः। यत्र विशिष्टप्रकृत्युपादानं तत्र विशिष्टप्रकृत्यन्तस्य विशिष्टप्रकृतित्वाभावात् तदन्त- विधिना प्रयोजनम्। [5]'स च प्रत्ययविधौ प्रतिषिध्यते। यत्र तु न विशिष्टा प्रकृतिरुपादीयते तत्रासमासादिव समासादपि विनैव तदन्तविधिना प्रत्ययः प्राप्नोतीति न तदन्तविधि[6]प्रतिषेधोऽ- पीत्याह — **यत्रेत्यादिना**। व्यपदेशिवद्भावस्य [7]'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति निषेधं हृदि निधाय शङ्कते — **यद्येवमिति**॥

[४, २७–३०]

(उद्द्योतनम्) वक्ष्यमाण इति। 'ग्रहणवता प्रातिपदिकेन' इत्यादिनेत्यर्थः। **ठञेवेति**। अपवादाभावे उत्सर्गस्य प्रवृत्तेरित्यर्थः। 'परमनैष्किकम्' इत्यत्र [8]'परिमाणान्तस्य' इत्युत्तरपद- वृद्धिः। एतस्य सूत्रस्य प्रयोजनमाह — **निष्कशब्दस्येति**। व्याख्यानभाष्यानुसारेण वार्तिककृतोऽज्ञत्वं

---

[1] पा. सू. ५.२.३८.
[2] पा. सू. ५.१.११७.
[3] पा. सू. ५.१.४७.
[4] पा. सू. ७.३.१७.
[5] तदन्तविधिश्चेत्यर्थः।
[6] प्रतिषेधोऽपीत्यत आह — ल; प्रतिषेध इत्याह — व.
[7] परिभाषा ३२.
[8] पा. सू ७.३.१७.

प्रतीयते। तन्निराह — **पूर्वत्रग्रहणमिति**। **अविवक्षितार्थमिति**। 'इत उत्तरम्' इति भाष्यानुरोधात्। [1]उक्तसंभवमाह — **केवलादिति**। समासभिन्नादिति यावत्। **आभासेति**। प्रातिपदिकसामान्यग्रहणे बाधकाभावाद् विशेषग्रहणमाभास इत्यर्थः। युक्त्याभासं दूषयति — **यत्र विशिष्टेति**। **प्रतिषेधः** [2]'ग्रहणवता' इत्यनेन। **न विधिरिति**। समासस्यापि प्रातिपदिकत्वेनैव प्रत्ययसिद्धेस्तदन्तविधेर्न प्रसङ्गः। अत एव न प्रतिषेध इत्यर्थः। [3]'अगोपुच्छ' इति प्रतिषेधात् कथं ठक्, अत आह — **ठक्प्रतिषेधादिति**। **यद्येवमिति**। तदन्तविध्यङ्गीकारे तदन्तस्यैव प्रतिषेधः स्यात्, न केवलस्येत्यर्थः। व्यपदेशिवद्भावेन केवलादपि प्रतिषेधं वक्तुं [4]'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति निषेधात् कथमत्र व्यपदेशिवद्भाव इति शङ्कां तावन्निराह — **यस्यामिति**। [5]परिभाषाद्वयानुपस्थाने इष्टसिद्धिरित्याह — **तेनेति**। परिभाषाद्वयानुपस्थानज्ञापनेनेत्यर्थः। [6]'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति [7]'ग्रहणवता' इति च परिभाषाद्वयं [8]'पूर्वादिनिः, [9]सपूर्वाच्च' इति ज्ञापकसिद्धं [10]'येन विधिः' इति सूत्रे उक्तम्। 'विधौ प्रतिषेधः' इति कथं विशेषो लभ्यते, अत आह — **पूर्वादिनिरिति**। पूर्वग्रहणेनैव तदन्तविधिना 'कृतपूर्वी कटम्' इत्यादावपीनिसिद्धेः सपूर्वग्रहणं 'ग्रहणवता' इति परिभाषाज्ञापकम्। तर्हि केवलात् प्रतिषेधो न स्यात्, अत आह — **नापि व्यपदेशिवद्भावेति**। [11]विधावेव सोऽपि प्रतिषेध इत्यर्थः। 'प्रतिषेधश्चायम्' इत्येतत् परिभाषाद्वयोपस्थानं प्रतिषेधे नास्तीत्येवंपरतया व्याख्यायात्र ज्ञापकस्य प्रयोजनं नास्तीत्येवंपरतया व्याचष्टे — **अन्ये त्विति**। **सर्वत्र** केवले तदन्ते च। ननु वचनापेक्षया ज्ञापकाश्रयणं लघु, अत आह — **तच्चावश्यमिति**। नियममेवाह — **संख्येति**। नियमकृत्यमाह — **इहेति**। प्रयोजनान्तरमाह — **तथेति**। **नन्विति**। [12]'खलयवमाष' इत्यत्र माषशब्दस्यार्थवतो ग्रहणाद् राजमाषशब्दे माषशब्दस्य निरर्थकत्वात् तदन्तात् प्रत्ययो न प्राप्नोतीत्यर्थः। **यथेति**। एकविंशत्यादिशब्दानां जातिविशेषवाचित्वेऽपि योगोऽपि प्रतीतोऽङ्गीक्रियते पङ्कजादिवत्, तथा राजमाषादिशब्दा अपीत्यर्थः। पदे वर्णानामिव वाक्ये पदानामपि निरर्थकानामेव कल्पितमर्थमादाय संस्कारः क्रियते। स च राजमाषादावप्यस्तीत्याह — **शब्दसंस्कारायेति**। वाक्यस्यैवार्थप्रत्यायकत्वे हेतुः — [13]**वाक्यस्यैवेति**। वृद्धव्यवहारात् शक्तिग्रहः, स च वाक्यस्यैव, पदानां त्वावापोद्वापाभ्यामर्थभेदकल्पनया संस्कारोऽङ्गीक्रियत इति भावः। **अञ्ठञोरिति**। अञो वैकल्पिकत्वात् पक्षे ठञोऽपि संभव इत्यन्यतरस्य लुगित्यर्थः। **अञ्भावे** [लुगन्तायाः प्रकृतेस्तदन्तविधिना ग्रहणाभावात्]। **परिमाणेति**। परिमाणान्तस्याङ्गस्य संबन्धिनः संख्यायाः परस्यादिवृद्धिर्ञ्निदादौ परे, न तु संज्ञायां शाणे चोत्तरपदे॥

---

[1] उक्तिसंभवमाहेत्युचितं भाति।
[2] परिभाषा ३१.
[3] पा. सू. ५.१.१९.
[4] परिभाषा ३२.
[5] ग्रहणवता, व्यपदेशिवद्भावोऽप्रातिपदिकेनेति परिभाषाद्वयेत्यर्थः।
[6] परिभाषा ३२.
[7] परिभाषा ३१.
[8] पा. सू. ५.२.८६.
[9] पा. सू. ५.२.८७.
[10] पा. सू. १.१.७२.
[11] विधावपि सोऽपि — अ.
[12] पा. सू. ५.१.७.
[13] प्रदीपे 'तस्यैवार्थस्य' प्रत्यायनाय' इत्यत्र 'वाक्यस्यैवार्थप्रत्यायनाय' इत्यन्नंभट्टपाठ इति भाति।

[४, २७–३०]

(नारायणीयम्) निष्कशब्दस्य परिमाणवाचित्वादिति। पूर्वसूत्रे परिमाणशब्देन परिच्छेदकमात्रं गृह्यत इत्युन्मानादेरपि ग्रहणसिद्धिरिति भावः। 'ऊर्ध्वमानं किलोन्मानम्' इत्यादिना भेदेन लक्षणकथनस्य त्वन्यत्रोपयोगः [१]'प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये' इत्यादौ। **आभासमात्रेणेति**। ईषद्भानमात्रेणेत्यर्थः। तेनातितुच्छत्वमस्य प्रयोजनस्योक्तम्। **यद्येवं केवलस्येति**। व्यपदेशिवद्भावो ह्यत्र नास्ति, अप्रातिपदिकेनेति प्रतिषेधादिति भावः। 'विधौ प्रतिषेधः' इत्ययं विशेषः कथं लभ्यत इत्यत आह — **पूर्वादिनिरिति**। यदि ग्रहणवता प्रातिपदिकेन तदन्तविधिः स्यात् [२]'पूर्वादिनिः' इत्येव वक्तव्यं स्यात्, न तु [३]'सपूर्वाच्च' इति, 'कृतपूर्वी कटम्' इत्यादौ तदन्तविधिनैव सिद्धत्वात्। कृतस्तु तदन्तविधेरभावं [४]ज्ञापयति। तथा, यदि 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति परिभाषा न स्यात् [५]'सपूर्वाच्च' इत्येव वाच्यम्, न तु [६]'पूर्वादिनिः' इति। कृतं तु तत् तस्याः परिभाषाया ज्ञापकमिति योगद्वयेन परिभाषाद्वयं ज्ञाप्यते। **नापीति**। तत्रैव ज्ञापितत्वात्। **अन्य इति**। भाष्यकारादन्य इत्यर्थः। **ननु राजमाषशब्दस्येति**। यद्यपि माषाणां राजा राजमाष इति व्युत्पत्तिः क्रियते, तथापि रूढ्या जात्यन्तरमेव तेनाभिधीयत इति माषशब्दस्य वर्णवदानर्थक्यादनर्थकेन तदन्तविधेरभावात् प्रत्ययो न स्यादित्यर्थः। **नावयवानामानर्थक्यमिति**। अत एवात्र समानाधिकारणादि[७]समासो भवति, काल्पनिकेनार्थेनार्थवत्त्वात्। एतच्च सर्वत्र समानमित्याह — **शब्दस्संकाराय हीति**॥

शताच्च ठन्यतावशते ५.१.२१.

[४, ३०–३१]

(विवरणम्)। [**बहिरङ्गमितीति**।] प्रकृत्यर्थव्यतिरिक्तं शतत्वं हेयमपि, 'शत्यं शाटकद्वयम्' इत्यपि दर्शनात्। तथैकत्वसंख्याव्यतिरिक्तद्वित्वादिसंख्यासाधारणं तत्, 'शत्ये शाटकशते' इत्यपि दर्शनादिति भावः॥

[४, ३०–३१]

(उद्द्योतनम्) अत्र प्रकृत्यर्थाभिन्नस्य शतस्य प्रत्ययार्थत्वे 'अशते' इति प्रतिषेधः, न तु संख्येयान्तरशतस्येति प्रतिपादनाय वार्तिकम्। तदुपपादनाय सूत्रं विवेचयति — **संख्याया इति**। असंभवे हेतुः — **न हीति**। प्रकृत्यर्थव्यतिरिक्तं संख्येयान्तरं [८]यस्य शतत्वस्य। अन्तरशब्दः

---

[१] महाभाष्यम् ५.२.३७.
[२] पा. सू. ५.२.८६.
[३] पा. सू. ५.२.८७.
[४] शास्ति — ङ.
[५] पा. सू. ५.२.८७.
[६] पा. सू. ५.२.८६.
[७] आदिशब्देन माषाणां राजेति षष्ठीतत्पुरुषग्रहः।
[८] यस्येत्यस्य विषय इत्यादिर्बोध्यः।

[1]प्रातिपदिकं स्पष्टप्रतिपत्त्यर्थो वेत्याहुः। आद्यमुदाहरति — **तत्रेति**। तयोर्मध्ये। द्वितीयमुदाहरति — **अपरं त्विति**। ननु ग्रन्थस्य प्रत्ययार्थत्वात्, तस्य कथं प्रकृत्यर्थशताभेदः, अत आह — **अत्र हीति**। **प्रत्ययोत्पादनायेति**। [2]'तदस्य परिमाणम्' इत्यर्थसंगतय इत्यर्थः। **तात्त्विकस्त्विति**। समुदायसमुदायिनोरभेदादिति भावः। ननु प्रत्ययार्थस्य शतत्वे शतक इत्येकत्वं न स्यात्, अत आह — **प्रत्ययार्थस्येति**। एवं सूत्रार्थं विविच्य वार्तिकमवतारयति — **तत्रेति**। नेदं वचनसाध्यम्, किं तु न्यायसिद्धमित्याह — **अत्र केचिदिति**। न्यायमेवाह — **प्रकृत्यर्थस्येति**। प्रकृत्युपात्तत्वेनान्तरङ्गत्वम्, प्रकृत्यर्थस्य त्यागासंभवादहेयत्वम्, शतत्वपरिच्छिन्ने संख्यान्तरासंभवादसाधारण्यम्। शाटकेति त्यक्त्वा गोशतमित्यपि संभवतीत्यहेयत्वं नास्ति, [3]शाटकादेः संख्यान्तरसाधारण्यं च स्पष्टमिति बहिरङ्गत्वमाह — **अन्यत्रेति**। शीघ्रोपस्थितिकस्यैव प्रतिषेधो युक्त इति भावः। प्रतिषेधेऽन्तरङ्गत्वमप्रयोजकम्, प्राप्तिमात्रापेक्षत्वात् प्रतिषेधस्येत्याशङ्क्य मतान्तरमाह — **अन्ये त्विति**। **ग्रन्थस्य** अध्यायसमुदायरूपस्य। शतत्वं समुदायगतम्। भवत्वनुमेयत्वम्, प्रकृते किमायातम्, अत आह — **तत्र यथेति**। वृक्षगतमेकत्वं प्रत्यक्षम्, अवयवभेदेन भेदकल्पनया बहुत्वमनुमेयमिति बहुवचनं न संभवतीत्यर्थः। **एवमिति**। ग्रन्थे शतत्वाभावादित्यर्थः। **वार्तिकेति**। तथा च वार्तिकमावश्यकमित्यर्थः। तर्हि प्रतिषेधस्य का गतिः, अत आह — **तत इति**। **एवं च सतीति**। प्रकृत्यर्थशतस्य प्रत्ययार्थत्वे प्रतिषेधे सतीत्यर्थः। **इत्यत्रापीति**। न तु ग्रन्थ एव प्रत्ययार्थे प्रतिषेधो नान्यत्रेति नियम इत्यर्थः। व्याकरणान्तरे 'शताच्च ठन्यतावग्रन्थे' इति सूत्रं कृत्वा ग्रन्थ एव प्रतिषेधो नान्यत्रेत्युक्तम्। तदाह — **आपिशलेति**। तद्वचनमिदानीं न ग्राह्यमित्याह — **नियतकाला इति**। नन्वनादिशब्दत्वं साधुत्वम्, तथा च कदाचिदपि साधोः सर्वदा साधुत्वमेवेति कथं कालभेदेन व्यवस्था। अत्राहुः — भाष्यविरुद्धयोः सूत्रवार्तिकयोरग्राह्यत्ववत् तद्विरुद्धं स्मृत्यन्तरमप्यग्राह्यम्। यद्वा, गमिरंहत्यादीनां देशभेदेन [4]नियतप्रयोगवत् शत्यशब्दस्यापि कालभेदेन नियतविषयः प्रयोगः। पूर्वं ग्रन्थ एव प्रयोग इति तदनुसारि स्मृत्यन्तरम्, इदानीं सर्वत्र प्रयोग इत्यनया स्मृत्या ज्ञाप्यत इत्यत्र तात्पर्यम्॥

[४, ३०–३१]

(नारायणीयम्) तत्राद्यस्येति। प्रकृत्यर्थादन्यस्य शतत्वे गम्यमाने प्रतिषेधाभावविज्ञानात्। **केचिदिति**। अर्थबलवादिनः। **तत्रान्तरङ्गमिति**। 'शतको ग्रन्थः' इत्यत्र शब्दान्तरप्रयोगं विना प्रत्ययार्थस्य शतत्वं गम्यत इत्यन्तरङ्गम्। नापि शतत्वं कदाचिदपि जहाति। **संख्यान्तरासाधारणमिति**। प्रत्ययार्थगतत्वेन संख्यान्तराभावात्। **बहिरङ्गमिति**। हेयं संख्यान्तरसाधारणं चेति द्रष्टव्यम्, 'शत्यं शाटकदशकम्' इत्यादेरपि संभवात्। **अन्ये त्विति**। शब्दबलवादिनः। **शतत्वमनुमीयत इति**। अवयवानामध्यायानां शतत्वात्। **अन्यशतत्व इति**। अत्र हि प्रत्यक्षं

---

[1] राजान्तरमित्यादाविवोत्तरपदमात्रतयागच्छन् अन्यवाचको नात्रान्तरशब्दः, व्यतिरिक्तमित्यनेनान्यत्वस्योक्तत्वात् पौनरुक्त्यापत्तेः। किं तु विशेषरूपार्थवाचकं स्वतन्त्रं प्रातिपदिकम्, अन्यदेवेदं परिभाषान्तरमितिवत्, इत्याशयः स्यादिति भाति।

[2] पा. सू. ५.१.५७.

[3] शाटकद्वयमित्यादेरपि संभवादिति भावः।

[4] 'नियतप्रयोगवत्' इत्यादि 'कालभेदेन' इत्यन्तं नास्ति — अ.

[1]प्रत्ययार्थस्य शतत्वमिति तत्रैव प्रतिषेधः स्यादित्यर्थः। [2]काशकृत्स्नादौ तु 'शताच्च ठन्यतावग्रन्थे' इति पाठः। तद् दूषयति — **आपिशलेति**। शास्त्राणां विरोधे कथं व्यवस्थासिद्धिरित्यत आह — **नियतेति**॥

संख्याया अतिशदन्तायाः कन् ५.१.२२.

[४, ३१–३२]

(विवरणम्) अत एवेति। द्विदशच्छब्दस्य विन्भावे शतिचि च प्रत्यये निपात्यमान इति शेषः। अवश्यमन्वयव्यतिरेकगम्यार्थवत्तेह शास्त्रे ग्रहीतव्येत्याह — **अत एवेति। अभावादिति**। [3]'संपर्युपेभ्यः' इत्यादावर्थवत्परिभाषाश्रयणमनुपपन्नं स्यादित्यत इति शेषः॥

[४, ३१–३२]

(उद्द्योतनम्) ननु 'विंशतेश्च' इत्यपि वक्तव्यं विंशतिकमिति सिद्ध्यर्थम्, तस्यापि त्यन्त-प्रतिषेधप्रसङ्गात्, अत आह — **विंशतिशब्दादिति**। **अत एव** अर्थवतस्तिशब्दस्य ग्रहणात्। 'द्वेर्विन् शतिच्च'[4] इति द्वयोर्दशतोर्विन्भावः [5]शतिच्च प्रत्ययः। द्वौ दशतौ [6]परिमाणमस्य विं-शतिः। ननु वैयाकरणानां प्रकृतिप्रत्यययोरर्थभेदावगतिरस्ति, अत आह — **लौकिकीति**। यत्र संघातग्रहणं तत्रार्थवत्परिभाषोपस्थाने प्रत्ययस्याप्यनेकवर्णरूप[7]शब्दसंघातत्वादर्थवत्परिभाषोपस्थिति-प्रसङ्गः, अत आह — **यद्यपीति**। अर्थवद्ग्रहणपरिभाषाविषयं दर्शयति — **यथोक्तमिति**। [8]'येन विधिस्तदन्तस्य' इत्यत्रेदमुक्तम्। **संग्रहणे** [9]'संपर्युपेभ्यः करोतौ भूषणे' इत्यत्र। **उद्-ग्रहणे** [10]'उदः स्थास्तम्भ्वोः पूर्वस्य' इत्यत्र। **हन्ग्रहणे** [11]'इन्हन्पूषार्यम्णां शौ' [12]'सौ च' इत्यत्र। अन्वयव्यतिरेकगम्यार्थवत्ता शास्त्रे आश्रीयत इत्यत्र संवादमाह — **अत एवेति**। यद्यपि [13]लक्षण-

---

[1] प्रत्ययार्थशतत्वमिति — ङ.

[2] 'काशकृत्स्नादौ तु' इत्यादि 'आपिशलेति' इत्यन्तं नास्ति — घ; 'शास्त्राणाम्' इत्यादि 'नियतेति' इत्यन्तम्, ततः 'काशकृत्स्नादौ तु' इत्यादि 'तद् दूषयति' इत्यन्तं वर्तते, 'आपि-शलेति' इति नास्ति — ङ.

[3] पा. सू. ६.१.१३७. 'संपरिभ्यां करोतौ भूषणे' इत्यत्र 'संपर्युपेभ्यः करोतौ भूषणे' इति काशिकापाठः।

[4] भाष्यवाक्यार्थानुवादोऽयम्।

[5] 'शतिश्च' इति 'अ, ऋ, लृ' कोशेषु दृश्यते। काशिकायां तत्त्वबोधिन्यां चैवमेव दृश्यते। अस्मिन् सूत्रे कैयटे 'शतिचः' इति दृश्यते। 'पञ्क्तिविंशति' इति सूत्रे भाष्ये 'शतिच्-प्रत्ययो निपात्यते' इत्युपलभ्यते। पदम-मञ्जर्यां च 'चित्करणमन्तोदात्तार्थम्' इत्यु-च्यते। अतः 'शतिश्च' इत्यशुद्धमिति भाति।

[6] प्रमाणम् — अ, ऋ, लृ.

[7] 'शब्द' इति नास्ति — अ.

[8] पा. सू. १.१.७२.

[9] पा. सू. ६.१.१३७. 'संपरिभ्यां करोतौ' इत्यत्र 'संपर्युपेभ्यः करोतौ' इति काशिकायां पाठः।

[10] पा. सू. ८.४.६१.

[11] पा. सू. ६.४.१२.

[12] पा. सू. ६.४.१३.

[13] परिभाषा ११४.

प्रतिपदोक्तपरिभाषया तन्निरास उक्तः, तथापि 'अथवा पुनरस्तु' इत्यादिनायमपि परिहारः [1]'शे'-सूत्र उक्त इत्यर्थः। न केवलं प्रत्ययानामेवान्वयव्यतिरेकगम्यार्थवत्त्वमाश्रीयते, किं तूपसर्गाणामपीत्याह — **उपसर्गाणामपीति**। [2]'ते प्राग् धातोः' इति नियमादिति भावः॥

[४, ३१–३२]

(नारायणीयम्) **प्रत्यया अपि शब्दसंघाता इति**। वर्णसंघातरूपत्वात्। **संग्रहण इति**। समादेरुपसर्गरूपत्वादर्थवत्त्वात्। **गर्मुत्स्थास्यतीति**। [3]'उदः स्थास्तम्भ्वोः पूर्वस्य' इति पूर्वसवर्णो न भवति। **प्लीहानाविति**। [4]'इन्हन्पूष' इति नियमाभावात् [5]'सर्वनामस्थाने' इति दीर्घो भवति। यत्र भवतोऽर्थवत्त्वमभिमतं तत्रापि काल्पनिक्येवार्थवत्ता, न तात्त्विकीत्याह — **उपसर्गाणामपीति**॥

वतोरिड् वा ५.१.२३.

[४, ३२–३३]

(विवरणम्) न चैवं वाग्रहणस्य वैयर्थ्यमित्याह — [6]**ततश्चेति**॥

[४, ३२–३३]

(उद्द्योतनम्) [7]नन्वागमत्वानिश्चयात् कस्येति प्रश्नायोगः, अत आह — **टित्त्वादिति**। वतोरेवागमित्वं किं न स्यात्, अत आह — **पञ्चमीति**। व्याख्यानादिति भावः। **वत्वन्तस्येति**। प्रत्ययग्रहणपरिभाषया तदन्तलाभः। वत्वन्तात् कन्प्रत्ययः कथम्, अत आह — **वत्वन्तस्येति**। [8]'बहुगणवतु' इत्यनेन। ननु वत्वन्ताद् [9]भवाद्यर्थे प्रत्ययान्तरस्य संभवात् तस्यापीडागमः किं न स्यात्, अत आह — **आनन्तर्यादिति**। **अनेकस्येति**। भवाद्यर्थेऽणादेरित्यर्थः। संख्यायाः परत्वेन सर्वेषामुपस्थित्यविशेषादिति भावः। भाष्यस्थं [10]हेत्वन्तरमाह — **प्रत्ययेति**। टित्त्वात् कथं प्रत्ययत्वम्, अत आह — **चरेरिति**। ननु टित्त्वसामर्थ्यादनकारान्तात् ङीप् कथं स्यादित्याशङ्क्य दृष्टान्तमाह — **यथेति**। 'श्वेतवाः' इत्यादौ। **अथेति**। यथा 'पुत्रकाम्या' इत्यत्र प्रयोजनाभावात् ककारस्य नेत्संज्ञा तथात्राप्यत इत्यधिकारादीकाराप्रसङ्गात् टस्य नेत्संज्ञेत्येव कल्प्यताम्, इत्संज्ञामङ्गीकृत्य प्रकरणबाधः कथमुच्यत इत्यर्थः। **नैतदिति**। [11]श्रुतिलिङ्गाधिकरणन्यायेन

---

[1] पा. सू. १.१.१३.
[2] पा. सू. १.४.८०.
[3] पा. सू. ८.४.६१.
[4] पा. सू. ६.४.१२.
[5] पा. सू. ६.४.८.
[6] प्रदीपे 'तत्रेट्कनौ वा भवतः' इत्यत्र 'ततश्चेट्कनौ वा भवतः' इति विवरणकृदभिमतः पाठ इति भाति।
[7] नन्वागमत्वनिश्चयात् — अ.
[8] पा. सू. १.१.२३.
[9] भेदाद्यर्थे — लृ०
[10] हेत्वन्तरमित्याह — अ.
[11] मीमांसातृतीयाध्यायतृतीयपादसप्तमाधिकरणे 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति सूत्रोक्तन्यायेनेत्यर्थः।

प्रकरणाच्छ्रुतिर्बलीयसीति श्रुत्या प्रकरणस्यैव बाधः, न तु वैपरीत्यम्। अत्र प्रकरणस्य प्रयोजनाभावसंपादनद्वारा श्रुतिविरुद्धत्वात् [1]तया तद्बाधे ईकाररूपप्रयोजनं संभवतीत्यर्थः। प्रत्ययविधौ पञ्चम्याः प्रकल्पकत्वाभावं सहेतुकमाह — **पञ्चमीति**। अनुवृत्तौ हेतुः — **स्वरितत्वेति**। **नन्विति**। इड्बाधा मा भूदिति पुनर्विधानार्था कननुवृत्तिः, वाकारश्च ठञ्नुज्ञानार्थः किं न स्यादित्यर्थः। **नैष इति**। वत्वन्तस्यापि संख्यात्वेन पूर्वसूत्रेणैव विहितत्वान्नात्र विधानार्थानुवृत्तिरिति प्रतीतिः स्वरसतो जायते। विहितस्य कनः सिद्धत्वात् [2]'तस्मात्' इति परिभाषाप्युपतिष्ठत इत्यागमित्वमेवेत्यर्थः। ननु पुनर्विधानस्यापि प्रयोजनमुक्तम्, अत आह — **तत्रेति**। **अनिष्टेति**। प्रत्ययत्वस्येष्टत्वेऽनेकबाधोऽपि कल्प्य एवेति भावः। विहितत्वप्रतीतेः परिभाषायाश्च बाधोऽनेकबाधः। एवं [3]न्याय्यमुक्त्वेष्ट[4]सूचितं हेतुमाह — **लक्ष्यस्येति**॥

[४, ३२–३३]

(नारायणीयम्) वतोरिति पञ्चमीनिर्देशादिति। पञ्चमीप्रकरणात् पञ्चीनिर्देशोऽयम्, न तु षष्ठीति भावः। **वत्वन्तस्य संख्यात्वादिति**। [5]'बहुगणवतुडति' इत्यनेन। **संख्यायास्तावदिति**। व्याप्तिन्यायाश्रयणादिति भावः। **हलन्त्यमिति श्रुतेरिति**। प्रकणाच्छ्रुतिर्बलीयसीति नयविद आहुः। **सर्वानुग्रह इति**। प्रतीतेः परिभाषायाश्च बाधाभावादनुग्रह इष्टसिद्धिश्च यथा भवति तथाश्रयणं युक्तमित्यर्थः॥

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ५.१.२४.

[४, ३३–३४]

(विवरणम्) नैतदस्तीति। स्वरूपनिर्देशे 'विंशतिकात्' इत्युपपत्तावपि स्वार्थिककन्नन्तत्वज्ञापनायार्थगतं स्त्रीत्वं स्वरूपे आरोप्य 'विंशतिकायाः' इति निर्देशः स्यादिति भावः॥

[४, ३३–३४]

(उद्द्योतनम्) ननु [6]विंशतिकशब्दात् खोऽत्र विधीयते, न कन्निपात्यते, अत आह — **कन्प्रत्ययेति**। [7]'संख्यायाः' इति सूत्रभाष्यविरोधमाशङ्कते — **नन्विति**। **विंशादेश इति**। निपातनस्य यथाकथंचिद् व्याख्यातुं शक्यत्वादिति भावः। शतिच्प्रत्ययपक्षे च तद्भाष्यमिति न विरोधः। ज्ञापकाश्रयणमेव युक्तमित्याह — **एवं हीति**। **अन्यथा** शतिच्प्रत्ययमाश्रित्य विंशतिक इत्यत्र त्यन्त[8]प्रतिषेधानङ्गीकारे। **शत इति**। त्रिदशच्छब्दस्य त्रिन्नादेशः शच्च प्रत्यय इति त्रिंशत्। अत्र तकारमात्रमादेशः, रिंशत् प्रत्ययः, यद्वा त्रिरादेशः, अनुस्वारादिः

---

[1] श्रुत्या प्रकरणबाध इत्यर्थः।
[2] पा. सू. १.१.६७.
[3] न्यायमुक्त्वा — अ, ऋ, लृ.
[4] इष्टशब्दसूचितमित्यर्थः।
[5] पा. सू. १.१.२३.
[6] विंशतिशब्दात् — अ, ऋ, लृ.
[7] पा. सू. ५.१.२२.
[8] प्रतिषेधाङ्गीकारे — अ, ऋ, लृ.

शत्प्रत्यय इति कल्पना क्लिष्टेति भावः। **नन्विति**। 'विंशतिकात्' इत्यनेन ककारमात्रं ज्ञाप्यते, न तु [1]कन्नित्यर्थः। **नैतदिति**। विंशत्या क्रीतमिति कनि [2]द्विलिङ्गम्। विंशतिशब्दस्य स्त्रीलिङ्गत्वात् स्वार्थे कनि 'विंशतिकायाः' [3]इति स्यादित्यर्थः। ज्ञापकात् कन्प्रत्ययः संज्ञा-संज्ञयोः साधारण इति भ्रान्ति वारयति — **असंज्ञायामिति**। योगापेक्षज्ञापकत्वं सदृष्टान्तमाह — **पुंवदिति**। [4]"स्त्री पुंवच्च' इति पुंवद्ग्रहणं [5]"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति [6]सूत्रा-प्रवृत्तिज्ञापकम्, न तु [7]स्नञ्मात्राप्रवृत्तिज्ञापकम्। अन्यथा स्त्रीवदिति न सिध्येदित्यर्थः। **एत-द्योगेति**। 'विंशतित्रिंशद्भ्याम्' इत्येतद्योगापेक्षमित्यर्थः॥

[४, ३३–३४]

(नारायणीयम्) ननु "विंशतिकात् खः' इत्येतन्न विंशतिकशब्दसाधुत्वार्थं निपातनम्, प्रत्यय-विधानार्थत्वात्, तस्येत्यत आह — **कन्प्रत्ययान्तेति**। कन्प्रत्ययान्तोच्चारणात् प्रसङ्गात् [8]तस्य साधुत्वमपि सिध्यतीत्यर्थः। **इत्येषा प्रक्रियेति**। नन्वेतत्प्रक्रियाश्रयणं किं गौरवापादनायेति, नेत्याह — **एवं हीति**। **शतोऽर्थवत्त्वादिति**। त्रयाणां [दशतां] त्रिन्भावः शच्च प्रत्यय इत्या-श्रयणात्। **विंशतिकाया इति**। स्वार्थिकानां लिङ्गानतिवर्तनात्॥

कंसाट्टिठन् ५.१.२५.

[४, ३४]

(उद्द्योतनम्) नन्वर्धशब्दस्यार्धिसापेक्षत्वेनासामर्थ्यात् कथं प्रत्ययः, अत आह — **अर्धशब्द इति**। रूढत्वेन सापेक्षत्वाभावात्। भागवदपेक्षायामसामर्थ्यमिति याशङ्का सा नास्तीत्यर्थः। अर्धसामान्यग्रहणमिति मतान्तरमाह — **अन्ये त्विति**। **सर्वस्य** आढकार्धस्यापि॥

[४, ३४]

(नारायणीयम्) सर्वस्येति। भागमात्रस्येत्यर्थः, न तु रूढ्या कार्षापणभागस्यैव॥

अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ५.१.२८.

[४, ३५–३७]

(उद्द्योतनम्) तत एवेति। तद्वदेवेदमपि व्याख्येयमित्यर्थः। तथा हि — तन्निमित्तमिति

---

[1] संख्याया इति विहितकन्नित्यभिप्रेतम्, स्वार्थिक-कनोऽस्याभिमतत्वात्।

[2] त्रिलिङ्गमित्युचितं भाति, क्रीतेत्यर्थे स्त्रीलिङ्ग-स्य विंशतिकाशब्दस्यापि संभवात्, क्रीत-मिति नपुंसकत्वस्याविवक्षितत्वात्। यद्वा द्वि-लिङ्गमपि भवतीति विवक्षितमिति भाति।

[3] इत्येव स्यादित्याशयः।

[4] पा. सू. १.२.६६.

[5] पा. सू. ४.१.८७.

[6] सूत्रप्रवृत्ति — अ, लृ.

[7] स्नञ्मात्रप्रवृत्ति — अ, ऋ, लृ.

[8] पा. सू. ५.१.३२.

[9] तत्साधुत्वमपि — घ.

षष्ठीसमासः। **द्विशूर्पमिति**। अञ्, 'अध्यर्धपूर्व' इति लुक्। **द्विशौर्पिकमिति**। ठञो द्विगुं प्रति निमित्तत्वाभावान्न लुक्। [1]'परिमाणान्तस्य' इत्युत्तरपदस्यादिवृद्धिः। **अर्थविशेषासंप्रत्यय इति**। द्विगुर्द्विविधः — तद्धितनिमित्तकस्तदन्यश्चेति। तत्र तद्धितनिमित्तद्विगुसमानार्थो यो द्विगुस्ततोऽतन्निमित्तादपि लुग् वक्तव्यः। तत्र द्वाभ्यां शूर्पाभ्यां क्रीतं, द्विशूर्प्या क्रीतमिति द्विगुद्वयं समानार्थम्। **तस्येति**। तद्धितस्येत्यर्थः। [2]**तन्निमित्तमस्येति**। तत् तद्धितस्वरूपमर्थद्वारेण निमित्तं यस्य द्विगोरित्यर्थः। **यदयमिति**। द्विशूर्प्या क्रीतमित्यत्रापि तद्धितस्य निमित्तं द्विगुरिति तन्निमित्तत्वादेव तत्रापि लुक्सिद्धेः 'अर्थविशेष' इति वार्तिकमनर्थकं स्यादित्यर्थः। [3]**निमित्तमिति**। षष्ठ्याश्रयणबलात् निमित्तनिमित्तिसंवन्ध एवाश्र्यते, न तु पौर्वापर्यमिति 'द्विशौर्पिकम्' इत्यत्र न लुक्प्रसङ्ग इति भावः। [4]**अव्यविकेति**। अव्यविकशब्दयोर्यो न्यायस्तेनेत्यर्थः। **एवमिति**। द्विशूर्पीशब्दात्त्वनभिधानात् तद्धितानुत्पत्तिरिति भावः। ननु पाञ्चलौहितिकादावलुगर्थमसंज्ञाग्रहणमिति वृत्तिकारैरुक्तत्वात् कथमानर्थक्यमुच्यते, अत आह — **इह वृत्तिकारा इति**। **संनिधानादिति**। असंज्ञायां यो द्विगुस्तस्माल्लुगिति झटिति प्रतीतेरित्यर्थः। संज्ञाप्रतिषेधनिमित्तत्वादित्यर्थभ्रमं निराह — **तस्या इति**। तदेव व्यनक्ति — **पञ्चलोहितेति**। ननु पञ्चलोहितशब्दस्य संज्ञात्वाभावात् तत्र कथमसंज्ञायामिति प्रतिषेधः, अत आह — **समाहारेति**। [5]**द्विगुसंज्ञां** द्विगुरूपसंज्ञाम्। अनेन वार्तिकस्य किं दूषणमुच्यते, अत आह — **तत्श्चेति**। ननु [6]पञ्चलोहितीशब्दात् प्रत्ययस्य द्विगुनिमित्तत्वाभावेन लुगभावाच्छ्रवणप्रसङ्गः, अत आह — **अव्यविकेति**। तेन पञ्चलोहित्या क्रीतमिति वाक्यमेव भवतीति भावः। अन्यत्र संख्याग्रहणेऽध्यर्धग्रहणं नेति ज्ञापनार्थमिहाध्यर्धग्रहणमिति वृत्तिकारोक्तं निराह — **न चेति**। तत्र हेतुः — **कनिति**। अध्यर्धेन क्रीतमध्यर्धकम्। [7]'संख्याया अतिशदन्तायाः' इति कन्। अध्यर्धेन शूर्पेण क्रीतम् अध्यर्धशूर्पम्। तद्धितार्थे द्विगुः, 'अध्यर्धपूर्व' इति ठञो लुक्। **तत्रत्यं** "बहुगणवतुडति' इति सूत्रस्थम्॥

[४, ३५–३७]

(नारायणीयम्) सूत्रकृद्वार्तिककृतोरत्र मतभेद इत्याह — **इह वृत्तिकारा इति**। **पाञ्चलोहितिकेति**। पञ्च लोहित्यः परिमाणमस्य, पञ्च कलापाः परिमाणमस्येति विगृह्य [9]'तद्धितार्थ' इति समासः। [10]'तदस्य परिमाणम्' इति ठञ्। [11]'भस्याढे तद्धिते' इति पुंवद्भावाल्लोहिनीशब्दस्येकारनकारयोर्निवृत्तिः। **संनिधानादिति**। श्रुतत्वात् संनिहितत्वात्। प्रत्ययान्तस्तु सामर्थ्यात् प्रतीयते। **तस्याः संज्ञाया इति**। लुकि सत्येव संज्ञा गम्यत इति संज्ञां प्रति लुको निमित्तत्वमुच्यते। तदेव विशदयति — **पञ्चलोहितेति**। केचिदाहुः — इहाध्यर्धग्रहणं क्वचित

---

[1] पा. सू. ७.३.१७.
[2] भाष्ये 'स निमित्तं यस्य' इत्यत्र 'स निमित्तमस्य' इति निर्णयसागरमुद्रिते पाठः। 'तत् निमित्तमस्य' इत्यन्नंभट्टपाठ इति भाति।
[3] तन्निमित्तमिति — अ, ऋ, लृ.
[4] भाष्ये 'अविरविकन्यायेन' इत्यत्र चौखाम्बामुद्रिते 'अव्यविकन्यायेन' इति पाठः।
[5] प्रदीपे 'समाहारद्विगुं संज्ञाम्' इत्यत्र 'समाहारद्विगुसंज्ञाम्' इत्यन्नंभट्टपाठ इति भाति।
[6] पञ्चलोहितशब्दात् — अ, ऋ, लृ.
[7] पा. सू. ५.१.२२.
[8] पा. सू. १.१.२३.
[9] पा. सू. २.१.५१.
[10] पा. सू. ५.१.५७.
[11] का. वा. ६.३.३५–११.

संख्याकार्याभावज्ञापनाय कृतमित्यतो न प्रत्याख्येयमिति, तत्राह — **न चेति** । **कन्समासाभावेति** । अत्र संख्याकार्यं भवति, अत्र न भवतीति विषयविशेषावगतौ प्रमाणाभावादिति भावः ॥

विभाषा कार्षापणसहस्राभ्याम् ५.१.२९.

[४, ३७]

(विवरणम्) ठञो लुगिति । परिमाणान्तत्वेन ठगभावात् ॥

[४, ३७]

(उद्द्योतनम्) ननु सुवर्णमुन्मानम्, न तु परिमाणमिति कथं [१]'परिमाणान्तस्य' इत्युत्तरपदवृद्धिः, अत आह — **उन्मानस्यापीति** । शाणमुन्मानम्, तस्य प्रतिषेधसामर्थ्यदुन्मानमपि परिच्छेदकत्वात् परिमाणशब्देन गृह्यत इत्यर्थः ॥

[४, ३७]

(नारायणीयम्) ठञो लुगिति । न तु ठकः, परिमाणपर्युदासात् । ननु सुवर्णस्योन्मानत्वात् कथं [२]'परिमाणान्तस्य' इत्युत्तरपदवृद्धिरित्यत्राह — **उन्मानस्यापीति** । शाणस्योन्मानत्वात् प्राप्त्यभावात् प्रतिषेधवचनमनर्थकम्, कृतं तु विधावुन्मानस्यापि ग्रहणं ज्ञापयतीत्यर्थः ॥

द्वित्रिपूर्वान्निष्कात् ५.१.३०. बिस्ताच्च ५.१.३१.

[४, ३७–३८]

(विवरणम्) अथेति । [३]'बह्वचोऽन्तोदात्तात्' इत्यत्र 'व्याख्यातव्यनाम्नः' इत्यनुवर्तत इति भावः ॥

[४, ३७–३८]

(उद्द्योतनम्) द्वित्रिपूर्वान्निष्कादार्हीयप्रत्ययस्य वा लुक्, द्वित्रिपूर्वाद् बिस्ताच्चार्हीयप्रत्ययस्य वा लुगिति द्वित्रिपूर्वादिति योगद्वयान्वयि, न तु [४]"विंशतिकात् खः' इत्यादाविति 'द्वित्रिभ्याम्' इति वार्तिकार्थः । **बह्वच इति** । द्वियोगशब्दः समासस्वरेणान्तोदात्तः । ननु व्याख्यातव्यनाम्नो बह्वचस्तेन ठञ् विधीयते । द्वियोगशब्दश्च न व्याख्यातव्यनाम । तथा च कथं ठञ्, अत आह — [५]**अथापीति** । **द्विगुः** तद्धितार्थे द्विगुर्द्वियोगशब्दः । **अण एव** प्राग्दीव्यतीयस्य ।

---

[१] पा. सू. ७.३.१७.
[२] पा. सू. ७.३.१७.
[३] पा. सू. ४.३.६७.
[४] पा. सू. ५.१.३२.
[५] प्रदीपे 'अथ द्विगुः' इत्यत्र 'अथापि द्विगुः' इति पाठोऽन्नंभट्टस्येति भाति ।

ननु द्वैयोग्यशब्देन भावप्रत्ययान्तेन द्वित्रिग्रहणस्य योगद्वयसंबन्धः कथं लभ्यते, अत आह — **द्वैयोग्यशब्देनेति**। तत्र भव इति प्रकृत्यर्थप्रत्ययार्थयोर्योऽयमाधाराधेयभावः स भावप्रत्ययवाच्यः। ततश्च योगद्वये द्वित्रिग्रहणं भवतीति द्वैयोग्यशब्दाल्लभ्यत इत्यर्थः। संबन्धाभिधाने हेतुः — **समासेति**। [1]'तस्य भावस्त्वतलौ' इति सूत्रे [2]इदं वचनम्॥

[४, ३७–३८]

(नारायणीयम्) अथ द्विगुनेति। नामग्रहणाद् रूढिपरिग्रहात्॥

खार्यां ईकन् ५.१.३३.

[४, ३८]

(उद्द्योतनम्) ननु 'खार्याः' इत्युक्त्या केवलाद् भविष्यतीति वचनं व्यर्थम्, अत आह — **अध्यर्धेति**॥

शाणाद्वा ५.१.३५.

[४, ३८]

(उद्द्योतनम्) पूर्वेण [3]'पणपादमाष' इत्यनेन। **कन इति**। [4]'संख्यायाः' इति विहितस्य। ननु 'द्वित्रिपूर्वादण् च' इति सूत्रमेवास्ति, किं वार्तिकेन, अत आह — [5]**'सूत्रेषु चेति**॥

तेन क्रीतम् ५.१.३६.

[४, ३९]

(उद्द्योतनम्) [6]षष्ठीसमासे व्याख्यानभाष्यविरोधः, इतरेतरयोगद्वन्द्वे द्विवचनेन भाव्यम्, अत आह — **समाहार इति**। [7]षष्ठीद्वयस्य सामानाधिकरण्ये परिमाणस्येति विशेषणं व्यर्थम्, 'पञ्चभिः क्रीतं पञ्चकम्' इत्याद्यसिद्धिश्च, अत आह — **परिमाणस्य या संख्येति**। त्रिकप्रातिपदिकार्थपक्षे वाचकम्, पञ्चकपक्षे द्योतकम्। परिमाणादेकवचनान्तादिति पर्यवसितार्थः। **मुद्गेति**।

---

[1] पा. सू. ५.१.११९.

[2] तस्मिन् सूत्रे इदं 'समासकृत्तद्धितेषु' इत्यादिवचनं कैयटेनोदाहृतम्। भर्तृहरिकृतमहाभाष्यटीकावचनमिदमिति भूषणसारे उक्तम्।

[3] पा. सू. ५.१.३४.

[4] पा. सू. ५.१.२२.

[5] निर्णयसागरहरयाणामुद्रितयोः प्रदीपयोः 'सूत्रेष्वनार्षः' इति दृश्यते। 'सूत्रे त्वनार्षः' इति चौखाम्बामुद्रिते। 'सूत्रेषु चानार्षः' इत्यन्नंभट्टपाठ इति भाति।

[6] संख्यैकवचनादित्यस्येत्यादिः।

[7] परिमाणस्य संख्याया इतीत्यादिः।

मुद्गादेः संख्यायाश्चापरिमाणत्वाद् द्विबहुवचनान्तादपि प्रत्ययो भवतीत्यर्थः। न केवलमनभिधानम्, युक्तिरप्यस्तीत्याह — **वृत्ताविति**। तर्ह्येकवचनान्तादपि न स्यात्, अत आह — **एकत्वेति**। **तेषां** परिमाणशब्दानाम्। **स्वभावत इति**। वस्तुमात्रे एकत्वस्यौत्सर्गिकत्वाद् द्वित्वादेर्वस्त्वन्तरसापेक्षत्वादिति भावः। तर्हि द्व्यादिभ्यः प्रत्ययो न स्यात्, एकवचनान्तत्वाभावात्, अत आह — **द्व्यादयस्त्विति**। शूर्पादीनां [1]विभक्त्या संख्याविशेषावगतिः, द्व्यादीनां तु प्रातिपदिकादेवेति ततः प्रत्ययो भवतीत्यर्थः। नन्वेवं मुद्गादेरप्येकवचनान्तादेव प्रत्ययः स्यात्, प्रातिपदिकेन संख्याविशेषानवगमादित्याशङ्क्य [2]किं मुद्गशब्दो व्यक्तिवाची जातिवाची वा? आद्ये सामर्थ्यलभ्यः संख्याविशेष इत्याह — **एकया चेति**। द्वितीये इष्टापत्तिमाह — **यदा त्विति**। अत्र यदा परिमाणशब्दे प्रकरणादिना संख्याविशेषावगमस्तत्र द्विवचनबहुवचनान्तेभ्यः प्रत्ययप्रसङ्गोऽनभिधानेनैव निरसनीयः। सूत्रस्यानुपयोगं शङ्कते — **नन्विति**। **वस्नः** मूल्यम्। बहुमूल्यस्य वस्तुनः स्नेहादिना यत्राल्पमूल्येन क्रयस्तदर्थमिदं सूत्रमिति समाधानाभिप्रायः। **मूल्यं न भवतीति**। न्यूनत्वेनाधिकत्वेन वा॥

[४, ३९]

(**नारायणीयम्**) [3]**समाहारे द्वन्द्व इति**। इतरेतरयोगे तु द्वन्द्वे 'संख्यैकवचनाभ्याम्' इति भाव्यम्। समाहारे तु तस्यैकत्वादेकवचनमुपपद्यते। **परिमाणस्य चेति**। परिमाणार्थगता यैकत्वसंख्येत्यर्थः। **वाचकं द्योतकं वेति**। त्रिकादि[4]पक्षे वाचकम्, पञ्चकादि[5]पक्षे द्योतकम्। अनभिधाने युक्तिमपि दर्शयति — **वृत्ताविति**। **स्वप्रवृत्तीति**। संख्याशब्दानां हि संख्या प्रवृत्तिनिमित्तम्॥

तस्य निमित्तं संयोगोत्पातौ ५.१.३८.

[४, ४०–४१]

(**विवरणम्**) **न तु निमित्तमिति**। निमित्तान्तरमित्यर्थः॥

[४, ४०–४१]

(**उद्द्योतनम्**) ननु प्रकृतिप्रत्ययसमुदायभेदेनार्थभेदस्य स्पष्टत्वात् प्रश्नायोगः, अत आह — **कोऽनयोरिति**। धातूनामनेकार्थत्वात् को वार्थविशेषोऽत्र विवक्षित इत्यर्थः। **न त्विति**। अर्थभेदस्य स्पष्टत्वादित्यर्थः। विशेषप्रश्नस्य प्रकृतोपयोगमाह — **कोऽसाविति**। **संयोगोत्पातौ** प्रकृतेऽभिमतौ। भेदच्छेदयोराश्रयभेदेन भेदमाह — **वस्त्रादेरिति**। भेदादीनामानन्त्यादनुगमकमाह

---

[1] द्विवचनादिनेत्यर्थः।

[2] 'किम्' इत्यस्यान्तरं तुशब्दोऽधिकः — लृ.

[3] समाहारद्वन्द्व इति — घ.

[4] अत्रादिशब्देन कारकेण सह चतुष्कपक्षस्य ग्रहणम्।

[5] अत्रादिशब्देन संख्यया सह चतुष्कं प्रातिपदिकार्थः, कारकमात्रं विभक्त्यर्थ इति पक्षोऽभिमत इति भाति।

— **भाविन इति**। यागादिवदुत्पातस्य फलकारणत्वरूपं निमित्तत्वं न संभवति, अत आह — **तस्य चेति**। सैन्धवादिवत् प्रकरणादिनार्थविशेषावगतिरित्याह — **प्रकरणेति**॥

[४, ४०–४१]

(**नारायणीयम्**) उक्तेऽर्थे भाष्यं योजयति — **कोऽसाविति**। संयुज्यते फलविशेषेण येनेति करणे घञ्इति दर्शयति। **स यागादिरिति**। अत एव 'पुत्रीयः क्रतुः, पुरोडाशसत्रं [1]'लोक्यम्' इत्यादिप्रयोगोपपत्तिः। एतच्चोपलक्षणम्, संबन्धोऽपि संयोगः परिगृह्यते। तेन [2]'ब्रह्मवर्चस्यो गुरुणा संयोगः' इत्यादिप्रयोग उपपद्यते। **शुभस्याशुभस्य वेति**। भाष्ये भेदादिरशुभस्य सूचक उदाहृतः। पद्मादि शुभस्योत्पाते। ज्ञापकत्वं निमित्तत्वं, न तु कारकत्वमित्याह — **तस्य चेति**॥

गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ५.१.३९.

[४, ४१]

(**उद्द्योतनम्**) ब्रह्मवर्चसशब्दार्थमाह — **ब्रह्मण इति**। ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगो गुरुर्वा ब्रह्मवर्चस्यः॥

[४, ४१]

(**नारायणीयम्**) **ब्रह्मणो वर्च इति**। ब्रह्मणो ब्राह्मणस्य वर्चस्तेजः। किं तदित्याह — **वृत्तेति**। **वृत्तम्** आचारः, **स्वाध्यायः** वेदादीनामध्ययनम्, तयोः **संपत्** संपूर्णतेत्यर्थः॥

तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ५.१.४७.

[४, ४१]

(**उद्द्योतनम्**) वचनस्य प्रयोजनमाह — **यत्रेति**। **इत्याह** इत्यत आह। संप्रदानेऽपि सप्तमीयोगं स्मृत्या दर्शयति — **सममिति**। [3]'द्विगुणं ब्राह्मणब्रुवे। श्रोत्रिये शतसाहस्रं पात्रे त्वानन्त्यमश्नुते॥' इति स्मृतिशेषः॥

[४, ४१]

(**नारायणीयम्**) **संप्रदानमेवेति**। विवक्षानिबन्धनत्वात् कारकाणाम्। क्व तथा विवक्षा दृश्यत इति चेत्, तत्राह — **यथा सममिति**। अब्राह्मणे दानमदानेन समम्, निष्फलमित्यर्थः॥

---

[1] लोकनिमित्तमित्यर्थे गोद्व्यच इत्यनेन द्व्यच्कत्वप्रयुक्तो यत्प्रत्ययो बोध्यः।

[2] गोद्व्यच इत्यत्रत्येन ब्रह्मवर्चसादुपसंख्यानमित्यनेन यत्प्रत्ययः।

[3] मनुस्मृतिः ७.८५. अत्रोत्तरार्धं 'प्राधीते शतसाहस्रमनन्तं वेदपारगे' इति दृश्यते।

पूरणार्धाट्ठन् ५.१.४८.

[४, ४१–४२]

(विवरणम्) न त्विति। स्वरितलिङ्गाभावादिति भावः॥

[४, ४१–४२]

(उद्द्योतनम्) ननु पूरणशब्देन पूरणार्थप्रत्ययान्तं गृह्यते। [1]'पूरणाद् भागे तीयादन्' स्वार्थिकः पूरणार्थ एवेति वचनानर्थक्यम्, अत आह — **यथेति**। तत्र स्त्रीग्रहणं स्वर्यत इति स्वरितेनाधिकारावगतिः, [2]अत्रापि पूरणग्रहणस्य स्वरितत्वादधिकारावगतिरिति मत्वा वचनमित्यर्थः। [3]अत्र स्वरितत्वं न प्रतिज्ञायत इति समाधानाभिप्रायः। स्वशब्दस्यान्प्रत्ययपरत्वे वैयर्थ्यप्रसङ्गे-नात्मीयवाचिनः प्रकृतिपरत्वमाह — **स्वस्या इति**। **सा** प्रकृतिः। अनेन प्रकृतौ स्वशब्दस्य वृत्तिरुक्ता। पूरणमर्थः, न शब्दः, अत आह — **पूरणाभिधयित्वादिति**॥

[४, ४१–४२]

(नारायणीयम्) न तु पूरणेति। स्वरितत्वप्रतिज्ञानाभावात्। **सा हीति।** अर्थाभिधाने साहचर्यात्॥

संभवत्यवहरति पचति ५.१.५२.

[४, ४२]

(उद्द्योतनम्) द्रोणस्य पाककर्मत्वासंभवादाह — **द्रोणपरिमित इति।** लक्षणाबीजमाह — **तस्यैवेति**॥

[४, ४२]

(नारायणीयम्) तस्यैवेति। व्रीह्यादेरेव, न तु परिमाणस्य प्रस्थादेः पाकप्रसिद्धिरस्तीत्यर्थः॥

कुलिजाल्लुक्खौ च ५.१.५५.

[४, ४२–४३]

(उद्द्योतनम्) [4]वार्तिककृदभिमतं सूत्रन्यासमाह — **कुलिजाच्चेत्येवेति। खोऽन्यतरस्यामिति।**

---

[1] पा. सू. ५.३.४८.
[2] तत्रापि — अ, ऋ, ॡ.
[3] तत्र — अ, ऋ.
[4] वार्तिककृदभिप्रेतं — अ.

[1]'आढकाचित' इत्यतः। **तस्येति**। खष्ठनोस्तु विधानसामर्थ्यान्न लुक्, त्रैरूप्यम्। द्विकुलिजिकी, द्विकुलिजीना, द्विकुलिजी। ननु ठञो [2]लुग्विकल्पार्थं लुग्ग्रहणं कर्तव्यम्। तेन 'द्वैकुलिजिकी' इति चतुर्थं रूपं सिध्यति, अत आह — **न चेति**। चतुर्थरूपानङ्गीकाराल्लुग्ग्रहणं व्यर्थम्, अनुवृत्त्यैव लाभात् खग्रहणमपि व्यर्थमित्यर्थः॥

[४, ४२–४३]

(नारायणीयम्) वार्तिककृतेति। सूत्रकारस्य लुग्ग्रहणं कुर्वतोऽन्यतरस्यांग्रहणाल्लुकोऽपि विकल्पितत्वात् तदभावे 'द्वैकुलिजिकी' इति चतुर्थं रूपमिष्टमिति लक्ष्यत इति सूत्रकृद्वार्तिककृतोर्मतभेद इति दर्शितम्॥

तदस्य परिमाणं संख्यायाः संज्ञासंघसूत्राध्ययनेषु ५.१.५७, ५.१.५८.

[४, ४३–४६]

(विवरणम्) यो हि ब्रूयात् पञ्चत्वं संख्येयानां परिमाणमिति सूत्रेणैव सिद्धः प्रत्ययः, नार्थो वार्तिकेनेति, तं प्रत्याह — **इहेति**। न्यायमूलमनभिधानमित्याह — **न हि रमणीयादय इत्यादिना**। स्तोमेऽभिधेये डो विधेय इति वार्तिकार्थः॥

इति भाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम्

[४, ४३–४६]

(उद्द्योतनम्) ननु पञ्चसंख्या परिमाणमेषां ते 'पञ्चकाः शकुनयः' इति सिद्धत्वात् 'स्वार्थे' इति किमर्थं वचनम्, अत आह — **इहादशभ्य इति**। पञ्चादीनामपि वृत्तिविषये संख्यानमात्रवृत्तित्वसंभवात् सूत्रेणैव सिद्धिरित्याह — **यदा त्विति**। संख्यानवृत्तित्वे [3]सौत्रप्रयोगं संवादयति — **तथा चेति**। संख्येयपरत्वेऽनिष्टमाह — **संख्येयेति**। भाष्ये **ततः परिमाणिनि** संज्ञायामेव स्वार्थे, संघादौ परिमाणिन्येवेत्यर्थः। पूर्वमर्थान्तिरस्यानुक्तत्वाच्चकारायोगं निराह — **पूर्वापेक्ष इति**। 'संज्ञायां स्वार्थे, अन्यत्र परिमाणिनि' इत्येतदपेक्ष इत्यर्थः। वचनोपयोगमाह — **संघादिष्विति**। [4]संख्यायाः परयोः संवत्सरसंख्ययोरादिवृद्धिर्ञ्निदादौ। षष्टिर्जीवित[5]परिमाणमस्येत्युक्तौ कालप्रतीतेः 'न हीमे' इत्ययुक्तम्, अत आह — **मासादय इति**। **निमित्तान्तरेण** लक्षणया। एतावता षष्ट्यादीनां कथं कालवृत्तित्वलाभः, अत आह — **काले संख्येय इति**। [6]यदा संख्याशब्दः कालरूपसंख्येये वर्तते तदा कालशब्दत्वम्। तच्च लक्षणया शक्त्या वेत्यन्यदेतदिति भावः।

---

[1] पा. सू. ५.१.५३.
[2] लुग्विकल्पनार्थं — अ.
[3] सौत्रप्रयोगं दर्शयति — अ.
[4] सख्यायाः संवत्सरसंख्यस्य चेत्यस्यार्थोऽयम्।
[5] परिमाणस्येत्युक्तौ — अ, ऋ, लृ.
[6] यदा कालशब्दः — अ.

ननू 'वर्षशतं [1]परिमाणमस्य वार्षशतिकः' इत्यत्र शतस्य [2]संख्यात्वात् ठञ् स्यात्, अत आह — **संख्याया इति**। यद्यपि संख्यायाः कन् विधीयते, [3]न ठञ्निति प्रकृतानुपयोगः, तथाप्यस्मिन् सूत्रे [4]ठञ्नुवृत्तिमङ्गीकृत्य ठञ्विध्यभिप्रायकमिदम्। तदन्तविधिं निराह — **संख्यापूर्वपदानामिति**। ननु खट्वादिवत् खारीशब्दस्य नित्यस्त्रीलिङ्गस्यैव परिमाणवाचित्वात् कथं खारशब्दः, अत आह — **वार्तिकेति**। अत्र 'तदस्य परिमाणम्' इत्येव [5]ठञ् सिद्धः, किं वचनेन, अत आह — **तदस्येति**। एकयोगमङ्गीकृत्य 'अन्येभ्योऽपि दृश्यते' इति वार्तिकम्। तस्य योगविभागे तात्पर्यमिति भावः। ननु षष्ट्यादिशब्दानां वृत्तौ कालवाचित्वम्, संवत्सरवाचित्वं तु कथम्, अत आह — **लोके चेति**। [6]सर्वत्राभिधानमेव शरणमिति भावः। ननु [7]'नस्तद्धिते' इति टिलोपे 'पञ्चदशः' इत्यादिसिद्धेर्डित्करणं किमर्थम्, अत आह — **डित्करणमिति**। स्तोमशब्दस्य समूहवाचित्वेनातिप्रसङ्गशङ्कां निराह — **मन्त्रसमूह इति**।

इति श्रीमहाभाष्यप्रदीपोद्द्योतने पञ्चमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम्

[४, ४३–४६]

(नारायणीयम्) इहादशभ्य इति। एकादयोऽष्टादशपर्यन्ताः संख्याशब्दा इत्यर्थः। [8]**ततः परा इति**। एकान्नविंशत्यादयः। गवां विंशतिः, विंशतिर्गावः, इति। **यदा त्विति**। वृत्तिविषये शब्दानामर्थवृत्तित्वस्य बहुलमुपलम्भात्। **तदा परिमाणेति**। पञ्चत्वसंख्या परिमाणमेषां 'पञ्चकाः शकुनयः' इति। **पूर्वापेक्ष इति**। संज्ञायां स्वार्थे प्रत्ययो वक्तव्यः, जीवितपरिमाणे चेति चशब्दार्थः। **मासादय एवेति**। येषां कालविशेषः प्रवृत्तिनिमित्तं ते कालशब्दा इति मासादय एव गृह्यन्ते, न तु रमणीयादयः। तेषां हि रमणीयत्वादयो गुणाः प्रवृत्तिनिमित्तम्। तदेतदाह — **न त्विति**। ननु संख्येये वर्तनेन कथं कालवृत्तित्वमित्यत्राह — **काल इति**। [9]**वार्षशतिक इति**। संख्यावाचित्वाभावेन 'तदस्य परिमाणं संख्यायाः' इति सूत्रस्य प्राप्त्यभावः। संख्यावाचित्वेऽप्यप्राप्तिरित्याह — **संख्याया इति**। खारीशब्दो लोके प्रसिद्ध इत्याह — **खारेति**। **योगविभागः कर्तव्य इत्युक्तं भवतीति**। अन्यथा वचनान्तरेण वचनान्तरस्य प्रत्याख्यानमनुपपन्नं स्यात्। [10]इदं तु चिन्त्यम्, [11]'कालात्' इति पाञ्चमिकसूत्रेणैव सिद्धिमुक्त्वा योगविभागस्याकृतत्वात्। किं चात्र योगविभागे द्विगोः परस्य लुक् स्यात्। न च समर्थविभक्तिप्रत्ययार्थयोः पुनःकरणाल्लुग्बाध इति वृत्तिकारोक्तरीत्या निर्वाह इति वाच्यम्, अंशवस्नभृतय इत्यस्यानुवृत्त्य-

---

[1] प्रमाणमस्य — अ, ऋ, लृ.

[2] 'संख्यात्वात्' इत्यादि 'तदन्तविधिं निराह' इत्यन्तं नास्ति — लृ.

[3] न ठगिति — अ, ऋ.

[4] ठगनुवृत्तिमङ्गीकृत्य ठग्विध्यभिप्रायकम् — अ, ऋ.

[5] ठक् — अ; ठः — ऋ, ठन् — लृ.

[6] सर्वत्रानभिधानमेव — अ.

[7] पा. सू. ६.४.१४४.

[8] प्रदीपे 'ततः परा तु संख्या' इत्यत्र 'ततः परास्तु संख्याः' इति पाठोऽभिमतः।

[9] 'वार्षशतिक इति' इत्यादि 'खारेति' इत्यन्तं नास्ति — घ.

[10] 'इदं तु चिन्त्यम्' इत्यादि 'निवृत्तेः कर्तुमशक्यत्वात्' इत्यन्तं नास्ति — घ.

[11] पा. सू. ५.१.७८.

भावार्थं पुनस्तयोरुक्तत्वात्। न च परिमाणग्रहणेन निवृत्तिः, अंशाद्युपाधिकात् प्रथमान्तादस्येत्यर्थे प्रत्ययः परिमाणं चेद्द्योत्यमित्यर्थस्य वक्तुं शक्यत्वेन निवृत्तेः कर्तुमशक्यत्वात्। षष्ट्यादीनां संख्येयेषु संवत्सरेषु वृत्तिमुपपादयति — **लोके चेति**। **स्तोमो मन्त्रसमूह इति**। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठादिस्तुतिः **स्तोमः**। स च पञ्चदश मन्त्राः परिमाणमस्येति पञ्चदशादिशब्दैरुच्यते। पञ्चदशमन्त्रसमूहाद्यात्मक इत्यर्थः। यद्यपि 'साम्ना स्तुवीत, एकं साम तृचे क्रियते' इति स्तुतिविधिः, तथापि [1]तृचस्य पञ्चकृत्व आवृत्त्या पञ्चदश मन्त्रा भवन्ति। सप्तदशस्तोमेऽन्त्याया ऋचः सप्तकृत्व आवृत्तिः। एकविंशस्तोमे [2]तृचस्यैवेत्यादि द्रष्टव्यम्॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य
प्रथमे पादे प्रथममाह्निकम्

---

[1] तृचोऽपि पञ्चकृत्वः — ङ.

[2] सप्तकृत्व आवृत्तिरित्यनुषङ्गः।

पञ्चमाध्यायस्य प्रथमपादे द्वितीयमाह्निकम्

पङ्क्तविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ५.१.५९.

[४, ४६–५६]

(विवरणम्) 'ञ्मे विंशत्यादयः' इत्युक्तत्वात् पङ्क्तिशब्दः सूत्रेऽनार्ष इति भ्रमं निरस्यति — **पङ्क्तिशब्द इति**। परिहरति — **पञ्चम्य इति**। व्यत्ययेन पञ्चमीस्थाने प्रथमा स्यादित्यत आह — **अनिष्पन्नस्य चेति**। लोके केवलानां प्रयोगः प्रत्ययत्वेऽपि [1]'द्वयसादिवद् भविष्यतीत्यत आह — **शताच्चेति**। यद्यपि केवलस्य प्रत्ययस्योच्चारणं [2]'लुटः प्रथमस्य' इत्यादौ शास्त्रेऽपि दृश्यते, तथापि तदन्तग्रहणलिङ्गाभावे केवलानां प्रकृतित्वेनोच्चारणादिति विवक्षितत्वाददोषः। प्रकृतिप्रत्ययलक्षणं पृच्छतीति भ्रमं वारयति — **प्रकृतीति**। द्विशब्दस्य द्वित्वसंख्यासंख्येयवाचिनः कथं दशदभिधायित्वमित्यत आह — **दशद्वर्गेति**। आत्मवचनः स्वशब्द इति पक्षान्तरमाह — **अथवेति**। **लिङ्गमिति**। 'गुडकल्पा द्राक्षा' इत्यादौ। द्वितीयं पक्षं संभावयति — **तदस्येति**। कथमस्मिन् पूर्वोक्तदोषपरिहार इत्यत आह — **परिमाणी चेति**। [3]**द्रव्येति**। दशद्वर्गद्वयवर्गिद्रव्यसंघात इत्यर्थः। इष्टसिद्धये स्वार्थे प्रत्ययो विधेय इत्युच्यत इति मत्वा चोदयति — **नन्विति**। अनिष्टनिवृत्तये स्वार्थे प्रत्ययविध्यभिधानमित्यभिप्रेत्य परिहरति — **एवं तर्हीति**। नन्विष्यत एव संघस्याभिधानं 'गवां विंशतिः' इति, अत आह — **न चेति**। ननु संघे प्रत्ययार्थे संघसंघिनोर्व्यतिरेकः[4], तद्भावे षष्ठी भविष्यति, अत आह — **संघे परिमाणिनीत्यादिना**। गोशब्देन [5]जात्यभिधानात् तस्याश्चैकत्वाद् गोशब्दसामानाधिकरण्येऽपि बहुवचनापादनमयुक्तम्, अत आह — **द्रव्येति**। द्रव्याभिधायिना समानाभिधेयत्वादित्यर्थः। लब्धप्रातिपदिकसंज्ञाः, अत एवार्थवत्सूत्रेणानुज्ञातसाधिमान इत्यर्थः। **ननु चोक्तमिति**। [अन्यथा] विंशतिर्गोसंघ इति [स्यादिति] शेषः। भावशब्देन साध्यरूपः सिद्धरूपो वा धात्वर्थोऽभिधीयते, तद्वाचित्वं न विंशत्यादीनामित्यत आह — **भावशब्देनेति**। ननु गुणवचना गुणमुक्त्वा गुणिनि वर्तमानाः, तेषु न कदाचिद् गुणिना गुणो व्यपदिश्यत इत्यत आह — **शुक्लादिभिरिति**। **स्वार्थे कन्** ज्ञापयिष्यते। ननु संख्यासंहनने वृत्तोऽयं विंशतिशब्दः कथं 'द्रव्यसंहनने वर्तिष्यते' इत्युच्यते, [6]'कन् हि तत्र वर्तत इत्यत आह — **परार्थेति**। अतिप्रसङ्गं निरस्यति — **अन्यत्रापीति**॥

[४, ४६–५६]

(उद्द्योतनम्) इदंशब्दस्य प्रत्यक्षगोचरत्वात् तदुपपत्तिमाह — **सूत्र इति**। पङ्क्तिशब्दत्यागे हेतुमाह — **पङ्क्तिशब्द इति**। पञ्चाक्षराणि परिमाणमस्य पङ्क्तिश्छन्दः। **संनिवेशेति**।

---

[1] भाष्ये परश्चेति सूत्रे 'द्वयसजादीनां केवलदृष्टत्वात्' इत्यत्रेदं स्पष्टम्।

[2] पा. सू. २.४.८५.

[3] द्वौ दशताविति — ल.

[4] व्यतिरेकसद्भावे — व.

[5] जात्यभिधाने — ल.

[6] अन्यो हि — ल.

यादृशसंनिवेशो वर्णानामध्यापकप्रसिद्धस्तद्विपरीतसंनिवेशे तेषामेव वर्णानां न पङ्क्तित्वम्। ननु वृत्तिकारैः प्रकृत्यादिविभागो वाच्यः, न तु वार्तिकविवरणकृता भाष्यकारेण, अत आह — **वक्ष्यमाणेति**। नन्वत्र प्रकृतिप्रत्ययविभागे किं मानम्, अत आह — **प्रकृतिप्रत्ययेति**। ननु विविधानां प्रकृतीनां प्रत्ययानां चावयवानां समुदाये तुल्ययोगाभावात् कथं [1]'तेन सह' इत्यनेन बहुव्रीहिः, अत आह — **सहशब्द इति**। अत्र [2]'अनेकमन्यपदार्थे' इत्येव बहुव्रीहिरित्यर्थः। प्रकृतिप्रत्ययसमुदायत्वमाक्षिपति — **अथेति**। ननु प्रातिपदिकादित्यधिकारादेतेभ्यः प्रातिपदिकेभ्य इति पञ्चमी कल्प्यते, प्रत्ययस्त्वार्हीयष्ठगिति पञ्चमीप्रत्यययोरुपादानमस्त्येव, अत आह — **अनिष्पन्नस्य चेति**। प्रातिपदिकगणेष्वेषां पाठाभावाद् व्युत्पत्तिसापेक्षत्वम्। प्रत्ययत्वमाशङ्क्य निराह — **प्रत्ययत्वमिति**। **केवलानामिति**। [3]'न केवलः प्रत्ययः' इति [4]नियमाभावादिति भावः। नन्वत्राप्यादेशप्रत्यययोर्विधेयत्वाद् विधिनिपातनयोः को भेदः, अत आह — **विधीति**। [5]'अग्नेर्ढक्' इत्यादावाग्नेयादिरनुमीयते, समुदायस्य साक्षादनुच्चारणात्। पङ्क्तिरित्यादौ प्रकृतिप्रत्ययानुमानम्। यस्मात् प्रत्ययः सा प्रकृतिरिति निश्चयात् प्रश्नायोगः, अत आह — **विशेषेति**। कियान् भागः प्रकृतिः कियान् प्रत्यय इति प्रश्न इत्यर्थः। प्रकृत्यर्थाप्रश्ने हेतुमाह — **प्रकृताविति**। निश्चितात् प्रातिपदिकात् प्रत्ययविधानादित्यर्थः। परिमाणाद्यनेकार्थप्रक्रमात् [6]प्रत्ययार्थे प्रश्नोऽयुक्त इत्यत आह — **लोक इति**। इदंशब्दस्योपयोगमाह — **वचनक्रियायामिति**। आत्मनेपदाभावे हेतुमाह — **वचनमात्रमिति**। यद्यपि प्रष्टुः संशयोच्छेदो वचनफलं परगामि, तथापि वचनात् साक्षाज्जायमानं ज्ञानमात्मगामि, परसंशयोच्छेदजन्यसुकृतं वात्मगामि। [7]'दशदभिधायिनः' इत्येतद् व्याचष्टे — **दशद्वर्गेति**। [8]'पञ्चद्दशतौ वर्गे वा' इति दशच्छब्दस्य वर्गे निपातनात्। वर्गः समूहः, संघः। पृथगनुच्चारणात् प्रत्ययः कथं निपातितः, अत आह — **समुदाय इति**। स्वशब्दस्यात्मीयार्थद्वयमाह — **प्रत्ययस्येति**। 'स्वार्थः' इत्यत्र हेतुमाह — **तत्रैवेति**। सामान्यनिषेधे बाधकं वक्ष्यन् विवक्षितमर्थमाह — **इष्टयोरिति**। समान्यनिषेधो न संभवतीत्याह — **न हीति**। **द्वयोर्दशतोरिति**। दशत्परिमितवर्गद्वयं दशद्वयं तदभिधीयते, स्वार्थे प्रत्ययविधानात्, न तु संघसंबन्धि द्रव्यमित्यर्थः। **व्यतिरेकः** भेदः। **सामानाधिकरणेति**। विंशतिर्गावः समाहृताः [9]'विंशतेर्गवां समाहार इति च, उभयथापि समानाधिकरणपदत्वमित्यर्थः। ननु षष्ठ्यन्तत्वेऽपि न पूर्वनिपातः, अर्धपिप्पल्यादौ व्यभिचारात्, अत आह — **उपसर्जनमिति**। ननु वर्गस्य समूहरूपस्य संख्यारूपस्य [10]वा गुणत्वात् [11]'पूरणगुण' इति षष्ठीसमासनिषेधेन भाव्यम्, अत आह — **गुणेनेति**। [12]'क्रोशशत' इति वार्तिकं [13]'योजनं गच्छति' इति सूत्रस्थम्। **लिङ्गमेव केचिदिति**। कुटीर इत्यादयः। संख्याया अव्यभिचारे हेतुः — **संख्यान्तरेति**। **स्त्रीसूत्र इति**। गुणानामुपचयापचयादिरूपलिङ्गत्रयस्य केवलान्वयित्वं शब्दविशेषेण च लिङ्गविशेषाभिव्यक्तिरिति [14]'स्त्रियाम्' इति सूत्र उक्तमित्यर्थः। नेदमपूर्ववचनमित्याह — **तदस्येति**।

---

[1] पा. सू. २.२.२८.
[2] पा. सू. २.२.२४.
[3] महाभाष्यम् १.२.६४.
[4] प्रत्ययविषयस्याप्रयोगनियमस्य प्रकृतेऽभावादित्यर्थः।
[5] पा. सू. ४.२.३३.
[6] प्रत्ययार्थविषय इत्यर्थः।
[7] 'दशदर्थाभिधायिनः' इति विवक्षितम्।
[8] पा. सू. ५.१.६०.
[9] विंशतीनां — अ, ऋ, लृ.
[10] 'वा' इति नास्ति — अ, ऋ.
[11] पा. सू. २.२.११.
[12] का. वा. ५.१.७४–१.
[13] पा. सू. ५.१.७४.
[14] पा. सू. ४.१.३.

परिमाणवृत्तेः संख्याशब्दस्य परिमाणिनि प्रत्यय इत्यर्थः। परिमाणिनि प्रत्यये प्रयोगद्वयोपपत्तिमाह — **परिमाणी चेति**। कः स्वार्थः, तस्मिन् को वा प्रत्यय इत्यत आह — **द्वौ दशताविति**। [1]दशद्द्वयमित्यर्थः। **संघान्तरस्येति**। दशद्द्वयपरिमितः संघो विंशतिशब्दवाच्यः। तत्परिमितं संघान्तरं नास्तीत्यर्थः। **नन्विति**। परिमाणी संघो द्रव्याणि चेत्युक्तम्, तत्र द्रव्यपक्षे नानुपपत्तिरित्यर्थः। **एवं तर्हीति**। संघः परिमाणीति पक्षेऽनिष्टपरिहाराय ड्वुन् स्वार्थे वक्तव्य इत्यर्थः। अनिष्टप्रसङ्गमाह — **विंशतिर्गोसंघ इति**। ननु संघे परिमाणिनि प्रत्ययपक्षे षष्ठी युज्यते, अत आह — **संघे परिमाणिनीति**। **केवलानां** ड्वुन्नादिरहितानाम्। **व्यतिरेकाभावात्** भेदाभावात्। 'अनारम्भो वा' इत्यनेनारम्भपक्षे उक्तदोषो नोद्धृतः, अत आह — **तदेवमिति**। वाकारं संगमयति — **वाशब्द इति**। अव्युत्पन्नत्वे प्रातिपदिकत्वाभावेन विभक्त्यनुत्पत्तावपदत्वेन[2] प्रयोगो न स्यात्, अत आह — **अर्थवदिति**। अव्युत्पन्नानां सर्वेषां साधुत्वान्वाख्यानप्रकारमाह — **अर्थवत्सूत्रेणेति**। अनुज्ञातः साधिमा साधुत्वं येषामिति विग्रहः। साधुशब्दस्य पृथ्वादित्वादिमनचि [3]'टेः' इति टिलोपे साधिमा। 'विंशतिर्गावः' इत्यत्र नियतलिङ्गसंख्यत्वं कथम्, अत आह — **रूढिशब्दत्वादिति**। तत्र दृष्टान्तः — **यथेति**। अक्षादितुल्यत्वं निराह — **अयमत्रेति**। **शुक्लादिवदिति**। शुक्लो गुणोऽस्यास्तीति 'शुक्लः' इति मतुब्लोपादिना तेषां यौगिकत्वमित्यर्थः। यौगिकत्वे हेतुः — **न हीति**। एषां सहस्रादिशब्दानां संख्या संख्येयं वा मुख्यार्थ इति संदेहाद् विंशत्यादिवत् तेषामप्यनुगमः कर्तव्य एवेति भावः। 'नासूया' इत्येतद् वार्तिकं दूषणपरतया व्याचष्टे — **अननुगमो हीति**। सहस्रादिवद् विंशत्यादीनामनुगमो व्यर्थ इत्युक्तम्। तत्राप्यनुगमस्य कर्तव्यत्वेनाननुगमस्य दोषत्वात्, सर्वशब्दानां लक्षणेनानुगमस्याशक्यत्वाद्वा सहस्रादिष्वनुगमाभावः। यत्र विंशत्यादिष्वनुगमः कृतः स तु न त्याज्य इत्याशयेनाह — **न त्विति**। ननूक्तदोषग्रासादनुगमो दुष्ट इत्युच्यते, अत आह — **स्वप्रज्ञेति**। अशक्योऽर्थविशेषनिश्चयो यस्यानुगमस्य तत्त्वादिति विग्रहः। अनुगमो **दोषत्वेन** दुष्टत्वेन [4]नोद्भावनीयः, वक्ष्यमाणरीत्यार्थविशेषनिश्चयसंभवादित्यर्थः। सूत्रे समुदायग्रहणाभावादाह — **अस्येति**। [5]**न तु तद्विशेष इति**। समुदायो द्रव्याणि चेति विशेष इत्यर्थः। ननु समासे एकदेशानुवृत्तिः कथम्, अत आह — **पूर्वसूत्र इति**। **इत्याह** इत्यत आह। संघे प्रत्ययपक्षे प्रागुक्तदोषं शङ्कते — **नन्विति**। **द्रव्यसंघयोरिति**। दशानां द्रव्याणां संघे दशदिति निपातनात् संघवाची। दशद्द्वयसंघे च विंशत्यादयो निपात्यन्त इत्यर्थभेदान्न स्वार्थिकत्वमित्यर्थः। **न त्विति**। किं तु [6]द्रव्यसंघसंघ इत्यर्थः। ननु द्रव्यव्यतिरिक्तसंघाभावात् कथं परिमाणिनि दशच्छब्दनिपातः। अत एव दशद्द्वयस्यापि संघान्तराभावात् परिमाणिनि कथं विंशतिशब्दः, अत आह — **इहेति**। समूहसमूहिनोर्वास्तवभेदाभावेऽपि लोके गवां समूह इति प्रयोगप्रत्यययोर्भेदाश्रययोर्दर्शनाद् भेदाश्रयेणान्वाख्यानं युक्तमित्यर्थः। द्रव्यसमुदायवचनत्वशङ्कां निराह — [7]**निपातनसामर्थ्यादिति**। **दाशते** दशत्संबन्धिनि। कथं संघस्याक्रियारूपस्य भावत्वम्, अत आह — **भावशब्देनेति**। क्रियासादृश्यमेवाह — **यथेति**। 'गुणमुक्तवन्तः' इति तात्पर्यकथनमेतत्। [8]"कृत्यल्युटो बहुलम्' इति कर्तरि ल्युटा षष्ठीसमासः। 'उक्तवन्तः' इति भूतनिर्देशाशयमाह — **गुणमुक्त्वेति**। त्रिधा समासोपपत्ति-

---

[1] दशद्वर्गद्वयमित्यर्थः — अ.
[2] अपवादत्वेन — अ.
[3] पा. सू. ६.४.१५५.
[4] 'न' इति नास्ति — अ.
[5] न तु विशेष इति — अ, ऋ, लृ.
[6] द्रव्यसंघ इत्यर्थः — अ.
[7] निपातनादिति — अ, ऋ, लृ.
[8] पा. सू. ३.३.११३.

माह — **भाष्यकारेति**। दृष्टान्तदार्ष्टान्तिकयोः सामानाधिकरण्योपपत्तिमाह — **गुणगुणिनोरिति**। **मतुब्लोपाद्वेति**। मत्वर्थीयाकारान्तत्वादित्यपि द्रष्टव्यम्। गुणिनो विशेष्यस्य कथं गुणविशेषकत्वम्, अत आह — **आधारान्तरेति**। षष्ठ्युपपत्त्यर्थमाह — **उपजातेति**। [1]**पक्षान्तरेण** [2]गुणशब्दस्य गुणिशेषत्वपक्षेण। सामानाधिकरण्येनैव वचनस्यापि परिहारोऽस्तु, अत आह — **समुदायेति**। समुदायस्यैकत्वाद् गुणाभिधानपक्षे एकवचनं युक्तम्, गुण्यभिधानपक्षे तु तदनुसारिवचनप्रसङ्ग इत्यर्थः। 'तिष्ठतु' इत्यस्याङ्गीकारपरत्वं निराह — **परस्तादिति**। 'संख्यासंहनने' इत्येतद् व्याचष्टे — **दशतोरिति**। **गवादीति**। विंशत्यात्मकगोसंघे दशद्द्वयसंघस्य बुद्धिकल्पितभेदेन सत्त्वादित्यर्थः। **विंशतिः** दशद्द्वयसंघः। 'वर्तिष्यते' इत्यत्र वृत्तिर्वाचकत्वमिति शङ्कां निराह — **परार्थेति**। विंशक इत्यत्र प्रकृतिप्रत्ययाभ्यां विशिष्टप्रत्यार्थाभिधानाद् विंशतिशब्दः परार्थाभिधाने। **वर्तते** वाचकतयेत्यादिः। **गवादिनेति**। समुदायलक्षणगुणयुक्तेनेत्यर्थः। **नन्विति**। विंशतिशब्दवाच्यस्य संघलक्षणगुणस्य दशतौ गुणिनौ, तयोः संघे निपातनात्। गवादिस्तु [3]गोसंघस्य गुणी, न दशतोः संघस्य। तथा च कथं 'गवां विंशतिः' इत्यत्र गुणिना गुणो विशेष्यत इत्युक्तमित्यर्थः। **नैष इति**। दशद्द्वयस्य गवाभेदात् संघोऽपि गोसंघ इति गवाविशेषणोपपत्तिरित्यर्थः। ननु समुदायविवक्षया गवां विंशतिरितिवद् दशतोर्विंशतिरित्यपि प्रयोगः किं न स्यात्, अत आह — **तत्रेति**। दृष्टान्तेऽपीदं समानमित्याह — **यथेति**। **शुक्लस्य शौक्ल्यमिति**। शुक्लशब्दस्य गुणपरत्वे [4]गुणसमवेतसामान्ये भावप्रत्ययः, गुणिपरत्वे तु गुण इति भावः। 'उभयोः' इत्यस्य प्रष्टृप्रतिवक्तृपरत्वशङ्कां निराह — **समुदायेति**। समुदायपक्षे कथं परिहारो न वक्ष्यते, अत आह — **तत्रेति**। तयोर्मध्ये। 'यदि' इत्यादिना दोष एवोच्यते, न परिहारः, अत आह — **तमिति**। लिङ्गसंख्याननुवृत्तिं दर्शयति — **प्राक्छतादिति**। त्रिंशच्चत्वारिंशत्पञ्चाशच्छब्दानामपि स्त्रीलिङ्गत्वमेव, प्रयोगानुसारादिति भावः। विंशत्यादीनां द्विवचनबहुवचने अपि दृश्येते, कथमेकवचनान्तत्वनियमः, अत आह — **विंशती इति**। **प्रचयेति**। विंशतिशब्दवाच्यसंघगतद्वित्वादिविवक्षायामित्यर्थः। धनस्य द्रव्यस्य कथं गुणत्वमित्याशङ्क्य प्रसिद्धगुणसाम्याद् गुणत्वमुपपादयति — **धनादीनामिति**। आदिनापत्यदेवतादक्षिणानां ग्रहणम्। उक्तहेतुत्रयं प्रसिद्धगुणेऽस्तीत्याह — **यथेति**। धनादावपि तदस्तीत्याह — **एवमिति**। **गवामिति**। धनमित्युक्ते गवां प्रीतिहेतुत्वप्रतीतेरप्रीतिकरेभ्यो भेदकं धनमित्यर्थः। अत्र कस्य गुणस्य प्राधान्यम्, अत आह — **संख्येति**। तत्र हेतुः — **तीर्णानीति**। [5]'आदिकर्मणि क्तः कर्तरि च' इति कर्तरि क्तः। कर्तृसामानाधिकरण्येऽप्ययोग्यत्वात् संख्यायाः कथं कर्तृत्वम्, अत आह — [6]**वस्तुतस्त्विति**। 'उडुपशतानि' इत्यत्र शते गुणभूतानामुडुपानां प्राधान्यविवक्षेति भावः। ननु मनुष्यकर्तृकतरणे उडुपानां करणत्वम्, न तु कर्तृत्वम्, अत आह — **अथवेति**। कारकेषु स्वतन्त्रत्वात् कर्तुः प्राधान्यम्, इतरेषामप्राधान्येन गुणभूतानामपि प्राधान्यविवक्षया प्रयोगोपपत्तिरिति भावः। योद्धृणामश्वा अधिकरणम्, असयः करणम्। ननु करणेऽपि तृतीयासंभवात् तया कथमत्र प्राधा-

---

[1] प्रदीपे 'पक्षान्तराश्रयेण परिह्रियते' इत्यत्र 'पक्षान्तरेण परिह्रियते' इत्यन्नंभट्टपाठ इति प्रतीयते।

[2] गुणवचनस्य गुणिशेषपरत्वपक्षेण — अ.

[3] दशत्संघस्य — अ, ऋ, लृ.

[4] गुणिसमवेत — अ, ऋ, लृ.

[5] पा. सू. ३.४.७१.

[6] प्रदीपे 'तत्त्वतस्तु संख्येयानाम्' इत्यत्र 'वस्तुतस्तु संख्येयानाम्' इति पाठोऽन्नंभट्टस्येति भाति।

न्यावगमः, अत आह — **कर्तरीति**। प्रक्रमानुरोधात् 'न चासयः' इति भाष्यानुसाराच्च कर्तरीयं तृतीयेति भावः। ननु गवां प्रत्येकं प्रीतिहेतुत्वेन धनत्वाद् धनस्याप्यनेकत्वात् कथमेकवचनम्, अत आह — **समुदायस्येति**। समुदायजन्यप्रीतिविशेषविवक्षायामेव 'गावो धनम्' इति प्रयोग इति भावः। ननु धनस्य प्राधान्याद् गोसंख्याननुवर्तनेऽपि गवां विशेषणत्वाद् धनसंख्यानुवर्तनं किं न स्यात्, अत आह — **आश्रितेति**। **विवक्षितेति**। समुदायजन्यप्रीतिविशेषो विवक्षितार्थः। अपत्यस्याप्येकत्वमाह — **बहूनामिति**। तत्र [1]प्रसिद्धिं संवादयति — **तथा चेति**। प्रत्येकमपत्यत्वविवक्षायां बहुवचनमपि भवतीत्याह — **प्रत्येकमिति**। **संघस्येति**। 'ऐद्राग्नमेकादशकपालम्' इत्यत्र इन्द्राग्नी देवतास्येति द्वन्द्वनिर्दिष्टसाहित्यस्य विवक्षितत्वाद्द्व्यासज्यवृत्ति देवतात्वमिति भावः। द्विवचने देवताभेदाद्विकल्पः प्रतीयेतेत्याह — **देवते इति**। ऐन्द्राग्नमित्यत्र [2]साहित्याविवक्षया प्रत्येकदेवतात्वाङ्गीकारे कदाचित् 'इन्द्रायेदम्' इति हविस्त्यागः कदाचित् 'अग्नय इदम्' इति विकल्पः स्यात्, न तु 'इन्द्राग्निभ्यामिदम्' इति। **देवताकार्यम्** उद्देश्यः। विकल्पे दृष्टान्तः — **यथेति**। [3]'एकार्थास्तु विकल्पेरन्' इति न्यायादिति भावः। दक्षिणाया अप्युक्तन्यायेनैकत्वमाह — **अत्रापीति**। विंशत्यादिसंख्याया व्यासज्यवृत्तित्वमेको द्वावित्यादिप्रतीत्यभावेन सिद्धमित्याह — **विंशतिसंख्येति**। पञ्चादीनां विंशत्यादिवैषम्यमाह — **पञ्चादयस्त्विति**। ननु भावस्य धर्मत्वात् तस्मिन् चोदितं धर्मिण्यपि स्यात्, अत आह — **न हीति**। **दण्डं** पुरुषे विद्यमानम्। दण्डिव्यावृत्त्यर्थमाह — **तद्व्यभिचारिणीति**। द्रव्यद्वारा संभवमाशङ्क्याह — **साक्षादिति**। अमूर्तत्वादित्यर्थः। तर्हि चोदितं न कृतं स्यात्, अत आह — **येषामिति**। अशक्यार्थे विध्यसंभवात् तदाधारद्रव्यपरत्वमेव विधेरिति भावः। मतान्तरमाह — [4]**येषामपीति**। **तेषामपीति**। त्यक्तभेदद्रव्येऽनुष्ठानासंभवादित्यर्थः। विद्यमानभेदस्य त्यागासंभवाद् विवक्षामात्रेणानुगतवस्त्वसिद्धेः पूर्वमतमेव सम्यक्। अन्यचोदनायामन्यानुष्ठाने मतद्वयेऽपि दृष्टान्तमाह — **यथेति**। [5]**तेन तेनेति**। आकृतिद्वारेण गुणद्वारेण च। अत्र विंशत्यादीनां संख्यावाचित्वं प्रयोगानुसारात् सिद्धम्। संघे [6]व्युत्पत्तिस्तु साधुत्वान्वाख्यानमिति ज्ञेयम्। ननु सहस्रादीनामन्वाख्यानाभावात् कथं साधुत्वम्, अत आह — **सहस्रादय इति**। अत्रापि दशशतशब्दस्य सहादेशः [7]स्रश्च प्रत्यय इत्यादि कल्पनीयमिति भावः॥

[४, ४६–५६]

(नारायणीयम्) प्रथमातिक्रमे कारणमाह — **पङ्क्तशब्द इति**। यद्यपि पञ्च पादाः परिमाणमस्य पङ्क्तश्छन्द इति छन्दोविशेषे कस्मिंश्चिदवयवार्थः संभवति, तथापि नासौ प्रतीतिपथमारोहति, गायत्र्यादिशब्दवद् रूढ्यैव छन्दोविशेषे वर्तनात्। संनिवेशविशेषे [8]तु ब्राह्मण-

---

[1] प्रसिद्धं— अ.

[2] साहित्यविवक्षया — अ.

[3] मीमांसासूत्रम् १२.३.१०.

[4] प्रदीपे 'येषां तावद्व्यतिरिक्ता जातिः।' इत्यस्यानन्तरं 'येषामपि तावदव्यतिरिक्ता जातिस्तेषामप्येतदेव' इत्यन्नंभट्टपाठः स्यादिति भाति।

[5] प्रदीपे 'द्रव्यमेव तेन द्वारेण' इत्यत्र 'द्रव्यमेव तेन तेन द्वारेण' इति पाठोऽन्नंभट्टस्येति भाति।

[6] व्युत्पत्तेस्तु — अ, ऋ, लृ.

[7] 'स्रच्च प्रत्ययः' इति युक्तं भाति, पदमञ्जरीदर्शनात्।

[8] तुशब्दो नास्ति — ङ.

पञ्चक्तिः पिपीलिकापञ्क्तरित्यादाववयवार्थः कथंचिदपि नोपपद्यत इति, तदाह — [1]**नावयवार्थेति**। अत्रैव हेत्वन्तरमाह — **वक्ष्यमाणेति**। अतश्चापि विंशत्यादय एव भाष्ये उपक्षिप्ता [2]इत्याशयः। सप्रकृतिकवं सप्रत्ययकत्वं च कथमेषामवसीयत इत्यत्राह — **प्रकृतिप्रत्ययेति**। **सहशब्दोऽत्रेति**। समासविधौ [3]'तुल्ययोगे' इति विशेषणं प्रायिकमिति भावः। **न तुल्ययोगार्थ इति**। तुल्ययोगार्थत्वे सति प्रकृत्यादेरपि निपातनक्रियायोगः प्रतीयेत, यथा 'सपुत्र आगतः' इत्यादौ। तच्चायुक्तम्, समुदायानामेव तद्विषयत्वात्। **पञ्चम्या इति**। यदि विंशत्यादीनां प्रकृतित्वमभिमतं स्यात् पञ्चम्या निर्देशः कर्तव्यः स्यात्। प्रत्ययोऽपि कश्चिदुपादेयः स्यात्। तदभावान्न प्रकृतित्वमेषाम्। किं च सिद्धस्यैव [4]प्रकृतित्वेन निर्देशो युक्तः, इमे तु निष्पाद्यन्ते, अन्यत एषां स्वरूपासिद्धेरिति हेत्वन्तरमाह — **अनिष्पन्नस्येति**। **प्रत्ययत्वं तर्हीति**। ङ्याप्प्रातिपदिकात् प्रकृतेर्ऽर्थे पञ्क्त्यादयः प्रत्यया भवन्तीति। परिहरति — **लोके केवलानामिति**। एषां प्रत्ययत्वे [5]'न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः' इति केवलानां प्रयोगो लोके नोपपद्यते। शास्त्रे च केवलानामुच्चारणमयुक्तं स्यात्। तद्दर्शनात्तु नैषां प्रत्ययत्वमित्यर्थः। ननु विधिनिपातनाभ्यां साधुत्वप्रतिपादनं समानम्, कोऽनयोर्भेद इत्यत आह — **विधीति**। **प्रकृतिप्रत्ययविशेषविषय इति**। सामान्यस्य प्रकरणवशाज्ज्ञातत्वात्। ननु प्रकृतमर्थमपेक्ष्य प्रत्ययविधानस्य शक्यत्वात् किं प्रश्नेनेत्यत आह — **लोक इति**। **वचनक्रियायामिति**। प्रतिवचनस्य सुशकत्वात् तत्राभिमुखा एव वयमवस्थिताः, न त्वशक्तत्वात् क्वचिन्निलीना इति 'इमे' इत्यनेन प्रतिपाद्यत इत्यर्थः। नन्वाचार्यः स्ववचनस्य निरवद्यतां प्रकाशयितुं परिहारमाचष्ट इति कर्तृगामित्वात् क्रियाफलस्य 'ब्रूमहे' इति वक्तव्यमिति, तत्राह — **वचनमात्रं चेति**। **दशद्वर्गेति**। दश परिमाणमस्य वर्गस्य दशद्वर्गः। द्वौ दशतौ संघात्मकौ विंशतिः। ननु समुदायस्य निपातनक्रियाकर्मत्वात् 'शतिच्प्रत्ययो निपात्यते' इत्ययुक्तमित्यत आह — **समुदाये चेति**। स्वार्थ इति षष्ठीसमास इत्याह — [6]**तस्या अर्थ इति**। यद्वा समानाधिकरणसमासोऽयमित्याह — **अथवेति**। ननु वचनमन्तरेण प्रकृत्यर्थे प्रत्ययः कथं भवेदित्यत आह — **प्रत्यासत्येति**। संनिहितत्वात् प्रकृत्यर्थोऽन्तरङ्गः, [7]अर्थान्तरं तु बहिरङ्गमित्यनिर्दिष्टार्थः प्रत्ययः प्रकृत्यर्थं एवोत्पद्यत इत्यर्थः। न सर्वथा समासवचनानुपपत्तिरिह चोद्यत इत्याह — **इष्टयोरिति**। **द्वयोर्दशतोरिति**। द्वयोः संघयोः, न तु संघिनां द्रव्याणाम्। ततश्च [8]'द्रव्यवाचिनो गवादेः षष्ठ्येवोत्पादनीयेत्याह — **ततश्चेति**। अनेन 'द्रव्यमनभिहितम्' इत्यादिभाष्यं व्याख्यातम्। 'विंशतिगवं तु न सिध्यति' इत्येतद्व्याचष्टे — **तत इति**। ननु संघार्थस्य विंशतिशब्दस्य गुणवचनत्वात् [9]'पूरणगुण' इति प्रतिषेधात् कथं 'गोविंशतिः' इति षष्ठीसमासः स्यादित्यत आह — **गुणेनेति**। ननु स्वार्थिकानां क्वचिल्लिङ्गातिवर्तनवत् संख्यातिवर्तनमपि [10]किमिति न भवेदित्यत आह — **स्वार्थिका इति**। **प्राकृतमिति**। प्रकृतिगतम्, यथा, कुटी कुटीर इत्यादौ। **लिङ्गानां त्विति**। सर्वत्र सर्वलिङ्गसद्भावात् क्वचित् कस्यचिद्विवक्षितत्वात्। कथं पुनः परिमाणिनि प्रत्ययो विधीयते, कथं वा तेनोक्तदोष-

---

[1] प्रदीपे 'नैवावयववार्थानुसारेण' इत्यत्र 'नावयववार्थानुसारेण' इति पाठोऽभिमत इति भाति।
[2] इति भावः — ङ.
[3] पा. सू. २.२.२८.
[4] प्रकृतित्वेनोद्देशः — घ.
[5] महाभाष्यम् १.२.६४.
[6] तस्यार्थ इति — ङ.
[7] प्रत्ययान्तरं तु — ङ.
[8] द्रव्यवचनाद् गवादेः — घ.
[9] पा. सू. २.२.११.
[10] कथं न — ङ.

परिहारसिद्धिरित्यत्राह — **तदस्येति**। **ड्वुन्प्रत्ययः स्वार्थ इति**। [1]'आर्हात्' इत्यधिकारादार्हीयेष्वर्थेषु प्राप्तः स्वार्थे विधेय इत्यर्थः। यद्यपि द्रव्याणां परिमाणित्वेन विवक्षायां संघे प्रत्ययः सिध्यति, अनिष्टमपि तु प्राप्नोतीत्येतच्चोद्यपूर्वकं दर्शयति — **ननु यदेति**। ननु विंशत्यादिशब्दैः संघस्याभिधानेन 'गवां विंशतिः' इत्यादि सिध्यतीत्यत आह — **संघे परिमाणिनीति**। **वाशब्दस्तर्ह्यर्थ इति**। न तु विकल्पे, व्युत्पत्तिपक्षस्य [2]दोषवत्त्वादस्वीकृतत्वात्। ननु विंशत्यादीनां [3]व्युत्पत्त्यनङ्गीकारे शास्त्रेणानुगमाभावादसाधुत्वं स्यादित्यत आह — **अर्थवत्सूत्रेणेति**। अर्थवत्सूत्रारम्भादव्युत्पन्नाः केचन शब्दाः सन्तीत्यनुमीयते। अन्यथा कृत्तद्धितान्तत्वादेव सर्वेषां प्रातिपदिकसंज्ञायाः सिद्धत्वात् किं तदारम्भेणेत्यर्थः। नन्वस्मिन् पक्षे 'विंशतिर्गावः' इति गोभिः सामानाधिकरण्याद् बहुवचनप्रसङ्गस्य कः परिहार इत्यत आह — **रूढिशब्दत्वाच्चेति**। अक्षादिदृष्टान्तवैषम्यप्रदर्शनेन विंशत्यादीनां यौगिकत्वमुपपादयन् 'यथा सहस्रादिषु' इति भाष्यतात्पर्यमाह — **अयमत्रेति**। **शुक्लादिवदिति**। शुक्लादयो हि गुणे रूढ्या वर्तन्ते, गुणिनि योगवशात्, तथा विंशत्यादय इत्यर्थः। तदेतदाह — **न हीति**। कोऽत्र संदेह इत्यत्राह — **क एषामिति**। **अननुगमो हि दोषायेति**। मन्दबुद्धीनामनुग्रहाभावात्। यद्यपि सर्वशब्दानुगमस्याशक्यत्वम्, तथापि न केषांचिदनुगमस्य दोषवत्त्वमसदारोपयितुं युक्तमिति 'नासूया कर्तव्या' इति भाष्यस्यार्थ इत्याह — [4]**अथेति**। स्वप्रज्ञापराधे हेतुः — **अशक्यार्थेति**। यथोक्तम् — [5]'नैष स्थाणोरपराधः, यदेनमन्धो न पश्यति। [6]पुरुषापराधः स भवति' इति। तस्मादनुगमे दोषं बुवता स्वप्रज्ञामान्द्यमेव ख्यापितं भवतीत्यर्थः। 'समुदाये' [7]इत्यनेन भिन्नानि द्रव्याणि व्यावर्त्यन्त इत्याह — **न त्विति**। **प्राणिसमूह इति**। तत्रैव संघशब्दस्य रूढत्वात्। 'द्रव्यसंघयोः' इत्यादिना 'संहनने वृत्तः' इति भाष्यस्य वक्ष्यमाणस्येदानीं प्रसङ्गात् तात्पर्यमाख्यायत इति द्रष्टव्यम्। अयमर्थः — दश परिमाणमस्य वर्गस्येति दशद्वर्गः, तयोर्दशतोर्द्रव्यसंघयोर्यः संघस्तस्मिन् दाशते संघे परिमाणिनि शतिच्प्रत्ययो निपातनसामर्थ्याद्विज्ञायते, न द्रव्यसंघे, नापि भिन्नेषु द्रव्येषु। ततो विंशतिशब्दात् संख्यानसंघवचनाद् गवादिद्रव्यसंघे परिमाणिनि ड्वुन् प्रत्ययः — विंशतिः परिमाणमस्य विंशको गोसंघ इति। उक्तं च —

[8]'संख्येयसंघसंख्यानसंघः संख्येति कथ्यते।
विंशत्यादिषु सान्यस्य द्रव्यसंघस्य भेदिका॥ इति।

अत्र तात्विकभेदाभावेऽपि काल्पनिकं शाब्दं भेदमाश्रित्य प्रकृतिप्रत्ययार्थविभाग इत्याह — **इहेति**। ननु संघे वर्तमानानां भाववचनत्वमयुक्तं, भावस्य क्रियात्वादित्याशङ्क्य भावशब्देनात्र गौण्या वृत्त्या धर्ममात्रमुच्यत इत्याह — **भावशब्देनेति**। 'गुणवचनाः' इत्यनेन न केवलगुणवचनत्वं विवक्षितम्, किं तर्हि, गुणे गुणिनि च वृत्तिरित्याह — **गुणमुक्तवन्त इति**। [9]'कृत्यल्युटो बहुलम्' इति भूतेऽर्थे कर्तरि ल्युट्। ननु च [10]'कर्तरि च' इति प्रतिषेधाद् 'गुणविशेषकः' इति षष्ठीसमासोऽनुपदिति भाति।

---

[1] पा. सू. ५.१,१९.
[2] दोषवत्त्वादस्फीतत्वात् — घ, ङ.
[3] व्युत्पत्त्यङ्गीकारे — ङ.
[4] प्रदीपे 'अशक्यो वा' इत्यत्र 'अथाशक्यो वा' इति पाठोऽभिमत इति भाति।
[5] कुसुमाञ्जलिः, ५ स्तबकः 'न पश्यति 'इत्यन्तमेव तत्रास्ति। उपरितनवाक्यमर्थसिद्धं स्या-
[6] पुरुषकृतापराधस्तु भवति — ङ.
[7] 'इत्यनेन' इत्यस्यानन्तरं 'न' इत्यधिकम्—घ.
[8] वाक्यपदीयम् ३.११.१९.
[9] पा. सू. ३.३.१३.
[10] पा. सू. २.२.१६. इयमुक्तिः काशिकारीत्येति बोध्यम्।

पन्न इत्यत्राह — **भाष्यकारेति**। **शेषषष्ठ्या वेति**। कर्मषष्ठ्यास्तु निषेधः। कथं पुनर्गुणवचनानां शुक्लादिशब्दानां गुणिवचनैः सामानाधिकरण्यमित्यत्राह — **गुणगुणिनोरिति**। यदा [1]'गुणवचनेभ्यो मतुपो लुक्' इति प्रत्याख्यातं तदा गुणगुणिनोरभेदोपचाराद् गुणिवचनत्वम्, अन्यदा तस्माद् वचनादित्यर्थः। **उपजातर्व्यतिरेकेणेति**। यदा गुणमात्रवचनाः शुक्लादयस्तदा गुणगुणिनोर्भेदात् तन्निबन्धना षष्ठी [2]गुणिवचनेभ्यो भवतीति वैयधिकरण्येन विशेषणविशेष्यभाव इत्यर्थः। **अस्मिन् पक्ष इति**। संघाभिधाने समानाधिकरण[3]पदनिबन्धनद्विगुसमासाप्रसङ्गलक्षणो यो दोष उक्तः स शुक्लादिवत् संख्यासंख्येययोः सामानाधिकरण्यमाश्रित्य समाधीयते — विंशतिगवम्, त्रिंशत्पूली, इतीत्यर्थः। **समुदायाभिधानेति**। समुदायस्यैकत्वादेकवचनस्योपपन्नत्वात्। **सामानाधिकरण्ये त्विति**। 'विंशतिर्गावः' इत्यादौ। परिहारस्य दुर्वचत्वाद् दोषस्यावस्थानमस्त्विति न भाष्यार्थ इत्याह — **परस्तादिति**। 'वर्तिष्यते' इत्यस्यार्थमाह —**प्रत्ययमुत्पादयिष्यतीति**। कथमस्यायमर्थो भवतीत्यत आह — **परार्थेति**। प्रधानार्थाभिधानमित्यर्थः। [4]"प्रकृतिप्रत्ययौ प्रधानं प्रत्ययार्थं सह ब्रूतः' इति न्यायात् 'पञ्चविंशतिर्गोसंघः' इत्यनिष्टप्रसङ्गोऽपि नावतरतीत्यर्थः। **न त्विति**। निपातनसामर्थ्यादि विशिष्टे दाशत एव संघे विंशत्यादीनां वर्तनात्। ननु दशतोर्गवां च गुणित्वेऽपि साक्षाद गुणित्वाद् दशद्भ्यामेव विशेषणं युक्तमित्यत्राह — **तत्राव्यभिचारादिति**। एतच्छुक्लादिष्वपि समानमित्याह — **यथेति**। ननु पक्षद्वयेऽपि वचनदोषपरिहाराभिधानं प्रतिज्ञायान्यतरस्मिन् पक्षे तदभिधानमसमञ्जसमित्याशङ्क्य भाष्याशयं दर्शयति — **तत्र समुदायेति**। ननु द्विवचनबहुवचनान्तानामपि विंशत्यादीनां प्रयोगो दृश्यत इत्याशङ्क्य तस्यान्यथोपपत्तिं दर्शयन्नभिधेयसंख्याननुवृत्तिमेव समर्थयते — **विंशती इति**। ननु धनादिशब्दानां द्रव्यवचनत्वाद् गुणवचनानामभिधेयगतलिङ्गसंख्याननुवृत्तौ [5]'दृष्टान्तत्वोक्तिरनुपपन्नेत्याशङ्क्य धनादीनां शुक्लादिभिः प्रसिद्धैर्गुणैः साम्याद् गुणत्वमुक्तमिति दर्शयति — **धनादीनामिति**। तरतेः प्लवनार्थत्वमाश्रित्य गुणस्य प्राधान्यविवक्षां समर्थयते — **अत्रेति**। **कर्तरीति**। अकर्मकत्वात् कर्तरि क्तः। करणार्थत्वमङ्गीकृत्य पक्षान्तरमाह — **अथवेति**। **करणानामेवेति**। करणत्वादुपकारित्वाद् गुणानामपि सतां तेषां तरणे प्राधान्यं विवक्ष्यत इत्युदाहरणतोपपत्तिरित्यर्थः। **अश्वा असयश्चेति**। अश्वेषु [6]'स्थित्वा पुरुषा युध्यन्तेऽसिभिश्च करणैः। ते संप्रहारे कर्तृत्वेन विवक्ष्यन्ते। **कर्तरि तृतीयेति**। न तु करणे। युद्धमिति च भावे निष्ठा। धनस्य गोगतसंख्यानुवृत्तौ विवक्षितार्थाप्रतीतिं दर्शयति — **समुदायस्येति**। **धनमेकमिति**। धनानीत्युक्ते प्रत्येकं प्रीतिहेतुत्वं प्रतीयेत। एवं गवां धनसंख्याननुवृत्तौ हेतुमाह — **आश्रितेति**। **बहूनां चापतनहेतुत्वमिति**। न पतन्त्यनेनेत्यपत्यं समुदितानां चापतनहेतुत्वमिति तत्प्रतिपादनायैकवचनप्रयोग इत्यर्थः। **न त्वेकपुत्रतेति**। तथा चाहुः — [7]"एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्' इति। लिङ्गातिवृत्तौ हेतुमाह — **लोकाश्रयत्वादिति**। तर्हि 'पुत्रा अपत्यानि' इति बहुवचनप्रयोगोऽसाधुर्भवेत्, नेत्याह — **प्रत्येकमिति**। **संघस्य देवतात्वमिति**। हविषः स्वामित्वं देवतात्वम्, तच्चैकस्य हविष इन्द्राग्न्योः समुदितयोरेव, न तु प्रत्येकमित्येकवचनप्रयोग इत्यर्थः। द्विवचनप्रयोगे तु विवक्षितोऽर्थो न प्रतीयेतेत्याह — **देवते इति**। **ततश्च विकल्पेनेति**। कदाचिदिन्द्राय

---

[1] का. वा. ५.२.९४–३.
[2] गुणवचनेभ्यः — ङ.
[3] 'पद' इति नास्ति — ङ.
[4] लौ. न्या. साहस्री. पृष्ठम् ३२.
[5] दृष्टान्तोक्तिः — ङ.
[6] स्थिताः पुरुषाः — ङ.
[7] महाभारतम् आरण्यपर्वणि पूनामुद्रिते अध्या. ८२. श्लो. ८५.

हविः प्रक्षिप्येत, कदाचिदग्नय इत्यर्थः। तस्मादेकवचनान्त एव देक्ताशब्दः प्रयोक्तव्यः। **बध्नाताविति**। बध्नात्यर्थे बन्धने। **एकार्थत्वादिति**। [1]पश्वस्वतन्त्रीकरणलक्षणैककार्यत्वादित्यर्थः। एवमिहाप्येककार्यत्वाद् विकल्पः स्यात्। **समुदायस्य दक्षिणात्वमिति**। कर्मफलसमृद्धिहेतुत्वमित्यर्थः। तथा चोक्तं यास्केन — [2]दक्षिणा दक्षतेः [3]समृद्धिकर्मणः [4]व्यृद्धं समर्धयतीति। विंशत्यादीनां शुक्लादिवैधर्म्यं स्फोरयति — **विंशतिसंख्येति**। **प्रत्येकं शुक्लादिवदिति**। शौक्ल्यं ह्येकैकस्मिन् कम्बले पौष्कल्येन वर्तत इति द्रव्यगतसंख्यानुविधानमेव शुक्लादीनामुपपन्नम्। विंशत्यादिसंख्या तु समुदितेषु द्रव्येषु समवैति, न प्रत्येकं परिसमाप्तेति तद्गतभेदानुगमाभावादेकवचनमेव भवति। [5]**द्रव्यगते लिङ्गसंख्ये नानुवर्तत इति**। शब्दशक्त्यनुसारेण यथायथं [6]लिङ्गादियोगोपपत्तिरित्यर्थः। नन्वेवं त्रयश्चत्वारः पञ्चेत्यादावप्येकवचनं स्यात्, त्रित्वादीनामपि प्रत्येकमपरिसमाप्तत्वादित्याशङ्क्य विशेषमाह — **पञ्चादयस्त्विति**। **नित्यं संख्येयवचना इति**। न तु कदाचिद्विंशत्यादिवत् संख्यानमात्रवचनाः। अत एवोक्तम् — [7]'आदशभ्यः संख्याः संख्येये वर्तन्ते, अत उत्तरं संख्याने संख्येये च' इति। ततश्चैकेन धर्मेण व्यासज्यवृत्तिना सह धर्मिणोऽनेकस्याभेदप्रतिपादनाभावाद् धर्मिभेदाश्रयं बहुवचनमेव भवति, न तु स्वगतमेकत्वमाश्रित्यैकवचनमित्यर्थः। ननु धर्मस्य धर्मिणि समवायाद् भावानयने चोदिते द्रव्यानयनं युक्तमेवेत्याशङ्क्याचोदितानुष्ठानेऽतिप्रसङ्गं दर्शयति — **न ह्यन्यस्मिन्निति**। ननु प्रश्ने सति प्रतिवचनमेव युक्तम्, न तु चोद्यवचनमित्याशङ्क्य तदाशयं दर्शयति — **अन्यस्मिन्निति**। 'तदव्यभिचारिणि' इत्यनेनातिप्रसङ्गदोषमपाकरोति — **आकृतौ साक्षादिति**। द्रव्यद्वारेणैव संभव इति द्रव्यविषयार्थक्रियावतिष्ठत इत्यर्थः। एतदेव पक्षभेदप्रदर्शनेन विशदयति — **येषां तावदिति**। 'अव्यतिरेकात्' इत्युक्तं पक्षान्तरमुपपादयति — **जातितद्वतोरिति**। अयमेव पक्षः पूर्वं [8]'येषामपि' इत्यादिनोक्तः। [9]**तेन तेनेति**। जातिद्वारेण गुणद्वारेण वा। ननु सूत्रारम्भपक्षे कथं सहस्रादीनां साधुत्वमित्यत्राह — **सहस्रादयस्त्विति**। शतस्य दशतां संघः सहस्रम्, शतस्य सहभावः स्रच्च प्रत्यय इत्येवमुक्तेन प्रकारेण पृषोदरादिषु व्युत्पादयितुं शक्यत्वात् तेषां साधुत्वमनुज्ञातमित्यर्थः॥

छेदादिभ्यो नित्यम् ५.१.६४. **पन्थो ण नित्यम्** ५.१.७६.

[४, ५६–५८]

(विवरणम्) मतुबिति। [10]अन्यतरस्यांग्रहणानुवर्तनाद्ध्यापादनविषये[11] मतुप् प्राप्तः, अतस्त-

---

[1] पशुस्वतन्त्रीकरण — ङ.

[2] निरुक्तम् १.३.७.

[3] 'समर्धयतिकर्मणः' इति निरुक्ते निर्णयसागरमुद्रिते दृश्यते।

[4] द्रव्यगलिङ्गमपि नानुवर्तत इति — घ, ङ.

[5] लिङ्गयोगोप — घ, ङ.

[6] तदस्य परिमाणमिति सूत्रे कैयटे इयमुक्तिः।

[7] प्रदीपे 'येषां तावद्व्यतिरिक्ता जातिः' इत्यस्यानन्तरं 'येषामप्यव्यतिरिक्ता जातिस्तेषामप्येतदेव' इति पाठोऽभिमत इति भाति। उपलभ्यमानप्रदीपपुस्तकेषु 'येषामप्यव्यतिरिक्ता जातिः' इति न दृश्यते।

[8] प्रदीपे 'द्रव्यमेव तेन द्वारेण' इत्यत्र 'द्रव्यमेव तेन तेन द्वारेण' इति पाठोऽभिमत इति भाति।

[9] केशोद्वोऽन्यतरस्यामित्यत इति भावः।

[10] अपादानविषयेऽपि मतुप् — व.

न्निवृत्त्यर्थमित्यर्थः। **न हीति**। छिन्नस्य प्ररोहाभावादिति भावः। **न नित्यमिति**। [1]नैरन्तर्येण, पुनः पुनरित्यर्थः। ननु प्रत्ययसंनियोगेन विधीयमान आदेशः कथं तदभावे साधुः स्यात्, अत आह — **प्रत्ययविधानं त्विति**। आदेशं वाक्यान्तरेण [2]विधाय प्रत्ययो विधीयेत। न च सहविधानव्यतिरेकेण वाक्यान्तरेणादेशविधौ प्रमाणमस्तीत्युत्तरेऽभिप्रायः॥

[४, ५६–५८]

(उद्द्योतनम्) ननु नित्यग्रहणस्य प्रत्ययान्तरनिवृत्त्यादेः प्रयोजनस्य संभवाद् विग्रहदर्शनमात्रेण कथं वैयर्थ्यमित्याशङ्क्य किमपि प्रयोजनं नास्तीत्याह — **नित्यग्रहणमिति**। **तस्य** प्रत्ययान्तरस्य। प्रत्ययान्तरप्राप्तिस्थले नित्यग्रहणेन तन्निवृत्तिरिष्यत इत्याह — **यथेति**। यथा तत्र प्रत्ययान्तर-निवृत्तिस्तथात्र न संभवति, तस्याप्राप्तत्वादित्यन्वयः। अप्राप्तिमाह — **तथा हीति**। **न चेति**। [3]'तदर्हति' इत्यर्थ इति यावत्। एकपूर्वाद् गोपूर्वाच्च मत्वर्थे नित्यं ठञ्, न मतुप्। एकशत-मस्यास्ति ऐकशतिकः, गौशतिकः। ननु पथिशब्दाण्णप्रत्ययेन ष्कन्प्रत्ययस्य बाधो नित्यग्रहणस्य प्रयोजनं संभवति, अत आह — [4]**पथिशब्दाच्चेति**। [5]'पथः ष्कन्' इति प्रतिपदविधानादित्यर्थः। **तद्विषयार्थमिति**। आर्हीय[6]ठगन्तानामेव प्रयोगः, न तु [7]केवलानामित्येतदर्थमित्यर्थः। तत्र दृष्टान्तः —**यथेति**। पाकेन निर्वृत्तं पक्त्रिममित्येव प्रयोगः, न तु पक्त्रिशब्दस्य केवलस्य, प्रत्य-यान्तरयुक्तस्य वा। **अन्यत्रेति**। प्रत्ययान्तरे, केवलस्य चेत्यर्थः। वृत्तिकारव्याख्यानं निराह — **नापि प्रत्ययार्थेति**। **न हीति**। छिन्नस्य छेदायोगादित्यर्थः। ननु छिन्नस्य पुनः प्ररोहे छेदः संभवति, अत आह — **योऽपीति**। **यद्यपीति**। न हि कश्चिदपि मनुष्यो नित्यं गच्छ-तीति अभ्युपेत्यवादोऽयम्। वाक्यनिवृत्त्यर्थत्वं सदृष्टान्तं शङ्कते — **वाक्यनिवृत्त्यर्थमिति**। तत्र वार्तिकोक्तं हेतुमाह — **शिष्टप्रयोग इति**। ननु प्रत्ययान्वितेन नित्यग्रहणेन विकारेण विग्रहा-भावः कथं लभ्यते, अत आह — **नित्यग्रहणमिति**। **विकारेण** आदेशेन। तावता वाक्यनिवृत्तिः कथम्, अत आह — **विरङ्गादेश इति**। 'विराग विरङ्गं च' इति छेदादिषु पठ्यते। विराग-शब्दाट्ठग् भवति, तत्संन्नियोगेन विरङ्गादेशः प्रकृतेर्भवति। विरागमर्हति वैरङ्गिकः। द्वितीयान्तात् पथो णप्रत्ययः पन्थादेशश्च। पन्थानं गच्छतीति पान्थः। नित्यग्रहणाभावेऽनिष्ट-माह — **अन्यथेति**। **सर्वविषयमिति**। प्रत्ययं विना, प्रत्ययान्तरेऽपि च प्रयोगप्रसङ्ग इत्यर्थः। प्रत्ययसंनियोगेन [8]विहितयोः कथं प्रत्ययाभावे प्रसङ्गः, अत आह — **प्रत्ययविधानमिति**। तस्या-प्रधानतया न संन्नियोगशिष्टन्याय इति भावः। **सुधातुरिति**। प्रधानमप्रधानं वास्तु प्रत्यय-विधानम्, संन्नियोगशिष्टत्वमस्तीति भावः। परस्त्रीशब्दः प्रत्ययमुत्पादयति, तत्संनियोगेन परशु-भावं प्राप्नोति, पारशवः। अयं न्यायः प्रयोगानुरोधेनाङ्गीक्रियत इत्याह — **विशिष्टेति**। अत्र दृष्टान्तः — **यथेति**। नन्वेवं संन्नियोगशिष्टानामित्यस्य न्यायसिद्धत्वे तदर्थज्ञापनाश्रयणं व्यर्थं स्यात्, अत आह — **अस्यैवेति**। उपोद्बलकतया ज्ञापकं वक्ष्यत इत्यर्थः। [9]'नडादीनां कुक च्' इति भाति।

---

[1] 'नैरन्तर्येण' इत्यतः प्राक् 'न' इत्यधिकम् — ङ. नित्यमित्यस्य नैरन्तर्येणेत्यर्थः।

[2] विधाय यदि प्रत्ययो विधीयते — व.

[3] पा. सू. ५.१.६३.

[4] प्रदीपे 'पथिशब्दात् ष्कन्प्रत्ययः' इत्यत्र 'पथिशब्दाच्च ष्कन्प्रत्ययः' इत्यन्नंभट्टपाठ

[5] पा. सू. ५.१.७५.

[6] ठञ्न्तानामेव — अ, ऋ, लृ.

[7] केवलानामित्येतदर्थः — अ, ऋ, लृ.

[8] विरङ्गपन्थादेशयोरित्यर्थः।

[9] पा. सू. ४.२.९१.

इति छसंनियोगेन कुग्विधानाद् बिल्वकादिभ्यः कुक्सहितेभ्यः परश्छ एवेति छस्येत्येतन्न्यायं ज्ञापयति। छनिवृत्तौ कुको निवृत्तिर्मा भूदित्येतदर्थत्वाच्छग्रहणस्य। भोजनादिकार्यमन्यतरापाये-ऽपि, क्रियते, अत आह — **धर्मेति**। तत्र सापेक्षत्वे हेतुः — **तत्र हीति**॥

[४, ५६–५८]

(नारायणीयम्) अत्र नित्यग्रहणस्य यानि प्रयोजनानि संभवन्ति तानि वाक्यतात्पर्यप्रदर्शनेन निराकर्तुमाह — **नित्यग्रहणमिति**। प्रत्ययान्तरस्याप्राप्तिमेवोपपादयति — **तथा हीति**। **नापि तद्विषयार्थमिति**। नित्यं ठग्विषया एव छेदादय इत्यन्यत्र तेषां प्रयोगनिवारणार्थमित्यर्थः। ननु वेतसादीनां छेदे पुनः प्ररोहात् पुनरपि छेदार्हत्वान्नित्यच्छेदमर्हतीत्यर्थः[1] संभवतीत्यत्राह — [2]**योऽपीति**। वार्तिकं व्याचष्टे — **वाक्यनिवृत्त्यर्थमिति**। **यथा नित्यमिति**। अत्र महाविभाषया प्राप्तस्य वाक्यस्य निवृत्त्यर्थं नित्यग्रहणम्[3]। नित्यग्रहणेन विकारप्रयोगनिवृत्तिः कथं क्रियत इत्यत आह — **नित्यग्रहणमिति**। ननु प्रत्ययसंनियोगेन विधानात् तदभावे तयोरसाधुत्वं सिध्यतीत्यत आह — **प्रत्ययविधानं त्विति**। **अन्वाचीयमानमिति**। न तु समुच्चीयमानम्। **प्रत्ययसंनियोगेनेति**। प्रत्ययेन समुच्चित्य विकारणामादेशानां विधानात् प्रत्ययाभावे तेषामप्रसङ्ग इत्यर्थः। [4]**अस्यैवार्थस्येति**। कृतकुगागमेभ्यो बिल्वकादिभ्यश्छस्यैव संभवात् लुगित्येव तस्य लुकि सिद्धे छग्रहणं कुको निवृत्तिर्मा भूदित्येवमर्थं सदस्मिन्नर्थे लिङ्गम्। **धर्मनिर्णयादिकमिति**। अनेकसंप्रतिपत्तौ हि धर्माधर्मादिकं निर्णेतुं शक्यते। तदाह — **तत्र हीति**॥

यज्ञर्त्विग्भ्यां घखञौ ५.१.७१.

[४, ५८]

(विवरणम्) मुख्यासंभवे गौणमुख्यन्यायाभावाद् गौणस्यैव ग्रहणम्। मुख्यसंभवे गौणमुख्यन्यायान्मुख्यस्यैव ग्रहणम्। उभयग्रहणं तु लक्ष्यवशात् क्वचिदित्यभिप्रेत्य परिहरति — **नैतदिति**॥

[४, ५८]

(उद्द्योतनम्) गौणार्थपरिग्रहे सूत्रेणैव देशादावपि प्रत्ययसिद्धिं शङ्कते — **नन्विति**। वृत्तौ गौणार्थग्रहे दृष्टान्तः — **यथेति**। मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः। **नैतदिति**। दृष्टान्ते गौणादेव प्रत्यय इष्यते, न मुख्यादिति गौणमुख्यन्यायस्याप्रवृत्तिः। इह तूभाभ्यामिष्यत इति तन्न्यायप्रवृत्तौ गौणान्न प्राप्नोतीति वचनमावश्यकमित्यर्थः। देशेऽपि मुख्यत्वं शङ्कते — **नन्विति**। **नैतदिति**। यज्ञियशब्दस्याधिकारिण्येव प्रयोगदर्शनादधिकारिण एव तदर्हत्वम्। देशस्य तु तदनुकूलकर्मार्थत्वमेवेत्युपसंख्यानापेक्षेति भावः॥

---

[1] नित्यच्छेदविधानमर्हतीत्यर्थः — घ. — ङ.
[2] यो हीति — घ, ङ.
[3] एतदुपरि पञ्चमाध्यायसमाप्त्यन्तं नास्ति
[4] प्रदीपे 'अस्यैव न्यायसिद्धस्यार्थस्य' इत्यत्र अस्यैवार्थस्य' इति पाठोऽभिमत इति भाति।

[४, ५८]

(**नारायणीयम्**) नन्विह शास्त्रे लक्ष्यदर्शनवशात् क्वचिद् गौणार्थवृत्तेरपि कार्यदर्शनादिह तत्कर्मणि तच्छब्दस्य वृत्त्या सूत्रेणैव प्रत्ययस्य सिद्धत्वात् किं वार्तिकेनेत्याशङ्कामुद्भाव्य समाधत्ते — **ननु वृत्तिविषय इति। यस्य यज्ञ इति**। यज्ञमर्हतीत्युक्तेऽधिकारिण एव प्रतीतिर्नान्यस्येत्यर्थः। **अर्थिन इति**। स्वर्गादिकं प्रत्यवायपरिहारं वा य इच्छति तस्येत्यर्थः। **विदुष इति**। अविदुषः कर्मण्यनधिकारात्। **शास्त्रेणापर्युदस्तस्येति**। अन्धपङ्ग्वादीनां काम्यकर्मणि क्वचिदधिकारः शास्त्रेण पर्युदस्तः। तर्हि यज्ञकर्मार्हत्वं देशादेः कथमित्यत्राह — **तस्येति**। यज्ञानुष्ठानयोग्यो देशकालादिर्यज्ञियशब्दवाच्यः॥

पारायणतुरायणचान्द्रायणं वर्तयति ५.१.७२.

[४, ५८–५९]

(**उद्द्योतनम्**) ननु निर्देशस्यानिर्देशत्वं कथम्, कर्मणि घञन्तस्योच्चार्यमाणवाचकत्वात्, अत आह — **इष्टार्थेति**। शब्दद्वयस्य पारायणान्वययोग्यमर्थमाह — **शिष्यस्येति**। शिष्यस्याप्युच्चारणकर्तृत्वमस्ति, अत आह — **शिष्यस्त्विति**। गुरुमुखोच्चारणानूच्चारणं शिष्यस्य व्यापारः। अध्यापक एवाध्ययन[1]निष्पत्तौ स्वतन्त्र इत्यर्थः। **ऋत्विगेवेति**। बह्वङ्गानुष्ठानस्य तदधीनत्वादेवेत्यर्थः। **तूष्णीमिति**। ऋत्विक्कर्तृकाङ्गेष्वित्यर्थः। **अन्यतरेति**। अध्ययनक्रिया गुरुशिष्यसाध्या। यागोऽपि साङ्ग ऋत्विग्यजमानसाध्यः। **तदेवमिति**। 'पारायणतुरायणयोरधीते यजत इत्यर्थे' इति न्यासान्तरं कर्तव्यमिति वार्तिककारमतं दूषितमित्यर्थः। **अध्यापक इति**। शिष्ये यजमाने च प्रयोगः॥

[४, ५८–५९]

(**नारायणीयम्**) ननु निर्देशस्य श्रूयमाणस्य निषेधोऽनुपपन्न इत्यत आह — **इष्टार्थेति**। अत एव भाष्ये 'अगमको निर्देशः' इति व्याख्यातम्। **शिष्यस्येति**। पारायणं नाम कृत्स्नवेदाध्ययनम्, वर्तनं निष्पादनम्। गुरुर्हि शिष्यस्य प्रतिपत्त्यर्थमध्ययनं निष्पादयतीति गुरावेव प्रत्ययः स्यात्, छात्रे त्विष्यते। तदेतदाह — **शिष्यस्त्विति**। **तन्निष्पत्तेरिति**। पारायणनिष्पत्तेरित्यर्थः। उक्तं च शौनकाचार्यैः — पारायणं वर्तयेद् ब्रह्मचारी गुरुः शिष्येभ्यस्तदनुव्रतेभ्यः' इति। **यज्ञविशेषमिति**। संवत्सरसाध्यं हविर्यज्ञविशेषमित्यर्थः। अत्राप्यृत्विजि प्रत्ययः प्राप्नोति, यजमाने त्विष्यते। गुरुशिष्ययोरुभयोरप्यध्ययननिष्पादने कर्तृत्वमुपपादयति — **अन्यतरेति**। यज्ञनिष्पादने यजमानस्यापि व्यापारं दर्शयति — **यजमान इति**।

---

[1] निवृत्तौ — ऋ.

उत्तरपथेनाहृतं च ५.१.७७.

[४, ६०]

(उद्द्योतनम्) णष्कनोराकर्षकत्वशङ्कां निराह — **चकार इति**। **युक्त इति**। श्रुतविभक्तित्यागेनाश्रुतकल्पनस्यायुक्तत्वादिति भावः। न केवलमश्रुतकल्पना, द्वितीयाङ्गीकारे बाधकमप्यस्तीत्याह — **द्वितीयापक्ष इति**। पथि पादविक्षेपसाध्यं यद् गमनं तदाक्रान्तशब्देनोच्यते। तत्र पथः करणत्वमेव, पादप्रक्षेपस्य तत्साध्यत्वात्। ज[ङ्ग]लपथं गच्छतीत्युक्ते तत्र पादविक्षेपपूर्वकमपि गमनं प्रतीयते, तद्रहितं तदुद्देशेनान्यस्माद् गमनमपि, ग्रामं गच्छतीतिवत्। तथा च प्रकृत्यर्थे ज[ङ्ग]लपथेऽनाक्रान्ते प्रत्ययनिरासाय तृतीयान्तपाठ एव युक्त इत्यर्थः। **गमनासंभवादिति**। स्वत इत्यादिः। **गौणेति**। चेतनेनानीयमानयोस्तयोर्देशान्तरप्राप्तिलक्षणगमनकार्यदर्शनात् तयोरपि गौणं गमनमस्तीत्यर्थः। ननु मधुकमरिचयोः प्रत्ययार्थत्वात् तत्पदप्रयोगः पुनरुक्तः, अत आह — **प्रत्ययेति**। आहृतरूपप्रत्ययार्थविशेषणतया तयोः प्रत्ययार्थत्वे [1]'स्थालपथम्' इत्युक्ते मधुकं मरिचं वेति संदेहनिरासाय द्वयोरपि तदर्थत्वसूचनायानुप्रयोग इत्यर्थः॥

[४, ६०]

(नारायणीयम्) भाष्ये क्वचित् पुस्तके 'वारिपथं गच्छति' इत्यादिद्वितीयान्तपाठो दृश्यते। तस्यायुक्ततां प्रतिपादयितुं चकारेण समर्थविभक्तेः समुच्चेतव्यत्वायोगमाह — **चकार इति**। लौकिके प्रयोगे वारिपथिकादेर्योऽर्थः प्रतीयते तदनुसारेणाप्येवमेव पाठो युक्त इत्याह — **द्वितीयापक्ष इति**। वारिपथादेर्गमनकर्मत्वे तेन प्राप्यमाणत्वादाक्रमणं न नियतम्, करणत्वं त्वाक्रमणं विना नोपपद्यत इति नियमेन तत्प्रतीतिरित्यर्थः। **मुख्यगमनासंभवादिति**। अचेतनानां चेतनाधिष्ठितानामेव देशान्तरप्राप्तिलक्षणकार्यदर्शनाद् गन्तृत्वारोपादौपचारिकं गमनम्, न तु मुख्यमिति भावः। **आहृत एवेति**। न तु गच्छतीत्यत्रापि। **अन्ये त्विति**। गौणमुख्यन्यायस्य लक्ष्यदर्शनवशादस्मिन् शास्त्रे क्वचिदनाश्रयणात्। ननु मधुकमरिचयोः प्रत्ययविधानात् तच्छब्दप्रयोगोऽनर्थक इत्यत आह — **प्रत्ययार्थेति**॥

तमधीष्टो भृतो भूतो भावी ५.१.८०.

[४, ६०–६१]

(विवरणम्) अव्याप्त्या द्वितीयेति। [2]'कालाध्वनोरत्यन्तसंयोगे' इत्यनेन॥

[४, ६०–६१]

(उद्द्योतनम्) अध्येषणभरणयोर्मुहूर्तव्याप्तत्वात् तत एव प्रत्ययसंभवात् कथं द्वितीयानिर्देशो-

---

[1] स्थूलपथमित्युक्ते — अ, ऋ, लृ. [2] पा. सू. २.३.५.

ऽनर्थकः, अत आह — **यावन्तमिति**। **ततः** मुहूर्तादिशब्दात्। अध्येषणभरणयोः फलभूतो यो व्यापारः — अध्यापनकर्मकरणे, ताभ्यां व्याप्तान्मासादेरित्यर्थः। ननु मासायेति न संप्रदाने तादर्थ्ये वा चतुर्थी, अत आह — **मासव्यापीति**। वृत्तौ मासशब्दस्तद्व्यापिव्यापारे वर्तत इत्यर्थः। तादर्थ्यात् ताच्छब्द्ये द्वितीयोपपत्तिमाह — **मासादीति**। नन्वेकस्मिन् सूत्रे द्वयोर्मुख्यत्वं द्वयोर्गौणत्वं च कथमुच्यते, अत आह — **लक्ष्येति**॥

[४, ६०–६१]

(नारायणीयम्) नन्वध्येषणभरणव्याप्यात् कालात् प्रत्ययो यथा स्यादित्येवमर्थो द्वितीयानिर्देशः स्यादित्याशङ्क्य 'तत्रादर्शनात् इत्येतद्व्याकुर्वन् परिहरति — **यावन्तमिति**। कुतः पुनरिष्यत इत्यत्राह — **अध्येषणेति**। अध्येषणं सत्कृत्य व्यापरणम्, भरणं वेतनेन स्वीकरणम्, तयोर्यत् फलमध्यापनादिको व्यापारः, तेन व्याप्यान्मासादेः। **द्वितीयानुपपत्तिरिति**। [१]'कालाध्वनोरत्यन्तसंयोगे' इत्यनेनात्यन्तसंयोगाभावाद् द्वितीया नोपपद्यत इत्यर्थः। ननु मासादिकालविशेषसंपादनार्थमध्येषणादिकं न क्रियत इत्यत आह — **मासव्यापीति**। तादर्थ्यात् तच्छब्दवृत्तिं स्फोरयति — **मासादीति**।

अवयसि ठंश्च ५.१.८४.

[४,६१–६२]

(उद्द्योतनम्) विपरीतम् अनिष्टम्। नन्वानन्तर्यस्य नियामकत्वात् कथं व्यवहिताकर्षणशङ्का, अत आह — **व्यवहितस्यापीति**। तत्रेवात्रापि स्वरितत्वभ्रमसंभवादिति भावः॥

[४, ६१–६२]

(नारायणीयम्) ण्यत इति। न तु व्यवहितस्य यपः। ननु ज्ञानस्य द्वेषविषयत्वमनुपपन्नमित्याशङ्क्य तेन विपरीतत्वं लक्ष्यत इत्याह — **विपरीतमित्यर्थ इति**। ननु [२]'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायाद् विपरीतज्ञानस्यात्रासंभव इति वार्तिकमनर्थकमित्यत आह — **व्यवहितस्यापीति**। **कश्चिद् भ्राम्येदिति**। भ्रान्तिनिरासार्थमेवेदं वार्तिकमित्यर्थः॥

षष्टिकाः षष्टिरात्रेण पच्यन्ते ५.१.९०.

[४, ६२]

(उद्द्योतनम्) बहुवचनान्तस्यैव साधुत्वशङ्कां निराह — **बहुवचनमिति**। **अत्रार्थ इति**। [३]षष्टिरात्रशब्दात् तृतीयान्तात् पच्यन्त इत्यर्थे प्रत्ययः, [४]रात्रशब्दस्य च लोपो निपात्यत इत्यर्थः।

---

[१] पा. सू. २.३.५.
[२] परिभाषा ६२.
[३] षष्टिरात्रिशब्दात् — लृ.
[४] रात्रिशब्दस्य — अ, ऋ, लृ.

अनभिधानस्यातिप्रसङ्गनिरासकत्वमुपपादयति — **लोक इति**। गवादिशब्दानामिव सामान्येनान्वाख्यानेऽपि लोकतोऽर्थव्यवस्थोपपत्तिरिति भावः॥

[४, ६२]

(नारायणीयम्) लाघवात् प्रथमातिक्रमे कारणाभावाच्चैकवचननिर्देशे [कर्तव्ये] सूत्रे बहुवचननिर्देशाद् विवक्षितं तदिति मन्यमानं प्रत्याह — **बहुवचनमतन्त्रमिति**। [प्रयोग] बहु [त्वाभिप्रायेण सूत्रे] बहुवचनं प्रयुक्तम्। अत एव वार्तिके 'षष्टिके' इत्येकवचनं प्रयुक्तम्। [अन्य]था 'षष्टिकेषु' इति निर्दिशेत्। ननु निपातनादेवार्थविशेषे षष्टिकशब्दस्य साधुत्वं सिद्धमिति किं संज्ञाग्रहणेनेत्यत्राह — **षष्टिरात्रेणेति**। 'अनभिधानात्' इत्यस्यात्र शास्त्रेऽर्थाभिधानाभावादित्यर्थमाह — **लोक इति**॥

तदस्य ब्रह्मचर्यम् ५.१.९४.

[४, ६२–६४]

(उद्द्योतनम्) सूत्रस्य संप्रदायसिद्धं व्याख्यानद्वयमाह — **द्विधेति**। **मासं ब्रह्मचर्यमिति**। ब्रह्मचर्येणात्यन्तसंयोगात् 'मासम्' इति द्वितीया षष्ठीविषये विधीयते। अत एवात्यन्तसंयोगाविवक्षायां 'मासस्याधीते' इति षष्ठी। शेषे च षष्ठी, शेषश्च कारकप्रातिपदिकार्थव्यतिरिक्तोऽप्रधानं वा। तथा च प्रथमाविषये द्वितीया न प्राप्नोतीत्यर्थः। सौत्रतच्छब्दस्य प्रथमान्तत्वं चेत्युक्तम्। 'महानाम्नीनाम्' इति कथं षष्ठी लभ्यते, अत आह — **ब्रह्मचर्यस्येति**। महानाम्नीनां मन्त्राणां षष्ठीं विना ब्रह्मचर्येण संबन्धाप्रतीतेरिति भावः। चरणमुच्चारणं मन्त्राणामपि संभवति, अत आह — **चरणमिति**। ननु 'महानाम्न्यो व्रतम्' इति कथमेकवचनबहुवचानान्तयोः सामानाधिकरण्यम्, अत आह — **लिङ्गसंख्ये इति**। वेदाः प्रमाणम्' इतिवत् सामानाधिकरण्योपपत्तिः। 'अवान्तर[1]दीक्षी' इत्यादेः [2]'यस्य' इति लोपेनैव सिद्धेर्ङित्करणमुत्तरार्थमित्याह — **ङिनेरिति**। संख्येयसामान्यपरत्वशङ्कां निराह — **वृत्तिविषय इति**। तत्र हेतुमाह — **चतुर्ष्विति**। [3]'प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा' इति स्मरणादिति भावः। पुनरण्विधेः प्रयोजनमाह — **तत्र भव इःयेवेति**। ननु विशेषविहितस्य ठञो बाधनार्थमण्विधिरस्तु, अत आह — **कालादिति**। **तदन्तेति**। [4]'ग्रहणवता' इति निषेधात्। **यथाकथंचिदिति**। [5]'कलाप्यश्वत्थयवबुसाद्वुन्' इत्यादाविवेत्यर्थः। **तस्य[च] लुकीति**। [6]'द्विगोर्लुगनपत्ये' इत्यनेन। ठञोऽपवादोऽण्, अन्यथा स्वार्थिकत्वाप्रसङ्गादित्यप्याहुः॥

[४, ६२–६४]

(नारायणीयम्) द्विधेदमिति। अर्थद्वयविवक्षया सूत्रकारेण सूत्रस्य प्रणयनाद्वृत्तिकारैरुभयथा

---

[1] दीक्षेत्यादेः — अ, ऋ, लृ.
[2] पा. सू. ६.४.१४८.
[3] याज्ञवल्क्यस्मृतिः आचाराध्याये श्लो. ३६.
[4] परिभाषा ३१.
[5] पा. सू. ४.३.४८.
[6] पा. सू. ४.१.८८.

व्याख्यातमिदं सूत्रमित्यर्थद्वयस्य प्रामाण्यं दर्शयति। **द्वितीयासमर्थादिति**। [1]'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया समर्थविभक्तिः। **ब्रह्मचर्यं चेद् गम्यत इति**। मासादिकालविशेषव्यापकत्वेनेत्यर्थः। ननु ब्रह्मचर्यस्य प्रत्ययार्थत्वेऽपि तेन मासादेर्व्याप्यत्वाद् द्वितीया समर्थविभक्तिर्युक्ता, न तु प्रथमेत्यत आह — **वाक्य इति**। मासादेर्विशेष्यत्वेन विवक्षितत्वाद् विशेषणविषयषष्ठ्यपवादद्वितीयाया अभाव इत्यर्थः। ननु वार्तिके समर्थविभक्त्यनुपादानात् किमन्तेभ्यो महानाम्न्यादिभ्यः प्रत्ययविधिरित्यत आह — **ब्रह्मचर्यस्येति**। अत एवोक्तं भाष्ये 'महानाम्नीनाम्' इति। **तच्च क्रियाविषयमिति**। क्रियाया एवानुष्ठानं संभवति, न तु शब्दरूपाणां महानाम्नीनाम्। **लिङ्गसंख्ये अजहदेवेति**। आरोपविषये स्वलिङ्गसंख्यापरित्यागात्[2]। यथा 'यष्टीः प्रवेशय' इत्यादौ। **महानाम्नीशब्द इति**। महन्नाम यासां ता महानाम्न्यः [3]'विदामघवन्' इत्याद्या ऋचः। [4]'नित्यं संज्ञाच्छन्दसोः' इति ङीप्। तच्छ्रवणार्थं यद् व्रतं तत्र तच्छब्दो वर्तत इत्यर्थः। **वृत्तिविषय इति**। संख्येयसामान्ये वर्तमानस्याष्टाचत्वारिंशच्छब्दस्यैतद्वृत्तिविषये संख्येयविशेषेष्वेव वृत्तिरभिधानस्वाभाव्यादित्यर्थः। **चतुर्षु वेदेष्विति**। एकस्य वेदस्य द्वादशवर्षाणि व्रतचरणम्। यथोक्तमाश्वलायनेन — [5]'द्वादश वर्षाणि वेदब्रह्मचर्यम्' इति। द्वयोश्चतुर्विंशतिः, त्रयाणां षट्त्रिंशत्, चतुर्णामष्टाचत्वारिंशत्। उक्तं चापस्तम्बेन[6] — 'उपेतस्याचार्यकुले ब्रह्मचारिणो वासः, अष्टाचत्वारिंशद्वर्षाणि' इति। तत्र केचित् प्रतिवेदमुपनयनं कर्तव्यमिति मन्यन्ते। अन्ये तु सकृदुपनयनं सर्ववेदार्थमिच्छन्ति। यथोक्तम् — [7]'सर्वेभ्यो वेदेभ्यः सावित्र्यनूच्यत इति हि ब्राह्मणम्' इति। तेन यः सर्ववेदाध्ययनार्थं व्रतं चरति सोऽष्टाचत्वारिंशकः। यदाह याज्ञवल्क्यः — [8]'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्। अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्' इति। **पुनरण्विधिरिति**। पुनरण्विधाने तत्सामर्थ्याल्लुङ् न भवति। **तदन्तविध्यभावादिति**। समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधात्। **यथाकथंचिदिति**। गुणवृत्त्यापि कालवाचिभ्यः, यथा — कदम्बपुष्पे भवः कादम्बपुष्पिकः, इति। तेन कालसमुदायवृत्तेरपि ठञ् भवतीत्यर्थः॥

तस्य दक्षिणा यज्ञाख्येभ्यः ५.१.९५.

[४, ६४]

(उद्द्योतनम्) स्वरूपग्रहणनिरासायाख्याग्रहणं किं न स्यात्, अत आह — **यज्ञेभ्य इति**। प्रसिद्धानामेव ग्रहणे हेतुः — **प्रसिद्धत्वादेवेति**। मुख्यामुख्ययोर्मुख्यस्यैव ग्रहणं युक्तमित्यर्थः। प्रसिद्धत्यागे हेतुमाह — [9]**एवं चेति**। **ये यज्ञमिति**। आख्याग्रहणस्य सर्वसंग्रहार्थत्वादित्यर्थः॥

---

[1] पा. सू. २.३.५.
[2] लिङ्गसंख्ययोरपरित्यागादित्यर्थः।
[3] सामवेदे पूर्वार्चिके महानाम्न्यार्चिके १.
[4] पा. सू. ४.१.२९.
[5] आश्वलायनगृह्यम् २२.३.
[6] आपस्तम्बधर्मसूत्रम् २.११,१२.
[7] आपस्तम्बधर्मसूत्रम् १.२०.
[8] मनुस्मृतौ ३.२. अत्रोत्तरार्धे 'अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्' इति दृश्यते। याज्ञवल्क्यस्मृतौ 'वेदानधीत्य' इत्यर्धं नास्ति। 'अविप्लुत' इत्यर्धं तु दृश्यते आचाराध्याये श्लो. ५२. पूर्वार्धत्वेन।
[9] प्रदीपे 'एवं यज्ञशब्दश्रुतिः' इत्यत्र 'एवं च यज्ञशब्दश्रुतिः' इत्यन्नंभट्टपाठ इति भाति।

[४, ६४]

(नारायणीयम्) नन्वसत्याख्याग्रहणे [1]'स्वं रूपम्' इति वचनाद् यज्ञशब्दादेव प्रत्ययः स्यादिति तस्य कर्तव्यत्वादाक्षेपो न युक्त इत्यत आह — **बहुवचनेति**। **प्रसिद्धत्वादेव [ते यज्ञा] मुख्या इति**। प्रसिद्धयप्रसिद्धिकृतत्वान्मुख्यगौणव्यवस्थानस्य। यथोक्तम् — [2]'शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते। स मुख्य इति विज्ञेयो रूपमात्रनिबन्धनः। यस्त्वन्यस्य प्रयोगेण यत्नादिव नियुज्यते। तमप्रसिद्धं मन्यन्ते गौणार्थाभिनिवेशिनम्॥' इति। ततश्चाप्रसिद्धत्वात् पञ्चौदनादिभ्यो न स्यात्। **बहुवचनेति**। बहुवचननिर्देशसामर्थ्यादत्र तदन्तविधिरित्यर्थः। तदेतदाह — **एवं यज्ञश्रुतिरिति**। **ये यज्ञमिति**। ये यज्ञं यथाकथंचिदाचक्षते ते यज्ञाख्या इति व्याप्त्यर्थमाख्याग्रहणमित्यर्थः॥

तत्र च दीयते कार्यं भववत् ५.१.९६.

[४, ६५–६६]

(विवरणम्) ननु सप्तम्यन्ताद् भवे प्रत्ययो विधीयमानः सत्सप्तम्यन्तादपि भविष्यतीत्यत आह — **तत्र भव इत्यत्र चेति**॥

[४, ६५–६६]

(उद्द्योतनम्) दीयते कार्यमिति विशिष्टैकार्थत्वशङ्कामपाकुर्वन् सूत्रार्थमाह — **दीयत इति**। **तत्र** सूत्रार्थे सति। [3]**तत्र** कार्ये। तर्हि मासस्याधिकरणत्वाभावात् 'मासे दीयते' इति कथं सप्तमी, अत आह — **मासे दीयत इति**। [4]'तत्र भवः' इत्यत्रापि सतिसप्तम्येवास्तु, अत आह — **तत्र भव इति**। तत्र हेतुः — **उपपदेति**। **इहेति**। इहाप्यधिकरणसप्तमी चेत् [5]'तत्र भवः' इत्येव प्रत्ययसिद्धेरतिदेशो व्यर्थः सन् तद्विलक्षणं सप्तम्यर्थमवगमयतीत्यर्थः। मासस्यौपश्लेषिकत्वमाह — **मास इति**। आनन्तर्यलक्षणसंबन्ध एवोपश्लेष इत्यर्थः। **तत्र भव इति**। 'मासे' इत्यस्या अप्यधिकरणसप्तमीत्वादित्यर्थः। नन्वौपश्लेषिकस्य मुख्याधारत्वाभावात् कथमधिकरणसंज्ञा, अत आह — **कारकप्रकरण इति**। [6]'साधकतमं करणम्' इति तमग्रहणात् [7]'स्वरितेनाधिकारः' इत्यस्याधिकः कारः अधिकं कार्यमित्यर्थाश्रयणाद् गौणस्याप्यपादानसंज्ञा भवतीति [8]तत्रोक्तम्। ननु योगविभागेऽपि 'भववत्' इत्यतिदेशाद् दीयत इत्यस्य वैयर्थ्यं तदवस्थम्, अत आह — **प्रत्ययेति**। यज्ञाख्येभ्यः सप्तम्यन्तेभ्यो दीयत इत्यर्थे ठञ्विध्यर्थो योगविभाग इत्यर्थः। [9]'तत्र भवः' इत्येवात्रापि ठञ्सिद्धेर्योगविभागो व्यर्थ इति शङ्कते — **केचिदिति**। व्याख्यात-

---

[1] पा. सू. १.१.६८.
[2] वाक्यपदीयम् २.२६५, २६६.
[3] प्रदीपे 'अत्र प्रत्ययानां सिद्धिम्' इत्यत्र 'तत्र प्रत्ययानां सिद्धिम्' इत्यन्नंभट्टपाठ इति भाति।
[4] पा. सू. ४.३.५३.
[5] पा. सू. ४.३.५३.
[6] पा. सू. १.४.४२.
[7] पा. सू. १.३.११.
[8] साधकतममिति सूत्रे स्वरितेनाधिकार इति सूत्रे चेत्यर्थः।
[9] पा. सू. ४.३.५३.

व्यनाम्न इति तत्र नानुवर्तत इति तेषामभिमानः। **अनुवर्तनादिति**। तथा च यज्ञाख्यानां व्याख्यातव्यनामत्वाभावेऽप्यनेन ठञ्त्यर्थः। **कार्यग्रहणमेवेति**। योगविभागार्थं 'दीयते' इत्यस्यावश्यकत्वात्। योगविभागस्य प्रयोजनान्तरमप्याह — **प्राग्वतेरिति**॥

[४, ६५–६६]

(**नारायणीयम्**) सूत्रार्थे निर्ज्ञाते सूत्रावयवाक्षेपवचनं सुज्ञानं भवेदिति तं तावदाह — **दीयत इति**। यथा मासे भवं मासिकम्, एवं मासे दीयते कार्यं वा मासिकमित्याद्युदाहरणम्। ननु गते मासे यद्दीयते तस्य मासाधिकरणत्वाभावात् कथं सप्तमीत्यत्राह — **मासे दीयत इति**। **नैषेति**। ननु यथा [१]'तत्र भवः' इत्यधिकरणसप्तम्याश्रीयते, एवमिहाप्यधिकरणसप्तम्येव युक्तेत्यत आह — **इह त्विति**। **तस्य मास औपश्लेषिकमिति**। माससमीपस्थत्वाद्दानस्य। यथा 'गङ्गायां घोषः' इति। ननु गौणमुख्यन्यायेनैवंविधे विषयेऽधिकरणसंज्ञा कथं भवेदित्यत्राह — **कारकप्रकरण इति**। 'योगविभागोत्तरकालम्' इति भाष्यस्यायमर्थः — योगविभागं मनसि कृत्वा 'कार्यग्रहणमनर्थकम्' इत्युक्तं वार्तिककृतेति। तदाह — **प्रत्ययविध्यर्थमिति**। **व्याख्यातव्यनाम्न इति**। 'आग्निष्टोमिकं भक्तम्' इत्यादावग्निष्टोमादिशब्दो न व्याख्यातव्यनामेति लक्षणान्तरेणासिद्धचात्र योगविभागः क्रियत इत्यर्थः। ततश्च दीयतेग्रहणस्य कर्तव्यत्वात् 'कार्यग्रहणमनर्थकम्' इति युक्तमुक्तमित्याह — **तदेवमिति**। योगविभागस्य प्रयोजनान्तरमाह — **प्राग्वतेरिति**। **ठञ् भवतीति**। [२]'ऋतुयज्ञेभ्यश्च' इत्यत्र तु तदन्तविधेरभावाद् व्याख्यातव्यनामत्वेऽप्यत्र ठञ् न स्यादिति योगविभागाश्रयणमिति भावः॥

व्युष्टादिभ्योऽण् ५.१.९७.

[४, ६६]

(**उद्द्योतनम्**) ननु व्युष्टाद्यणोऽग्रेऽननुवर्तनात् प्रकरण इत्ययुक्तम्, अत आह — **प्रकरणमिति**। अग्निपदादयो न क्वचिदानुपूर्व्येण पठ्यन्ते, अत आह — **आदिशब्द इति**। **कुतश्चित्** प्रकृतेः। अग्निपदे दीयते आग्निपदम्। प्राशिता प्राप्तोऽस्य प्राशित्रम्। 'चूडा प्रयोजनमस्य चौडम्' इत्यादीनामर्थविशेषे प्रत्ययविधानात् सादृश्याभावात् कथं प्रकारवाचिनादिशब्देन संग्रहः, अत आह — [३]**तत्रेति**॥

[४, ६६]

(**नारायणीयम्**) प्रकरणशब्देनात्र प्रस्तावमात्रमुच्यते, न तु प्रकृतानुवृत्तिरित्याह — **प्रकरणं प्रस्ताव इति**। ननु त्रिष्वर्थेष्वग्निपदादिभ्यः प्रत्ययविधाने भिन्नप्रस्थानतयोदाहरणप्रदर्शनं कथमित्यत्राह — **आदिशब्द इति**॥

---

[१] पा. सू. ४.३.५३.

[२] पा. सू. ४.३.६८.

[३] तेनेति — अ.

अनुप्रवचनादिभ्यश्छः ५.१.१११.

[४, ६६–६७]

(उद्द्योतनम्) अनस्येति। 'अन' इति ल्युडादेशस्य प्रत्ययत्वाद् धातुरहितस्य प्रयोगाभावादित्यर्थः। नन्वभेदोपचारेण प्रयोगोपपत्तेर्लुग्वचनं व्यर्थम्, अत आह — **साहचर्यादिति**। प्रयोजनप्रयोजनिनोरभेदोपचारः साहचर्यम्। अभेदविवक्षया प्रत्ययरहितस्य प्रयोगसिद्धावपि भेदविवक्षायां प्रत्ययश्रवणनिरासाय लुग्वचनमित्यर्थः॥

[४, ६६–६७]

(नारायणीयम्) अनस्य केवलस्येति। [1]'युवोरनाकौ' इति विहितस्य प्रत्ययादेशत्वात्। ननु यस्य [2]पुण्याहवाचनं . . . ॥

ऐकागारिकट् चौरे ५.१.११३.

[४, ६७]

(उद्द्योतनम्) ननु सूत्रस्यास्य प्रत्याख्यानादत्र सोऽनुवर्तिष्यत इत्ययुक्तम्, अत आह — **प्रयोजनमित्यत्रेति**। तेन सिद्धिप्रकारमाह — **एकशब्द इति**। अनेकगृहसाध्यत्वाद् भिक्षाया एकं गृहं भिक्षोः कथं प्रयोजनम्, अत आह — **एकामेवेति**। नियमार्थत्वं निराह — **अनभिधानादिति**। ञित्स्वरनिवृत्त्यर्थं निपातनमिति वृत्तिकारमतं निराह — **न चेति**। कथमिष्टत्वम्, अत आह — **एतच्चेति**। ताभ्यां सूत्रं प्रत्याख्याय ठञ्ङीकारात् तद्विरुद्धमतान्तरं हेयमित्यर्थः॥

[४, ६७]

(नारायणीयम्) नन्वेकागारं प्रयोजनमित्यत्रार्थे ठञ्विधाने कथं चोरस्याभिधानं युज्यत इत्याह — **ए[कशब्द इति।]** चोर एवैकागारिकशब्दः साधुः, न भिक्षाविति कथं पुनर्भिक्षोः प्रत्ययान्तेनाभिधानं स्यादित्यत्राह — **एकामेवेति**। [3]'एकागारं चरेद् ग्रामे तत्पुराणं मुनेर्व्रतम्' इत्युक्तत्वात्। ननु भिक्षौ प्रत्ययनिवृत्त्यर्थम् 'एकागाराच्चौरे' इति वक्तव्ये कथं प्रत्याख्यानमुपपद्यत इत्याशङ्क्य भाष्याशयं दर्शयति — **अनभिधानादिति**। नन्वसति निपातने ञित्स्वरः स्यात्, सति तु टकारस्यावधारणार्थत्वात् ङीबेव; न ञित्स्वर इति ञित्स्वरनिवृत्तिः सिध्यतीति सति प्रयोजने कथं प्रत्याख्यानमित्यत आह — **न चेति**॥

---

[1] पा. सू. ७.१.१.

[2] 'पुण्याहवाचनम्' इत्यस्यानन्तरं ग्रन्थपातः — घ.

[3] 'एकागारे चरेद् ग्रामे' इत्युद्द्योते दृश्यते। 'एकागारं चरेद् भैक्ष्यं तत्पुराणमुनेर्व्रतम्' इति पदमञ्जर्यामुपलभ्यते।

आकालिकडाद्यन्तवचने ५.१.११४.

[४, ६८–६९]

(उद्द्योतनम्) वार्तिककारस्य सूत्रप्रत्याख्यानाभिप्रायमाह — **आकालशब्दादिति**। निपातनानङ्गीकारेऽर्थविशेषः कथं लभ्यते, अत आह — **तत्रावृत्त इति**। एतावताद्यन्तवचनत्वं कथं लभ्यते, अत आह — **न चेति**। एकप्रतियोगिकोत्पत्तिविनाशसंबन्धेन कालस्यावृत्तिरौपचारिकीत्यर्थः। उभयसंबन्धे आवृत्तिं स्फोरयति — **एवं हीति**। एकस्य कालस्योभयसंबन्धित्वमावृत्तिरित्यर्थः। ननूत्पत्त्यनन्तरं विनाश इति कथमुभयोरेककालसंबन्धः, अत आह — **न चेति**। कालद्वयस्य नैरन्तर्ये तयोरेककालत्वं कथम्, अत आह — **निरन्तरो हीति**। नन्वावृत्तः कालो यस्येत्याद्यन्तवचनस्य प्रकृत्यर्थत्वात् कः प्रत्ययार्थः, अत आह — **तत इति**। आकालशब्दान्निपातनपक्षे उक्तार्थस्य स्पष्टप्रतीतिरित्याह — **निपातने हीति**। नन्वाकालशब्दाट्ठञ्विधिपक्षेऽपीत्थं प्रतीतिरुपपादिता, अत आह — **विधौ त्विति**। निपातने बह्वर्थसंग्रहे संमतिमाह — **उक्तं चेति**। [1]'भव्यगेय' इत्यादिनिपातनेषु धातुसाधनकालानां, नियमस्य च भव्यादीनामेव कर्तरि कृत्य इत्येवंरूपस्य। समानकालशब्दस्याकालादेशः, इकप्रत्ययष्टकारोऽनुबन्धः। रूढ्यर्थत्वं सर्वनिपातनसाधारणम्। केचिद् विद्युदादावेवाकालिकशब्दमिच्छन्ति। अन्ये वर्षादावपीत्याह — **अन्य इति**। तत्र समानकालत्वं प्रवृत्तिनिमित्तमस्तीत्याह — **यस्मिन्नेवेति**। **व्युत्पत्तिः** आवृत्तः कालो यस्येत्यनेनेत्यर्थः। आकालशब्दात् प्रत्यये समुदायस्य कोऽर्थः, अत आह — **अर्थस्त्विति**। यस्योत्पत्तिविनाशौ समानकालौ स स्वार्थिकप्रत्ययान्तेनोच्यत इत्युक्तमित्यर्थः॥

[४, ६८–६९]

(नारायणीयम्) न पूर्ववत् कृत्स्नस्य सूत्रस्यानर्थक्यमुच्यते, कस्य तर्हि, निपातनमात्रस्येत्याह — **आकालेति**। **प्रकृतिमुच्चार्येति**। 'आकालादाद्यन्तवचने' इति सूत्रं कृत्वेत्यर्थः। यस्य जन्मना तुल्यकालो विनाशः स आकालिकः स्तनयित्नुप्रभृतिः। विधिपक्षे तस्यार्थस्य प्रत्ययान्तेनाभिधानं यथा सिध्यति तथा दर्शयति — **तत्रावृत्त इति**। **न च कालस्येति**। क्रियाधर्मो ह्यावृत्तिः, यथा द्विवारं भुङ्क्ते, पञ्चकृत्वः पचतीति। **उत्पत्तिकालेनेति**। 'आद्यन्तवचने' इति वचनाद् आद्यन्तयोरुत्पत्तिविनाशयोरावृत्तः कालो यस्येत्यर्थो लभ्यते। ततश्चोत्पत्तिविनाशयोः समानकालत्वमर्थादुक्तं भवतीत्यर्थः। तदेतद् विशदयति — **एवं हीति**। उत्पत्तिविनाशयोरेककालत्वायोगान्नैरन्तर्यप्रतीतिरित्याह — **न चेति**। एतदुपपादयति — **निरन्तरो हीति**। एवं वार्तिककृता प्रत्याख्याते निपातने भाष्यकृत् तत्समर्थनार्थमारभते — **इदं तर्हीति**। अत्र वृद्धसंमतिमाह — **उक्तं चेति**। **धातुसाधनेति**। धात्वादीनां प्राप्त्यर्थं निपातनम्। यथा [2]'राजसूयसूर्य' इति सर्तेः सुवतेर्वा वर्तमानविशिष्टार्थवचनात् कर्तरि क्यब्निपात्यते, सरति सुवतीति वा सूर्यः। **अनुबन्धविकाराः** अनुबन्धकार्याणि, तेषां नियमस्य प्राप्त्यर्थं च। यथा विपूयादौ कित्कार्यादि, यथा वा 'अमावस्या' इत्यत्र णित्कार्याभावः। यद्वा, अनुबन्धशब्देनानुबन्धकार्यं लक्ष्यते, **विकाराः** आदेशादयः। अनुबन्धस्य विकाराणां नियमस्य च प्राप्त्यर्थम्। विकाराणामुदाहरणं पाय्यादावादि-

---

[1] पा. सू. ३.४.६८.

[2] पा. सू. ३.१.११४.

[वर्णस्य पकारा]दि, यथा वा निष्टर्क्ये धातोराद्यन्तविपर्ययः, निसः षत्वं च, तथा सुवतेः प्रत्ययस्य रुटि सूर्यः। नियमस्य यथा-अवद्यम्, इति। [1]'वदः सुपि क्यप् च' इति यत्क्यपोः प्राप्तयोर्यदेव यथा स्यात्, गर्ह्य एव च यदिति निपातनं क्रियते। **रूढ्यर्थं च निपातनम्** यथा [2]'आनय्योऽनित्ये' इत्यनित्यविशेषे दक्षिणाग्नौ, न तु घटादौ, यथा वा सांनाय्यमिति हविर्विशेषे, न तु हविर्मात्र इत्यादि द्रष्टव्यम्। **अन्य इति**। 'परमतमप्रतिषिद्धमनुमतमेव' इति न्यायादिदमपि ग्राह्यम्। **यस्मिन्नेवेति**। आ तस्मात्कालादनुवर्तत इति कृत्वा। अत्र मते ह्येक एव कालो [भवति मध्याह्ना]दिः। **ठञ्प्रत्यय इति**। ततश्च ङीबभावाट्टाप् भवति। **चकाराट्ठञ् चेति**। अत एव भाष्ये 'आकालिकी, आकालिका' इत्युभयमुदाहृतम्। **अर्थस्त्विति**। रूपस्यैव भेदो नाथस्यत्यर्थः॥

तेन तुल्यं क्रिया चेद्वतिः ५.१.११५.

[४, ६९–७५]

(विवरणम्) 'ब्राह्मणवदधीते क्षत्रियः' इत्यादौ वतिसिद्धये सूत्रे क्रियाग्रहणं सिद्धरूपक्रियावाच्यपि साध्यरूपधात्वर्थपरमित्यभिप्रेत्याह — **क्रिया त्विति**। ननु 'पाको भोक्तुम्' इत्यादौ क्रियार्थक्रियोपपदतुमुनो दर्शनात् पाकादेर्घञन्तस्य क्रियावाचित्वात् ततः सुब्विभक्तिदर्शनाच्च तृतीयासमर्थता क्रियावाचिनोऽपि संभवतीत्यत आह — **पाकादय इति**। अविशेषेण सुब्विधानादव्ययकृतस्तृतीयासमर्थता संभवतीत्याशङ्क्य च कर्मादिषु द्वितीयादीनां नियतत्वात् 'प्रातिपदिकार्थमात्रे' इत्येकत्वाभावेऽप्येकत्वाद्यर्थनियमाश्रयणाद्वचननियमेऽपि ज्ञापकात् [3]'अव्ययादाप्सुपः' इत्यस्मात् प्रथमातिक्रमे कारणाभावात् प्रथमैव भवतीत्यभिप्रेत्याह — **प्रातिपदिकार्थेति**। सिद्धरूपक्रियावाचित्वेऽपि क्रिया तत्रोद्भूतेत्याह — **शयितव्येति**। **पूर्वादीति**। न च पञ्चालशब्दसामानाधिकरण्यात् पूर्वादिशब्दस्य समुदायप्रवृत्तत्वं शङ्कनीयम्, तथा सति पूर्वादिशब्दवैयर्थ्यप्रसङ्ग इति भावः॥

[४, ६९–७५]

(उद्द्योतनम्) संपूर्णसूत्रस्येदमा परामर्शशङ्कां प्रत्यक्षवाचीदंशब्दप्रयोगानुपपत्तिं वा निराह — **सूत्रोपात्तमिति**। नपुंसकत्वनिर्वाहाय 'वस्तु' इत्युक्तम्। सूत्रे तादृशनिर्देशाभावादाह — **तेनेति**। [4]**अनेनैव क्रमेणेति**। प्रकृत्यर्थस्य पूर्वं निर्देशः प्रत्ययार्थस्य पश्चादित्येवं क्रमेणेत्यर्थः। आनन्तर्यात् क्रियाग्रहणं प्रत्ययार्थस्यैव विशेषणम्, न तु प्रकृत्यर्थस्य, अत आह — **तत्रेति**। तयोर्मध्ये द्वयोरपि विशेष्यत्वयोग्यतया लिङ्गेन संनिधिबाधात् प्रथमान्वयेन निराकाङ्क्षस्य न द्वितीयेनान्वय इत्यर्थः। **नन्विति**। भिन्नविभक्तिकयोः कथं सामनाधिकरण्येनान्वय इत्यर्थः। एतच्छङ्कानिरासपरतया भाष्यं संगमयति — **सोपस्कारत्वादिति**। सूचकत्वात् सूत्राणां सूचितार्थविवरणमु-

---

[1] पा. सू. ३.१.१०६.
[2] पा सू. ६.१.१२७.
[3] पा. सू. २.४.८२.
[4] प्रदीपकोशेषु 'इत्यनेन क्रमेण' इति दृश्यते। 'इत्यनेनैव क्रमेण' इत्यन्नंभट्टपाठ इति प्रतीयते।

पस्कारः। **सत्ववाचिन इति**। कारकत्वस्य सत्त्वधर्मत्वात्। पाकेनेत्यादौ क्रियावाचिनः कथं तृतीया, अत आह — **पाकादय इति**। लिङ्गसंख्यान्वययोग्यत्वं सत्त्वधर्मः, तदयोग्यत्वं क्रियाधर्मः। शब्दस्वाभाव्यात्तु घञादिवाच्यं [1]तद्योग्यम्, न तु तिङ्वाच्यम्। घञ्वाच्यस्याक्रियात्वे हेतुः — **तथा चेति**। 'पञ्चकृत्वः पाकः' इति न भवतीत्यर्थः। ननु घञन्तस्य क्रियावाचित्वाभावे 'भोक्तुं पाकः' इत्यादौ क्रियार्थायां क्रियायामुपपदे विधीयमानस्तुमुन् न स्यात्, अत आह — **भोक्तुमिति**। धात्वर्थस्यासत्त्वरूप[2]क्रियात्वाश्रयेणात्र तुमुनित्यर्थः। तर्हि धात्वर्थस्य क्रियारूपत्वे घञन्ताद्विभक्तिर्न स्यात्, अत आह — **विभक्तिस्त्विति**। तिङन्तात् [3]स्वाद्यनुत्पत्तौ हेतुमाह — **पचत्यादीनामिति**। 'अप्रत्ययः' इत्युक्तेर्न प्रातिपदिकत्वम्। अप्रातिपदिकत्वमव्ययकृत्सु नास्तीति तत्साधारणं हेतुमाह — **असत्त्वेति**। [4]तेषां क्रियावाचित्वं घञादिविलक्षणमिति वदन् हेतुसाधारण्यमाह — **कृत्वेति**। क्रियावाचित्वे गमकमाह — **तथा चेति**। क्रियाभ्यावृत्तौ कृत्वसुचो विधानादित्यर्थः। तर्हि [5]तेषां विभक्त्यन्तत्वाभावादपदत्वं स्यात्, अत आह — **प्रातिपदिकेति**। यद्यपि कुतश्चित् क्रियावचनाद् वत्युत्पत्तावपि 'ब्राह्मणवत्' इत्यादौ वतिर्न सिध्यति, तथापि तत्रापि वतिर्न संभवतीत्याह — **शयितव्यादय इति**। क्रियावाचित्वे हेतुः — **पञ्चकृत्व इति**। अभावे हेतुः — **न हीति**। शयनक्रियाया द्रव्यगुणयोः सादृश्यं नास्तीत्यर्थः। तर्हि क्वोपमानसंभवः, अत आह — **उपमानं हीति**। ननु शुद्धद्रव्यगुणयोः शयनोपमेयत्वाभावेऽपि शयनयुक्तद्रव्यस्य तत् स्यात्, अत आह — **नापि शयितव्येनेति**। **क्रियातद्वतोरिति**। यद्यप्यत्यन्तभिन्नयोरपि हस्तिमशकयोः केनचिद्धर्मेण सादृश्यं संभवति, तथापि लोकप्रसिद्धसादृश्य एव वतिर्नान्यत्रेति भावः। क्रियाद्रव्ययोः सादृश्याभावेऽपि क्रिययोः संभवतीत्याशङ्क्य विजातीययोः सजातीययोर्वेति विकल्प्य नाद्य इत्याह — **क्रियाणामपीति**। द्वितीयं निराह — **नेति**। दृष्टान्ते सादृश्याभावे हेतुः — **येनैवेति**। [6]गोत्वेनैकजातीययोरप्याश्रयभेदेन भिन्नयोः सादृश्यं संभवतीति शङ्कते — **नन्विति**। सादृश्यसंभवेऽप्यत्र राजसापेक्षत्वात् शयितव्यस्य तद्धितोत्पत्तिर्न संभवतीत्याह — **सापेक्षत्वादिति**। मानान्तरेण राजकर्तृकत्वज्ञाने सापेक्षत्वाभावाद् वृत्तिः प्राप्नोतीति शङ्कते — **नन्विति**। प्रकारान्तरेण सापेक्षत्वाभावमाह — **तथेति**। राजशयितव्यशब्दाद् वत्युत्पत्तौ न सापेक्षत्वप्रसङ्ग इत्यर्थः। विजातीयक्रियास्वपि क्वचित् सादृश्यमित्याह — **तथेति**। एकजातीयस्याप्याश्रयभेदेन भेदात् सादृश्यमाह — **तैलपाकेनेति**। पाकशब्दस्य क्रियावाचित्वं साधयितुं 'भोक्तुम्' इत्यादि। **क्रियानिबन्धनकार्यं** क्रियायामुपपदे तुमुन्। भवतु [7]त्रयापेक्षा, तदा कथं भाष्यसंगतिः, अत आह — **तत्रेति**। त्रयापेक्षायां सत्याम्। [8]'अवश्यापेक्ष्यो यः साधारणो धर्मस्तदाधारत्वादिति विग्रहः। असत्त्वभूतक्रियायाः साधारणधर्माधारत्वं नास्ति। तदाधारत्वे च सत्त्वरूपत्वमेवेति क्रियास्वरूपं नोपमानम्। 'नृत्यतीव गच्छति' इत्यादिप्रयोगो नास्तीति भावः। सर्वशब्दस्य संकोचमाह — **उपमानेति**। ननु [9]"तृजकाभ्याम्' इति निषेधात् कथमत्र

---

[1] लिङ्गसंख्यान्वययोग्यमित्यर्थः।
[2] क्रियाश्रयेणात्र — अ.
[3] स्वाद्युत्पत्तौ — अ.
[4] अव्ययकृतामित्यर्थः।
[5] अव्ययकृतामित्यर्थः
[6] गोत्वेऽनेनैकजातीययोः — अ, ऋ, लृ.
[7] क्रियापेक्षा तथा कथं — अ, ऋ, लृ.
[8] 'अवश्यापेक्ष्यसाधारणधर्माधारत्वात्' इति निर्णयसागरहरयाणामुद्रितयोः प्रदीपपुस्तकयोः पाठः, चौखाम्बामुद्रिते तु 'अवश्यापेक्षसाधारणधर्माधारत्वात्' इति दृश्यते। 'अवश्यापेक्ष्य' इत्येव युक्ततरो भाति॥ अवश्यापेक्षो यः — अ, ऋ, लृ.
[9] पा. सू. २.२.१५.

षष्ठीसमासः, अत आह — **शेषेति**। [1]तस्यापि तेन निषेधः किं न स्यात्, अत आह — **तृजकाभ्यामिति**। **कर्तरि येति**। [2]'कर्तृकर्मणोः कृति' इति विहिता। तत्र हेतुः — **न हीति**। अन्तरङ्गत्वात् तन्निमित्तषष्ठ्या एव समासनिषेधः, न षष्ठीमात्रस्येति भावः। धर्माणां धर्मिकारकत्वासंभवादाह — **ब्राह्मणव्यपदेशस्येति**। **परिपूर्णः** संपूर्णब्राह्मणशब्दार्थः, न मुख्यो ब्राह्मण इति यावत्। अत एव श्रुताभावात् श्रौतकर्मणि नाधिकारः। ननु शिष्टाचारस्य शुचित्वविशेषणमव्यावर्तकम्, अत आह — **अनुपहतेति**। अविरतेत्यर्थः। **पुराकल्पेति**। 'कुर्वन्ति' इत्यनेन बहुकर्तृकोपाख्यानरूपपुराकल्पो भाष्ये दर्शितः। न पुराकल्पमात्रम्, किं त्वद्यापि संभवोऽस्ति, अतो व्यञ्जकत्वमुपपन्नमित्याह — **अद्यत्वेऽपीति**। [3]ब्राह्मण्यस्य व्यञ्जका इत्यन्वयः। समुदायत्यागेनावयवप्रतिपादकत्वशङ्कां निराह — **समुदायेति**। 'न तु' इत्यत्र हेतुः — **शब्दार्थेति**। स्वार्थप्रतिपत्तिद्वारैव शब्दानां व्यवहारहेतुत्वम्, मुख्यार्थारोप एव लक्षणेति भावः। अत्र पञ्चालशब्दस्यावयववृत्तित्वे हेतुमाह — **पूर्वादीति**। सामानाधिकरण्यस्य हेतुत्वमुपपादयति — **समुदायवृत्तित्वे हीति**। तैलशब्दस्य जातिवाचित्वेन समुदायशब्दत्वाभावादाह — [4]**यदेति**। **मात्रा** प्रस्थादिपरिमाणम्। जातिवाचित्वे त्वनुदाहरणमित्याह — **यदा त्विति**। **संस्थानम्** अवयवसंनिवेशः। **प्रमाणं** प्रस्थादि, तन्निरपेक्षाः। शुक्लशब्दोऽपि शुक्लत्वजातिवाचित्वेऽनुदाहरणम्। यदा तु राशीकृतशुक्लधान्यादिसमूहे शुक्लशब्दो वर्तते तदा समुदायशब्दत्वम्। तदेकदेशेऽशुक्ले तत्समुदायारोपात् शुक्लशब्दप्रयोगे उदाहरणमित्याशयेनाह — **स्वयमशुक्लोऽपीति**। ननु ब्राह्मणनिष्ठक्रियाणामनेकत्वाद् यत्किंचित्क्रियापरत्वे उपमानत्वं न संभवति, अत आह — **यैवेति**। तदुदाहरति — **ब्राह्मणेनेति**। अस्मिन् वाक्ये तुल्यमिति नपुंसकत्वं कथम्, क्षत्रियविशेषणत्वेन पुंस्त्वेन भाव्यम्, अत आह — **अध्ययनेति**। [5]'क्रियाविशेषणनां क्लीबत्वं कर्मत्वं च वक्तव्यम्' इत्युक्तेरित्यर्थः। यैव क्रियेत्युक्तमुपपादयति — **ब्राह्मणाध्ययनेनेति**। अनेन [6]'कथं च तृतीयासमर्थम्' इति शङ्का समाहितेत्याह — **इत्युपपद्यत इति**। **नन्विति**। क्रियाद्वये साधारणधर्मानुपादानात् तुल्यत्वप्रतीतिर्न संभवति। कर्त्रोस्त्वध्ययनमेव साधारणधर्म इति तुल्यत्वसंभवाद् ब्राह्मणशब्दः कर्तृपर एव, नाध्ययनपर इत्यर्थः। **उच्यत इति**। अर्थात् प्रतीयमानधर्मेणाप्युपमानत्वं संभवतीत्यर्थः। साधारणधर्माश्रयत्वे क्रियारूपत्वं नास्तीत्युक्तमाशङ्कते — **नन्विति**। **सामर्थ्यात्** क्रियातुल्यत्वे सति प्रत्ययविधानसामर्थ्यात्। भूतपूर्वत्वमेवाह — **यस्येति**। **संप्रति** वतिविधानसमये। ननु शयितव्यादीनां सांप्रतिकक्रियावाचिनां संभवाद् भूतपूर्वगत्याश्रयणं किमर्थम्, अत आह — **अत एवेति**। वक्ष्यमाणहेतुपरामर्शः। 'राजशयितव्येन तुल्यं देवदत्तशयनम्' इत्यत्रापि साधारणधर्माश्रयत्वं विनोपमानत्वासंभवात् सांप्रतिकक्रियारूपत्वं क्वापि न संभवतीत्यर्थः। तस्यापि क्रिया विशेषणमस्तु, अत आह — **एकेनेति**। आवृत्तिप्रसङ्गादिति भावः। षष्ठीसमासे द्रव्यस्य गुणतुल्यत्वाभावादाह — [7]**गुणेनेति**। पुत्रशब्दस्य क्रियावाचित्वमाह — **पुत्रशब्द इति**। **अत्र**

---

[1] शेषषष्ठीसमासस्यापीत्यर्थः।

[2] पा. सू. २.३.६५.

[3] ब्राह्मणस्य — अ, ऋ, लृ.

[4] यथेति — अ, ऋ, लृ.

[5] काशिकायाम् 'अव्ययीभावश्च' इति नपुंसकविधायकसूत्रे 'क्रियाविशेषणानां च क्लीबतेष्यते' इति वचनमुदाहृतम्। तत्र चौखाम्बाप्रकाशित (१९५२ सन्) काशिकायामत्र 'क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च वक्तव्या' इति पाठान्तरं प्रादर्शि। भाष्ये त्विदं वचनं नोपलभ्यते।

[6] 'कथं च' इत्यस्यानन्तरं 'ते' इत्यधिकम्—अ, ऋ, लृ.

[7] प्रदीपे 'गुणैस्तुल्य इति' इत्यत्र चौखाम्बामुद्रिते 'गुणेन तुल्य इति' इति पाठो दृश्यते। सोऽत्राभिमतः।

अस्मिन् वाक्ये। प्रथमातिक्रमे हेतुमाह — **समानेति**। श्रुतविभक्त्यन्वयसंभवेऽश्रुतकल्पना न युक्तेत्यर्थः। ननु पुत्रशब्दस्याक्रियावाचित्वात् प्रत्ययार्थविशेषणाभावादेवात्र वृत्तिर्न भविष्यति, अत आह — **तत्रेति**। स्थूलेन तुल्यः पुत्र इत्यादौ। तर्हि क्रियायाः प्रत्ययार्थविशेषणत्वं न समर्थितम्, अत आह — **क्रियाग्रहणं चेति**। **तस्य** क्रियाग्रहणस्य। **पक्षद्वये** क्रियाग्रहणस्य प्रकृतिप्रत्ययार्थविशेषणत्वपक्षद्वये। प्रत्ययार्थविशेषणस्यापि प्रकृत्यर्थविशेषणत्वं व्युत्पत्तिलभ्यमित्याह — **एकस्मिन्निति**। 'अथवा' इति पक्षसाधारण्याय सामान्योक्तिः। [1]'नैवयोधर्म' इति यत्प्रत्ययान्तस्तुल्यशब्दः सदृशवाची। तत्र सूत्रे संमितशब्दार्थमाह — **सदृशमिति**। सदृशस्य सर्वस्य कथं तुलासादृश्यम्, अत आह — **यथेति**। तुल्यशब्दार्थमुक्त्वा सामर्थ्यादुभयविशेषणत्वमुक्तमुपपादयति — **तत इति**। सामर्थ्यमेवाह — **न हीति**। ननु क्रियाग्रहणं क्रियावत उपलक्षणमित्युक्तम्, अत आह — **न चेति**। क्रियातुल्यत्वविवक्षायां 'स्थूलेन तुल्यः' इत्यत्र नातिप्रसङ्ग इत्याह — **न चेति**। अप्रतीतौ हेतुः — **क्रियापदेति**। 'ब्राह्मणवदधीते' इत्यादाविवेत्यर्थः। **अत एव** क्रियापदानुपादानादेव। 'ब्राह्मणवदधीते' इत्यत्र क्रियोपादानाद् ब्राह्मणपदस्य क्रियावत्त्वं युक्तम्, नात्र तथेत्यर्थः। यत्र [2]क्रियोपादानं तत्र का गतिः, अत आह — **स्थूलेनेति**। [3]क्रियातुल्यत्वं तत्प्रत्यायकश्च तत्र न प्रतीयत इत्यर्थः। स्थौल्येन तुल्य इत्यन्वयः। क्रियातुल्यत्वविवक्षायां तु प्रत्यय इष्यत इत्याह — **यदेति**। पूर्वं तुल्यशब्दो द्रव्यविशेषणम्, इदानीं क्रियाविशेषणमिति भेदः। पूर्वप्रकारमतिदिशति — **पूर्वोक्तेनेति**। न ह्यक्रिया क्रियातुल्या भवति। प्रत्ययार्थस्य क्रियात्वं सामर्थ्यलभ्यमित्यर्थः। प्रकर्षप्रत्ययं संगमयति — **उक्तेति**। **वत्यर्थ इति**। तुल्यं वत्यर्थः। **वाक्याध्याहारेणेति**। यत् तृतीयासमर्थं सा क्रिया चेदित्येवमध्याहारेणेत्यर्थः। तत्र हेतुः — **तेनेति**। प्रत्ययार्थविशेषणत्वे तु नाध्याहार इत्याह — **तुल्यं क्रियेति**। पूर्वं वतिशब्दे तदर्थलक्षणा, इदानीं क्रियाशब्दे तद्वाचकलक्षणेति भेदः। अस्मिन् पक्षे क्रियायाः प्रत्ययार्थविशेषणत्वं सामर्थ्यलभ्यमित्याह — **एवं चेति**। तुल्यवाचिनः क्रियावाचित्वं तयोरभेदं विना न संभवति। न च द्वयोरपि पृथग्वाच्यत्वम्, अनेकशक्तिकल्पनाप्रसङ्गात्, लक्ष्यानुरोधाच्चेति भावः। नन्वस्मिन् पक्षे क्रियारूपद्वयसंभवेन सत्त्वपक्षे लिङ्गादियुक्तत्वात् कथं पाठवैयर्थ्यम्, अत आह — **प्रत्ययार्थेति**। असत्त्वस्वभावा मुख्यक्रिया, सत्त्वस्वभावा तु गौणी। [4]'गौणमुख्यन्यायेन मुख्यैव क्रिया शब्देन गृह्यते। यद्यपि साधारणधर्माश्रयत्वं तुल्यत्वार्थमभ्युपेयम्, तथापि तद्रहितरूपाश्रयेणाव्ययत्वमुच्यते। अत एवोक्तम् — **संभवतीति**। ननु [5]'पाठेन विधीयमाना संज्ञापठितस्य'[6] कथं स्यात्, अत आह — **यन्न व्येतीति**। नन्वसत्त्वभूतक्रियाया वत्यर्थत्वे 'ब्राह्मणवदधीते' इत्यत्र अधीत इत्यस्य प्रयोगो व्यर्थः, अत आह — **क्रियामात्रमिति**। मात्रशब्दः सामान्यवाची। पक्षान्तरे पाठावश्यकत्वमाह — **प्रकृत्यर्थेति**। तत्र प्रकारद्वयमाह — **भूतेति**। नन्वाद्ये कल्पे पाठं विनाप्यव्ययत्वं सिध्यति, अत आह — **तत्रेति**। द्वयोः कल्पयोर्मध्ये। गत्यन्तरं प्रत्ययार्थविशेषणत्वं क्रियावद्ग्रहणं वा। क्रियावदर्थकत्वमभिनयति — **ब्राह्मणेनेति**। पाठेऽपि सत्त्ववाचिनः कथमव्ययत्वम्, अत आह — **पाठसामर्थ्यादिति**। प्रत्ययार्थविशेषणत्वमुपसंहरति — **तदेवमिति**। क्रियावतोः सादृश्ये तु न प्रत्यय इति तदर्थमपि पाठो व्यर्थ इत्याशयेनाह — **ब्राह्मणेनेति**। उत्तरसूत्रद्वयविहितवत्यर्थोऽपि न पाठ इत्याह — **उत्तरेति**।

---

[1] पा. सू. ४.४.९१.
[2] क्रियापदोपादानं — अ.
[3] क्रियातुल्यत्वप्रत्यायकश्च — अ, ऋ, लृ.
[4] परिभाषा १५.
[5] स्वरादिपाठेनेत्यर्थः।
[6] अपठितस्येति छेदः।

विहितस्य वतेरित्यन्वयः। इवार्थे विहितस्य तद्वदेवासत्त्वार्थत्वमित्यर्थः। **क्रियायामिति**। अस्मिन् सूत्रे क्रियाग्रहणमनुवर्तते। तेन राजानमर्हतीदं वृत्तं राजवद् वर्तते। इह न, 'ब्राह्मणमर्हतीदं दधि' इति॥

[४, ६९–७५]

(नारायणीयम्) सूत्रमुपादाय प्रत्यक्षवाचिनपुंसकलिङ्गसर्वनामनिर्देशात् तत्परामर्शित्वं [१]प्रतीयते, तच्चानुपपन्नम्, सूत्रस्य शब्दरूपत्वात्, इह च तस्यायुक्तताशङ्काबीजाभावात्, उपपादकभाष्यविरोधाच्च। तत् किमनेन परामृश्यत इत्यत्राह — **सूत्रोपात्तमिति**। अयुक्तशब्दार्थस्तु 'न्याये-नायुक्तमित्यर्थः, प्रसिद्धन्यायकरणो हि युजिः' इति [२]पूर्वमेवोक्तत्वान्नेह विविच्यते। यद्यपि 'तृतीयासमर्थं क्रिया' इति सूत्रे शब्देन नोपात्तम्, तथापि न्यायबलायातस्यार्थस्योक्तकल्पत्वात् 'उच्यते' इत्युक्तमित्याह — **तेन तुल्यमित्यनेनेति**। स्थानतः पदार्थानां [३]गुणविनियोगदर्शनात् इह च तद्बाधकस्य कस्यचिदभावात् तेनैव नियम आश्रीयते। यथा [४]'सास्य देवता' इत्यत्र देवतेत्युपाधिः प्रकृत्यर्थस्य, न प्रत्ययार्थस्येत्यर्थः। बाधकं सामर्थ्यमाशङ्कते — **नन्विति**। [५]'अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः' इति सामानाधिकरण्यमप्युपाधिलक्षणम्, यथा [६]'हरतेर्दृतिनाथयोः पशौ' कर्तरीत्यादि। इह तु वैयधिकरण्यादुपाध्युपाधिमतोः संबन्धो नैवोपपद्यत इति पक्षस्योत्थानमेव नास्तीत्यर्थः। न च संबन्धान्यथानुपपत्त्या विभक्तिविपरिणामः कल्प्यत इति वाच्यम्, ऊहन्यायत्वात्। परिणामस्य प्रकृतावुपयुक्तस्य विकृतावूहस्य न्याय्यत्वात्। यथा [७]'भूवादयो धातवः' इत्यत्र संज्ञाविधावुपयुक्तायाः प्रथमान्तश्रुतेः "अनुदात्तङितः' इत्यादौ पञ्चम्यन्ततया विपरिणामः, अत्र त्वस्यैवोत्पत्तिवाक्यत्वात् कथं विपरिणामः। सत्यपि वा विपरिणामे भिन्नलिङ्गत्वादसमन्वय एवेति भावः। परिहरति — **सोपस्कारत्वात् सूत्राणामिति**। इह सूचितार्थसूत्रपदानामध्याहारेण समन्वयोपपत्तेः प्रत्ययविधिवाक्ये प्रकृतेस्तृतीयान्तताप्रज्ञापने चरितार्थस्य 'तेन' इत्यस्योपाध्युपाधिमत्संबन्धप्रतिपादनपरे चेच्छब्देनावेदिते वाक्यान्तरेऽध्याहारेण स्वातन्त्र्यं सदृशलिङ्गविभक्तितां चासादितस्योपाधिसंबन्धो युज्यत एवेत्यर्थः। 'कथं च' इत्यादिभाष्योक्तविशेषणविशेष्यभावासंभवप्रकारमाह — **तृतीया सत्त्ववाचिन इति**। सीदन्त्यस्मिन् जातिगुणक्रियादय इति सत्त्वं द्रव्यमिदंतदादिव्यपदेश्यम्, तद्वाचिनस्तृतीयासमर्थत्वम्, निष्पन्नस्यैव शक्त्याधारत्वसंभवात्। अस्तु तर्हि क्रियावाचिनोऽपि सत्त्वरूपता, तत्राह — **क्रिया त्विति**। तथा चोक्तम् —

> [९]यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
> आश्रितक्रमरूपत्वात् तत् क्रियेति [१०]प्रतीयते॥ इति।

ततश्च क्रियाया अनिष्पन्नरूपत्वात् तद्वाचिनस्तृतीयान्तत्वासंभवात् [११]संभवे व्यभिचारे [च] सन्

---

[१] प्रतीयेत — घ.
[२] तपरस्तत्कालस्येत्यत्र प्रदीप इत्यर्थः।
[३] गुणत्वेन विनियोगेत्यर्थः।
[४] पा. सू. ४.२.२४.
[५] प्रत्यय इति सूत्रे प्रदीपे इदम्।
[६] पा. सू. ३.२.२५.
[७] पा. सू. १.३.१.
[८] पा. सू. १.३.१२.
[९] वाक्यपदीयम् ३.८.१.
[१०] 'अभिधीयते' इत्यत्र 'प्रतीयते' इति पाठान्तरं पूनामुद्रितेऽधो निर्दिष्टम्।
[११] 'संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्' इति न्यायोऽत्राभिप्रेतः।

विशेषणविशेष्यभावोऽनुपपन्न इत्याह — **तत इति**। ननु घञाद्यन्तानां पाकादीनां क्रियावाचित्वं तृतीयान्तत्वं च संभवतीति कथं विशेषणविशेष्यभावानुपपत्तिरित्याशङ्क्य [तत्र] क्रिय[ाधर्मा] युक्तमुपपादयति — **पाकादय इति**। इह धातुभागवाच्यार्थस्य साध्यरूपत्वेऽपि धात्वर्थसिद्धतायां घञादिविधानात् प्रत्ययांशवाच्यसाध्यविरोधिसिद्धरूपार्थप्रादुर्भावात् साध्यधर्मो विनष्टो भवति। यथा शीतवस्तुनः कारणान्तरे [सति] शीतताविनाश इत्यर्थः। उक्तं च —

[1]'एकाभिधान एकोऽर्थो युगपच्च द्विधर्मभाक्।
न संभवति, सिद्धत्वे स साध्यः स्यात् कथं पुनः॥' इति।

नन्वाख्यातपदेषु कर्मादिशक्तियुक्तद्रव्ये प्रत्ययविधानेऽपि साध्यरूपप्रकृत्यर्थस्य न विनाशः, किं तूद्भूतत्वमेव। अत एव कारकयोगः, एवमेतेष्वपि भवत्वित्याशङ्क्य कृत्वोऽर्थप्रत्ययाभावप्रदर्शनमुखेन तद्वैधर्म्यं व्यक्तयति — **तथा चेति**। यद्येषां साध्यप्रधानता स्यात् तर्ह्याख्यातशब्दा इवैतेऽपि पुनःपुनःप्रवृत्तिरूपाभ्यावृत्तिविषयप्रत्ययैर्युज्येरन् 'पञ्चकृत्वः पाकः' 'द्विः पाकः' इति। न च युज्यन्ते। तस्मात् कृत्वोऽर्थप्रत्ययादर्शनादेते सत्त्वप्रधानाः। तिङन्तास्तु शब्दशक्तिस्वाभाव्यात् साध्यप्रधाना इति निश्चीयत इत्यर्थः। ननु क्रियायामुपपदे विधीयमानस्य तुमुन्प्रत्ययस्यैतेष्वप्युपपदेषु दर्शनात् क्रियाप्राधान्यमत्रापि कल्प्यं स्यादित्याशङ्क्य गौणमुख्यन्यायस्य लक्ष्यदर्शनवशेनात्र शास्त्रे क्वचिदनाश्रयणात् प्रकृतिवाच्योपसर्जनार्थ[2]परिग्रहेण तुमुन्प्रत्ययः, प्रत्ययवाच्यप्रधानार्थस्तु सत्त्वरूप एवेत्याह — **भोक्तुं पाक इत्यादौ [3]त्विति**। यदि गौणमुख्यन्यायानादरेण किंचित् कार्यं पाकादिषु भवति तर्हि तृतीयादयोऽपि तथैव स्युः। एवं च सति पूर्वप्रतिज्ञातार्थविरोध इति कस्यचिद् भ्रान्तिः स्यात्। तामपनयति — **विभक्तिस्त्विति**। **सत्त्वरूपताश्रयेति**। सत्त्वधर्मत्वात् संख्याकर्मादीनाम्। आख्यातानां तु यद्यपि क्रियावाचित्वम्, तथापि तृतीयान्तत्वाभावाद् विशेषणविशेष्यभावाभाव इत्याह — **पचतीत्यादीनां त्विति**। ननु तुमुनः स्वार्थे विधानात् तुमर्थे विधीयमानाः क्त्वाप्रभृतयोऽपि साध्यार्थाभिधायिन इति तत्र युज्यते विशेषणयोग इत्यत आह — **कृत्वा हृत्वेति**। ननु तेभ्यस्तृतीयाद्यभावे सुबन्तहेतुकपदत्वाभावात् प्रयोग एव तेषां न स्यादित्यत्राह — **प्रातिपदिकार्थेति**। एवेत्ययोगं व्यवच्छिनत्ति। यद्यपि शयितव्या[दिका]द् भावार्थविहितकृत्याद्यन्तात् स्वभावत. साध्यार्थाभिधानात् क्रियान्तरं प्रति साधनभावाच्च क्रियावाचित्वतृतीयान्तत्वे भवतः, तथाप्युपमानोपमेयभावविषयत्वाद्वतिप्रत्ययस्येह च तदभावान्न ते प्रकृतित्वेनात्राभिमता इत्याह — **शयितव्यादय इति**। तत्रोपमानभूतायाः क्रियाया द्रव्यगुणावुपमेयौ न भवत इत्याह — **न हि भवतीति**। यथा 'चन्द्र इव मुखमस्याः' इत्युक्ते शब्देनानुक्ता अपि प्रसिद्धत्वात् कान्तिमत्त्वादयो गुणाः प्रतीयन्ते, यथा च 'ब्राह्मण इव क्षत्रियः' इत्यध्ययनादयः क्रियाः, तथात्रापि यद्युपमानोपमेयभावः स्यात्, प्रतीयेत कश्चिद् धर्मः, तच्च न, तस्मात् सामान्यधर्माभावादुपमानोपमेय[भावा]भावनिश्चय इत्यर्थः। ननु क्रियायां निर्वर्तकत्वेन प्रत्यासन्नत्वात् क्रियावानुपमेयोऽस्त्वित्यत्राह — **नापीति**। प्रत्यासत्तेरविशेषात् [4]समानधर्मवत्त्वायोगात् सिद्धसाध्यरूपयोरनयोः सर्षपमहीधरादिवदत्यन्तभेदाद् भेदाभेदप्रयुक्तोपमानोपमेयत्वासंभव इत्यर्थः। ननु विजातीयाः क्रियाः क्रियात्वसामान्यादुपमेया भविष्यन्तीत्याशङ्क्य तस्य सर्वक्रियास्वेकरूपत्वान्निमित्तत्वानुपपत्तेरत्यन्तभिन्नास्ता नोपमाविषया इत्याह — **क्रियमाणामपीति**। तर्हि सजातीया उपमेयत्वेनाश्रयिष्यन्त इत्यत्राह — **नापीति**। अत्यन्ताभेदोऽत्र हेतुः। तमेव दृष्टान्तप्रदर्शनेन

---

[1] वाक्यपदीयम् ३.८.४५.
[2] परिग्रहणे तुमुन्प्रत्ययः — घ.
[3] प्रदीपे तुशब्दरहितः पाठ उपलभ्यते।
[4] समानधर्मत्वायोगात् — घ.

विशदयति — **यथा गौरिवेति**। **हेतुनेति**। अभिन्नाकाररूपेणेत्यर्थः। **क उपमानोपमेयभाव इति**। इतिकरणो हेतौ, यस्माज्जात्याधारव्यक्तिमात्रस्य शब्दवाच्यत्वं तस्माद् 'गौरिव गौः' इत्यादौ भेदाश्रयस्योपमानोपमेयभावस्यात्यन्तमसंभवः। एवं 'शयितव्येन तुल्यं शयितव्यम्' इत्यादावपीत्यर्थः। तथा चोक्तं भाष्यकृतोपमानसमाससूत्रे [1]"यदि यदेवोपमानं तदेवोपमेयं क इहोपमार्थः। गौरिव गौः। अथान्यदुपमानमन्यदुपमेयं क इहोपमार्थः — गौरिवाश्वः' इति। व्याख्यातं च हरिणा —

[2]तत्राभिन्नव्यपेक्षायामुपमार्थो न विद्यते ।
यो हि गौरिति विज्ञाने हेतुः सोऽस्ति गवान्तरे ॥ इति ।
व्यावृत्तानां विशेषाणां व्यापारे तु विवक्षिते ।
न कश्चिदुपकारोऽस्ति बुद्धेर्बुद्ध्यन्तरं प्रति ॥ इति ।

एवं घञाद्यन्ताव्ययकृदन्ततव्याद्यन्तानां क्रियावाचित्वतृतीयान्तत्वोपमानोपमेयभावविषयत्वासंभवादेतद्व्यतिरिक्तस्य कस्यचित् क्रियावचनस्याभावात् तृतीयान्तं क्रियेति विशेषणविशेष्यभावस्यायुक्तिः समर्थिता। अधुना समानजातीयानां क्रियाणामौपाधिकं भेदं स्वाभाविकं चाभेदमाश्रित्योपमानोपमेयभावमाशङ्कते — **नन्विति**। परिहरति — **सापेक्षत्वादिति**। भेदप्रतिपत्त्यर्थमन्यस्यापेक्षणात्। **ननु यदेति**। यदा कुतश्चित् प्रस्तावात् सामर्थ्याद्वापेक्षणीय आश्रयो निर्ज्ञातो भवति तदा शयितव्यादिशब्दादेवाधारविशिष्टार्थप्रत्यायनादनपेक्षत्वात् सामर्थ्यनिबन्धना वृत्तिः प्राप्नोत्येवेत्यर्थः। **तथा राजशयितव्येनेति**। समासे कृते एकार्थीभावाद् भेदनिबन्धनाया अपेक्षाया अभावात् तत्रापि वृत्तिप्रसङ्ग इत्यर्थः। विजातीयानां क्रियाणामपि यत्किंचित्सादृश्यमाश्रित्योपमानोपमेयभावव्यवहारदर्शनात् तद्विषयेऽपि प्राप्नोतीत्याह — **तथा स्थातव्येनेति**। **भोक्तुं पाक इत्यादौ चेति**। इह सत्त्वधर्मविशिष्टस्य शब्दाद् क्रियार्थस्य प्रतीतेः प्रकृतिप्रत्ययसमुदायवाच्यार्थाश्रयेण कृदभिहितो भावो द्रव्यवद् भवति क्रियावदपीति क्रियावदतिदेशात् तुमुनादिक्रियाकार्यस्याभ्युपगमादत्रापि तद्वदेव क्रियाकार्यस्य सिद्धत्वात् तृतीयान्तं क्रियेति विशेषणविशेष्यभावः पाकादिविषयेऽप्युपपन्न इत्यर्थः। कृत्वोऽर्थप्रत्ययास्त्वभ्यावृत्तिग्रहणान्न भवन्ति। 'ओदनस्य पाकः' इत्यादौ तु कर्मा[द्यन्वय] उपसर्जनभूतधात्वर्थद्वारक उपपद्यत इति न काचिदनुपपत्तिः। एवं तव्याद्यन्तघञाद्यन्तविषये विशेषणविशेष्यभावस्योपपन्नत्वाद् भाष्यकारेण तदनुपपत्त्युद्भावनमयुक्तमित्याह — **तत्किमुच्यत इति**। किंशब्दः क्षेपे, उपपन्नत्वादित्यर्थः। एवं पूर्वपक्षभाष्यमाक्षिप्य समाधत्ते — **अत्रोच्यत इति**। [3]**तयोः साधारणश्च धर्म इति**। न केवलं कर्मकरणे एवोपमानोपमेयभावनिमित्ते, येन क्रियाया अप्युपमानत्वं युज्यते। यावत् तदतिरिक्तः साधारणो धर्म इति चशब्दार्थः। **एतत् त्रयमिति**। अनेनान्यथा स्वरूपमेव हीयेतेति दर्शयति। **तत्र यदेति**। एवं सतीत्यर्थः। यदि शयितव्यादिशब्दास्तृतीयान्ता उपमानत्वेनाश्रीयन्ते तैः शब्दैः साधारणधर्माधारत्वोपपत्तये क्रियाधर्ममनिष्पन्नरूपत्वं परित्यज्य निष्पन्नरूपत्वं सत्त्वधर्मः परिग्रहीतव्यः, स्वरूपमलभमानस्यान्याश्रयत्वायोगात्। तस्मात् प्रत्ययप्राप्तिवेलायां केवलक्रियावाचित्वासंभवाद्विशेषणविशेष्यभावानुपपत्तिरिति पूर्वपक्षभाष्याशय इत्यर्थः। **उपमानोपमेयभावविषयाः शब्दा इति**। न तु वक्ष्यमाणपरिगणितब्राह्मणादिशब्दा एव। नापि सर्वशब्दसामानाधिकरण्यप्रतीतलोकप्रयुक्तसकलशब्दा इत्यर्थः। 'चान्द्रायणादि' इत्यादिशब्देन कृच्छ्रादि संगृह्यते। **वेदेति**। श्रुतमिति भावे निष्ठाश्रयणेन तत्पूर्वकमध्ययनं लक्ष्यते। तथा च नञ्सूत्रे व्याख्यातम् —

---

[1] महाभाष्यम् २.१.५५.
[2] वाक्यपदीयम् ३.४.३९६, ३९७.
[3] प्रदीपे 'यश्च तयोः साधारणोऽर्थः' इत्यत्र 'यस्तयोः साधारणश्च धर्मः' इति पाठोऽभिमत इति भाति।

[1]श्रुतं वेदवेदाङ्गादीनामध्ययनम्, इति। ननु ब्राह्मणकारकमिति समासेन न भाव्यम्, षष्ठीसमासस्याकयोगे [2]'तृजकाभ्यां कर्तरि' [3]'कर्तरि च' इत्यनेन सूत्रद्वयेन निषेधात् समासान्तरस्यात्राविवक्षितत्वादित्यत आह — **शेषषष्ठीसमास इति**। [4]'शेषे' इति विहिताया: षष्ठ्या: समास इत्यर्थ:। नन्वेवमपि निषेधस्तदवस्थ एवेत्यत्राह — **तृजकाभ्यामिति**। **तृजकनिमित्तेति**। हेतुतृतीयाश्रयणात्। **कर्मणीति**। कर्तृविहिततृजकनिमित्तत्वं कर्मषष्ठ्या एव संभवति। **तस्या एवेति**। कर्तृकर्मविहितषष्ठ्या एव सूत्रद्वयेन निषेधविधानात् अस्यास्तु शेषे विधानान्निषेधाप्राप्तिरित्यर्थ:। **न हीति**। यद्यपि कर्मण: शेषत्वेन विवक्षितत्वात् कर्मणि विधानं कथंचिदस्या: संभवति, तृजकनिमित्तत्वं तु नास्त्येवेत्यर्थ:। ब्राह्मणशब्दोऽत्र ब्राह्मणाख्यामाचष्ट इत्याह — **ब्राह्मणेति**। **निमित्तमिति**। निमित्तं हि निमित्तिनं करोति। एवकारव्यवच्छेद्यं दर्शयति — **नासाविति**। कथं तर्हि तत्र ब्राह्मणशब्दप्रयोग इत्याह — **जातिलक्षणेति**। ब्राह्मणत्वजातेर्यल्लक्षणं तप:प्रभृति तदेकदेशो ब्राह्मणाद् ब्राह्मण्यां जन्ममात्रं तदाश्रय इत्यर्थ:। यद्वा जातिर्जन्म, तल्लक्षण एकदेशस्तदाश्रय इत्यर्थ:। [5]**ब्राह्मणक्रियासु सर्वासिवति**। अग्न्याधानाग्निष्टोमादिष्वविदुषोऽनधिकारात्। तथा चाहु: —

> [6]'यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्।
> स वै दुर्ब्राह्मणो व्रात्य: सर्वकर्मबहिष्कृत:॥' इति।

अनुपहतेति। अविच्छेदेन सम्यग्वर्तनमनुपहतत्वम्, तदेव शुचिशब्दे भाष्ये विवक्षितमित्यर्थ:। नन्वव्यभिचारिण एव धर्मा: शब्दार्थान्तर्भाविन:, यथा सत्त्ववचनानां लिङ्गादय:। गौरत्वादयस्तु व्यभिचारिण इति कथं तेषां शब्दार्थान्तर्भाव इत्यत आह — **गौरत्वादय इति**। पुराकल्पे एतद्धर्माव्यभिचारित्वस्यागमसिद्धत्वादस्मिन् कल्पेऽपि क्वचित्संबन्धेन व्यञ्जकत्वस्याविहतत्वाद् व्यञ्जकानां च व्यङ्ग्यवाचिशब्दोच्चारणे प्रतीयमानत्वात् तेषामपि शब्दार्थान्तर्भूतत्वेनाश्रयणमित्यर्थ:। 'शब्दार्थान्तर्भूतत्वेन' इत्यनेन 'अभ्यन्तरान् ब्राह्मण्ये' इति व्याचष्टे — **आश्रयन्तीति**। अनेन 'कुर्वन्ति' इति व्याख्यातम्। ननु समुदायात् प्रच्युत्यावयवे वर्तमान: [7]'शब्दार्थसंबन्धस्यानित्यत्वमापादयेदिति सिद्धान्तव्याकोप इत्यत आह — **समुदायरूपारोपादिति**। समुदाये वृत्त: शब्दो यदावयवे वर्तते तदाप्यारोपितसमुदायरूपे तत्र वर्तनात् सर्वदैकरूपस्यार्थस्याभिधानान्न संबन्धनित्यत्वहानिरित्यर्थ:। यथोक्तम् —

> [8]'अर्थमात्रं विपर्यस्तं शब्द: स्वार्थे व्यवस्थित:' इति।

विपक्षे बाधमाह — **न तूपात्तेति**। व्युत्पत्तिप्रत्याख्यानपक्षे चायं निर्वाह:। यदा तु [9]'सोऽस्य निवास:' इत्यणो [10]'जनपदे लुप्' इति लुपा पञ्चालादय: शब्दा व्युत्पाद्यन्ते तदैकावयवस्यापि निवासाधिकरणत्वादुपपद्यते मुख्यया वृत्त्यावयववृत्तित्वम्। कथं पुनर्ज्ञायतेऽवयववृत्तिरत्र पञ्चालशब्द इति, तत्राह — **पूर्वादिशब्दसामानाधिकरण्याच्चेति**। सामानाधिकरण्यं नाम समानाभिधेयत्वम्,

---

[1] नञ्सूत्रे प्रदीप इदं व्याख्यानम्।
[2] पा. सू. २.२.१५.
[3] पा. सू. २.२.१६.
[4] पा. सू. २.३.५०.
[5] प्रदीपे 'तस्य सर्वासु ब्राह्मणक्रियासु' इत्यत्र 'तस्य ब्राह्मणक्रियासु सर्वासु' इति पाठोऽभिमत इति भाति।
[6] कृत्यकल्पतरौ श्राद्धकाण्डे यमवचनत्वेनेदमुद्धृतम्। 'स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपति:' इत्युत्तरार्धे तत्र पाठ:।
[7] शब्दोऽर्थ — घ.
[8] वाक्यपदीयम् २.२५५.
[9] पा. सू. ४.३.८९.
[10] पा. सू. ४.२.८१.

पूर्वादिशब्दाश्चावयवविशेषवचना इति तत्सामानाधिकरण्यात् तद्वाच्यावयववृत्तित्वमवसीयते। अन्यथा समुदायावयवयोर्भेदाद्व्यतिरेकनिबन्धना षष्ठी स्यादित्यर्थः। ननु

[1]'नेक्षिता जातिशब्दानां समुदायानुपातिना।
जातिमाचक्षते [2]ते हि व्यक्तिर्वा जातिसंगता॥'

इति नयेन तैलादिशब्दानां जातिवाचिनां समुदायाभिधायित्वासिद्धेः कथमत्र दृष्टान्ततोपपत्तिरित्याशङ्क्याह — **यदा द्रव्यसंस्कृत इति**। रोगविशेष[3]प्रशमनार्थमौषधाहितविशेषे षोडशपलादिपरिमिते यदा तैलादिशब्दा वर्तन्ते तदा पलसमुदायाभिधानात् तेषां समुदायवृत्तित्वम्। ततः प्रतिदिनमभ्यवहारे समुदायोपयोगात्पूर्वं यदा 'तैलं भुक्तं मया' इति प्रयोगस्तदावयववृत्तित्वम्। कथं पुनर्भाष्यकारस्यायमभिप्रायोऽवसीयत इति चेदाह — **यदा त्विति**। ननु गुणशब्दानामपि जातिशब्दवत् संस्थानप्रमाणनिरपेक्षमर्थेषु गुणसंबन्धादेव वर्तनात् समुदायावयववृत्तित्वमयुक्तमित्यत आह — **स्वयमशुक्लोऽपीति**। लोके समस्तावयवव्याप्त्या यो गुणो वर्तते तत्र मुख्यस्तद्वचपदेशः — शुक्लः पट इति। अतः समुदायाभिधायिता कथ्यते। यत्र त्ववयवः कश्चित् शुक्लः, अपरः कृष्णस्तत्राशुक्लेऽप्यवयवे समुदायारोपात् शुक्लशब्दप्रवृत्तावावयववृत्तित्वमुच्यते। यस्य हि पटस्यावयवोऽपि नाशुक्लस्तन्निवृत्तिपरायां चोदनायामयं प्रयोगः। अत एव सद्यः प्रक्ष[रणेनाव]यवमलिनीकरणे समन्यवो वक्तारो भवन्ति 'कृष्णः पटः कृतः' इति। 'एवमयम्' इत्यादिदार्ष्टान्तिकभाष्यं केचिदेवं व्याचक्षते — तपःप्रभृत्यवयवसंतानवचनोऽपि ब्राह्मणशब्दोऽध्ययनप्रधाने द्रव्ये वर्तत इति। तदनादृत्य स्वम[तमाह —]**येति**। द्रव्ययोरुपमानोपमेयत्वे तुल्यशब्दस्योपमेयविशेषणत्वात् प्रथमया पुँल्लिङ्गेन च निर्देशोपपत्तौ विग्रहवाक्ये द्वितीयया नपुंसकेन च [निर्देशः] क्रियमाणोऽध्ययनस्योपमेयत्वमावेदयन्नुपमानवाचिब्राह्मणशब्दस्य क्रियामात्रवाचित्वमवगमयतीत्यर्थः। अस्मिन् पक्ष एव क्रियाशब्दस्य मुख्यार्थत्वम्, पक्षान्तरे तु क्रियाशब्देन क्रियावत उपलक्षणान्मुख्यार्थत्वहानिरित्याह — [4]**इत्युपपद्यत इति**। अस्मिन पक्षे द्रव्यवादिनोद्भावितं दोषं शङ्कते — **नन्विति**। त्वत्पक्षेऽसाधारणधर्मस्य शब्देनानुपादानाद् किंनिमित्तं सादृश्यमिति न ज्ञायेतेत्यर्थः। मत्पक्षे त्वेष दोषो नावतरतीत्याह — **कर्त्रोरिव त्विति**। 'उच्यते' इत्यादिपरिहारग्रन्थः स्पष्टार्थः। नन्वेवमपि त्वन्मते पूर्वपक्षोक्तदोषतादवस्थ्यमिति चोदयति — **ननु चोक्तमिति**। सांप्रतिकाभावे भूतपूर्वगत्याश्रयणाददोष इति परिहरति — **एवं तर्हीति**। ननु 'देवदत्तशयितव्येन तुल्यं यज्ञदत्तशयितव्यम्' इत्यादौ सांप्रतिकक्रियावाचित्वसंभवात् तदभावोऽसिद्ध इत्यत्राह — **अत एवेति**। साधारणधर्माधारत्वोपपत्तये क्रियाधर्ममसत्त्वरूपं परित्यज्य सत्त्वधर्मावेशादेवेत्यर्थः। यत्पुनरपरं दूषणमुक्तं 'सिंहश्चैत्र इत्यत्र शौर्यमात्राभिधायिनः सिंहशब्दस्य योगे चैत्रशब्दात् षष्ठी प्रसज्यते' इति, तन्न, आरोपो ह्ययम्, नोपमानोपमेयभावः। तत्र च तद्धर्मान्वयात् तत्त्वाध्यास इति सामानाधिकरण्यमेव युक्तम्। यच्चाप्युक्तम् — 'ब्राह्मणवद्वैश्याय दातव्यम्' इत्यादौ संप्रदानादियोगोऽनुपपन्न इति। तदप्यतितुच्छम्, सांप्रतिकक्रियारूपतानङ्गीकारात्। **एकेनेति**। एक एव क्रियाशब्दोऽत्र श्रुतः। तस्य प्रकृत्यर्थविशेषणोपक्षीणत्वात् प्रत्ययार्थमवच्छेत्तुं रूपमेव नास्तीत्यर्थः। **गुणैस्तुल्य इति**। तेन गुणनिमित्तसादृश्ये प्रत्ययः स्यादिति भाष्यार्थः। ननु पाचकादिवत् पुत्र-

---

[1] वाक्यपदीयम् ३.१४.४८७.

[2] 'तर्हि व्यक्तीर्वा जातिसंश्रयाः' इति पूनामुद्रिते वाक्यपदीये पाठः। अधस्तात् 'ते हि व्यक्तिर्जातिसमाश्रया' इति पाठो निर्दिष्टः।

[3] प्रदर्शनार्थम् — घ.

[4] नेत्युपपद्यत इति — घ.

शब्दस्य क्रियावाचित्वमसिद्धमित्याशङ्क्यं परिहरति — **पुत्रशब्दोऽत्रेति**। **श्रुताध्ययनं** वेदादीनामध्ययनम्। **निदेशस्थानं** पितुर्निदेशे वर्तनम्। आदिशब्देन तदनुवर्तनादीनां ग्रहणम्। एताः क्रियाः कुर्वन् पुत्र इति व्यपदिश्यते। अननुष्ठातारमपुत्रोऽयमिति व्यवहरन्ति। ततश्च निरूढसंबन्धास्ताः क्रियाः पुत्रशब्दोऽन्तर्भावयतीति क्रियावाचिनः पुत्रशब्दाद् गुणतुल्यत्वे वतिः स्यात्। यद्यपि पुन्नाम्नो नरकात् त्रायत इति पुत्रशब्दव्युत्पत्तिः, तथापि रूढिशब्देष्ववयवार्थाननुगमात् तदनादरेणैवमुक्तिः। एवं प्रकृत्यर्थविशेषणपक्षस्य सावद्यत्वात् प्रत्ययार्थविशेषणपक्षोऽङ्गीकृतो भाष्ये 'अस्तु तर्हि' इत्यादिना। तत्र भाष्यकृतोऽभिमतं क्रमव्यतिक्रमहेतुमाह — **समानविभक्तित्वादिति**। यथाश्रुति समन्वयोपपत्तावध्याहारेण सोऽनुपपन्नः, प्रधानस्य विशेषणयोगे संभवति गुणस्यासावन्याय्य इति क्रमस्य श्रुत्यादिना बाध इत्यर्थः। **अत्रोदाहरणमूह्यमिति**। पूर्वत्रोदाहरणस्य दत्तत्वात् तद्विपर्ययेणात्राप्यूहितुं शक्यत्वान्नोपन्यस्तं भाष्यकृतेत्यर्थः। **क्वचित् [तु] पुस्तक इति**। तत्रोहो न कर्तव्य इति प्रतिपत्तिलाघवं भवतीति भावः। ननु क्रियानिमित्तसादृश्यविषये प्रत्ययस्येष्टत्वात् कथं क्रियातुल्येऽपि प्रत्ययः स्यादित्यनिष्टापादनं क्रियत इत्याशङ्क्य न पूर्ववदत्र तृतीयासमासः, कस्तर्हि, षष्ठीसमास इत्यभिप्रायेण परिहरति — **तत्र पुत्रादय इति**। ननु द्वितीयोदाहरणे क्रियाशब्दोपादानात् तन्निमित्तमेव सादृश्यं प्रतीयेत। मैवम्, पुंल्लिङ्गसामानाधिकरण्येन तुल्यः केनचिद् धर्मेण स्यादित्येवं प्रतीतेः। अत एव पूर्वोदाहरणादस्य नातीव भेदः। ननु पुत्रादीनां क्रियामात्रवाचित्वमसिद्धम्, पूर्वोक्तहेत्वभावादिति कथमत्र पूर्वत्र च दोषोद्भावनमित्यत्राह — **क्रियाग्रहणं चेति**। एवं पक्षद्वये समीकृतस्य दोषस्य प्रतिविधानाय भाष्यम् 'नैष दोषः' इत्यादि। तत् तात्पर्यतो व्याचष्टे — **एकस्मिन्नपीति**। श्रुतेरेकत्रैव व्यापारः, अन्यत्र तुल्यशब्दोपादानात् सामर्थ्याद्विशेषणस्पर्श इति पूर्वोक्तदोषो नावतरतीत्यर्थः। ननु तुलया यत् परिच्छिद्यते सुवर्णादि न तत्तुल्यशब्दवाच्यमिति 'तुलया संमितम्' इति व्युत्पत्तिकथनमयुक्तमित्यत आह — **सदृशमित्यर्थ इति**। सदृशे रूढ एव तुल्यशब्दः। व्युत्पत्तिस्तु यथाकथंचिदनुसरणीयेत्यर्थः। तदेवाह — **यथेति**। एतत्तुल्यार्थकथनमुत्तरभाष्यार्थस्य हेतुत्वेन योजयति — **तत इति**। पूर्वपक्षोक्तां युक्तिं निरस्यति — **न चेति**। एवं च पूर्वपक्षोद्भावितातिप्रसङ्गानवतर इत्याह — **न च स्थूलेनेति**। यत्र श्रूयते क्रिया — ब्राह्मणेन तुल्यमधीते क्षत्रिय इति, तत्रोभयगतयोः क्रिययोस्तुल्यता प्रतीयते। अश्रूयमाणायां तु तस्यां द्रव्ययोरेव तुल्यता केनचिद्धर्मेणावसीयत इति तत्र वतिर्न भविष्यतीत्यर्थः। क्रियातुल्यत्वानवधारणात् क्रियावति प्रवृत्तिरपि निष्प्रमाणिकेत्याह — **अत एवेति**। नन्वेवं स्थूलेन तुल्यो यातीत्यत्र वतिः स्यादित्यत्राह — **स्थूलेन तुल्य इति**। अत्रापि पुंल्लिङ्गेन निर्देशात् तुल्यत्वेन क्रिया न विशेष्यते, किं तर्हि, द्रव्यमेव, ततश्चोपमाने नियतं यत् स्थौल्यं तन्निमित्ता तुल्यता द्रव्यान्तरस्य प्रतीयत इति क्रियातुल्यत्वाभाव इत्यर्थः। यत्र तु क्रिया विशेष्यते तत्र वतिर्भवत्येवेत्याह — **यदा त्विति**। प्रत्ययार्थविशेषणपक्षवत् प्रकृत्यर्थविशेषणपक्षेऽप्युभयविशेषणत्वमिति 'अथवा' इत्यादिभाष्यतात्पर्यं दर्शयति — **पूर्वोक्तेनेति**। एवं पक्षद्वयेऽपि दोषे परिहृते प्रत्ययार्थविशेषणपक्षं सिद्धान्तयितुं चोद्यभाष्यम् 'किं पुनरत्र ज्यायः' इति। तद्व्याचष्टे — **उक्तदोषेति**। ननु वतिप्रत्ययेन सामानाधिकरण्यं क्रियाया अनुपपन्नमित्यत्राह — **वतिशब्देन वत्यर्थ इति**। तुल्यमिति वत्यर्थः। तेन तुल्यशब्देन क्रियावाचिनः सामानाधिकरण्यं कृतमिति भाष्यार्थः। न हि विधीयमानत्वादसिद्धावस्थस्य वतेर्विशेषणयोगोपपत्तिः। न चापि क्रियारूपता। अत्र भाष्यकृतोऽभिमतां युक्तिमाह — **तेनेति**। प्रकृत्यर्थविशेषणपक्षे भिन्नविभक्तित्वादध्याहारेण समन्वये प्रतिपत्तिगौरवं स्यात्। पक्षान्तरे तु श्रुत्यैवान्वयोपपत्तौ लाघवं भवतीति तस्यैव ज्यायस्त्वमित्यर्थः। 'अन्ये तु' इत्यनेनास्य व्याख्यानस्य पूर्वोक्तनयेनासंमतत्वं सूचयति। ननु पक्षद्वयस्याप्युभयविशेषणत्वेन समानत्वात् 'अपि च' इत्यादिनाभ्युच्चयोक्तिरनु-

पपन्नेत्याशङ्क्य भेदमाह — **प्रत्ययार्थेति**। 'मुख्या' इत्यनेन पक्ष[ान्तरत्वं] दर्शयति — **साध्यमानस्वभावेति**। **मुख्या** असत्त्वभूता, लिङ्गसंख्यादिसंबन्धानर्हेत्यर्थः। नन्वसत्त्वभूतार्थाभिधायित्वेऽपि पाठेनैवाव्ययसंज्ञेति कर्तव्य एव पाठ इत्यत्राह — **यन्नव्येतीति**। न [न्वस्मिन् प]क्षे क्रियाया वतिनैव प्रत्यायितत्वादधीत इत्यादिप्रयोगोऽनुपपन्न इ[त्यत आह — **क्रियामात्रमिति**।] वतेः पाठस्य कर्तव्यतामुपपादयति — **प्रकृत्यर्थेति**। **भूतपूर्वगतिरिति**। साधारणधर्माधारत्वोपपत्तय इति शेषः। **गत्यन्तरसंभव इति**। संप्रति लक्षणाश्रयेणाप्यनिर्वाहे भूतपूर्वगतिरुपपत्तिमती, अत्र तु नैवमि[त्यर्थः। क्रियावत उपलक्ष]णादव्ययसंज्ञा न प्राप्नोतीत्याशङ्क्य स्वत्यादीनां कर्मप्रवचनीयसंज्ञेवैषापि भविष्यतीति परिहरति — **पाठसामर्थ्यादिति**। उक्तमर्थमुपसंहरति — **तदेवमिति**। अत्र पक्षेऽध्येतरि प्रत्ययोऽनिष्टो भवतीत्याह — **ब्राह्मणेन तुल्य इति**। **इवशब्दस्येवेति**। इवार्थे विहितस्य वतेरिवशब्दवदव्ययत्वमित्यर्थः। **क्रियायामिति**। क्रियाग्रहणानुवृत्त्यार्हणस्य कर्त्र्यां क्रियायामित्यर्थः। [1]'उपसर्गाच्छन्दसि' इत्यनेन विहितस्य लिङ्गसंख्यादिसंबन्धान्नाव्ययत्वम्। तस्मात् प्रत्ययार्थविशेषणपक्ष एव युक्ततर इति स्थितम्॥

तत्र तस्येव ५.१.११६.

[४, ७५–७७]

(विवरणम्) ननु विलक्षणत्वात् संनिवेशस्य न मधुराख्यनगर्या पाटलिपुत्रस्थप्राकाराणां सादृश्यम्, अत आह — **मधुराशब्देन चेति**। 'यदान्येन' इति भाष्यकारेण क्रियातुल्यत्वे पूर्वेण प्रत्ययः, न चात्र क्रियातुल्यतास्तीति सूत्रं कर्तव्यमित्युक्तम्। तत् 'क्रियाग्रहणं न करिष्यते' इत्युक्तत्वादयुक्तमित्यत आह — **पूर्वसूत्र इति**। यो हीवशब्दस्य तुल्यार्थत्वात् तदर्थोपजनितसंबन्धे षष्ठ्या भाव्यम्, तथा च सप्तम्यन्ताद्विधानमनुपपन्नमिति मन्यते, तं प्रत्याह — **इवशब्दश्चेत्यादिना**। ननु सप्तमीविधिपरे वाक्ये तस्येवेत्यविशेषे सप्तमीविधानार्थत्वात् न तस्येत्यनेन षष्ठ्याः प्रतिप्रसवसंभव इत्यत आह — **महाविभाषेति**॥

[४, ७५–७७]

(उद्द्योतनम्) ननु तृतीयया षष्ठीसप्तम्यर्थयोरलाभात् कथं तेन सिद्धिः, अत आह — **तुल्यार्थैरिति**। **व्याप्ताः** प्राप्ता एवेत्येवकारान्वयः। प्राप्तिमुदाहरति — **यथेति**। प्राप्त्युपपादनस्य प्रयोजनमाह — [2]**तत इति**। ननु तत्र क्रियायां प्रत्ययः, अत्र द्रव्य इति कथं तेन सिद्धिः, अत आह — **क्रियाग्रहणमिति**। ननु तृतीययेवार्थो न लभ्यत इति न तेन सिद्धिः, अत आह — **य एवेति**। ननु [3]मधुरायामिवेत्युक्ते मधुरासंबन्धिप्राकारतुल्यत्वं यत् प्रतीयते तन्मधुरयेति तृतीयया न लभ्यते, अत आह — **मधुराशब्देन चेति**। पूर्वसूत्रे क्रियाग्रहणाभावे तेन सिद्धिरुक्ता, तद्ग्रहणस्यावश्यकत्वान्न तेन सिद्धिरित्याह — **पूर्वसूत्र इति**। तत्र हेतुः — **गवेति**। **तस्मिन्** क्रियाग्रहणे। नन्विवशब्दस्य तुल्यार्थत्वात् तद्योगे [4]'तुल्यार्थैः' इत्यनेन षष्ठीतृतीये कुतो न भवतः, अत

---

[1] पा. सू. ५.१.११८.

[2] प्रदीपे 'तत्र तृतीयया' इत्यत्र 'ततश्च तृतीयया' इत्यन्नंभट्टपाठः स्यादिति भाति।

[3] मधुराया इवेत्युक्ते — अ, ऋ, लृ.

[4] पा. सू. २.३.७२.

आह — **इवशब्दश्चेति**। **द्योतकत्वात्** सादृश्यस्येत्यादिः। इवार्थप्रतियोगिकभेदविशेषः प्रथमातिरिक्तविभक्तिप्रयोजको व्यतिरेकः। **गौरिवेति**। प्रातिपदिकार्थे प्रथमा न व्यतिरेकमपेक्षते। द्योतकस्य व्यतिरेकाप्रयोजकत्वे दृष्टान्तः — **यथेति**। धवस्य खदिरस्य समुच्चय इत्यत्र षष्ठी भवति। चशब्दयोगे तु प्रथमैवेत्यर्थः। नन्वेवमिवशब्दस्य षष्ठीसप्तमीप्रयोजकत्वाभावात् कथं प्रत्ययविधिः, अत आह — **तत्र दन्तेति**। 'न च' इत्यस्याप्रसक्तप्रतिषेधत्वं निराह — **नन्विति**। तावता षष्ठीसप्तम्यर्थलाभः कथम्, अत आह — **तदनुवृत्त्या चेति**। तृतीयाया अपि व्यतिरेकनिबन्धनत्वाद्व्यतिरेकनिबन्धनाः सप्तम्यादयोऽप्युपमानाद् भवन्तीत्यनुमानात् षष्ठी[1]सप्तम्यर्थलाभः। अनभिधानात्तु तृतीया तावन्न भवतीति भावः। शङ्काशयं निराह — **अयमर्थ इति**। अत्र तृतीयानुवृत्तिर्न संभवति, इवेन सहान्वयायोगात्। सा किं लक्षणप्राप्ता, उतानुवृत्तिबलाज्ज्ञापनेन[2] वा, नाद्य इत्याह — **इवशब्दस्तावदिति**। **लक्षणेन** [3]'तुल्यार्थैः' इत्यनेन। न द्वितीय इत्याह — **नेति**। **तद्योगे** इवशब्दयोगे। कारकत्वासंभवात् 'शेषविषये' इत्युक्तम्। **इष्टेति**। इवयोगे वक्ष्यमाणरीत्या सप्तमी ज्ञापकादिष्यते, न तृतीया। अतस्तृतीयानुवृत्त्यसंभवात् तत्र तस्येति विभक्तिद्वयं निर्दिष्टमित्यर्थः। **तृतीयां हित्वा** तदनुवृत्तिमनङ्गीकृत्य। 'ननु' इत्यस्य पूर्वसंबन्धमाह — **तत्र यथेति**। **एवमिति**। तृतीयानुवृत्त्या इवयोगे तृतीयाया अपि ज्ञापयितुं शक्यत्वादिति भावः। सप्तम्या अभावे 'सिद्धे सति' इत्ययुक्तम्, अत आह — **तृतीयानुवृत्त्येति**। **अस्मादेव** तृतीयानुवृत्तिसामर्थ्यादेव। तृतीयाज्ञापनं तु नेष्यत इत्याह — **तृतीया त्विति**। शेषविषयेयं सप्तमीत्याह — **देवानामिवेत्यर्थ इति**। ज्ञापकत्वमाक्षिपति — **नन्वसतीति**। शेषसप्तम्यन्तात् प्रत्ययपक्षेऽनिष्टमप्याह[4] — **किं चेति**। [5]**स्वलक्षणेन** [6]'सप्तम्यधिकरणे च' इत्यनेन। **तस्येति**। षष्ठ्यर्थे सप्तमी भवतीवशब्दयोग इति द्वितीयसूत्रार्थः। ननु सप्तम्या षष्ठी बाध्येत, अत आह — **सप्तम्येति**। द्वितीयसूत्रे तस्येति तन्त्रोपात्तम्। एकं षष्ठ्यर्थपरम्, अपरं तद्विधानपरमिति भावः। तन्त्रकल्पनायां गौरवं मन्वान आह — **महेति**॥

[४, ७५–७७]

(नारायणीयम्) नन्विवतुल्यशब्दयोः समानार्थत्वेऽपि पूर्वेण तृतीयान्ताद्विधिः, अनेन तु षष्ठीसप्तम्यन्तादिति समर्थविभक्तिभेदात् कथं पूर्वेण सिद्धिरुक्तेत्याशङ्क्य पूर्वपक्षभाष्याभिप्रायमाह — **तुल्यार्थैरिति**। तुल्यार्थयोगे तृतीया शेषविषये विधीयते। शेषसंबन्धश्च क्रियाकारकसंबन्धपूर्वक इति तृतीयया सकलस्य क्रियाकारकसंबन्धस्य हेतुभूतस्याक्षेपात् तया योगे कृत्स्नविभक्त्यर्थव्याप्तिः। एतदेवोदाहरणप्रदर्शनेन विशदयति — **यथेति**। ननु पूर्वसूत्रे क्रियाग्रहणाद् द्रव्यगुणयोस्तुल्यत्वे तेनाप्राप्तो वतिरनेन विधीयत इति चेन्नेत्याह — **क्रियाग्रहणमिति**। एवं च शब्दार्थभेदेऽपि वस्तुभेदाभावात् पूर्वेणैव वतिसिद्धिरित्याह — **य एव चेति**। नन्वर्थभेदोऽस्त्येव मधुरया तुल्याः पाटलिपुत्रे प्राकारा इत्यादौ, मधुरादिना प्राकारादीनां सादृश्यावगमादित्याशङ्क्याह — **मधुराशब्देन चेति**। समानधर्मप्रयुक्तत्वादौपम्यस्य मधुरादिना समुदायेन प्राकारादीनां तद-

---

[1] समर्थलाभः — अ.
[2] ज्ञापकेन वा — अ.
[3] पा. सू. २.३.७२.
[4] अनिष्टमाह — अ.
[5] 'स्वलक्षणविहित' इत्यत्र 'केषां शब्दानाम्' इत्यत्रेव बुद्ध्या प्रविभज्यैवंप्रतीकधारणं बोध्यम्।
[6] पा. सू. २.३.३६.

संभवान्मधुरादिशब्देन तदवयवः प्राकारादिर्लक्ष्यत इत्यर्थः। उत्तरवादिन आशयं दर्शयति — **पूर्वसूत्र इति**। ननु यथा तुल्यशब्दयोगे व्यतिरेकविभक्ती षष्ठीतृतीये भवतः, एवं तत्समानार्थैवशब्दयोगे षष्ठी स्यादिति 'गवा तुल्यो गवयः' इत्यत्राप्यर्थेऽनेन वतिः प्रसजेदिति कथं क्रियाग्रहणेनात्र व्यावृत्तिरित्याशङ्क्याह — **इवशब्दश्चेति**। परपदार्थनिष्ठत्वेन प्रयोगात् तद्गतं विशेषं द्योतयन् स्वतन्त्रेणार्थेनायोगाद् व्यतिरेकमिवशब्दो द्योतको नापादयतीत्यर्थः। **धवश्चेति**। वाचकशब्दप्रयोगे त्वत्रापि व्यतिरेकविभक्तिर्भवति 'धवस्य खदिरस्य समुच्चयः' इति। कथं तर्हीवशब्दप्रयोगे षष्ठीसप्तम्यौ स्याताम्, येन तदन्ताद्वतिर्विधीयेतेत्यत्राह — **तत्रेति**। इवशब्दप्रयोगे यो व्यतिरेको दृश्यते नासाविवार्थनिबन्धनः, अपि तु दन्त[1]प्राकारादिबाह्यसंबन्धिनिमित्तोऽयम्। ततश्च तन्निमित्तषष्ठीसप्तम्यन्तादिवार्थे वतिप्रत्ययः, पूर्वेण तु स्वार्थनिमित्त एव व्यतिरेके तृतीयान्ताद्वतिरिति भिन्नविषयत्वमनयोः। [2]एवमक्रियार्थोऽयमारम्भ इति 'न सिध्यति' इत्यादिभाष्यतात्पर्यं प्रतिपाद्य 'न [च] काचित्' इत्यादिभाष्यस्य प्रकृते संगतिं दर्शयितुमाह — **नन्विवेति**। **लक्षणेनेति**। [3]'तुल्यार्थैरतुलोपमाभ्याम्' इत्यनेनेत्यर्थः। इवशब्दस्य द्योतकत्वाद्यद्व्यतिरेकहेत्वभावात्, तुल्यार्थत्वाभावाच्च। **नापीति**। तथा प्रयोगाभावात्। नन्विवशब्दप्रयोगे सप्तम्या अविधानेन प्रकृते को दोष इत्यत्राह — **तत्र यथेति**। ननु सप्तम्यन्तादिवार्थे केनचिल्लक्षणेन वतिर्न विहित इति किमुच्यते 'सिद्धे सति' इति, तत्राह — **तृतीयेति**। **तृतीया त्विति**। यदीष्टा स्यात् तेनेत्यनुवृत्त्यैव सिद्धत्वाद्विभक्त्यन्तरं नोपादीयेतेत्याशयः। शेषविषयत्वं सप्तम्याः स्फोरयति — **देवानामिवेति**। **मधुरायामिव मधुरावदिति**। यद्यत्र शेषविवक्षया षष्ठ्यन्ताद् वतिः स्यात्, तदा पाटलिपुत्र इत्यनुप्रयोगे सप्तमी न स्यादन्तरेणाधाराधेयभावविवक्षाम्, तस्मादधिकरणसप्तम्यन्तादेवात्र वतिरित्यर्थः। **अधिकरणसप्तम्यन्ताद्वतेरनुत्पत्तिरिति**। या शेषविषयेऽनेन ज्ञापिता सप्तमी तदन्तादेव वतिः स्यादित्यर्थः। [4]**सप्तम्या चेति**। अयं हि द्वितीयसूत्रार्थः — इवशब्दयोगे तत्रेति सप्तमी भवति, तस्येति षठी च शेषविषये, न केवला षष्ठ्येवेति। **महाविभाषेति**। अस्मिन् पक्षेऽयं सूत्रार्थः — तस्येत्यस्यार्थे तत्रेति सप्तमी भवतीति॥

तदर्हम् ५.१.११७.

[४, ७७–७९]

(उद्द्योतनम्) पूर्वेण सिद्धिमुपपादयति — **इहेति**। अन्यथा 'ब्राह्मणमर्हतीदं दधि' इत्यत्रापि वतिः स्यात्। अनुवृत्त्या लब्धं सूत्रार्थमाह — **तेनेति**। तदुदाहरति — **राजानमिति**। तेनैतत्सिद्धिमाह — **तत्रेति**। क्रियानुवृत्तेः प्रयोजनमाह — **राजानमिति**। अक्रियानुवृत्तौ राजवद्रूपमस्येति कथम्, अत आह — **राजवदिति**। भाष्ये 'न तेन' इत्येतत् 'तत्र तस्य' इत्यस्योपलक्षणमित्याह — **तेनेति**। पूर्वसूत्राभ्यामेव सर्वत्र वतिसिद्धेरिदं व्यर्थमित्यत्र तात्पर्यम्। पूर्वसूत्राप्रवृत्तिस्थलं शङ्कते — **इह तर्हीति**। तत्रापि भेदविवक्षायामेव वतिरित्याह — **अत्रापीति**। **यदेति**। राजवद्वर्तते राजा, एतस्य राज्ञो वर्तनं राजानमर्हतीत्यर्थः। तत्र राजशब्दस्य सामान्यपरत्वेन

---

[1] प्रासादादि — घ.
[2] एवं क्रियार्थोऽयं — घ.
[3] पा. सू. २.३.७२.
[4] प्रदीपे 'सप्तम्या षष्ठी' इत्यत्र 'सप्तम्या च षष्ठी' इति पाठोऽभिमतः।

भेदनिबन्धनसादृश्याभावात् पूर्वेण न प्राप्नोति। विशेषपरत्वेऽपि प्रसिद्धराजसादृश्याभाववति राजान्तरे यत्र प्रयोगस्तत्रापि [1]पूर्वेणाप्राप्तिरिति तदर्थमिदं सूत्रमित्यर्थः। यत्र सादृश्यं न गम्यते, अर्हणमात्रं गम्यते, तत्रापि लोके वतिप्रयोगदर्शनात् तदर्थं सूत्रमित्याह — **तयेति**। चौर्याद्यकार्यं येन हस्तेन कृतं स कृतहस्तश्चौरादिः। तद्वत् काष्ठं कश्चिच्चिच्छेदेत्यत्र कृतहस्तस्य छेदार्हत्वं प्रतीयते, न तु कृतहस्तसादृश्यं काष्ठस्येत्यर्थः। कृतहस्तमिति कर्म, छेदनं कर्तृ। आत्मशब्दस्य च [2]द्रव्यगतात्मपरत्वशङ्कां निराह — **द्वितीयान्तेति**। 'अर्हति' इति शत्रन्तस्य कर्तरीत्येतद्विशेषणत्वेऽनर्हस्य कर्तृत्वासंभवेन विशेषणवैयर्थ्यम्, अत आह — **अर्हतेरिति**। श्तिपा निर्देशोऽयमित्यर्थः। नपुंसकत्वनिर्वाहायाह — **क्रियारूपे वृत्तादिक इति**। **कर्तरीति**। सामान्येन नपुंसके व्युत्पादितस्य पश्चात् क्रियायामित्यनेन सामानाधिकरण्येन संबन्धो न विरुध्यत इति भावः। 'निश्चित' इत्यस्य यथाश्रुतस्य प्रकृतानुपयोगादाह — **निश्चितस्येति**। [3]उक्तमर्थमुदाहरति — **यदा राज्ञ इति**। **यदेति**। 'राजवद्राजा वर्तते' इत्यादावपि भेदकल्पने सादृश्यसंभवात् पूर्वेणैव सिद्धमित्यर्थः। अवस्थाभेदेन परिकल्पितो भेदो यस्य राजादिवस्तुनस्तदिति विग्रहः। कल्पितभेदेनापि सादृश्यं लोके इवशब्दप्रयोगदर्शनेनाङ्गीक्रियत इत्याह — **तथा चेति**। **दृश्यते** कल्पितभेदस्थलेऽपीत्यर्थः। सदृशशब्दप्रयोगमप्याह — [4]**तयेति**॥

[४, ७७–७९]

(नारायणीयम्) नन्वक्रियार्थत्वं पूर्वसूत्रारम्भस्य समर्थितम्, इहापि तदेव प्रयोजनं स्यादित्याक्षेपो न युक्त इत्याशङ्क्याह — **इह क्रियाग्रहणमिति**। **तत्र तस्येवेति सिद्ध इति**। राज्ञ इव वृत्तमस्येति विग्रहाश्रयेण। भाष्ये तेन तुल्यमित्येतत् सूत्रान्तरस्याप्युपलक्षणम्, पूर्वसूत्रद्वयेन सिद्धत्वादनर्थकमिदमिति भाष्यार्थ इति। तदाह — **तेन तुल्यमित्येतत्त्विति**। **अत्रापीति**। परिपूर्णराजवृत्तैर्भरतादिभिः प्राथमकल्पिकैः सांप्रतिकोऽपरिपूर्णराजवृत्तोऽपि समाचारतस्तुल्य इति विवक्षा[वशादुपमानोपमेय]भावोपपत्तावत्रापि पूर्वेणैव प्रत्ययसिद्धिरित्यर्थः। सिद्धान्तिन आशयं दर्शयति — **यदा राजशब्द इति**। यदा जातिमात्रमुपादीयते तदा भेदस्याविवक्षितत्वात् तन्निबन्धन उपमानोपमेयभावो नास्ति। राज [सादृश्यसं]बन्धापाकरणेन स्थैर्यापादनस्य विवक्षितत्वात् तदर्थमिदमित्यर्थः। **प्रसिद्धविशेषविषयो वेति**। अत्रापि परिपूर्णगुणत्वादेः सादृश्यस्याभावात् पूर्वेणाप्राप्तिः, पृथुमेवेदं [वर्तनमर्हतीत्यर्थात्।] अत एव [5]"पाण्डोर्विदुर सर्वाणि प्रेतकार्याणि कारय। राजवद्राजसिंहस्य' इति प्रयोगः। अत्र हि यानि राजानमेवार्हन्ति **प्रेतस्य** परलोकं प्राप्तस्य, **कार्याणि** संपाद्यानि तानि निष्पादयेत्ययमर्थः, न तु पाण्डोरन्येन [सादृश्यं प्रतिपाद्यते]। **तथा चिच्छेदेति**। नात्रापरेण कृतहस्तेन तुल्यत्वं विवक्षितम्। किं तर्हि, कृतो दृढं निवेशितो हस्तो येन तस्यैवार्जुनादेर्योग्यं छेदनं शरीरपाटनमनेन कृतमिति, तदाह — **कृतहस्तमर्हतीति**। आत्मशब्दार्थमाह — **द्वितीयान्तेति**। अर्हतीत्यर्हम्, पचाद्यच्। यद्यपि तद्योगे कर्मणि षष्ठ्या भाव्यम्, तथापि निपातनाद् द्वितीयेति केचित्। अन्ये तु तदर्हमित्येकं पदम्, कर्मोपपदोऽच्प्रत्यय इत्याहुः।

---

[1] पूर्वेण प्राप्तिरिति — अ, लृ.
[2] द्रव्यान्तर्गतेत्यर्थः। 'पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणि' इत्येतद्विवक्षितम्।
[3] उक्तार्थमुदाहरति — अ.
[4] यथेति — अ, ऋ, लृ.
[5] महाभारतम् आदिपर्व ११८–१.

'निश्चितबलाधाने' इत्यस्याप्रतिपत्तिमपनुदन् व्याचष्टे — **निश्चितस्येति**। एतदेव विशदयति — **यदा राज्ञ इति**। **राजानमेतदिति**। राजानमेवैतदर्हति, अराजसु नास्त्यस्य संभव इत्यर्थ-विवक्षायामेतत् सूत्रमारब्धम्। आपिशलाः काशकृत्स्नाश्च सूत्रमेतन्नाधीयते, तेषामाशयं दर्शयति — **यदा त्विति**। सामान्यवचने वा प्रसिद्धविशेषविषये वा राजशब्दे प्रसिद्धेनाप्रसिद्धस्यौपम्यं समस्त्येव यानि भूतपूर्वाणां राज्ञां प्रेतकार्याणि तत्तुल्यतया पाण्डोरपि विधत्स्वेत्यर्थः। तथा 'चिच्छेद कृतहस्तवत्' इत्यत्रापि यथा यः पूर्वत्र रणान्तरेऽभ्यासवशाद्धस्तलाघवेनाच्छिनत्, तथा तेन तुल्यमन्यदापि छिन्नवानित्येवं कालभेदेन कार्यभेदात् प्रसिद्धचप्रसिद्धिभ्यां च भेदकल्पनयैक-स्याप्युपमानोपमेयभावोपपत्तौ पूर्वेण सिद्धत्वान्नार्थोऽनेन योगेनेत्यर्थः। अवश्यमेवमेवोपयम्, अन्यथा सूत्रारम्भे वचनाद् गतिरस्तु, इवशब्दप्रयोगस्त्वत्र न स्यादित्याह — **तथा चेति**। **तथा सदृश-स्त्वमिति**। अत्र हि यौवनावस्थां चारुत्वातिशयवशात् प्रसिद्धामाश्रित्यान्या स्थविरावस्थोपमीयते। अवस्थाभेदेनावस्थावतो भेदं परिकल्प्य तवैव सदृशस्त्वमित्यन्योपमाननिवृत्तिमुखेन स्तुत्यर्थमयं प्रयोगः, तथा वेदेऽपि [1]'इन्द्र इव दस्युहा भवापः क्षेत्राणि संजय' इतीन्द्र एक एवावस्थाभेदेन भेद-माश्रित्य स्तूयते। यथा त्वमन्यत्र दस्यूनां हन्ता भूतस्तथेहापि भवेति, एवं व्याकरणान्तरेऽस्य सूत्र-स्यानारम्भः समर्थितः। इह तु व्याकरणे यदौपम्यमविवक्षित्वा योग्यतामात्रं प्रतिपिपादयिषितं तदार्थवदेतदिति मतम्। उक्तं च —

[2]युक्तमौपयिकं राज्ञ इत्यर्थस्य निदर्शने।
उपमानाविवक्षायां तदर्हमिति पठ्यते॥ इति।

अत एव भाष्यकारः प्रयोजनस्थापनं कृत्वा विरतः, न सादृश्याश्रयेण प्रत्याख्यातवान्॥

उपसर्गाच्छन्दसि धात्वर्थे ५.१.११८.

[४, ७९–८०]

(विवरणम्) अन्वर्येति। वत्यन्तस्याव्ययसंज्ञाविधिः पूर्वसूत्रत्रयविहिते चरितार्थ इति भावः॥

[४, ७९–८०]

(उद्द्योतनम्) वक्ष्यमाणाशयेन प्रश्न इत्याह — **धाताविति**। 'धातुर्वै शब्दः' इत्येतदुत्तर-त्वेन व्याचष्टे — **तत्रेति**। 'शब्दे' इत्येतच्चोदकवचनमित्याह — **येनेति**। लक्षणायां हेतुमाह — **न हीति**। धातौ [3]प्रयोगादर्शनादिति भावः। **एकग्रन्थ इति**। चोदकवाक्यमेवेत्यर्थः। लोपविधायकाभावादाह — **गम्यमानेति**। धातोरर्थप्रतिपादकत्वमेव, न तु तत्कर्तृत्वम्, अत आह — **धातुशब्देनेति**। नन्वत्रार्थशब्देन कारकमभिप्रेतम्। न च क्रिया स्वकारककर्त्री, अत आह — **क्रियेति**। सूत्रादेव कारकलाभप्रकारमाह — **बहुव्रीहीति**। लाभमेवाह — **धातुरिति**। धातुरर्थः प्रयोजनं यस्य कारकस्येति विग्रहः। धातुशब्दस्तद्वाच्यक्रियापर इति सूत्रार्थः। ननु कारकस्य शक्तिरूपस्यासत्त्वरूपत्वात् 'परावतः' इति लिङ्गसंख्यायोगः कथम्, अत आह — **वृत्ति-विषये चेति**। तथापि वतेरव्ययेषु पाठादव्ययत्वाद्विभक्तिश्रवणं कथम्, अत आह — **अन्वर्येति**।

---

[1] मैत्रायणीयसंहिता ४.१२.७३.

[2] वाक्यपदीयम् ३.१४.५८०.

[3] प्रयोगदर्शनादिति — अ.

[४, ७९–८०]

लिङ्गसंख्याभ्यां यन्न व्येति तदव्ययम्। पाठस्तु प्रपञ्चार्थः। वतेश्च पाठो व्यर्थ इत्युक्तमिति भावः। उपसर्गस्य वृत्तिविषये द्रव्यवाचित्वे भाष्ये साधनोक्तिविरोधः, अत आह — **साधन-शब्देनेति**। ननु 'उद्वतः' इति पुंल्लिङ्गत्वात् [1]'उद्गताः' इति वाच्ये 'उद्गतानि' इति कथम्, अत आह — **पुंस्त्वमिति**। यद्यप्युद्वदादीनां लोके क्लीबप्रयोगो नास्ति, तथापि भाष्यकारवचनात् [2]तन्निश्चय इति भावः। कस्मिन्नर्थे उपसंख्यानम्, अत आह — [3]**प्रत्यय इति**। वत्यर्थ इत्यादिः। नञ्स्नञोर्वतिबाधकत्वमुपपादयति — **प्राग् भवनादिति**। उपसंख्यानस्य तद्बाधकत्व-माह — **तेन चेति**। कियोगापेक्षम्, कस्य वार्थस्य ज्ञापकम्, अत आह — **स्त्रीपुंसाभ्यामिति**॥

(**नारायणीयम्**) **धातावित्येवेति**। शब्दे प्रत्ययस्य वृत्त्ययोगान्मुख्यकल्पनाभावाद् गौण्या वृत्त्या तत्सहचरितेऽर्थे धातुशब्दो वर्तिष्यत इत्यर्थः। 'धातुर्वै शब्दः' इत्युत्तरवचनमित्याह — **तत्रेति**। 'शब्दे कार्यस्य' इत्यादिचोदकस्य स्वाभिप्रायप्रकाशकं वचनमित्याह — **येनेति**। **एकग्रन्थ एवेति**। एकस्य चोदकस्यैव सर्वो ग्रन्थ इत्यर्थः। उत्तरवादिनापि धातुशब्दस्य धात्वर्थे वृत्तिरभ्युपगम्यत इति 'धातुर्वै शब्दः' इति तस्य वचनमसंगतमित्याशयः। ननु कोऽयमुत्तरपदलोपो नाम, सूत्र-कृतानन्वाख्यात इत्यत्राह — **गम्यमानार्थत्वादिति**। धात्वर्थकृतस्यार्थस्य धातुशब्देनाभेदारोपात् संग्रहे धातुरेवार्थो धात्वर्थ इति गौणे सामानाधिकरण्ये मयूरव्यंसकादित्वात् समासे सति कृतशब्दस्य गम्यमानार्थत्वाद्वस्तुतोऽप्रयोग एव लोप इत्युक्त इत्यर्थः। ननु धातुकृतोऽर्थः क्रियैव, न तु साधनमित्यत आह—**धातुशब्देनेति**। ननु क्रियाकृतत्वं साधनस्य नास्ति, साधनकृतत्वं तु क्रियाया इत्याशङ्क्य कर्मादि-व्यपदेशकरणमेव तत्कृतत्वं विवक्षितमित्याह — **क्रिययेति**। एवं तत्पुरुषसमासमाश्रित्य धात्वर्थ-शब्दस्य साधनाभिधायित्वमुपपाद्य समासान्तरेऽप्युक्तार्थलाभं दर्शयति — **बहुव्रीहीति**। एतदेवोप-पादयति — **धातुरिति**। 'धात्वर्थे' इति च प्रकृतिविशेषणम्, न प्रत्ययार्थनिर्देश इत्याह — **तस्मिन् वर्तमानादिति**। ननु सा[धनस्य] शक्तिरूपत्वेन क्रियावदसत्त्वभूतत्वात् कथं लिङ्गसंख्या-योगोपपत्तिरित्यत आह — **उपसर्गः क्रियाविशेष इति**। ननु क्रियाविशेषद्योतकाः प्रादयोऽवधृताः, नैषां द्रव्याभिधानसामर्थ्यं दृष्टमित्यत उक्तम् — **वृत्तिविषय इति**। वाक्येऽदृष्टानां विशेषाणां केषांचिद्वृत्तौ दर्शनादत्र विषये द्रव्याभिधानशक्तिरुपसर्गाणामुपपद्यत एवेत्यर्थः। नन्वेवमपि वतेः स्वरादिषु पाठात् सत्त्ववाचित्वेऽप्यव्ययसंज्ञा सं[भवतीत्यत आह — **अन्व[र्थेति]**। उ]क्तस्यार्थस्य भाष्येण संग्रहं दर्शयति — **साधनशब्देनेति**। शक्तिशक्तिमतोरभेदोपचारात्। ननु 'उद्वतः' इत्यस्य 'उद्गतानि' इति व्याख्यानमनुपपन्नमित्यत आह — **पुंस्त्वमत्रेति**। वनानामभिधेयत्वा-न्नपुंसकत्वप्र[सङ्ग इत्य]र्थः। अयं हि 'यदुद्वतः' इत्यस्यार्थः। **यत्** यदा **उद्वतः** उद्गतानि, ऊर्ध्व-देशावस्थितानि **निवतः** निगतानि, नीचदेशावस्थितानि च वनानि **बप्सत्** भक्षयन् **यासि** गच्छ-सीत्यग्निः स्तूयते। **वतीति**। भावलक्षणसप्तमी। [**प्राग्भवनादिति**।] यथापत्यादिष्वर्थे-षूत्सर्गप्रत्ययान् बाधित्वा नञ्स्नञौ स्त्रीपुंसाभ्यां भवतः, एवमत्रापि वतिं बाधित्वा तौ स्याता-

---

[1] 'उद्गतान्' इत्यस्योपलक्षणमिदम्, द्वितीया-बहुवचनान्तत्वात्। वनानीति विशेष्यस्या-भिप्रेतत्वात् 'उद्गतानि' इति व्याख्यातं भाष्ये। पदमञ्जर्यामिदं स्पष्टम्। साय-णीये भाष्ये तरुगुल्मादीन् इति विशेष्यं निर्दिश्य पुंलिङ्गतयैव विवृतम्।

[2] तन्निश्चीयत इति भावः — अ.

[3] प्रदीपे 'वतिप्रत्यये' इत्यत्र 'प्रत्यये' इत्ये-वान्नंभट्टपाठ इति प्रतीयते।

मित्यर्थः। उपसंख्याने सति नञ्[स्नञौ कुतो न स्याता]मित्यत्राह — **तेन चेति**। **स्त्री-पुंसाभ्यामितीति**। सामान्येन ज्ञापकं व्याख्यायत इत्यर्थः। उक्तं च —

[1]नञ्स्नञौ विहितौ येन स योगो नावगाहते।
वतिप्रकरणं तर्हि लिङ्गमेवं समर्थ्यते॥ इति।

निपातनानां बाधकत्वस्यान्यत्र स्थापितत्वाद्वत्यर्थे 'पौंस्नम्' इत्यादिप्र[योगो नास्तीत्यर्थः॥]

तस्य भावस्त्वतलौ ५.१.११९.

[४, ८१–८८]

(विवरणम्) पूर्वोक्तेति। 'स्त्रीपुंसाभ्यां त्वतलोरुपसंख्यानम्' इत्येतद्वचनव्यावृत्त्यर्थ इत्यर्थः। द्वैतीयीकलुगपवादस्यालुकश्चतुर्थषष्ठयोर्दर्शनान्नायं नियमः, यदुत्सर्गसमानदेशा अपवादा भवन्तीत्यत आह — **प्राग् भवनादिति**। नदीस्रोतोन्यायेनाधिकारे निश्चिते 'एतच्चैव न जानीमः' इत्ययुक्त-मित्यत आह — **विध्यधिकारेति**। [2]'सत्त्वे निविशतेऽपैति' इत्येतल्लक्षणलक्षितस्यैव ग्रहणमिति शङ्कां वारयति — **गुणशब्देनेति**। गुणे वर्तमानशुक्लादेर्जातावभिधेयायां वैशेषिकप्रसिद्धद्रव्यग्रहणे शुक्लत्वमिति भावप्रत्ययो न स्यात्, अत आह — **द्रव्येति**। गुणवृत्तित्वमुपपादयति — **गुण-गुिनोरिति**। **असत्यपीति**। पुरुषस्य चैतन्यमित्यादौ। **ये द्रव्यविनाशमिति**। वैशेषिका-दयः। **पूर्वेति**। कार्ये पूर्वद्रव्यविनाशमित्यर्थः॥

[४, ८१–८८]

(उद्द्योतनम्) वावचनस्यावश्यकत्वमाह — **अन्यथेति**। उपसंख्यानस्यानङ्गीकाराद्विकल्पार्ह-त्वासंभवादाह — **वाशब्द इति**। [3]द्वयोः प्रयोजनमाह — **एतेनेति**। 'न चैतौ' इत्येतद्व्याचष्टे — **नञ्स्नञोश्चेति**। [4]'ननूर्ध्वमात्वसंशब्दनात् नञ्स्नञोरप्यत्रानुवृत्तिः स्यात्, अत आह — **नञ्स्नञोरिति**। दूरस्थत्वादित्यर्थः। नन्वनुवृत्त्यसंभवात् कथमभ्यन्तरत्वम्, अत आह — **प्राग् भवनादिति**। प्राग् भवनाद्येऽर्थास्तेषु सर्वत्र नञ्स्नञोरुपस्थानमावश्यकमित्यर्थः। नन्वन्तर्भाव-स्योक्तत्वात् 'न जानीमः' इत्ययुक्तम्, अत आह — **विधीति**। भवनात् प्रागर्थेषु नञ्स्नञोः स्वस्थाने स्थितत्वाद्विधिः। स्वरितलिङ्गेन प्रतियोगमुपस्थानार्थोऽधिकारः। भवनात् प्रागर्थेषु नञ्स्नञौ प्रत्ययावुपतिष्ठेते इति परिभाषा। तत्रान्यतमरूपनिश्चयाभावादज्ञानोक्तिरित्यर्थः। नन्वन्यतमरूपाज्ञानेऽप्यभ्यन्तरत्वं स्यादेव, अत आह — **तत्रेति**। **तदा [5]नाभ्यन्तरत्वमिति**। स्व-स्थान एव विधिपरिभाषयोः सत्त्वादित्यर्थः। ननु विधियथोद्देशपरिभाषापक्षौ तत्र न संमताविति कथं तदाश्रयेण संदेहः, अत आह — **तथा चेति**। [6]'दित्यदित्यादित्य' सूत्रस्थमिदं वार्तिकम्। **न त्विति**। प्रतिसूत्रमुपस्थाने पूर्वत्वाभावात्। एवमज्ञानमुपपाद्य 'अपि च' इति भाष्यमुप-

---

[1] वाक्यपदीयम् ३.१४. ५९२.
[2] महाभाष्यम् ४.१.४४.
[3] ईश्वराज्ञाधर्मसूत्रकारपाठयोरित्यर्थः।
[4] ननूर्ध्वं मातृशब्देन लोपे नञ्स्नञोः — अ; ननूर्ध्वं मातृसंशब्देन लोपे नञ्स्नञोः — — ऋ, लृ.
[5] प्रदीपे 'नास्त्यनयोरभ्यन्तरत्वम्' इति दृश्यते।
[6] पा. सू. ४.१.८५.

पादयति — **कार्यकालेति**। कार्यकालपक्षेऽप्यर्थनिर्देशमात्र उपस्थानम्। तस्मिन्, सापवादप्रत्ययविधानानन्तरं वा, उभयथापि नान्तर्भूतत्वमित्याह — **तत्र यदीति**। ननु [1]'कर्मणि' इत्यत्रोपस्थानादभ्यन्तरत्वं स्यात्, अत आह — **गुणवचनेति**। **एतच्चेति**। विशेषविहिताभ्यां नञ्स्नञ्भ्यां त्वतलोर्बाधनिरासाय चकार इति तत्र वक्ष्यते। ननु 'भावः' इत्यनेन शब्दस्य प्रवृत्तिनिमित्तग्रहणेऽतिप्रसङ्गो नास्ति, अत आह — **अनाश्रितेति**। भावशब्दस्य नानार्थत्वात् प्रवृत्तिनिमित्तभेद आवश्यकः। तत्र प्रकृते प्रवृत्तिनिमित्तविशेषानुपादानादतिप्रसङ्ग इत्यर्थः। [2]'ये नो भावाः' इत्येतद्व्याचष्टे — **नित्यमेवेति**। भावार्थकभावशब्देन कथं भवन्तीत्यर्थो लभ्यते, अत आह — **भवन्तीति**। **भवतेश्चेति**। [3]'विभाषा ग्रहः' इत्यत्र वृत्ताविदं वचनम्। गुणशब्दो भेदकमात्रपरः, न रूपादिपर इत्याह — **गुणशब्देनेति**। गुणग्रहणस्य कृत्यमाह — **यस्य भावादिति**। **गुणग्रहणमिति**। यद्यपि पितापुत्रयोरपि परस्परभेदकत्वमस्ति, तथापि पराश्रयत्वाभावात् तेन व्यावृत्तिः। द्रव्यशब्दो विशेष्यपरः, न पृथिव्यादिनवकपर इत्याह — **द्रव्यशब्देनेति**। घटत्वमित्युक्ते रूपादेरपि प्रत्ययप्रसङ्गः, तस्मिन् सत्येव घटशब्दस्य घटे प्रवृत्तेः, अत आह — **शब्देन वाच्यस्येति**। **अवाच्यस्येति**। गवादिशब्दानां व्यक्तिवाचित्वपक्षेऽवाच्यस्यापि गोत्वादेः प्रवृत्तिनिमित्तत्वम्। सुखग्रहणाय भावप्रत्ययार्थं प्रपञ्चयति — **तत्रेति**। [4]'गुणिवृत्तित्वे हेतुः — **गुणगुणिनोरिति**। स्वरूपग्रहणमाह — **यो गोशब्द इति**। गुणगुणिनोरभेदोपचारवदिति भावः। शुक्लत्वमित्युक्ते शुक्लरूपप्रत्ययवद् गोत्वमित्युक्ते जातिरेव प्रतीयते, न तु गोशब्द इति कथं शब्दे भावप्रत्यय इति चेत्, अत्राहुः — केवलाकृतिवाचिभ्यो भावप्रत्यय एव नास्ति, प्रवृत्तिनिमित्ताभावात्। किं तु शुक्लादिशब्दवत् जातिव्यक्त्योरभेदोपचारेण जातिशब्दो यदा द्रव्ये वर्तते तदा जातौ भावप्रत्यय इत्यत्र तात्पर्यमिति॥

अन्ये तु संज्ञाशब्देष्विव जातिशब्देष्वपि शब्द एव प्रवृत्तिनिमित्तम्, लोके तु द्रव्यवाचिनामेव गवादिशब्दानां भावप्रत्ययान्तानां प्रयोग इति जातिप्रतीत्युपपत्तिरिति॥

द्रव्यवाचिभ्य इति। पाणिनेस्तूभयं मतमिति मतद्वयेऽप्युपपत्तिरुक्ता। द्रव्यपक्षेऽवाच्याया अपि जातेरेव प्रवृत्तिनिमित्तत्वम्, न त्वन्यस्येति तत्रैव भावप्रत्ययः। **केवलमिति**। स्वतन्त्रतया संबन्धिनिरपेक्षमित्यर्थः। तत्र प्रतीतिरपि तथेत्याह — [5]**तथा चेति**। **जातिमिति**। अनेकेषूपगवपत्येषु संस्थानविशेषव्यङ्ग्या काचिदसाधारणा जातिरस्ति। अन्ये तु [6]'गोत्रं च चरणैः सह' इत्यत्रापत्यमात्रं गोत्रशब्देन विवक्षितमित्यपत्यं जातिरित्याहुः। तत्रापत्यं तद्धितवाच्यमेवेति न तत्र भावप्रत्यय इति चिन्त्यम्। **अर्थान्तरेति**। मधुरायां जातो माधुरः। माधुरत्वमित्यादिरित्यर्थः। समासादिषु संबन्धाभिधाने वृद्धसंमतिमाह — **उक्तं चेति**। रूढिषु समासेऽपि भावप्रत्ययो जातावेव, न संबन्ध इत्युदाहरति — **रूढिशब्दा इति**। जातिवाचिनोः कृत्तद्धितयोरपि जातावेवेत्याह — **एवमिति**। अभिन्नरूपेषु संबन्धाभिधानमुदाहरति — **अभिन्नेति**। ननु शुक्लादिशब्दानां समासकृत्तद्धितेष्वनन्तर्भावात् कथं प्रत्युदाहरणत्वम्, अत आह — **मनुब्लुकीति**। गुण एव भवतीत्यत्र हेतुमाह — **गुणगुणिनोरिति**। **लोकनिरूढेन** लोकप्रसिद्धेन। **भेदसंबन्धस्य** भेदस्य तन्निबन्धनसंबन्धस्य चेत्यर्थः। **न्यग्भावात्** तिरोभावात्। तर्हि भेदसंबन्धयोरभावे मतुपोऽप्रसङ्गाल्लुग्विधानं व्यर्थम्, अत आह — **गुणवचनेभ्य इति**। उत्पन्नमतुपो लुङ् न

---

[1] पा. सू. ५.१.१२४.
[2] 'ते नो भावाः' इत्युचितं भाति।
[3] पा. सू. ३.१.१४३.
[4] गुणवृत्तित्वे — अ.
[5] तदा चेति — अ, ऋ, लृ.
[6] महाभाष्यम् ४.१.६३.

विधीयते। किं तु लुगुक्त्या मतुबनुत्पत्तिरेवोच्यत इत्यर्थः। लुगुक्तिमात्रेणेदं तद्धितान्तमित्युदाहृतमिति भावः। कृत्यप्यव्यभिचरितसंबन्धे संबन्धाभिधानमुदाहरति — **अव्यभिचरितेति**। **जातौ** सत्ताजातौ। संबन्धस्याव्यभिचारमाह — **न हीति**। विद्यमानोऽपि संबन्धः शब्दप्रवृत्तौ निमित्तं न भवतीत्यर्थः। राजपुरुषत्वादौ तु संबन्धापेक्षेत्याह — **राजेति**। सत्तेत्यत्र जातेरेव प्रत्ययार्थत्वमुदाहरति — **तस्मादिति**। द्वन्द्वे भावप्रत्ययार्थमाह — **धवेति**। इतरेतरयोगद्वन्द्वे सर्वत्र समस्यमानपदार्थसमुदाये भावप्रत्ययः। **संज्ञास्वरूप इति**। देवदत्त इत्युक्ते देवदत्तसंज्ञक इति प्रतीयते। तत्र संज्ञैव प्रवृत्तिनिमित्तम्। तत्रैव भावप्रत्ययः। केचित्तु संज्ञायाः स्वरूपं कुशब्दत्वम्। तस्य संज्ञिन्यारोपात् तस्मिन् भावप्रत्यय इत्याहुः। अत्र कुत्वमित्युक्ते कुशब्दः कुशब्दत्वं वा न प्रतीयत इति प्रतीत्यनुसारिमतान्तरमाह — **अन्ये त्विति**। **संबन्ध इति**। सप्तम्यन्तम्। एवं च 'कुत्वं कस्मात्' इति भाष्यस्य संबन्धापादनद्वारा संबन्धी कवर्ग एवापाद्यत इत्यर्थः संपद्यते। प्रकृते द्रव्यगुणनिरूपणस्य संगतिमाह — **प्रकृतीति**। ननु स्पर्शादीनामेव गुणत्वे घटत्वमित्यादि न स्यात्। रूपत्वमित्यपि न स्यात्, रूपस्य स्पर्शादित्वेन द्रव्यत्वाभावात्, अत आह — **एतच्चेति**। [1]**द्रव्यत्वेन** अभिमतत्वादित्यनुषङ्गः। उक्तार्थे भाष्यं संगमयति — **तत एतदुक्तमिति**। अभेदस्य प्रत्यक्षसिद्धत्वाद् भेदप्रमाणाक्षेपपरः प्रश्न इत्याह — **भेदावगतीति**। अनेन भेदप्रमाणं किमपि नोक्तम्, अत आह — **तात्त्विकेति**। लोके रूपादीनां पटादिगुणत्वव्यवहार एव भेदे प्रमाणमिति भावः। **असत्यगीति**। चन्द्रभेदव्यवहारवद् गुणगुणिभेदव्यवहारोऽप्रमाणमित्यर्थः। लोकव्यवहारस्याप्रामाण्ये हेतुमाह — [2]**न हीति**। अनुपलम्भे हेतुः — **रूपादीति**। रूपादिसमुदाय एव घट इत्यर्थः। 'पशोः' इति भाष्यं योग्यानुपलब्धिपरमित्याह — **उपलब्धीति**। **उपलब्धिः** प्रत्यक्षज्ञानम्, तदेव लक्षणं प्रमाणम्, तत्प्राप्तस्य, प्रत्यक्षोपलब्धियोग्यस्येति यावत्। शतत्वमविवक्षितमित्याह — **बहुषेति**। पर्णशतन्यासस्य प्रयोजनमाह — **एतेनेति**। भागानां व्यवधानाद् द्रव्यस्यानुपलब्धिरिति शङ्कां निरसितुमव्यवधानमनेनोक्तमित्यर्थः। अतिरिक्तस्याप्यवयविनो नाशादनुपलब्धिरिति शङ्कते — **नन्विति**। **एवं तर्हीति**। योग्यानुपलब्ध्या रूपादिव्यतिरिक्तावयव्यभावनिश्चयेन नाशकल्पनायां न मानमित्यर्थः। **सर्वदा** घटव्यवहारदशायामपि। ननु 'घटे शुक्लं रूपम्, रूपवान् घटः' इति गुणभिन्नद्रव्यस्य प्रत्यक्षत्वादनुमानानुधावनं व्यर्थम्, अत आह — **यद्यपीति**। **साक्षिस्थानीयं** प्रतिभूस्थानीयम्। ननु घटाद्यवयविसाधने तद्व्याप्तः कश्चिद्धेतुर्वक्तव्यः। 'ओषधिवनस्पतीनाम्' इत्यनेन किमुच्यते, अत आह — **प्रत्यक्षापलापिनमिति**। 'ओषधिवनस्पतिनः' इति कथं न भवति, अत आह — **भाष्यकारेति**। उपचयापचयौ द्रव्यधर्माविपि देशविशेषसंयोगेन तौ साध्येते। संयोगस्योपचयापचयव्याप्यत्वे दृष्टान्तमाह — [3]**कुड्यादीनामिति**। गत्याश्रयत्वेनापि द्रव्यत्वं साधयितुं गतिरनुमीयत इत्याह — **गतिपूर्विकामिति**। 'तद्यथा' इत्यनेन यथा वृद्धिह्रासगतीनामनुमानं तथा द्रव्यस्याप्यनुमानमित्युक्ते द्रव्यानुमानप्रश्नः — **कोऽसाविति**। तत्र पुंस्त्वं संगमयति — **अनुमीयत**

---

[1] हरयाणानिर्णयसागरमुद्रितयोः प्रदीपपुस्तकयोः 'द्रव्यत्वेनाभिमतत्वात्' इत्येव पाठो दृश्यते। चौखाम्बामुद्रिते 'द्रव्यत्वेन' इत्यन्तं वाक्यं दृश्यते। सोऽत्राभिमतः।

[2] प्रदीपे 'न च रूपादिव्यतिरेकेण' इत्यत्र 'न हि रूपादिव्यतिरेकेण' इत्यन्नंभट्टपाठ इति भाति।

[3] 'ओषध्यादीनामुपचयापचयपूर्वकः' इति हरयाणाचौखाम्बामुद्रितयोः प्रदीपपुस्तकयोर्दृश्यते। निर्णयसागरीये तु 'कुड्यादीनामुपचयापचयपूर्वकः' इति दृश्यते। अयमेव समुचितः पाठ इति प्रतीयते। उद्द्योते चेदं स्पष्टम्।

इति। पारिमाण्डल्यमिति। इदमियदितीयत्तापरिच्छेदहेतुर्गुणविशेषः पारिमाण्डल्यं परिमाणापरनामकम्। शास्त्रान्तरेऽजनकपरिमाणमणुत्वं पारिमाण्डल्यमुच्यते। तिर्यग्विस्तृतं वा पारिमाण्डल्यमभिमतम्। **उन्नामलक्षणमिति।** उत्कर्षेण नामः प्रह्वत्वम् **उन्नामः**, तद्रूपमित्यर्थः। **गुरुत्वभेदात्** गुरुत्वविशेषात्। नन्वेतावता द्रव्यसिद्धिः कथम्, अत आह — **गुरुत्वस्य चेति। खड्गादिरिति।** तथा च तैक्ष्ण्याद्याधारत्वेन रूपादिव्यतिरिक्तद्रव्यसिद्धिः। एतेनातिरिक्तद्रव्ये प्रत्यभिज्ञा प्रमाणमित्युक्तमित्याह — **यदीति।** पिठरपाकपक्षे प्रत्यभिज्ञाया द्रव्यैक्यविषयत्वमाह — **एतच्चेति।** पीलुपाकमते प्रत्यभिज्ञा जातिविषयेत्याह — **ये त्विति।** तर्हि द्रव्यसिद्धिः कथम्, अत आह — **जातेश्चेति।** [1]**अर्थान्विते**ति। द्रव्यपदनिर्वचने गुणाश्रय एव द्रव्यशब्दार्थः। अनेन कथं गुणाश्रयत्वलाभः, अत आह — **संद्रूयत इति। घञ्** कर्मणीत्यादिः। यद्यपि संद्रावशब्दस्य गुणाश्रयोऽर्थः, न द्रव्यशब्दस्य, तथापि [2]'अचो यत्' इति [3]कर्मणि यति तदर्थलाभ इति भावः॥

[४, ८१–८८]

(नारायणीयम्) उपसंख्यानात् त्वतलौ भवतः [4]'स्त्रीपुंसाभ्याम्' इति सूत्रेण नञ्स्नञावपीति किं वावचनेनेत्यत आह — **अन्यथेति। पूर्वोक्तवचनव्यावृत्त्यर्थ इति।** अनेकार्थत्वान्निपातानाम्, न तु पूर्वोक्तापेक्षया विकल्पा[र्थ]ः, पूर्वोत्तरपक्षयोः समत्वाभावात्। **वावचनं न कर्तव्यमिति।** 'स्त्रीपुंसाभ्यां त्वतलोः' इति 'वा' इति च न कर्तव्यमिति वाशब्दार्थ इत्यर्थः। यद्यत्रापवादशब्देन नञ्स्नञावुच्येयातां तदा प्रतिज्ञैव हेतुः स्यात्। तस्मादिमनिजादय एव तेनोच्यन्ते। तैश्च समावेशो निदर्शनद्व[रा]हे[तुरित्याह] — **यथा प्रकृतिविशेषादिति।** 'नैवेश्वरः' इत्यादेर्निषेधस्य प्रकृतेऽसंगतिमाशङ्क्याह — **ईश्वरभयादिति।** वधबन्धनादिभयात् स्वामिना नियुक्तमन्याय्यमप्यनुष्ठीयत एव, तदत्र नास्तीत्यर्थः। **तेषामिति।** मन्वादीनाम्। नन्वस्मादेव यत्नान्नञ्स्नञोरपि समावेशोऽस्त्वित्यत्राह — **नञ्स्नञोश्चेति। प्राग् भवनादिति।** भवनसंशब्दनात् प्रागित ऊर्ध्वं स्त्रीपुंसाभ्यां नञ्स्नञाविति यधिकृतं वेदितव्यमित्यर्थाश्रयणात्। अवधिनिर्देशस्तु [5]'कृत्याः' [6]'प्राङ्ण्वुलः' इत्यादिवत् प्रतिपत्तिलाघवार्थः स्यादिति भावः। 'त्वतलपवादैरिमनिजादिभिः समानदेशौ नञ्स्नञौ' इत्यनेन 'अपवादसदेशा अप्यपवादा भवन्ति' इति भाष्यं व्याख्यातम्। अधिकृता अपवादा अपि ण्यादयः प्रत्यर्थं निर्दिष्टैरपवादैः समानदेशा इति भाष्यार्थः। **प्रतिसूत्रं प्रत्यर्थं चेति।** अधिकारपक्षे प्रतिसूत्रमुपस्थानं, कार्यकालपरिभाषापक्षे प्रत्यर्थम्। परिभाषापक्षे ह्ययमर्थः — प्राग् भवनाद्येऽर्थास्तेषु स्त्रीपुंसाभ्यां नञ्स्नञौ भवत इत्येवं वेदितव्यमिति। प्राग्भवनीयार्थलिङ्गेयं परिभाषावतिष्ठते। विधिपक्षे यथोद्देशपरिभाषापक्षे च [7]'स्त्रीपुंसाभ्यां नञ्स्नञौ' इत्यत्रैव प्रकरणे नञ्स्नञोः संनिधिः, न त्विमनिजादौ सिध्यतीति समावेशासिद्धिरित्याशयेन 'एतच्चैव न विजानीमः' [8]'इत्युक्तमित्याह — **यदा त्विति।** कथं पुनर्ज्ञायते विधिपक्षः परिभाषापक्षश्च तत्राश्रित इति, तत्राह — **तथा चेति।** कं पक्षमाश्रित्य 'अपि च'

---

[1] प्रदीपे 'अर्थान्विताद् द्रव्यव्यपदेशादेव' इत्यत्र अर्थान्वितद्रव्यव्यपदेशादेव' इत्यन्नंभट्टपाठ इति भाति।

[2] पा. सू. ३.१.९७.

[3] द्रुधातोः कर्मणि यत्प्रत्यये द्रव्यशब्द इत्यर्थः।

[4] पा. सू. ४.१.८७.

[5] पा. सू. ३.१.९५.

[6] का. वा. ३.१.९५–१.

[7] पा. सू. ४.१.८७.

[8] इत्युक्तमित्यत्राह — घ.

इत्याद्यभ्युच्चयोक्तिरित्यत्राह — **कार्यकालेति**। **अथ तूत्सर्गेति**। साधकबाधकचिन्तोत्तरकालमुपस्थानस्यानुपस्थानस्य वा न्याय्यत्वात्। ननु [१]'गुणवचनब्राह्मणादिभ्यः' इत्यत्र कर्मणीत्यर्थनिर्देशात् नञ्स्नञोरुपस्थानादभ्यन्तरत्वं स्यादित्याशङ्क्याह — **गुणवचनेति**। **तस्येति**। णप्रत्ययान्तो भावशब्दोऽभिप्रायवाची भाष्ये दर्शितः। अस्ति च शब्दार्थमात्रवाची — यथा, विचित्रा हि भावशक्तिरिति। अस्ति च नाट्यशास्त्रप्रसिद्धेषु स्थायिसंचारादिषु। घञन्तं तु भावे कर्तृवर्जिते च कारके वर्तते। भवतिश्चानेकार्थः। [२]'तत्र भवः' [इति सत्तार्थः]। [३]'धान्यानां भवने' इत्युत्पत्त्यर्थः। [४]'भूतिकामः' इति समृद्ध्यर्थः। [५]'इत्थंभूत' इति प्राप्त्यर्थः। विशेषानुपादानेऽस्य सर्वस्य ग्रहणं न्याय्यमिति वार्तिकाशय इत्यर्थः। **भवन्तीत्यर्थ इति**। द्वितीयभावशब्दार्थ इत्यर्थः। एतदेवोपपादयति — **भवन्तीति भावा इति**। भाष्ये 'पुत्राः पुत्रैश्चेष्टन्ते' इत्यभिप्रायप्राप्तिरेव दर्शिता। एवं यथान्यासेऽतिप्रसङ्गमुद्भाव्य न्यासान्तराश्रयेण वाक्यकृता परिहृतम् 'यस्य गुणस्य भावात्' इति। तत्र गुणशब्देन न वैशेषिकादितन्त्रसिद्धा रूपरसादयो गृह्यन्ते, नापि लोकप्रसिद्धाः शुक्लादयः, किं तर्हि,

[६]'संसर्गिभेदकं यद्यत् सव्यापारं प्रतीयते। गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम्' इति लक्षणलक्षितं भेदकमात्रम्। तेन यद्यदवच्छेदकत्वेन परतन्त्रं विवक्ष्यते तस्य सर्वस्य जात्यादेरपि गुणत्वसिद्धिरित्याह — **गुणशब्देन यावानिति**। लक्षणे गुणग्रहणस्योपयोगं दर्शयन् व्यवच्छेद्यमाह — **यस्य भावादिति**। द्रव्यशब्देनापि [७]'वस्तूपलक्षणं यत्र' इति लक्षितमिदंतदादिसर्वनामप्रत्यवमर्शयोग्यं विशेष्यत्वेन विवक्षितं गृह्यते, न तु गुणानामाश्रयो द्रव्यमिति तन्त्रान्तरलक्षितमित्याह — **द्रव्यशब्देनेति**। **शब्देन वाच्यस्येति**। जात्यादेर्वाच्यत्वम्, संबन्धादेरवाच्यत्वम्। सर्वशब्देभ्यो गुणे भावप्रत्ययप्रवृत्तिं विविच्य प्रदर्शयति — **तत्रेति**। **गुणमात्रवृत्तय इति**। न तु कदाचिद् गुणिनि वर्तन्ते, शब्दशक्तिस्वाभाव्यात्। [८]**'गुणसमवायिनि सामान्यविशेष इति**। गुणेष्वालम्बनभेदभिन्नेष्वभिन्नाकारप्रख्योपाख्योत्पादात् जातिविशेषसद्भावावसायः। गुणवचनानां सतां गुणिवृत्तित्वे हेतुः — **गुणगुणिनोरिति**। भेदविवक्षायां तद्धितोत्पत्तौ [९]'गुणवचनेभ्यो मतुपः' इति लुग्विधानाद् गुणिवृत्तित्वमित्याह — **मतुब्लोपाद्धेति**। **परिमाणे गुण इति**। परिमाणस्य गुणत्वं तन्त्रान्तरेऽप्युक्तम्। **भिन्नवर्गव्यक्तिसमवेते सामान्यविशेष इति**। शुकशारिकादिवक्तृभेदनिरूप्यमाणभेदासु षकारादिव्यक्तिषु यः समवेतः सामान्यविशेषस्तस्मिन्नित्यर्थः। उक्तं च —

'शुकादिवक्तृभेदाच्च स्पष्टभेदनिरूपणः।
कथमेकः परोपाधि .....॥ [इति]॥

[**शब्दस्वरू**]**प इति**। संज्ञिष्वध्यस्ते संज्ञास्वरूप इत्यर्थः। तस्य प्रवृत्तिनिमित्तत्वमुपपादयति — **तथा हीति**। संबन्धव्युत्पत्तिकाले गौरयमर्थ इत्यर्थजात्या शब्दजातेः सामानाधिकरण्यान्यथानुपपत्त्याभेदाध्यारोपः कल्प्य[मानः प्रवृत्ति]कारणमित्यर्थः। स्वरूपेण हि परमुपरञ्जयद्विशेषणम्,

---

[१] पा. सू. ५.१.१२४.
[२] पा. सू. ४.३.५३.
[३] पा. सू. ५.२.१.
[४] तै. सं. २.१.१.
[५] पा. सू. २.३.२१.
[६] वाक्यपदीयम् ३.५.१.
[७] वाक्यपदीयम् ३.४.३.
[८] प्रदीपे 'गुणसमवायिनि सामान्ये' इत्यत्र 'गुणसमवायिनि सामान्यविशेषे' इति पाठोऽभिमतः।
[९] का. वा. ५.२-९४ — ३.

यथा जात्यादिः, तथा स्वरूपावेशेनार्थं प्रत्याययत; शब्द[स्य स्वरूप]मुपरञ्जकत्वाद् गुणः प्रवृत्ति-निमित्तमिति तत्र भावप्रत्ययः। तथा चोक्तम् —

[1]स्वा जातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते।
ततोऽर्थंजातिरूपेषु तद्ध्यारोपकल्पना॥ इत्यादि।

यदा तु जातिशब्दा जातिं निमित्तीकृत्य द्रव्येषु प्रयुज्यन्ते तदा जातौ भावप्र[त्यय इत्याह] — **द्रव्यवाचिभ्यस्त्विति**। **यद्यपि केवलमिति**। यथा जातिगुणशब्दा जातिगुणौ द्वा[रीकृत्य द्रव्य-मभिदधति तथेत्यर्थः]। **संबन्धं प्रवृत्तिनिमित्तमिति**। अनभिधीयमानमपि संबन्धं प्रवृत्तिनिमित्त-त्वेनोपादाय संबन्धिनि प्रयुज्यन्त इत्यर्थः। कथं पुनर्ज्ञायते संबन्ध एव प्रवृत्तिनिमित्तमिति, तत्राह —**तथा चेति**। **अप[त्यप्रत्ययान्तादिति]**। [2]'गोत्रं च चर]णैः सह' इति परिभाषितत्वात्। **अर्थान्तरवृत्तिरिति**। काषायत्वं वस्त्रस्येत्यादिः। **गौरखरेति**। गौरश्चासौ खरश्चेति व्युत्पा-दितस्यापि गौरखरशब्दस्य जातिविशेषः प्रवृत्तिनिमित्तम्, न तु संबन्धः, एवं पर्वणि पर्वणि सप्त पर्णानि यस्येत्यादिव्युत्पत्तिसिद्धसप्तपर्णादिषु ज्ञेयम्। **एवं कुम्भकारत्वं हस्तित्वमिति**। कृत्तद्धितयोरपि समासवद् द्रष्टव्यमित्यर्थः। कुम्भं कुर्वन्नपि ब्राह्मणादिः कुम्भकारशब्देन नोच्यते, अकुवर्त्यपि तज्जातीये वर्तते चायं शब्द इति जातिविशेषवृत्तित्वावसायः। एवं हस्तिशब्देन हस्तवान्नाभि-धीयते पुरुषादिः। अत एव [3]'हस्ताज्जातौ' इति जातिग्रहणम्। **गुणगुणिनोर्जातितद्वतोरिवेति**। यथा जात्या विना व्यक्तेः प्रतीतिरेव न भवतीति सोऽयमित्यभेदारोपादेव तस्याः शब्देनाभिधान-मिति जातिरेव प्रवृत्तिनिमित्तं गवादिशब्दानां द्रव्याभिधाने, एवं शुक्लादेरपि गुणिनि वृत्तौ गुण एव प्रवृत्तिनिमित्तमिति तत्रैव भावप्रत्यय इत्यर्थः। किमर्थं तर्हि मत्वर्थीयमुत्पाद्य तस्य लुग् विधीयत इत्यत्राह — **गुणवचनेभ्य इति**। **लुग्विधानद्वारेणेति**। सर्वत्रैव हि लोपलुगादिशासनद्वारे-णार्थाभावात् स्वाभाविकः शब्दस्याप्रयोगः ख्याप्यते, न त्वर्थाभिधानाय प्रयुज्यमानानां शब्दानां वचनशतेनापि निवृत्तिः शक्या कर्तुमिति भावः। **सतासंबन्धानपेक्षणादिति**। अव्यभिचरितस्या-नवच्छेदकत्वात्। यत्र तु व्यभिचारस्तत्र संबन्धस्य प्रवृत्तिनिमित्तत्वात् तत्रैव भावप्रत्यय इत्याह — **राजपुरुषयोस्त्विति**। **तदपेक्ष इति**। राजसंबन्ध्ययं पुरुषः, नान्यसंबन्धीत्यवच्छेदोपपत्तेः। **तस्मात् सत्स्विति**। न त्वसत्सु शशविषाणादिषु। **सतैवेति**। परं सामान्यमित्यर्थः। **जातिसमुदाय इति**। न तु संबन्धे, द्वन्द्वे गुणप्रधानभावा [भावेन तद] योगात्। **संज्ञास्वरूपे संज्ञिष्वध्यस्त इति**। [4]'अणुदित् सवर्णस्य' इत्यनेन कवर्गेषु कुरूपं व्याक्रियत इति स्वरूपस्य प्रवृत्तिनिमित्तत्वात् तत्र प्रत्यय इत्यर्थः। **अन्ये तु** भेदवादिनः। उक्तं च —

जातिगुणाज्जातिगुणे समासकृत्तद्धिताच्च संबन्धे।
डित्थादेः स्वे रूपे धवखदिराज्जातिसंघाते॥ इति।

द्रव्यगुणादिस्वरूपस्यान्यत्र निर्णीतत्वादिह तत्प्रश्नस्यानुपयोगमाशङ्क्योपयोगमाह — **प्रकृतीति**। ननु वैशेषिकादितन्त्रलक्षिताः शब्दादय एवात्र गुणत्वेन न गृह्यन्त इत्युक्तमित्यत्राह — **एत-च्चेति**। तस्माद् दृष्टान्तत्वेन शब्दादीनामुपादानं भाष्य इत्याह — **तत एतदुक्तमिति**। ननु स्वरूपकथनेनैव भेदस्यापि प्रतिपादितत्वात् प्रश्नोऽनर्थक इत्यत आह — **भेदावगतीति**। प्रमाण-सिद्धस्यैव सत्त्वं निश्चेतुं शक्यत इति प्रमाणप्रश्नोऽनेन क्रियत इत्यर्थः। ननूत्तरे भेदसिद्धौ किं

---

[1] वाक्यपदीयम् ३.१.६.
[2] महाभाष्यम् ४.१.६३.
[3] पा. सू. ५.२.१३३.
[4] पा. सू. १.१.६९.

प्रमाणमुक्तमित्यत्राह — **तात्त्विकेति** । **आचार्येणेति**। वार्तिककृता। **असत्यपि भेद इति**। 'राहोः शिरः, शिलापुत्रकस्य शरीरम' इत्यादौ काल्पनिको भेदव्यवहारो लोके दृष्ट इति न ततो वास्तवभेदनिश्चय इत्यर्थः। ननु भेदावगतौ प्रत्यक्षं प्रमाणमस्त्वित्यत्राह — **न चेति**। एतदेव समर्थयितुं 'पशोः खल्वपि' इत्याद्युक्तं भाष्य इत्याह — **उपलब्धिलक्षणप्राप्तस्येति**। उपलब्धेर्लक्षणं निमित्तमव्यवधानादि, तत्प्राप्तस्य, उपलब्धियोग्यस्येत्यर्थः। अतो योग्यत्वे सत्यनुपलब्धेरभावो निश्चीयत इत्यर्थः। पर्णशतन्यस्तत्वकथनस्योहोपयोगं न पश्याम इत्यत्राह — **बहुधा विभक्तस्येति**। ननु बहुधा विभागोऽवयविद्रव्यस्यानुपलब्धेः कारणम्, न तूपलब्धेरिति चोदयति — **नन्विति**। 'संयोगविरोधी विभागः' इति विभागलक्षणम्। तत्रावयविद्रव्यस्योत्पत्तावसमवायिकारणस्यावयवसंयोगस्य तद्विभागे सति निवृत्तावयविद्रव्यस्य प्रहाणादप्रतीतिर्भवेदित्यर्थः। परिहरति — **एवं तर्हीति**। अयमर्थः — येन ह्यवयविद्रव्यस्य सत्त्वमङ्गीक्रियते स एवैवं पृच्छचेत। यस्तु रूपादि[व्यतिरिक्तानुपलम्भा]दसत्त्वमेव तस्य प्रतिजानीते तस्य विभाग उपलब्धेरेव हेतुः, व्यवधानापगमस्योपलब्धिकारणस्य भावादित्युपलब्धियोग्यत्वेऽप्यनुपलम्भादसत्त्वनिश्चय एव युक्ततर इति। ननु [प्रत्यक्षे विप्रतिपन्नं प्रत्यनुमा]नोपन्यासो न संगत इति चोद्यमनूद्य परिहरति — **यद्यपीति**। **व्यतिरिक्तद्रव्यवादिभिः** वैशेषिकादिभिः। प्रत्यक्षप्रमाणग्राह्यत्वमुपपादयति — **रूपाद्यालम्बनेति**। इदं रूपम्, अयं रस इति यद्रूपादिविष[यकं प्रत्यक्षं तद्विलक्षणो रूपवान् रसवान्] इति घटादिविषयः प्रत्यय उत्पद्यते। अतो रूपादिव्यतिरिक्तघटादिद्रव्यसद्भावसिद्धिः। वि[लक्षण]त्वोपगमस्य संविदधीनत्वादित्यर्थः। **साक्षिस्थानीयेति**। साक्षिसदृशम्, यथा व्यवहारेष्वर्थतत्त्वप्रकाशनेन साक्षी विप्र[तिपत्तिमपाकरोति तथेत्यर्थः। अनुमानं] पुनर्द्विविधम् — दृष्टं सामान्यतोदृष्टमिति। तत्र दृष्टं यथा — धूमोऽग्नेः, धूमाग्न्योर्व्याप्यव्यापकयोः संबन्धं प्रत्यक्षेण महानसादावुपलभ्य पर्वतादौ [वह्नि]व्याप्यमात्रदर्शनाद्व्यापको वह्निरनुमीयत इति दृष्टविषयत्वाद् [दृष्टमित्युच्यते। सामान्यतो]दृष्टं रूपादिज्ञानं चक्षुरादेः। अत्र चक्षुरादेः क्वचिदपि प्रत्यक्षविषयत्वं नास्ति, तथापि कार्यं [1]कारणपूर्वकं दृष्टमिति सामान्यव्याप्तिबलात् प्रव[र्तमा]नत्वात् सामान्यतोदृष्टमित्युच्यते। तत्राद्यस्येहासंभवाद् द्वितीयोपन्यासो ग्राह्य इत्या[शयः।] **प्रत्यक्षापलापिनमिति**। वनस्पत्यादेर्नामुपचयापचयानुमानस्य सामान्यतोदृष्टत्वमुपपादयति — **कुड्यादीनामिति**। **गतिपूर्विकामिति**। अश्वादीनां गतेः प्रत्यक्षेण प्रतीताया देशान्तरप्राप्तिकारणत्वमुपलब्धम्। ततश्चादित्यादीनां देशान्तरप्राप्तिदर्शनाद् गतिरनुमीयत इत्यर्थः। कर्मणः प्रत्यक्षत्वं न्यायविद्भिरभ्युपगतम्। वैयाकरणमतेऽपि धातुवाच्यस्य समूहस्यैवाप्रत्यक्षत्वं, न तु प्रत्येकं क्षणानाम्। ननु प्रमाणविशेषवचनस्यानुमानशब्दस्य नपुंसकलिङ्गत्वदर्शनात् कथं भाष्ये पुँल्लिङ्गप्रयोग इत्यत्राह — **अनुमीयत इति**। पारिमाण्डल्यं परिमण्डलत्वम्। **नामोन्नामलक्षणं गुरुत्वभेदादिति**। नामोन्नामयोः पतनादिसूचकत्वात् पतनासमवायिकारणत्वाद् गुरुत्वस्य तयोस्तद्धेतुत्वम्। **गुरुत्वस्य च समवायिकारणं द्रव्यमिति**। गुणानां समवायिकारणं द्रव्यमिति हि द्रव्यलक्षणम्। गुरुत्वं नाम गुणो भूमिजलयोः समवैतीति पदार्थविदः। **खड्गादिरिति**। खड्गादीनां छेदनसामर्थ्यमपि गुरुत्वादिकृतम्। । **एकाकारेति**। गुणान्तरप्रादुर्भावेऽपि तदेवेदमित्येकाकारा बुद्धिरुपजायते। तेन गुणेभ्यो व्यतिरिक्तं द्रव्यमस्तीति गम्यते, गुणानां भिन्नत्वादेकाकारबुद्धिविषयत्वायोगात्। एतदेव विशदयति — **यदि रूपादीति**। **ये द्रव्यविनाशं नेच्छन्तीति**। ये पिठरपाकप्रक्रियामभ्युपगच्छन्ति ते स्थिरेऽप्याश्रये वह्निसंयोगात् पूर्वरूपनाशं संयोगान्तराच्च

---

[1] करणपूर्वकं — घ.

तत्रैव गुणोत्पत्तिं वर्णयन्ति। [तन्मते] गुणान्तरप्रादुर्भावेऽपि द्रव्यस्यैकत्वाद् द्रव्यप्रत्यभिज्ञोपपत्तिः। **ये त्विति**। ये पीलुपाकप्रक्रियावादिनस्ते द्रव्ये पाकजगुणोत्पत्तिप्रकारमेवमाहुः — कारणगुण-प्रक्रमेण कार्ये गुणो[त्पत्तिरिति] न्यायः। आमस्य द्रव्यस्य श्यामत्वस्यारब्धत्वात् तस्यैव पाकजा रक्तिमादय उत्पद्यन्त इत्ययुक्तमित्यामद्रव्यस्याग्निसंयोगे तदभिघातान्नोदनाद्वा तदारम्भकेषु परमाणुषु कर्मोत्पत्तौ तेषां विभागेन संयोगनिवृत्तौ कार्यद्रव्यं विनश्यति। तेषु परमाणुषु चौष्ण्यापादकाद् दहनसंबन्धाच्छ्यामताविनाशे सत्यन्यस्मादग्निसंयोगात् पाकजा रक्ततादयो जायन्ते। ततोऽदृष्टवदात्मसंयोगात् तेषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद् द्व्यणुकादिक्रमेणोत्पन्ने कार्ये कारणगुणप्रक्रमेण रक्ततादिगुणोत्पत्तिरिति। नन्वस्मिन् मते गुणान्तरप्रादुर्भावे द्रव्यस्यान्य-त्वात् प्रत्यभिज्ञाविषयत्वायोगाद् भाष्यमनुपपन्नमित्यत आह — [1]**तन्मत इति**। नन्वेवं सति द्रव्यसद्भावे प्रमाणं नोक्तं स्यादित्यसंगतमेतदित्याशङ्क्याह — **जातेश्चेति**। **समीति**। 'अक-र्तरि च कारके' इत्यनुवर्तनात् कर्मणि घञ्। फलितमाह — **गुणानामिति**। तथा च पदार्थ-विद्भिर्द्रव्यलक्षणमुक्तम् — क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणमिति॥

[४, ८८–९५]

(विवरणम्) ननु 'द्विगुणा रज्जुः' इत्यत्र न किंचित् षष्ठीसमर्थं दृश्यते, अतः कथं प्रत्यय-प्राप्तिरित्यत आह — **विषयेति**। **संबन्धेति**। साक्षादिति शेषः॥

[४, ८८–९५]

(उद्द्योतनम्) यस्य गुणस्येति। 'तस्य भावः' इत्युक्ते भावव्याख्यानार्थं यस्य गुणस्येत्यपेक्ष-णाद् गुरुसूत्रं स्यादित्यर्थः। यद्वा यथाश्रुतसूत्रस्यागमकत्वात् 'यस्य गुणस्य' इत्यादि सूत्रं कर्तव्यमिति न्यासान्तरे वार्तिककारस्याभिप्रायः। **विषयेति**। अवयवेऽपि गुणशब्दप्रयोगोऽस्तीति प्रदर्शन-मित्यर्थः। तर्हि क्वातिप्रसङ्गः, अत आह — **रज्जुशब्दादिति**। **इत्याह** इत्यत आह। पाठा-न्तरमाह — **क्वचित्त्विति**। [2]**प्रसङ्गः** अतिप्रसङ्गः। विशिष्टमेवाह — **शब्देति**। सर्वत्रशब्दार्थ-माह — **पूर्वोक्तेति**। पदादित्रयमध्ययनविषयतयाध्ययनावयवः। चर्चाशब्देन विच्छिन्नानि पदा-न्युच्यन्ते। तान्येव गुणा अध्ययनावयवा इत्यभिप्रेत्याह — **पदविच्छेदगुणा इति**। भाष्ये गुण-शब्दः सर्वोऽप्यवयववाची। **पदक्रमेति**। एकवेदसंबन्धीत्यादिः। [3]अनेकशाखासंबन्धिपदसंहिता-ध्यायिनोऽपि द्विगुणाध्यायित्वमस्ति, अत आह — **वेदान्तरेति**। [4]**अध्ययनभेदादिति**। [5]'स्वाध्या-योऽध्येतव्यः' इत्यत्र स्वाध्यायशब्दस्य शाखावाचित्वात् शाखाभेदेऽध्ययनभेद इति भावः। ननु पदाध्ययने पदस्यैकावृत्तिः, क्रमे तु द्विरावृत्तिरिति कथं तयोः साम्यम्, अत आह — **यद्यपीति**। **युक्तित इति**। संहिताध्ययनं क्रमाध्ययनमिति व्यपदेशतौल्यादवयवत्वं समानमित्यर्थः। पूर्वोक्त-

---

[1] प्रदीपे 'तन्मतेन' इत्यत्र 'तन्मते' इति पाठो-ऽभिमतः।

[2] प्रदीपे 'इत्यस्मिन् न्यासे प्रसङ्गो न भवति' इत्यन्नंभट्टपाठ इति प्रतीयते। दृश्यमानेषु प्रदीपपुस्तकेषु तु 'इत्यस्मिन् न्यासेऽतिप्रसङ्गो न भवति' इत्येवोपलभ्यते।

[3] एकशाखासंबन्धि — अ, ऋ, लृ.

[4] प्रदीपे 'अध्ययनक्रमभेदात्' इत्यत्र 'अध्ययन-भेदात्' इत्यन्नंभट्टपाठ इति भाति।

[5] तै. आ. २.१५.

विषय इत्युक्तमुपपादयति — **गुणवानिति**। युक्तिमेवाह — **गवादीनामिति**। एकस्मिन्नवयविनि मेलनादवयवत्वोपचार इत्यर्थः। **सदृशेति**। सदृशत्वेनात्मनो निर्देशः। तत्राप्यौपचारिकमवयवत्वमित्यर्थः। **गुणवानिति**। गुणसमुदायो ब्राह्मणशब्दार्थ इत्युक्तम्। नन्वाचारस्यावयवत्वं कथम्, अत आह — **युक्तित इति**। अवयविन एकदेशोऽवयवः। समुदायैकदेशोऽप्येकदेशत्वसाम्यादुपचारादवयव उपचर्यत इत्यर्थः। **साम्यम्** अवयवेन। **एवं** 'गुणवदन्नम्' इत्यत्रापि संस्कारेऽन्नावयवत्वोपचार इति भावः। औपचारिकावयवत्वस्य संभवात् प्रश्नायोगः, अत आह — **यथेति**। **अर्थेति**। अर्थक्रियायोग्यत्वरूपमवयवसाम्यमत्राप्यस्तीत्यर्थः। 'यदि तावत्' इत्यस्य प्रकृतोपयोगमाह — **युक्तित इति**। **साम्याभावे** साम्यानङ्गीकारे। परिमाणत एव साम्याङ्गीकार इति यावत्। यावता लवणेन भक्षणयोग्यता तावत एव प्रक्षेपेऽदनीयं भवति, गुणवच्च भवति। प्रस्थप्रक्षेपे त्वन्नमपि न भवति, गुणवच्च न भवतीत्यर्थक्रियायोग्यत्वेनैव साम्यं वक्तव्यम्, न तु परिमाणत इत्यर्थः। भाष्ये 'अदेरन्नम्' इत्यत्र [1]"रदाभ्याम्' इति निष्ठातस्य नः, 'अनितेरन्नम्' इत्यत्र पृषोदरादित्वान्न इति ज्ञेयम्। 'द्विगुणा रज्जुः' इत्यादि 'प्राण्यात्' इत्यन्तस्य [2]तात्पर्यमुपसंहरति — **तदेवमिति**। **अत्रापि** 'यस्य गुणस्य भावात्' इति न्यासेऽपि। शुक्लशब्दो गुणमात्रवचन इति मत्वा शङ्कत्युपपादयति — **पटस्येति**। **व्यतिरेकः** भेदः। पटस्य शुक्लत्वमित्युक्ते शुक्लगुण एव प्रतीयत इत्यर्थः। तर्हि शुक्लत्वमिति न भवत्येव, अर्थान्तरे तु भवतीत्याह — **गुणसमवायिनीति**। रूपत्वावान्तरशुक्लत्वसामान्य इत्यर्थः। तर्हि तथैवास्तु, अत आह — **किं त्विति**। शुक्लत्वमित्युक्ते शुक्लगुणप्रतीतिर्जायते, सा न स्यादित्यर्थः। वर्तिशब्देन प्रत्ययार्थ उच्यत इत्याह — **वर्तनमिति**। प्रत्ययस्येत्यर्थः। वृक्षादिशब्दानामपि शुक्लादिसाम्यमाह — **तेऽपीति**। **जाताविति**। प्रकृत्यर्थत्वादित्यर्थः। द्रव्यसामान्यवाचित्वशङ्कां निराह — **विशिष्टेति**। वृक्षत्वं न गुणः, अत आह — **जातिलक्षणमिति**। यत इत्यस्य प्रकृतिपरत्वशङ्कां निराह — **यस्मादिति**। वृक्षादिष्वपि मतुब्लोपादेव द्रव्यवाचित्वं किं न स्यात्, अत आह — **वृक्षादय इति**। शुक्लादिवैषम्याह — **न हीति**। **व्यतिरेकः** भेदः। तत्र प्रवृत्तिनिमित्ताभावमाह — **डित्थादय इति**। अनेन किं प्रवृत्तिनिमित्तमुक्तम्, अत आह — [3]**डित्थसहचरितेति**। **विनयादिष्विति**। [4]"विनयादिभ्यष्ठग् वाच्यः' इति स्वार्थे ठक्। विनय एव वैनयिकः। कथंचिच्छब्दार्थमाह — **शब्दस्वरूपमिति**। 'एवं वृत्तिः' इत्येतद्व्याचष्टे — **तथैवेति**। जातेः प्रवृत्तिनिमित्तत्वमत्रापि संभवतीत्याह — **अन्ये त्विति**। परिमाणभेदेन द्रव्यभेदवाचिनां मतमेतत्। इदं तु न सार्वत्रिकम्, यस्तु कौमार एव मृतस्तत्र जातेरभावात् डित्थत्वमिति प्रयोगः पूर्वरीत्यैव समर्थनीयः। यस्य गुणस्येति न्यासापेक्षयास्य न्यासस्य भेदमाह — **पूर्वत्रेति**। द्रव्याभिधायिभ्यो डित्थादिभ्यः शब्दस्वरूपे, शुक्लादिभ्यो गुणे, गवादिभ्यः सामान्ये भावप्रत्यय इत्यर्थः। **इह तु शब्दाभिधायिभ्य इति**। पूर्वं जात्यादिवाचकेभ्यो भावे प्रवृत्तिनिमित्ते प्रत्यय इत्युक्तम्, इदानीं गवादि[5]शब्देभ्यो भावे प्रत्यय इत्युच्यत इति भेद इत्यर्थः। पूर्वं प्रकृत्यर्थसंबन्धिप्रत्ययार्थ उक्तः, इदानीं साक्षात्प्रकृतिसंबन्धिप्रत्ययार्थ उच्यत इति तु निष्कर्षः। **पूर्वोक्तेष्विति**। शब्दस्वरूपगुणसामान्यादिष्वेवेत्यर्थः। नन्वेकार्थानां विकल्पः, प्रकृतेऽर्थभेदात् कथं

---

[1] पा. सू. ८.२.४२.

[2] 'तात्पर्यम्' इत्यस्यानन्तरमितिशब्दोऽधिकः — अ, ऋ, लृ.

[3] डित्थत्वसहचरितेति — अ, ऋ, लृ.

[4] पा. सू. ५.४.३४. 'विनयादिभ्यष्ठक्' इति सूत्रम्।

[5] शब्दपरेभ्य इत्यर्थः।

विकल्पार्थकवाकारः, अत आह — **प्रकृत्यर्थेति**। **भावशब्दत्रयस्य** वार्तिकस्थस्य। **भवतेश्चेति**। [1]'विभाषा ग्रहः' [2]इत्यत्रत्यमिदम्। **स च** अर्थः, वाच्यः प्रवृत्तिनिमित्तरूपश्चेति द्विविधः। **अत्रेति**। पूर्वं कर्तरि णः। इदानीम् अर्थे शब्दो भवत्यनेनेति भाव इत्यर्थः। प्रवृत्तिनिमित्त-रूपभावस्य करणत्वमुपपादयति — **तत्र शुक्लस्येति**। शुक्लशब्दस्येत्यर्थः। शुक्लशब्दस्य भाव इत्यन्वयः। उक्तन्यायं प्रवृत्तिनिमित्तान्तरेऽतिदिशति — **तथेति**। स्वस्मिन्नर्थे भवन्तीति वाच्ये 'स्वेनार्थेन' इति तृतीयां समर्थयितुमाह — **शब्दानामिति**। विवक्षायां हेतुः — **अर्थप्रत्यायनायेति**। **यस्मादिति**। अध्याहार्यमित्यर्थः। भाष्ये क्वचित् 'यच्च सर्वे शब्दाः स्वेनार्थेन भवन्ति' इति पाठः। तत्र यच्छब्दो यस्मादर्थे व्याख्येय इत्यनेनोक्तमिति ज्ञेयम्। **तेषां** प्रकृतिभूतानां शब्दा-नाम्। संबन्धाभिधानस्य प्रयोजनमाह — **एतेनेति**। **प्रकृतिः** गवादिशब्दः। **प्रत्ययार्थः** प्रवृत्ति-निमित्तं गोत्वादीति। **अन्यत्रेति**। प्रकृत्यर्थसंबन्धिप्रत्ययार्थः सर्वत्रोच्यते, अत्र प्रकृतिशब्द-संबन्धिप्रत्ययार्थः कथमुच्यत इति शङ्कार्थः। अन्यत्र प्रकृतिशब्दसंबन्धित्वं प्रत्ययार्थस्य न संभवति, अत्र तु संभवतीत्युत्तरतात्पर्यमाह — **शब्दसंबन्धित्वमिति**। प्रकृतिभूतेत्यादिः। अनुपपत्तिमेवाह — **कषायेति**। **शब्दार्थसंबन्धित्वं** प्रकृत्यर्थसंबन्धित्वम्। **तद्वाचिनी** शब्दवाचिनी। अर्थस्येव शब्दस्यापि भावसंबन्धमुपपादयति — [3]**यथा हीति**। नानात्वमित्यादौ जातिगुणयोरभावात् कथं भावप्रत्ययः, अत आह — **नानात्वमिति**। **पूर्वत्र** 'यस्य गुणस्य भावात्' इत्यत्र। **उत्तरत्र** 'यद्वा सर्वे भावाः' इति लक्षणे। **शब्देति**। नानायुगपच्छब्दाभिधायिभ्याम्, शब्दपराभ्यामिति यावत्। **पूर्वेति**। नानार्थे युगपद्भूतार्थे च पूर्वोक्त एवासहभावे युगपद्भावे च। [4]'उक्ते भावे' इति समानाधिकरणे सप्तम्यौ। अनभिधानादतिप्रसङ्गाभावेऽपि वार्तिकोक्तन्यासद्वयार्थः सूत्रात् कथं लभ्यते, अत आह — **तत्रेति**। सूत्र इत्यर्थः। **शब्दसंबन्धिनि च** जात्यादिक इत्यन्वयः। **पूर्वोक्तेति**। प्रकृत्यर्थसंबन्धिनि वा भावे प्रकृतिसंबन्धिनि वेत्यर्थः। पूर्वविप्रति-षेधस्य प्रयोजनमाह — **न ब्राह्मणस्येति**। युगपदुभयप्रसङ्गार्थमेवं विग्रहः। **अव्ययेति**। [5]'तत्पुरुषे तुल्यार्थ' इत्यनेन। [6]**अन्तोदात्तत्वं** त्वप्रत्ययान्तस्य। **लित्स्वरेण** लिति प्रत्ययात्पूर्वमुदात्त-मिति। [7]**तदर्थः** अन्तोदात्तत्वमध्योदात्तत्वार्थः। अप्रधानस्य सापेक्षस्य सामर्थ्यं नास्तीति सदृष्टान्तमाह — **प्रत्ययार्थस्येति**। प्रत्ययार्थस्य प्राधान्याद् ब्राह्मणार्थस्याप्राधान्यमित्यर्थः। प्राधान्यं कथयन् प्रधानस्य सापेक्षस्यापि सामर्थ्यं सदृष्टान्तमाह — **उत्तरपदेति**। न्यायेन सर्वस्माद् भाव-प्रत्ययात् पूर्वं नञ्समासे प्राप्ते नियमार्थमिदं वार्तिकमिति भाष्यार्थमुपपादयति — **न्यायेनेति**। प्रधानस्य सापेक्षस्यापि समास इति **न्यायः**। नियममेवाह — **त्वतलोरेवेति**। स्वयमुदाहरति — **ततश्चेति**। उत्तरपदवृद्धिमुदाहरति — **अशौक्ल्यमिति**। शुक्लशब्दात् पूर्वं ष्यञ्। शौक्ल्यमित्यस्य पश्चान्नञ्समासे 'अशौक्ल्यम्' इति सिध्यतीत्यर्थः। पूर्वं समासे तद्रूपं न सिध्यतीत्याह — **यदीति**। [8]"न नञ्पूर्वात् तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः' इत उत्तरं ये भावप्रत्ययास्ते नञ्पूर्वात् तपुरुषान्न भवन्ति, चतुराद्यन्तं वर्जयित्वा। अत्र वृद्धिशब्देना-

---

[1] पा. सू. ३.१.१४३.
[2] इति सूत्रे काशिकास्थमित्यर्थः।
[3] प्रदीपे 'तथा हि शुक्लस्य' इत्यत्र 'यथा हि शुक्लस्य' इति निर्णयसागरमुद्रिते पाठः।
[4] वृत्तौ भाव इति समानाधिकरणे सप्तमी — अ, ऋ, लृ.
[5] पा. सू. ६.२.२.
[6] प्रदीपे 'प्रत्ययस्वरेणान्तोदात्तं पदं भवति' इत्यत्र 'प्रत्ययस्वरेणान्तोदात्तत्वं भवति' इत्यन्नंभट्टपाठ इति भाति।
[7] प्रदीपे 'तदर्थं पूर्वविप्रतिषेधः' इत्यत्र 'तदर्थः पूर्वविप्रतिषेधः' इत्यन्नंभट्टपाठ इति ज्ञायते
[8] पा. सू. ५.१.१२१.

शौक्ल्यमित्यादि शब्दरूपं विवक्षितम्। तथा च पूर्वं समासे ष्यञ्भावात् तद्रूपं न सिध्येदित्यर्थः। प्रत्ययानन्तरं समासे [1]'तत्पुरुषे तुल्यार्थ' इत्याद्युदात्तत्वं सिध्यतीत्याह — **प्रत्ययस्येति**। युक्तत्वे हेतुः — **अत्र हीति**। **जात्यन्तरयुक्तं** पशुत्वरहितं पशुसदृशमपशुशब्देनोच्यते। जात्यन्तराशासनमभिनयति — **अपशुरिति**। पशुत्वाभावाशासनप्रकारमाह — **पशुरिति**। वचनानुपयोगमाह — **न पशोरिति**। एवं विग्रहे पूर्वं प्रत्ययोत्पत्तिं विना [2]भावसंबन्धाभावात् प्रत्ययानन्तरं समास इति सामर्थ्यादेव लाभाद् वचनं नापेक्ष्यमित्यर्थः॥

[४, ८८–९५]

(नारायणीयम्) सूत्रशब्देन कात्यायनीयमुच्यते, न तु पाणिनीयम्। प्रमाणातिरेकमभिप्रेत्य ,इयता' इत्युक्तमिति व्याचष्टे — **यस्य गुणस्येति**। **विषयप्रदर्शनमात्रमिति**। न तु विग्रहवाक्यप्रदर्शनम्। [3]तत्तु रज्ज्वा गुण इति। तदाह — **रज्जुशब्दादिति**। 'गुणशब्दोऽयम्' इत्यादिः पूर्वशेष इत्याह — **कथमिति**। **तत्रायमिति**। अस्मिन् पाठे लक्षणान्तरे दोषाभावप्रदर्शनपरत्वेन भाष्यं योज्यमित्यर्थः। **इत्यस्मिन् न्यास इति**। 'षष्ठीसमर्थाद् गुणे' इत्यस्मिंस्तु न्यास एवातिप्रसङ्ग इत्य[र्थः]। अध्ययनस्य द्विगुणत्वमेव भाष्ये दर्शितम्। त्रिगुणत्वं तु कथमित्यत्राह — **पदक्रमसंहितेति**। **पदविच्छेदगुणा इति**। पदविच्छेदरूपा अवयवा इत्यर्थः। ननु संहितां पदानि चाधीयानोऽपि द्विगुणमधीत इ[ति कथमिदमुक्तमित्याशङ्क्य] व्यतिरेकप्रदर्शनेनोक्तमर्थं स्थिरीकर्तुमिदमुक्तमित्याह — **वेदान्तरेति**। **यद्यपीति**। पदद्वयमुपक्रम्योत्तरं पदं तत उत्तरेणोपसंधाय क्रमोऽधीयते। तत्र पदानामावृत्तित आधिक्यात् प्रमाणतः साम्यं [नास्तीत्यर्थः। फलयो]ग्यत्वमत्र साम्यम्। फलसाधनार्हत्वं स्वरदोषाद्यभावादित्यर्थः। 'पूर्वोक्ते विषये सर्वस्मिन्' इत्युक्तमुपपादयति — [**गुण**]**वानय**[**मिति**]। अवयव]त्वेन साम्यमित्यर्थः। [कथं गवादीनां देशावयवत्व]मित्यत्राह — **गवादीनामिति। उपचरितमिति।** देशसाहचर्यादारम्भकसाम्यात्। **गृहाद्यवयवसदृशात्मनिर्देश इति**। भूतशब्द उपमार्थः। यथा [अत्र] गृहे [अप्रधानभूता अ]वयवाः स्तम्भादय इव वयम्, न [प्रधानभूता इत्यर्थः। **ब्राह्मणादिशब्दार्थेति**]। [4]'गौरः [शुच्याचारः' इत्यादिना पूर्वमुक्तत्वात्। **युक्ततश्चेति**। यथाध्ययनादयो धर्मा] ब्राह्मण्यमुपबृंहयन्ति तथाचारोऽपीत्यर्थः। **अर्थक्रियायामिति**। अदनमत्रार्थक्रिया, तस्यां योग्यत्वसामान्यात् सूपादीनां समत्वमित्यर्थः। एतदे[वोपपादयति] — **युक्ततः साम्याभाव इति**। उक्तमर्थं निगमयति — **तदेवमिति**। 'षष्ठीसमर्थाद् गुणे' इत्यत्रैव न्यासे 'शुक्लादिषु तर्हि' इति दोषोद्भावनमिति भाति, तन्निराकरणायाह — **अत्रापीति**। 'वर्त्यभावात्' इति हेतोरसिद्धिं परिहरन् व्याचष्टे — **संबन्धाभावप्रसङ्ग इति**। गुणगतसामान्यस्य गुण एव संबन्धी, न तु द्रव्यमिति भावः। उक्तेऽर्थे भाष्यं योजयति — **वर्तनमिति**। ननु वृक्षादीनां द्रव्यवचनानां जातौ प्रत्यय उपपद्यत इत्यत आह — **तेऽपि जातिमात्रवचना इति**। 'विशेष्यं नाभिधा गच्छेत्' इति न्यायात्। ननु [5]वृक्षादीनां गुणवचनत्वमसिद्धमित्याशङ्क्य पराश्रयत्वसामान्याज्जातिरेव गुणशब्देनोच्यत इत्याह — **जातिलक्षणमिति**। ननु जातिवचनेभ्योऽपि द्रव्य उत्पन्नस्य मतुपो लुग् विधेय इत्यत आह — **वृक्षादय इति**। जातितद्वतोरभेदविवक्षैव सर्वदा, न तु कदाचिद् भेदविव-

---

[1] पा. सू. ६.२.२.
[2] नञ् इत्यादिर्बोध्यः।
[3] विग्रहवाक्यं त्वित्यर्थः।
[4] महाभाष्यम् २.२.६.
[5] शुक्लादीनां गुणवचनत्वम् — घ.

क्षेति निरूढलक्षणया द्रव्यवचना एव वृक्षादिशब्दा इति मतुपोऽप्रसङ्गः[1], नैवं शुल्कादय इति तेभ्यो भेदविवक्षायां मतुपः श्रवणं स्यादिति लुग्विधेय इति, तदाह — **तत्र गुणद्रव्ययोरिति**। डित्थादिषु प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावमुपपादयति — **डित्थादयो यदृच्छाशब्दा इति**। यदृच्छयार्थेषु प्रवर्तमानत्वाद् यदृच्छाशब्दाः संज्ञाशब्दा उच्यन्ते। तेषु स्वरूपासञ्जनमेव प्रवृत्तिनिमित्तम्, न त्वर्थगतं जात्यादिकमिति प्रत्ययानुपपत्तिरित्यर्थः। **गुणक्रिये एव प्रवृत्तिनिमित्तमिति**। तेन डित्थगते गुणे क्रियायां वा डित्थत्वमिति प्रत्ययोपपत्तिरित्यर्थः। 'कथंचित् प्रयोगः' इत्यनेन डित्थादिष्वपि प्रवृत्तिनिमित्तसद्भावो दर्शितः। तत्प्रदर्शनायाह — **शब्दस्वरूपमिति**। **अन्ये त्विति**। सर्वे शब्दा जातिवचना इति येऽभ्युपगच्छन्ति तेषां मते डित्थादिशब्दानामपि जातिरेव प्रवृत्तिनिमित्तम्। डित्थादिशब्दवाच्यं हि द्रव्यं कौमारयौवनाद्यवस्थाभेदेन भिन्नम्, तत्रावस्थान्तरेऽपि स एवायं डित्थ इति प्रत्यभिज्ञानिमित्तं जातिरभ्युपगम्यत इति तस्यां त्वतलादिप्रत्यय उपपद्यत इत्यर्थः। एवं 'यस्य गुणस्य भावात्' इति वार्तिककृतो लक्षणं समर्थितम्। लक्षणान्तरमुक्तं वाक्यकारेण, तत्र पूर्वस्माल्लक्षणाद् भेदं तावदाह — **पूर्वत्रेति**। **शब्दस्वरूपेति**। तत्र जातिमात्रवाचिभ्यो गवादिभ्यः शब्दस्वरूपे प्रत्ययः। जातिमद्द्रव्यवाचिभ्यो जातौ, गुणमात्रवाचिभ्यः शुक्लादिभ्यो गुणगतसामान्ये, [गुणवद्द्रव्यवाचिभ्यो] गुणे, पाचकादिभ्यः क्रि[यावद्वाचिभ्यः क्रिया]दिषु, इत्यादि द्रष्टव्यम्। **पूर्वोक्तेष्वेवेति**। जात्यादिषु। **प्रकृत्यर्थभेदेऽपीति**। यथा 'व्रीहिभिर्यजेत, यवैर्यजेत' इति साधनभेदेऽपि साध्यभेदापेक्षो विकल्पस्तयात्रापीत्यर्थः। **भवन्तीति भावा इति**। अर्थप्रत्यायनाय **भवन्ति** प्रयुज्यन्त इत्यर्थः। **स च द्विविध इति**। द्वितीयभावशब्दस्य वाच्योऽर्थोऽभिधेयः, तृतीयस्य प्रवृत्तिनिमित्तरूप इत्यर्थः। **करणसाधन इति**। [2]'अकर्तरि च कारके संज्ञायाम्' इति संज्ञाग्रहणस्य प्रत्याख्यातत्वादसंज्ञायामपि करणे घञ्। अत्र लक्षणे प्रवृत्तिनिमित्तलक्षणस्यार्थस्य प्रत्ययार्थत्वव्याप्तिं दर्शयति — **तत्र शुक्लस्य भाव इति**। शुक्लशब्दस्य प्रवृत्तिनिमित्तलक्षणोऽर्थ इत्यर्थः। 'भवति प्रवर्तते' इत्यनेन प्रथमस्य भावशब्दस्यार्थो दर्शितः। नन्वर्थे शब्दः प्रवर्तत इत्यधिकरणस्य सतोऽर्थस्य कथं करणत्वमित्यत्राह — **वाच्योऽर्थ इति**। स्थाल्या पचतीतिवद् वैवक्षिकं करणत्वमित्यर्थः। विवक्षामेवोपपादयति — **अर्थप्रत्यायनायेति**। 'स तेषामर्थः' इत्यनेनापि वाच्योऽर्थ एवोक्त इति प्रतिभाति, तन्निराकुर्वन् व्याचष्टे — **यत्तदोरिति**। **एतेनेति**। शब्दस्वरूपाभिधायिन्याः प्रकृतेरर्थस्य प्रवृत्तिनिमित्तलक्षणस्य प्रत्ययार्थस्य च संबन्धसंभवात् प्रत्ययोपपत्तिर्दर्शितेत्यर्थः। एकग्रन्थाशङ्कां निरस्यति — **अत्रोत्तरमिति**। यथान्यत्रार्थसंबन्धित्वं प्रत्ययार्थस्याश्रितं तथेहापि युक्तमित्याशङ्क्येह शब्दसंबन्धित्वस्याप्युपपन्नतां दर्शयति — **इह त्विति**। **तद्वाचिनीति**। शब्दस्वरूपाभिधायिनीत्यर्थः। एतदेवोपपादयति — [3]**यथा हीति**। **शुक्लं द्रव्यमिति**। शुक्लशब्दवाच्यमित्यर्थः। अर्थस्य विशिष्टशब्दवाच्यत्वे निमित्तत्वात् संबन्धिप्रवृत्तिनिमित्तलक्षणोऽर्थः। शब्दस्य तु विशिष्टार्थप्रवृत्ताविति विवेकः। ननु धर्ममात्रवचनानां नानायुगपदित्यादीनां लक्षणद्वयेऽपि धर्म एव कथं प्र[त्यय इत्यत आह — **नानात्वमि] ति**। **नानाभूतेति**। वृत्तिविषयेऽर्थविशेषवृत्तित्वात्। **पूर्वोक्त एवेति**। नानाभूतस्य युगपद्भूतस्य चार्थस्य प्रवृत्तौ निमित्तभूते धर्ममात्र इत्यर्थः। अनभिधानमेव दर्शयति — **न हीति**। वार्तिककृता प्रतिपादितस्य लक्षणद्वयस्य यो[गेन संग्रहमाह — **तत्र भव]त्यनेनेति**। [4]"श्रिणी-

---

[1] 'अप्रसङ्गः' इत्यस्यानन्तरम् 'इत्यर्थः' इत्यधिकम् — घ.

[2] पा. सू. ३.३.१९.

[3] प्रदीपे 'तथा हि शुक्लस्य द्रव्यस्य' इत्यत्र 'यथा हि शुक्लस्य द्रव्यस्य' इति निर्णयसागरमुद्रिते पाठः।

[4] पा. सू. ३.३.२४.

भुवोऽनुपसर्गे' इति करणे घञ्। नञ्समासस्य त्वतलोश्च विप्रतिषेधोपपत्तये युगपत्प्राप्तिं दर्शयति — **न ब्राह्मणस्येति**। **तदाव्य[यपूर्वपदेति**। सतिशिष्टस्व]रस्य बलीयस्त्वात्। प्र-[त्ययार्थस्य प्रधा]नत्वे हेतुः — **नञर्थापेक्षत्वादिति**। सापेक्षत्वे ब्राह्मणार्थस्य नञर्थापेक्षया प्राधान्यं दर्शयति — **उत्तरपदार्थेति**। नञ्[समासात् प्राग् भाववचन इति] सूत्रा [भावेन] कथं पुनस्त्व-तलभ्याम[न्यो भाववचनः] नञ्समासात् प्राग् भवेदित्यत आह — **न्याये नैवेति**। **न्यायस्येति**। यथा [1]'द्विरैन्द्रवायवस्य भक्षयति, द्वि[र्ह्येतस्य व] षट् करोति' इति वचनेन शेष [स्यैन्द्रवा] यव-ग्रह [सोम]स्य द्विर्भक्षणं विधीयते [तथेति भावः]। पश्चान्नञ्समासे सतीष्टस्वरस्योत्तरपदवृद्धेश्च सिद्धिं दर्शयति — [2]**तत्रेति**। पूर्वं नञ्समासे सति ष्यञ्प्रत्यय एव न सिध्यति, कुत उत्तरपद-वृद्धिरित्याह — **यदि त्विति**। 'वा छन्दसि' इति वार्तिकेन किमुच्यत इत्याशङ्क्य प्रकृतस्य पूर्व[विप्रतिषेधस्य विकल्प उच्यत इत्याह — **छन्दोविषय इति**। अत्रा]पि स्वरसिद्धिः प्रयोजन-मित्याह — **प्रत्ययस्येति**। **नञ्स्वर इति**। अव्ययपूर्वपदप्रकृतिस्वरः। 'अशिथिलत्वाय' इत्यादेरुदाहरणस्य युक्ततां दर्शयति — **अत्र हीति**। न शिथिलस्य भाव इति भावनञर्थसंबन्धोऽत्र युगपद्विवक्ष्यते। [उत्तरपदशब्देन तदर्थ] उच्यत इत्याह — **उत्तरपदार्थस्येति**। 'न पशोर्भावः' इति भाष्यमप्युक्तेऽर्थे योजयति — **भावस्येति**॥

आ च त्वात्. ५.१.१२०.

[४, ९५–९७]

(उद्द्योतनम्) सूत्रस्य [3]प्रयोजनमनुक्त्वा चकारविचारानुपपत्तेस्तदाह[4] — **वक्ष्यमाणैरिति**। इमनिजादिभिः। प्रयोजनान्तरमाह — **गुणेति**। **कर्मणि** पूर्वसूत्रेणाप्राप्ते। **वक्ष्यमाणः** 'नैत-दस्ति' इत्यादिना। **अथेति**। अधिकारादपि त्वतलोरपवादैः समावेशसिद्धेः सूत्रं व्यर्थमित्यर्थः। अनुवृत्तेः कर्मणि विधानार्थत्वोपपत्तेरपवादसमावेशार्थं सूत्रमित्याह — **नैतदिति**। विनिगमका-भावादुभयार्थमनुवृत्तिः स्यात्, अत आह — **किं चेति**। स्वरितलिङ्गेनानुवृत्तिर्व्याख्यानसापेक्षेति स्पष्टप्रतिपत्त्यर्थं सूत्रम्। नञ्स्नञ्समावेशार्थश्चकारोऽपि सूत्रसापेक्ष इति भावः। अनुकर्षणस्य प्रयोजनमाह — **अन्यथेति**। आकाङ्क्षां विना प्रकृतान्वयो न संभवति, अत आह — **विधेय-मन्तरेणेति**। वार्तिककाराभिप्रायमाह — **नञ्स्नञिति**। भाष्यस्य तद्विरोधं निराह — **भाष्य-कारस्त्विति**। आत्वाद् याः प्रकृतयस्ताभ्यस्त्वतलोर्विधानेऽपवादैः समावेशो भविष्यति, अत आह — **असतीति**। **कर्मण्येवेति**। तस्यैव [5]प्राक्त्वादर्थत्वादित्यर्थः। **सोऽपीति**। तदर्थमेव तदुपादानादित्यर्थः। प्राक्त्वादर्थे विधाने कथं समावेशः, अत आह — **आत्वाद्या इति**। त्व-प्रत्ययेन प्रकृतीनामाक्षेपादिष्टसिद्धये [6]प्रकृतीनामेवावधिमत्त्वेन व्याख्यानाच्चेति भावः। ननु [7]प्रकृतीनामवधिमत्त्वे चकारो व्यर्थ इत्युक्तम्। तदेव चकारस्य प्रयोजनं कथमुपन्यस्यते, अत आह

---

[1] अयं विषयः मीमांसायां ३.५.५ अधिकरणे प्रतिपादितः।

[2] प्रदीपे 'ततश्च सतिशिष्टत्वात्' इत्यत्र 'तत्र च सतिशिष्टत्वात्' इति पाठोऽभिमत इति भाति।

[3] प्रयोजनमुक्त्वा — अ.

[4] सूत्रप्रयोजनमाहेत्यर्थः।

[5] प्राक्त्वार्थत्वादित्यर्थः — अ, ऋ, लृ.

[6] विकृतीनामेवावधिमत्त्वेन — अ, ऋ, लृ.

[7] त्वात् इत्येतं प्रतीत्यर्थः॥ प्रकृतीनामव-धित्वे — अ.

— **गुणवचनेति**। गुणवचनादिभ्यः प्रकृतिभ्यः कर्मणि त्वतलोर्विधानं सूत्रप्रयोजनम्, चकारस्यापवादसमावेश इत्येवंपरमिदं भाष्यमित्यर्थः। **सूत्रार्थः** सूत्रप्रयोजनम्। व्याख्यानप्रकारमाह — **यत इति**। **विशेषप्रकृतेः** पृथ्वादेः। चशब्दं विना समावेशो न सिध्यतीत्याह — **अन्यथेति**। गुणवचनादिप्रकृतिविशेषपरत्वे मानाभावादिति भावः। आत्वात् कर्मैक एवार्थ इति बहुवचनानुपपत्तिं निराह — **जाताविति**। ननु सर्वप्रकृतीनामवधिमत्त्वे चकारवैयर्थ्यमुक्तमिति कथमेतत्पक्षोत्थितिः, अत आह — **अयमर्थ इति**। एकस्य सूत्रस्य प्रतिप्रसवार्थत्वं विध्यर्थत्वं च न संभवतीति कर्मणि विधानार्थमिदं सूत्रम्, चकारस्तु समावेशार्थ इति तात्पर्यकथनमिदमित्यर्थः। **विशेषप्रकृतिभ्यः** पृथ्वादिभ्यः। **अर्थानिति**। लक्ष्यानुरोधादुभयोरवधिमत्त्वं[1] विवक्ष्यत इति भावः। **अन्यथेति**। कर्मणि प्रकृतिविशेषमनपेक्ष्य प्रातिपदिकमात्रात् त्वतलौ विधीयेते, न तु गुणवचनादिभ्य एव, सर्वप्रकृत्यपेक्षया च समावेशसिद्धिरित्येवं व्याचक्षत इत्यर्थः। इदं दूषयति — **तत्त्विति**। **उपादानात्** सूत्रादित्यादिः। **तस्य** कर्मार्थस्य। संप्रदायसिद्धमर्थमाह — **तस्मादिति**। [2]त्वपर्यन्तं कथं कर्मानुवृत्तिः, अत आह — **आपादेति**। [3]**अस्मादिति**। एतस्य प्रतिप्रसवार्थत्वात्। **ताभ्यः** अनेन सूत्रेणेति शेषः। नञ्स्नञोस्त्वतल्बाधकत्वं[4] तावदाह — **प्रकृतिविशेषादिति**। **प्राप्येते** चकारेण। ननु भावव्यतिरिक्तार्थे सावकाशयोर्नञ्स्नञोः कथं भावे प्राप्तिः, अत आह — **प्राग् भवनादिति**। **अन्यथा** भावे तयोरप्रवृत्तौ। ननु तथा सति वत्यर्थे न स्याताम्, अत आह — **वत्यर्थे हीति**। यद्यपि भावे तयोरनङ्गीकारे 'प्राग् भावात्' इति वक्तव्यं स्यादित्यापादनं युक्तम्, तथापि वत्यर्थेऽप्यनङ्गीकारात् ज्ञापकानुसरणापरिहाराय 'प्राग्वतेः' इत्येव युक्तम्। तथा च भावे ताभ्यां त्वतलोर्बाधो मा भूदिति चकारः॥

[४, ९५–९७]

(**नारायणीयम्**) प्रतिप्रसवार्थं विध्यर्थं [च] सूत्रमिति सूत्रप्रयोजनं तावदाह — **वक्ष्यमाणैरिति**। **सूत्रमेवेति**। कृत्स्नं सूत्रमेव, न तु सूत्रैकदेशश्चकार एवाक्षेप्तुं योग्य इत्यर्थः। **संदिग्धतदर्थोपस्थानादिति**। संदिग्धं **तदर्थम्** अपवादविषयविधानार्थम् उपस्थानं ययोस्तौ तथा। यथान्यार्थङित्त्वेष्वनङादिष्वसंदिग्धत्वात् [5]'ङिच्च' इत्यस्य झटिति प्रवृत्त्या सावकाशत्वात् तातङन्यार्थत्वान्ङित्त्वस्य संदिग्धत्वादन्त्यविधिं बाधित्वा सर्वादेशशास्त्रं प्रवर्तते तथात्रेमनिजादिभिस्त्वतलौ बाध्येयातामित्यर्थः। एवं त्वतलोरुत्तरत्राधिकारमभ्युपगम्य सूत्रप्रयोजनमुक्तम्। सूत्रेऽस्मिन्नसत्यधिकार एव न सिध्येदिति युक्त्यन्तरमाह — **किं चेति**। आकाङ्क्षानिमित्तानुवृत्तिर्भवेत्, इह तूत्तरवाक्यानां प्रत्ययं प्रत्याकाङ्क्षा नास्ति। त्वतलोरपि प्रकृत्यन्तरापेक्षा नेति कुतस्तयोरुत्तरत्रानुवृत्तिः स्यादित्यर्थः। नन्वाकाङ्क्षाया अभावादनुवृत्तिर्न स्यादित्युक्तम्, तत् किमुच्यते त्वतलावनुवर्तिष्येते इति, तत्राह — **विधेयमतरेणेति**। वार्तिके विवक्षितमर्थमाह — **नञ्स्नञ्समावेशार्थमिति**। नन्वस्मिन्नर्थे भाष्यं न जाघटीतीत्याशङ्क्य भाष्यकारस्याशयं दर्शयति — **भाष्यकारस्त्विति**। ननु 'आत्वात्' इत्यवधिर्निर्देशसामर्थ्यादिमनिजादिभिरपवादैस्त्वतलोः समावेशः सिद्धः, किं चकारेणेत्यत्राह — **असति 'चकार इति**। **अयमेवार्थ इति**। अप्राप्तयो-

---

[1] अवधित्वं — अ, ऋ, लृ.
[2] ब्रह्मणस्त्व इति त्वप्रत्ययपर्यन्तमित्यर्थः।
[3] प्रदीपे 'एतस्मात् सूत्रात्' इत्यत्र 'अस्मात् सूत्रात्' इत्यन्नंभट्टपाठ इति भाति।
[4] त्वतलबाधकत्वं — अ.
[5] पा. सू. १.१.५३.

स्त्वतलोः कर्मणि विधानार्थत्वादस्य योगस्य प्रतिप्रसवार्थं रूपं नास्तीत्यर्थः। तदेतदाह — **कर्मण्येवेति**। **चशब्दादिति**। पुनर्विधानार्थादित्यर्थः। यदा प्रकृतयोऽवधिमत्य आश्रीयन्ते, न त्वर्थः, तदा वक्ष्यमाणाभ्यः सर्वाभ्यः प्रकृतिभ्यस्त्वल्भ्यां भाव्यमिति विना[पि चकारमि]मनिजादिभिः समावेशसिद्धिरिति 'नैतदस्ति प्रयोजनम्' इत्यादिभाष्यम्। [तदाह] — **आत्वादिति**। [**अनेनेति**]। अनेन 'आत्वात्' इत्यस्यार्थं उक्त इत्यर्थः। **विशेषप्रकृतेरिति**। पृथ्वादेः। 'उच्यते' इत्यस्य व्याख्यानम् — **प्र[सक्ताविति**। इमनिजादिभिश्च बाधिताविति वा]क्यशेषो दर्शितः। [तदु]पपादयति — **अन्यथेति**। **जातौ बहुवचनमिति**। [1]'जात्याख्यायामेकस्मिन्' इत्यनेन। ननु प्रकृतीनामवधिमत्त्वाश्रयणेन चकारेण विनापीष्टसिद्धिर्दर्शितेत्याशङ्क्यं परिहरति — **अयमर्थ इति**। **कर्मणि त्वतलोरिति**। अर्थस्यानाश्रयणात्। **प्रसक्तबाधाविति**। प्रसक्तो बाधो ययोस्तौ त्वतलौ। **अर्थान् प्रकृतीश्चेति**। आत्वाद्याः प्रकृतयो यश्चार्थस्ताभ्यस्त्वतलौ भवतः, तत्र चार्थ इति सूत्रार्थः। **भाष्यमेतदन्यथेति**। 'आत्वाद्यैर्ऽर्थाः' इत्यादिभाष्यस्यायमर्थः — आत्वाद्योऽर्थस्तस्मिन् कर्मणि ङ्याप्प्रातिपदिकात् त्वतलोर्विधानं सूत्रफलम्। चकारेण तु भावे प्रकृतिविशेषेभ्योऽपवादैः प्रसक्तबाधयोः प्रतिप्रसवः क्रियत इत्येतत् प्रयोजनद्वयमपि सूत्रणैव सिद्धमित्युत्तरमिति केषांचिद्व्याख्यानम्। अस्य व्याख्यानस्यायुक्ततामुपपादयति — **प्रकृतिविशेष[2]संबद्धस्येति**। आत्वादर्थे त्वतलौ भवत इत्युक्ते यस्मात् प्रकृतिविशषात् कर्मणि प्रत्ययान्तरविधिस्तस्मात् त्वतलावपि तस्मिन्नर्थे स्यातामित्येवार्थः स्यादित्यर्थः। तस्मादेवमत्र व्यवस्थेत्याह — **तस्माद् गुणवचनेत्यत इति**। ननु ङ्याप्प्रातिपदिकाद्विधीयमानौ त्वतलौ विनापि चकारेण स्त्रीपुंसाभ्यामपि स्यातामित्यत आह — **प्रकृतिविशेषादिति**। **तद्विषय इति**। नञ्स्नञ्विषये। तर्हि स्त्रीपुंसाभ्यां भावे त्वतलावेव, न तु नञ्स्नञाविति चेत्, नेत्याह — **प्राग् भवनादिति**। अवध्युपादानसामर्थ्यादित्यर्थः। एतदेव दर्शयति — **अन्यथेति**। ननु 'प्राग्वतेः' इत्युच्यमाने वत्यर्थे स्त्रीपुंसाभ्यां नञ्स्नञौ न स्यातामित्याशङ्क्येष्टमेवैतत् संगृहीतमित्याह — **वत्यर्थे हीति**॥

न नञ्पूर्वात् तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः ५.१.१२१.

[४, ९७–१००]

(विवरणम्) अप्रकृतस्यैव कथमुत्तरस्य प्रतिषेध इत्यत आह — **अधिकारादिति**। **वत्सेभ्य इति**। वत्सेभ्यो हितो वत्सीय इति नञ्नमनपेक्ष्य कृत्वा तद्धितं नञ्तत्पुरुषे उत्तरपदार्थसदृशोऽन्यः प्रतीयते, न तु हितत्वादिगुणप्रतिषेध इति युगपदुभयार्थविवक्षा कर्तव्येति भावः॥

[४, ९७–१००]

(उद्द्योतनम्) त्वतलोः प्रतिषेधोऽनिष्टः, अत आह — **आचार्यदेशीय इति**। तन्निषेधे हेतुः — **अनन्तरस्येति**। प्रकृतिविशेषोपादानेन विहितस्योत्तरस्याप्रसक्तस्य कथमनेन निषेधः, अत आह — **अधिकारादिति**। तथा च [3]'पृथ्वादिभ्य इमनिज्वा' इत्यादौ 'न नञ्पूर्वात्' इत्युपतिष्ठत इत्यर्थः। सूत्रे परिगणनाभावादाह — **पृथ्वादीति**। **उपलक्षणमिति**। एकत्रान्तग्रहण-

---

[1] पा. सू. १.२.५८.

[2] संबन्धस्येति — घ.

[3] पा. सू. ५.१.१२.

मस्ति, इगन्तत्वयोपधत्वयोर्नञ्समासेऽपि संभव इत्यर्थः। ननु पत्यन्तादौ प्रतिषेधस्य सप्रयोजनत्वात् कथमेतत्प्रदेशकरणस्य ज्ञापकत्वम्, अत आह — **अत्र प्रदेश इति**। **अन्यपूर्वाच्चेति**। तुल्यन्यायत्वाच्चकारद्वयम्, उत्तरद्वयं च युगपद्व्याख्यातम्। निषेधसापेक्षात् प्रत्ययः कथं ज्ञाप्यते, अत आह — **प्रसङ्गेति**। [1]'ग्रहणवता' इति तदन्तविध्यभावात् प्रसङ्गो नास्तीत्यर्थः। **ज्ञापयतीति**। नञ्समासान्न भवतीत्युक्ते समासात् पूर्वं भवतीति प्रतीतेरित्यर्थः। **यत्रापीति**। सापेक्षस्थले। **उत्तरः** इमनिजादिः। तदुदाहरति — **न पृथोरिति**। अप्राप्तिमाह — **अत्र हीति**। **अप्रथिमेति**। अत्र प्रत्ययानन्तरं समासे नञ्स्वरः प्रयोजनम्, अन्यथा [2]चित्स्वरेणान्तोदात्तः स्यात्। नञो विग्रहवाक्यस्थले सापेक्षादपि पूर्वं प्रत्ययो भवतीति ज्ञापने बहुव्रीह्यादिस्थलेऽपि स्यात्, अत आह — **नञ्पूर्वस्येति**। तत्पुरुषादित्युक्तेस्तद्विषयविग्रहवाक्य एवेदं ज्ञापकमित्यर्थः। ननु ज्ञापकेन त्वतलावपि समासात् पूर्वं स्याताम्, ततश्च 'अपृथुत्वम्, अपृथुता' इत्यत्रापि [3]नञ्स्वरप्रसङ्गः, [4]प्रत्ययस्वरश्चेष्यते, अत आह — **त्वतलौ त्विति**। **उत्तरेति**। उत्तरत्रैव निषेधाधिकारादित्यर्थः। [5]'नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः'। गुणप्रतिषेधविषयान्नञ उत्तराणि संपाद्याद्यर्थतद्धितान्तान्युत्तरपदान्यन्तोदात्तानि। ननु वत्सेभ्यो हितो वत्सीयः, [6]'प्राक् क्रीताच्छः', न वत्सीयोऽवत्सीय इत्यत्रान्तोदात्तविधिसंभवात् कथमसमर्थात् तद्धितोऽनेन ज्ञाप्यते, अत आह — **वत्सेभ्यो न हित इति**। 'गुणप्रतिषेधे' इत्युक्तेः प्रत्ययार्थनिषेध एवायं स्वरविधिरित्यर्थः। तथापि भावार्थतद्धितस्य सापेक्षादुत्पत्तिः कथं स्यात्, अत आह — **सामान्येनेति**। एतावता प्रबन्धेनोक्तमुपसंहरति — **तदेवमिति**। **इदानीमिति**। पूर्वं न्यायेनैव नञ्समासस्य पूर्वत्वे सिद्धे इदं नियमार्थमित्युक्तम्। इदानीं ज्ञापकेन त्वतलोः पूर्वत्वे सिद्धे समासस्य पूर्वभावोऽनेन विधीयत इत्यर्थः। सूत्राभावे चतुरादिप्रतिषेधः कथम्, अत आह — **चतुरादिभ्य इति**। समासानन्तरं तु ष्यञ्निष्यत इत्याह — **कृते त्विति**। ननु नञ्समासात् ष्यञि [7]'यथातथा' इति सूत्रं संगच्छते। नञ्नः परयोर्यथातथयथापुरयोः पर्यायेण पूर्वोत्तरपदयोर्वृद्धिरिति तदर्थात्। तथा च कथं ज्ञापकात् पूर्वं प्रत्ययोऽङ्गीक्रियते, अत आह — **यथातथेति**। **विवक्षाभेदेनेति**। कदाचित् समासस्य पूर्वत्वं कदाचित् प्रत्ययस्येति विवक्षाभेदः। विवक्षाभेदमेवाह — **यदेति**। पूर्वं प्रत्यये याथातथ्यमिति स्थिते पश्चान्नञ्समासे 'अयाथातथ्यम्' इति सिध्यति। पूर्वं समासे पश्चात् प्रत्यये 'आयथातथ्यम्' इति तत्सूत्रं न कर्तव्यमित्यर्थः। अपतिशब्दात् [8]'पत्यन्त' इति यक्प्रसङ्गं निराह — **न पत्युरिति**। **त्वतलभ्यामिति**। त्वतलोर्नञ्समासस्य च प्राप्तौ पूर्वं समासः, पश्चात् त्वतलौ। प्रयोगानुसारेणान्यत्रापि व्यवस्थामाह — **न पटोरिति**। अपाटवमित्यत्र [9]'इगन्ताच्च' इत्यण्। अमानुष्यकमित्यत्र [10]'योपधात्' इति वुञ्। अद्व्हायनमित्यत्र [11]'हाय-

---

[1] परिभाषा ३१.

[2] इमनिचश्चित्त्वादित्यर्थः।

[3] तत्पुरुषे तुल्यार्थेत्यादिनाव्ययपूर्वपदप्रकृतिस्वर आद्युदात्तत्वमत्र नञ्स्वरः।

[4] त्वप्रत्यये ऽन्तोदात्तत्वम्, तल्प्रत्यये लितीति प्रत्ययात् पूर्वस्योदात्तत्वमित्यर्थः।

[5] पा. सू. ६.२.१५५.

[6] पा. सू. ५.१.१.

[7] पा. सू. ७.३.३१. 'यथातथ' इति ह्रस्वान्तपाठः काशिकादिसंमतः। भाष्ये 'यथातथाभावः' इति विग्रहप्रदर्शनाद् दीर्घान्त एव सूत्रपाठो युक्त इति मन्यते नागेशः। तत्त्वबोधिनीमूले कौमुद्यां दीर्घान्ततयैव पाठो दृश्यते।

[8] पा. सू. ५.१.१२८.

[9] पा. सू. ५.१.१३१.

[10] पा. सू. ५.१.१३२.

[11] पा. सू. ५.१.१३०.

नान्त' इत्यण्। सर्वत्र प्रत्ययानन्तरं [1]समासान्नञो वृद्ध्यभावः। **सापेक्षादिति**। समासात् पूर्वं ज्ञापकात् ष्यञ्। उक्तमेव सुखग्रहणार्थं संक्षिप्याह — **सूत्रेऽस्मिन्निति। त्वतलौ त्विति**। [2]'त्वतलभ्यां नञ्समासः' इति वचनात्। प्रयोगानुसारित्वं संक्षिपति — [3]**क्वचित्त्विति**॥

[४, ९७–१००]

(नारायणीयम्) आचार्यदेशीय इति। न त्वाचार्यः, बाध्यत्वादस्य पक्षस्य। [ननूत्तरेषां] भावप्रत्ययानां कस्मादनेन प्रतिषेधः स्यादित्यत आह — **अधिकारादिति**। **पृथ्वादि[प्रभृति]भ्य इति**। पृथ्वादिदृढादिप्रभृतयो गणे पठिताः, स्तेनादयः सूत्रे। [**नञ्पूर्वादिति**]। नञ्पूर्व[ाद् द्विहायनशुचि-] रमणीयादेरणादिप्र[सङ्ग इत्यर्थः।] हायनान्तादिसूत्रेषु कथं प्रतिषेधसंबन्धः स्यादित्यत आह — **स एवेति**। ज्ञापनप्रकारमाह — **अत्र प्रदेश इति**। **अन्यपूर्वाच्चेति**। अनेनोत्तरं [पक्षं संगृह्णाति।] न सूत्रेण सापेक्षादु[त्तरो भावप्रत्ययः प्राप्नोतीत्य] त्राह — **प्रसङ्गाभावादिति**। उत्तरो भावप्रत्ययो नञर्थापेक्षत्वेऽपि भवतीति विशेषः कथं ज्ञाप्यत इत्यत्राह — **नञ्पूर्व [स्येति**। ननु सा]पे[क्षात् तद्धिता भवन्तीत्युक्तौ वस्त्रमु]पगोरपत्यमित्यादावपि तद्धितः स्यादित्याह[4] — **नञर्थेति**। **इदानीं विध्य[र्थमिति।]** नञर्थापेक्षात् पूर्वं तद्धितो भवतीति ज्ञाप[नात् त्वतलौ नञ्समासात् पूर्वं स्या-] तामिति विध्यर्थमुपसं[ख्यानमित्यर्थः। ननु पू]र्वोक्ताज्ज्ञापकान्न चतुरस्य भाव इति पूर्वं ष्यञि सत्यचातुर्यमित्याद्यनिष्टं प्राप्नोती[त्यत आह —] **चतुरादिभ्यस्त्विति**। अन्यत्रा[पि] भाष्यका[रेणेत्थमङ्गीकृतमित्याह — **यथे]ति**। नञ उत्तरयोर्यथातथा[यथापुरशब्दयोः पूर्वपद]स्योत्तरपदस्य चाचामादेरचो वृद्धिर्ञिदादौ तद्धिते परतोऽनेन विधीयते। एतत् सूत्रं भाष्ये विवक्षाभेदमाश्रित्य प्रत्याख्यातम्। [कथमि]त्याह[5] — **यदा पूर्वमिति**। नन्वेवं [पति]शब्दाद्यक् कस्मान्न भवतीत्यत [आह — **न पत्युरिति**। **इति वचनादिति**। ज्ञाप]कादन्यो भावप्रत्ययो नञ्समासात् पूर्वमेव भवति, अस्मात्तु वचनात् कृते नञ्समासे त्वतलाविति विभागः। एतदेव स्फोरयति — **न पटोर्भाव इति**। **अशुचिशब्दादिति**। यदि पूर्वमणि सति पश्चात् समा[सस्तदाङ्गा]नन्तर्भावाद्वृद्धिविधानमनुपपन्नं स्यात्। तस्मात् पूर्वं निषेधविवक्षया नञ्समासे सति प्रत्यय एष्टव्य इत्यर्थः। अत एव वृद्धिसिद्धिरित्याह — **नञः शुचीति**। अशौक्ल्यमित्यादौ तु नैवमित्याह — **न शुक्लस्येति**। उक्तस्य विवक्षाभेदस्य लक्ष्यानुसारेण विषयविभागं दर्शयति — **तदेवमिति**। **क्वचिद् भावेति**। अपाटवमित्यादौ। [6]**क्वचित्त्विति**। 'अयाथातथ्यम्' इत्यादौ। **क्वचित्पूर्वमिति**। आशौचमित्यादौ॥

पृथ्वादिभ्य इमनिज्वा ५.१.१२२.

[४, १००–१०१]

(उद्द्योतनम्) वक्ष्यमाण इति। 'नैतदस्ति' इत्यादिना। **अण्समावेश इति**। पृथ्वादिभ्यः

---

[1] समासान्न वृद्ध्यभावः — अ, ऋ, लृ.
[2] का. वा. ५.१.११९–८.
[3] प्रदीपे 'क्वचित्पूर्वम्' इत्यत्र 'क्वचित्तु पूर्वम्' इत्यन्नंभट्टपाठ इति भाति।
[4] इत्यत आहेत्यर्थः।
[5] इत्यत आहेत्यर्थः।
[6] प्रदीपे 'क्वचित्पूर्वं भावविवक्षा' इत्यत्र 'क्वचित्तु पूर्वं भावविवक्षा' इति पाठोऽभिमतः।

[1]'इगन्ताच्च' इत्यण्समावेशार्थम्। उपलक्षणमिदम्, चण्डखण्डादिभ्यः ष्यञो [2]बालवत्सादिभ्यो वयोलक्षणस्याञश्च समावेशार्थमित्याहुः। ननु महाविभाषयैव वाक्यवदुत्सर्गोऽपि किं न स्यात्, अत आह — **यत्रेति**। महाविभाषया द्वयोरप्यत्र विकल्पः। अत्र ज्ञापकमाह — **लिङ्गं चेति**। ज्ञापनस्य प्रयोजनं तु पूर्वकाय इत्यत्र महाविभाषयैकदेशिसमासे विकल्पिते 'पूर्वः कायस्य' इति वाक्यमेव भवति, न तु षष्ठीसमासः॥

[४, १००–१०१]

(नारायणीयम्) ननु महाविभाषयेमनिचि विकल्पिते सति [3]'इगन्तात्' इत्यण् भविष्यतीति किं वावचनेनेत्यत आह — **यत्रेति**। **लिङ्गं चेति**। [4]'पारे मध्ये' इत्यत्र षष्ठीसमासाभ्यनुज्ञानार्थं वाग्रहणम्। [5]'पीलाया वा' इत्यत्र ढगनुज्ञानार्थम्। यदि महाविभाषयापवादे विकल्पिते उत्सर्गः स्यात्, उभयत्र वावचनमनर्थकं स्यात्। कृतं तु महाविभाषया वाक्यमेवानुज्ञायत इति ज्ञापयतीत्यर्थः॥

गुणवचनब्राह्मणादिभ्यः कर्मणि च ५.१.१२४.

[४, १०१]

(उद्द्योतनम्) प्रत्ययान्तोच्चारणस्य कृत्यमाह — **प्रत्ययान्तेति**। चतुर्वेदशब्दस्य संज्ञात्वात् [6]'दिक्संख्ये संज्ञायाम्' इति समासमभिप्रेत्याह — [7]**चतुर्वेदा एवेति**। संज्ञात्वानङ्गीकारे त्वाह — **अथवेति**। [8]'विद्यालक्षण' इति [9]'सर्वसादेः' इति च वार्तिकद्वयं [10]'क्रतूक्थादिसूत्रान्ताट्ठक्' इति सूत्रस्थम्। **चतुर्विद्य इति**। [11]'गोस्त्रियोः' इति ह्रस्वः। षित्करणस्य प्रयोजनमाह — [भाष्ये] **आर्हन्तीति**। उदाहरणव्याजेनान्यत्रापि ङीषमुदाहरति — **तयेति**॥

[४, १०१]

(नारायणीयम्) ननु 'चतुर्वर्णादिभ्यः' इति वक्तव्ये प्रत्ययान्तपाठे किं प्रयोजनमित्यत आह — —**प्रत्ययान्तेति**। भाष्ये सिद्धय इति शेषः। [12]**चतुर्वेद एवेति**। चतुरो वेदानधीत इति तद्धि-

---

[1] पा. सू. ५.१.१३१.
[2] 'बालवत्सादिभ्यः' इत्यस्यानन्तरं चकारोऽधिकः — अ, ऋ, लृ.
[3] पा. सू. ५.१.१३१.
[4] पा. सू. २.१.१८.
[5] पा. सू. ४.१.११८.
[6] पा. सू. २.१.५०.
[7] प्रदीपपुस्तकेषु 'चतुर्वेदमेव' इति दृश्यते। 'दिक्संख्ये' इति समासाभिधानात् 'चतुर्वेदा एव' इति पाठोऽभिसंहितोऽन्नंभट्टेनेति भाति। 'चतुर्वेद एवेति' इति — 'अ, ऋ, लृ.' कोशेषु प्रतीको दृश्यते।
[8] महाभाष्यम् ४.२.६०.
[9] श्लो. वा. ४.२.६०.
[10] पा. सू. ४.२.६०.
[11] पा. सू. १.२.४८.
[12] प्रदीपे 'चतुर्वेदमेव' इत्यत्र 'चतुर्वेद एव' इति पाठोऽभिमतः।

तार्थे द्विगुः, अणः [1]'सर्वसादेः' इति लुक्। [2]**पूजाद्यर्हाभिधायीति**। पूजादानादिकं योऽर्हति तमभिधत्त इत्यर्थः। अर्हतो भावः कर्म वा **आर्हन्त्यम्**॥

स्तेनाद्यन्नलोपश्च ५.१.१२५.

[४, १०१–१०२]

(उद्द्योतनम्) ननु [3]'यस्य' इत्यकारलोपेऽच्परत्वाभावात् कथमयादेशः, अत आह — **यस्येति**। [4]'नानर्थकेऽलोऽन्त्यविधिः' इत्यन्त्यस्य न भविष्यति, अत आह — **नानर्थक इति**। **प्रयोजनेति**। [5]'हलि लोपः' इत्यनो नकारलोपेनैव 'आभ्याम्' इति रूपसिद्धेः सा परिभाषा निष्प्रयोजनेति भावः। ननु नस्य लोप इति स्थानषष्ठ्या अन्त्येऽल्युपसंहारात् कथं सर्वादेशः, अत आह — **अलोऽन्त्यस्येति**। **अनुसंहारः** उपसंहारः॥

[४, १०१–१०२]

(नारायणीयम्) ननु वर्णमात्रलोपेऽपि [6]'यस्य' इति लोपे सत्यचः परत्वाभावादयादेशो न भविष्यतीत्यत आह — **यस्येत्यकारलोपस्येति**। [7]'[अलोऽन्त्य]स्य' इत्यस्मिन् जीवत्यारम्भसामर्थ्यं [8]'किमिति करोतीत्यत आह — **अलोऽन्त्यस्येति**॥

हायनान्तयुवादिभ्योऽण् ५.१.१३०.

[४, १०२]

(विवरणम्) क्वचित्त्विति। इकारस्य तु [9]'यस्य' इति लोप इति भावः॥

[10]इति भाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्

[11]॥ पादश्च समाप्तः॥

---

[1] महाभाष्यम् ४.२.६०. द्विगोरित्यनेनेति भावः।
[2] प्रदीपे 'पूजाद्यर्थाभिधायी' इत्यत्र 'पूजाद्यर्हाभिधायी' इति पाठोऽभिमतः।
[3] पा. सू. ६.४.१४८.
[4] परिभाषा १०५.
[5] पा. सू. ७.२.११३.
[6] पा. सू. ६.४.१४८.
[7] पा. सू. १.१.६२.
[8] किं करोतीति विवक्षितम्।
[9] पा. सू. ६.४.१४८.
[10] इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते भाष्य — व.
[11] एतावत्पर्यन्तमेवास्ति — 'ल' कोशे।

[४, १०२]

(**उद्द्योतनम्**) 'घलोपश्च' इति पाठं संगमयति — **यदेति**। **क्वचित्त्विति**। तत्र यलोपे [1]'यस्य' इतीकारलोपे 'श्रौत्रम्' इति सिध्यति ॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने पञ्चमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः ॥

[४, १०२]

(**नारायणीयम्**) ननु श्रोत्रियशब्दे घशब्दो नोपलभ्यते, यस्य लोपो विधीयत इत्यत्राह — **यदेति**। **घशब्देनेति**। घशब्देनादेशरूपं लक्ष्यत इत्यर्थः। [**क्वचित्त्विति**। अस्मिंस्तु] पाठे लक्षणा नाश्रयणीया। यशब्दस्य संघातस्य लोपः, वर्णलोपे [2]'यस्य' इति लोपे सति तस्य स्थानिवत्त्वाद्घणादेशप्रसङ्गात् ॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य
प्रथमे पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः ॥

---

[1] पा. सू. ६.४.१४८.

[2] पा. सू. ६.४.१४८.

पञ्चमाध्यायस्य द्वितीयपादे प्रथममाह्निकम्

विभाषा तिलमाषोमाभङ्गाणुभ्यः ५.२.४.

[४, १०३–१०५]

(**विवरणम्**) ननु यदि 'धान्यानां भवने क्षेत्रे' इत्येतावता संबद्धं खञ्ग्रहणमनुवर्तते, अतः परस्परनियमात् खञ्ग्रहणमिव 'भवने क्षेत्रे' इत्येतदपि [1]'व्रीहिशाल्योः' इत्यादौ संबध्येत। अतश्च ढगादिः स्वार्थे स्यात्, अत आह — **धान्येति**॥

[४, १०३–१०५]

(**उद्द्योतनम्**) विभाषाग्रहणेन पक्षे वाक्यमेव प्रतीयते, नोत्सर्गः, अत आह — **[महा]विभाषयेति**। **निमित्तेति**। धान्यत्वं प्रत्ययनिमित्तम्। विभाषाग्रहणमुत्सर्गप्रापकं स्यात्, अत आह — **विभाषेति**। अपवादेनापोदितस्य पक्षे प्रतिप्रसवमात्रं तेन क्रियत इत्यर्थः। **तद्वन्त इति**। मत्वर्थाकारेण, न तु लक्षणया, 'मे' इत्यस्य षष्ठ्यन्तस्य सप्तम्यन्तत्वासंभवात्। ननु 'च मे' इति पदद्वयम्, [2]तस्मात् कथं मत्वर्थीयाकारः, अत आह — **अथवेति**। मकारान्तानुकरणत्वे 'चमेषु' इति कथं स्यात्, अत आह — **आगन्तुनेति**। मान्तानुकरणे [3]सुखोच्चारणार्थमेवाकारः प्रक्षिप्त इत्यर्थः। **छस्य लुगिति**। अध्यायानुवाकयोरभिधेययोर्मत्वर्थे यश्छस्तस्य लुग्विधानसामर्थ्याच्छः। [4]पूर्वसूत्रेण तु 'सूक्तसाम्नोः' इत्युक्तेरध्यायानुवाकयोर्न प्राप्यते। एवं मकारान्तानुकरणान्मत्वर्थीयाकारेणापि [5]चमशब्दोऽनुवाकपरः सिध्यतीति ज्ञेयम्। भावे [6]घञ्मादायाह — **धान्यग्रहणेनेति**। कर्मणि घञ्मादायाह — **अथवेति**। संबन्धानुवृत्ताविष्टसिद्धिमाह — **तत इति**। **प्रत्ययेनेति**। अर्थाकाङ्क्षिणा। अचेतनस्य गत्यसंभवादाह — **यत्रैवेति**। **अर्थित्वं** प्रयोजनवत्त्वम्। उत्सर्गसाम्यं [7]प्रकृते दर्शयति — **उत्सर्गस्येति**। ननु ढग्यतोः [8]खञ्पवादत्वात् 'यथोत्सर्गेण' इत्युक्तिरयुक्ता, अत आह — **धान्यानामित्यनेनेति**। **तत्र** तयोः [9]सूत्रयोः। अनुवृत्त्या संनिहितस्य विधानार्थत्वस्यापि संभवादुत्सर्गत्वे निश्चयो नास्ति। तथा च सामान्यविधित्वेनोत्सर्गसाम्येऽप्यनुवृत्तिलक्षणवैधर्म्यदृष्टान्तत्वोपपत्तिरित्यर्थः। 'एतदेव[10] ज्ञापयति' इत्यत्रैतच्छब्दार्थमाह — **विभाषाग्रहणमेवेति**। केवलयौगिकत्वे गवादावपि धान्यशब्दप्रयोगप्रसङ्गः, अत आह — **योगरूढिरिति**। चमकेऽपाठात् कथं धान्यत्वम्, अत आह — **चमकेष्विति**। **अधान्या-**

---

[1] पा. सू. ५.२.२.

[2] वाक्यात्मकत्वेन समासग्रहणकृतनियमेन प्रातिपदिकत्वाभावादित्यर्थः।

[3] सुखोच्चारणार्थमेकारः — अ, ऋ, लृ.

[4] अध्यायानुवाकयोरित्येतस्मात् पूर्वसूत्रेण मतौ छः सूक्तसाम्नोरित्यनेनेत्यर्थः।

[5] चमेशब्दः — अ, ऋ, लृ.

[6] घञमाह — अ.

[7] प्रकृतेर्दर्शयति — अ, ऋ, लृ.

[8] खञोऽपवादत्वात् — अ, ऋ, लृ.

[9] 'सूत्रयोः' इत्यस्मादनन्तरम् इतिशब्दोऽधिकः — अ, ऋ, लृ.

[10] भाष्ये 'एव'शब्दो न दृश्यते।

न्यपि अश्मादीनि। [धान्यान्यपि] कानिचित् कुल्माषादीनि न पठ्यन्ते। भाष्ये श्रुतौ पाठाभावेऽपि स्मृतौ पाठोऽस्तीति 'अथवा' इत्यनेनोक्तम्॥

[४, १०३–१०५]

(**नारायणीयम्**) ननु वाक्यानुज्ञानार्थं विभाषाग्रहणं स्यादिति, नेत्याह — **महाविभाषयेति**। ननु विभाषाग्रहणसामर्थ्यादधान्यवाचिनोऽप्युमादेः खञ् भविष्यतीत्यत आह — **विभाषाग्रहणं त्विति**। **चमेशब्देन तद्वन्त इति**। चमेशब्दसाहचर्यात् तद्वन्तोऽनुवाका लक्षणयोच्यन्त इत्यर्थः। योगादेव चमशब्दस्यानुवाकवृत्तित्वोपपत्तेर्लक्षणा नाश्रयणीयेत्याशयेन पक्षान्तरमाह — **अथवेति**। यद्य यनु[1]वृतिरकर्मकः, तथाप्यत्रानुरोधनार्थत्वात् सकर्मकत्वात् कर्मसंबन्धोपपत्तिरित्याह — **संबन्धमनुरोत्स्यत इति**। **संबध्यत इति संबन्धमिति**। [2]'अकर्तरि च कारके' इति कर्मणि घञ्, तदन्तस्याभिधेयवल्लिङ्गत्वान्नपुंसकत्वमिति भावः। संबन्धानुवृत्त्याश्रयणे कथं दोषाभाव इत्यत्राह — **तत इति**। नन्वेवं 'भवने क्षेत्रे' इत्येतदपि व्रीह्यादिभिर्न संबध्येतेत्यत्राह — **भवन इति**। **अभिधायकेनेति**। अभिधायकस्य प्रत्ययस्याभिधेयेऽर्थित्वात् संबन्धोपपत्तिं दर्शयति। नन्वधिकारेषु नदीप्रवाहन्यायस्य युक्तत्वात् कथं मण्डूकप्लुतिसाम्यमुक्तमित्यत आह — **यत्रैवेति**। [3]'यत्र किंचित् सामान्यं कश्चिच्च विशेषः [तत्]सदृशतायाः' इत्युक्तां नीतिमनुसृत्योत्सर्गापवादसाम्यं खञादीनां दर्शयति — **उत्सर्गस्येति**। यथा [4]'कर्मण्यण्' इत्यणोऽनाकारान्तेभ्यः प्रवृत्त्या सावकाशत्वादाकारान्तधातुविषये संदिग्ध[त्वात् [5]'आतोऽनुपसर्गे कः' इति कप्रत्ययस्य तद्विष]ये प्रवृत्तिरसंदिग्धेति तेनासौ बाध्यते, एवमत्रापीत्यर्थः। एवं सामान्यमुक्त्वा विशेषमाह — **धान्यानामित्यनेनेति**। एतच्छब्दार्थमाह — **विभा[षाग्रहणमिति। योग]रूढिरिति**। पङ्कजादिवद्यो[गरूढिरित्यर्थः। केवलयो]गाश्रयणे सुवर्णादेरपि धान्यत्वप्रसङ्गादित्यर्थः। ननु चमेष्वपाठादुमाभङ्गयोरधान्यत्वमुक्तमित्यत्राह — [6]**चमेषु त्व [धान्यान्ययीति।] परिगणनार्थेति**। शण [शब्देनो]माभङ्गयोरपि पाठाद्धान्यत्वाद्यता मुक्ते खञः सिद्धिः॥

यथामुखसंमुखस्य दर्शनः खः ५.२.६.

[४, १०५]

(**उद्द्योतनम्**) संपूर्वस्य मुखस्य 'संमुखीनः' इत्यादिसिद्धेः किं निपातनेन, अत आह — **समिति**। **अर्थसंगतीति**। समित्यस्य सम्यक्त्वमर्थः, न तु समत्वमित्यर्थः। अन्यत्रापि समशब्दस्यान्तलोपशङ्कां निराह — **प्रत्ययेति**। ननु प्रतिबिम्बाभावेऽप्यभिमुखवस्तुमात्रे 'संमुखीनः' इति प्रयोगः कथम्, अत आह — **संमुखीनेति**। गौणस्तत्र प्रयोग इत्यर्थः॥

---

[1] इका निर्देशोऽयं बोध्यः।
[2] पा. सू. ३.३.१९.
[3] महाभाष्यम् २.१.५५. भाष्यार्थानुवादोऽत्र।
[4] पा. सू. ३.२.१.
[5] पा. सू. ३.२.३.
[6] प्रदीपे 'चमकेषु तु' इत्यत्र दृश्यते।

[४, १०५]

(नारायणीयम्) समं मुखमिति। समशब्द[:सर्वपर्यायः। यत्रेत्य]नेन 'दर्शनः' इत्य[त्राधिकरणे ल्युडिति दर्शितम्। **प्रतिबिम्ब]मुखादेराश्रये** आदर्शजलादौ। **प्रयोगदर्शनादिति**। रूढ्यर्थत्वान्निपात[नस्येति भावः। **सं]शब्दस्येति**। सर्व[र्थे सं]शब्दस्य वृत्तिर्न दृश्यत [इत्यर्थः। वाक्ये तु संमुखशब्दस्य प्रयोगो नास्तीत्य[ाह — **प्रत्ययसंनियोगेनेति**। कथं [तर्हि 'संयुगे संमुखीनं तम्' इत्या]दिप्रयोग इति, तत्राह — **संमुखीनादर्शादीति**॥

अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ५.२.९.

[४, १०५–१०६]

(उद्द्योतनम्) नन्वयानययोर्गमनप्रतिषेधयोः प्रतीतेरज्ञानं कथम्, अत आह — **अयनमिति**। विरुद्धार्थद्वयस्य नेय इति प्रत्ययार्थेन संबन्धो [1]न संभवतीत्यर्थः। किमपेक्षया प्रदक्षिणाप्रदक्षिणत्वे, अत आह — **एकेति**। [2]यं.गेन कथमयं विषयविशेषो लभ्यते, अत आह — **रूढीति**। परैः शारैरिति विवक्षितमित्याह — **द्वितीयेति**। परैरनाक्रान्तं पदं कीदृशम्, अत आह — **ससहायस्येति**। यस्मिन् पदे शारद्वयमस्ति तत् परकीयेणैकेन शारेण नाक्रम्यते। एकश्चेत् तं बाधित्वा तत् पदमाक्रम्यत इत्यर्थः। अयानययोः परस्परानात्मकत्वेन कर्मधारयासंभवादाह — **अयसहित इति**। **अथवेति**। अयानयसमुदायोऽयशब्देनानयशब्देन चोच्यत इति सामानाधिकरण्योपपत्तिः। [3]यथा — ईषत्कृतमीषदकृतं च वस्तूभाभ्यामुच्यत इति कृताकृतमिति समानाधिकरणसमासस्तद्वदित्यर्थः। तत्र [4]"क्तेन नञ्विशिष्टेनानञ्' इति [5]लक्षणवशात् तथा, नात्र तथा किंचिल्लक्षणमस्तीत्यत आह — **समाहारेति**। ननु 'अयानयं नेयः' इति द्वितीयान्तात् प्रत्ययविधानमयुक्तम्, नेय इति कृत्येन कर्मत्वाभिधानेन द्वितीयान्तत्वासंभवात्, अत आह — **नयतेरिति**। [6]'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्। अप्रधाने दुहादीनाम्' इति वचनात्। प्रयोगनियममाह — [7]**तत्र केचिदिति**। तत्र नियामकमाह — **यो हीति**। **अन्यः** एकपार्श्वचारी॥

[४, १०५–१०६]

(नारायणीयम्) ननु वृद्धव्यवहारादेव शब्दार्थपरिज्ञानसत्त्वात् 'न ज्ञायते' इत्ययुक्तमित्याशङ्क्य प्र]ष्टुराशयमाह — **अ[यनमिति**। "एर]च्'। **एकद्यूतकारापेक्षयेति**। [तत्राभिमुखयोः क्रीड]तोः कितवयोर्यदेवैकं प्रति प्रदक्षिणं गमनं तदेवेतरं प्रति प्रसव्यम्। चतस्रो वीथय इति पक्षे त्वेकमेव [8]प्रत्ययानयत्वं संभवति। **रूढिवशादिति**। रूढ्या ह्ययमयानयशब्दः शाराणां

---

[1] न भवतीत्यर्थः — अ.
[2] योगे कथमयं — अ.
[3] तथा — अ.
[4] पा. सू. २.१.६०.
[5] लक्षणवत्तदा — अ; लक्षणवशात्तदा — ऋ.
[6] महाभाष्यम् १.४.५१.
[7] 'तत्र केचिदिति। तत्र नियामकमाह' इति नास्ति — अ.
[8] पा. सू. ३.३.५६.
[9] प्रति, अयानयत्वमिति छेदः।

प्रदक्षिणप्रसव्यगमने। शारा द्यूतसाधनविशेषाः श्वान इति प्रसिद्धाः। शृणन्ति हिंसन्त्येभिर्द्यूतकाराः परस्परमिति करणे घञ्। कथं पुनरनध्यासनमध्यासनं वा शारैर्गृह्णामीत्यत्राह — **ससहायस्येति**। **शारेणेति**। परकीयेण शारेणेत्यर्थः। [1]**खाद्यत इति**। शुनां खादनमुचि[तमिति भावः।] नन्वयानयशब्दयोः सामानाधिकरण्याभावात् कथमत्र समास इत्यत आह — **अयसहित इति**। **अथवेति**। एकदेशवचनाभ्यामयानयशब्दाभ्यां गमनसमुदायस्याभिधानात् [2]'विशेषणं विशेष्येण' इति समानाधिकरणसमासोपपत्तिरित्यर्थः। **समाहारद्वन्द्वो वेति**। अस्मिन् पक्षे लोकाश्रयत्वाल्लिङ्गस्य पुँल्लिङ्गता। **नयतेर्द्विकर्मकत्वादिति**। [3]'नीवह्योर्हरतेश्चैव'[4] इति वचनात्। **प्रधाने त्विति**। तथा चोक्तम् — [5]'प्रधानकर्मख्याख्येये लादीनाहुर्द्विकर्मणाम्' इति। **फलकशिरस्थस्यैवेति**। आरम्भकाले यत्र स्थाने शाराः स्थाप्यन्ते तच्छिरः, तत्र स्थितस्येत्यर्थः। **एकपार्श्व एवेति**। परकीयेण शारेण खाद्यमानत्वान्न पार्श्वान्तिरमानीयत इत्यर्थः। **पार्श्वादिति**। परपार्श्वादित्यर्थः। **पार्श्वान्तरमिति**। आत्मीयमित्यर्थः॥

परोवरपरम्परपुत्रपौत्रमनुभवति ५.२.१०.

[४, १०६–१०७]

(**उद्द्योतनम्**) उकारवचनमिति भ्रमं निराह — **परशब्दस्येति**। ओकारनिपातनप्रयोजनमाह — **तत इति**। अत्र मतभेदमाह — **तत्रेति**। **सामान्येन** खप्रत्ययरहितस्थलेऽपि। तस्य प्रयोजनमाह — **तेनेति**। **पारम्पर्यमिति**। अत्र [6]परपरतरशब्दस्य 'परम्पर' इति निपात्यते। परांश्च परतरांश्चानुभवति परम्परीणः। तथा च ष्यञन्तेऽपि निपातनं भवतीत्यर्थः। निपातनमन्तरेणापि पारम्पर्यं साधयति — **परम्परेति**। **स्वार्थ इति**। [7]'वर्तमानसामीप्ये' इति ज्ञापकाच्चातुर्वर्ण्यादेराकृतिगणत्वाद्वा। तत्र हेतुः — **प्रत्ययेति**॥

[४, १०६–१०७]

(**नारायणीयम्**) ओत्वपक्षे परशब्देन पूर्वपदमुच्यत इत्याह — **परशब्दस्येति**। कोऽयं शकन्धुन्याय इत्यत्राह — **शकन्ध्वादिष्विति**। उत्वपक्षे परस्य पदस्य, उत्तरपदस्येति यावत्। तदाह — [8]**अवरशब्दादेरिति**। **अन्ये त्विति**। अयं पक्षो बहुभिः परिगृहीतत्वाद्युक्ततरत्वादन्ते कथितः। **अव्युत्पन्नमिति**। प्रबन्धस्य वाचकम्। अत एव स्त्रीलिङ्गत्वमेकवचनान्तत्वं चोपपद्यते। **तस्मात्स्वार्थ इति**। चातुर्वर्ण्यादित्वात्॥

---

[1] श्लोके 'परकीयेण बाध्यते' इति प्रदीपे पाठो दृश्यते। 'परकीयेण खाद्यते' इति पाठोऽभिमतोऽत्र।

[2] पा. सू. २.१.५७.

[3] महाभाष्यम् १.४.५१.

[4] 'हरतेश्चापि' इति भाष्ये दृश्यते।

[5] महाभाष्यम् १.४.५१.

[6] परपरशब्दस्य — अ, ऋ, लृ.

[7] पा. सू. ३.३.१३१.

[8] प्रदीपे 'अवरशब्दस्यादेः' इत्यत्र 'अवरशब्दादेः' इति पाठोऽभिमतः।

समां समां विजायते ५.२.१२.

[४, १०७–१०८]

(उद्द्योतनम्) विपूर्वस्य जनेः प्रसवोऽर्थ इत्याह — **प्रसूयत इति**। यकारस्याभावात् कस्यालुक्, अत आह — **तत्रेति**। पदसमुदायस्याप्रातिपदिकत्वात् कथं प्रत्ययः, अत आह — **वचनादिति**। ननु सुपो लुकि यकारस्यापि लोपार्थं यलोपवचनं स्यादिति कथं तेन सुपोऽलुक्सिद्धिः, अत आह — **याट इति**। तर्हि 'समायां समायां विजायते' इति सूत्रन्यासः स्यात्, अत आह — भाष्ये **अनुत्पत्ताविति**। 'अनुत्पत्तौ' इति विग्रहवाक्यमुच्यत इत्याह — **वाक्य इति**। **तेन** 'वा यलोप'वचनेन। **द्वैरूप्यं** विग्रहवाक्यस्येत्यादिः। तत्तु भाष्ये दर्शितम्। [1]अत्र " 'समां समाम्' इत्यत्यन्तसंयोगे द्वितीया। 'विजायते' इति गर्भधारणमुच्यते। [2]तेन द्वितीयान्तसमुदायात् प्रत्ययः" इति काशिका भाष्यवार्तिकविरुद्धा। जनेः प्रादुर्भाववाचिनो धारणवाचित्वं च क्लिष्टम्॥

[४, १०७–१०८]

(नारायणीयम्) अत्र केचिदाहुः — गर्भधारणे विजनिर्वर्तते। **विजायते** गर्भं धारयतीत्यर्थः। दृश्यते च प्रयोगः [3]'स विजायमानो गर्भेणाताम्यत्' इति। गर्भधारणेन च कृत्स्ना समा व्याप्यत इत्यत्यन्तसंयोगे [द्वितीया।] समां समां विजायते समांसमीना गौः। पूर्वपदे सुपो लुगभावो निपातनात्, इति। एतद् भाष्यवार्तिक[ननुगु]णमिति तदनुगुणमर्थमाह — [**विजायत इति**]। अन्यथा सप्तम्यन्तात् प्रत्ययोत्पत्त्यभावाद्यलोप [वचनमनुप]पन्नं स्यात्। [इदानीं] तु तदुपपद्यत [इति। **पदसमुदा]यात्प्रत्ययो वचनादिति**। सुबन्तसमुदायस्याप्रातिपदिकत्वेऽपि वचनसामर्थ्यात् प्रत्ययो भवतीत्यर्थः। [4]**तत्रेति**। तद्धिते सतीत्यर्थः। **यलोपवचनादिति**। यलोपनिपातनादित्यर्थः। ननु निपातनाद्यलोपमात्रं भवतु, अलुक् तु सुपः कथं सिध्येदित्य[त आह — **याट इति**।] ननु [5]'सुपो धातु' इत्यनेनैव लुकः सिद्धत्वात् किमर्थमुत्तरपदस्थस्य सुपो लुग् विधीयत इत्यत आह — **यलोपेति**। सिद्धान्तिन आशयं दर्शयति — **तेनेति**। अनुत्पत्तिशब्देन यत्र प्रत्ययस्योत्पत्तिर्नास्ति तद्वाक्यमुच्यत इत्याह — **वाक्य इति**॥

आगवीनः ५.२.१४.

[४, १०८]

(उद्द्योतनम्) आङ्पूर्वाद् गोशब्दात् खप्रत्ययो निपात्यत इति प्रतीतेः प्रश्नायोगः, अत आह — **का प्रकृतिरिति। यो गवा भृत इति।** मह्यं गौः पयोऽर्थं कियन्तं कालं दीयते चेत् तस्याः

---

[1] काशिकोक्तमनुवदति — अत्रेत्यादिना।
[2] न द्वितीयान्त — अ, ऋ, लृ.
[3] तै. ब्रा. २.३.८.
[4] प्रदीपे 'तद्धितान्तत्वात्' इत्यत्र 'तत्र तद्धितान्तत्वात्' इति पाठोऽभिमतः।
[5] पा. सू. २.४.७१.

प्रत्यर्पणपर्यन्तं कर्म करिष्यामीति वचनाद् यो गवा भृत इत्यर्थः। एवं समुदायार्थमुक्त्वा प्रकृति-प्रत्ययार्थौ विविनक्ति — **तत्रेति**। **ह्रस्वत्व इति**। अव्ययीभावस्य नपुंसकत्वात् ह्रस्वत्वम्, उपसर्जनह्रस्वत्वं वा। **खो विधीयते** कर्मकारिणीत्यादिः। ओर्गुणेऽवादेशे च 'आगवीनः' इति सिध्यति॥

[४, १०८]

(नारायणीयम्) गवा भृत इति। इयं गौस्त्वयैतावन्तं कालं तृणदानादिना परिपाल्यताम्, अहमपि तदर्थं भवत इदं दास्यामीत्येवं यो वेतनेन क्रीतः स गवा हेतुना भृत इत्युच्यते। प्रतिदानं प्रत्यर्पणमित्याह — **प्रत्यर्पणादिति**। कथं पुनरयमर्थो लभ्यत इत्यत्राह — **तत्र वृत्तिविषय इति**। **ह्रस्वत्व इति**। [1]'गोस्त्रियोः' इत्यनेन। खप्रत्यय ईनादेशे च [2]'ओर्गुणः'॥

शालीनकौपीने अधृष्टाकार्ययोः ५.२.२०.

[४, १०९]

(उद्द्योतनम्) ननु लोकप्रसिद्धिविरोधात् कथमयमर्थ आशङ्क्यते, अत आह — **अस्यामिति**। मुख्यार्थत्यागप्रसङ्गात् कथमुत्तरपदलोपोऽङ्गीक्रियते, अत आह — **लोकेति**। शब्दानित्यत्वप्रसङ्गं निराह — **तत्रेति**। **क्रियायां** प्रवेशनावतरणक्रियायाम्। लोकप्रसिद्धार्थानुगमं दर्शयति — **अन्यत्रेति**। लिङ्गाच्छादनस्यावश्यकार्यत्वात् तत्र कौपीनशब्दः कथम्, अत आह — **अकार्येति**। ग्राम्यकर्म **अकार्यम्**। [3]'ऋतौ भार्यामुपेयात्' [4]'काममाविजनितोः संभवाम' इति श्रुतिस्मृतिदर्शनान्न ग्राम्यकर्माकार्यम्, अत आह — **अथवेति**। [यद्वा] लिङ्गे कौपीनशब्दप्रयोगो न दृश्यते, अत आह — **अथवेति**॥

[४, १०९]

(नारायणीयम्) अन्यत्र धृष्ट इति। शालायां भार्याजितत्वादप्रगल्भः, अन्यत्र तु प्रगल्भ एव यस्तस्याभिधानं प्राप्नोतीत्यर्थः। **लङ्घनादिकमिति**। आदिशब्देन मूत्रणादिकं गृह्यते। ननु मुख्ये संभवति गौणग्रहणमन्याय्यमित्याशङ्क्य मुख्यार्थलङ्घने हेतुमाह — **लोकप्रसिद्धेति**। गौणार्थतामेव दर्शयति — [5]**एतद्वृत्तिविषय इति**। ननु यः शालाप्रवेशनमर्हति तस्याधृष्टत्वमसिद्धमित्यत आह — **अन्यत्रेति**। एवं कूपावतरणमर्हतीत्यत्रापि योज्यमित्याह — **यदकार्यमिति**। **अकार्ययोग्यत्वादिति**। अकार्यस्य परदारगमनादेर्योग्यत्वादित्यर्थः। **तत्साहचर्यादिति**। लिङ्गसाहचर्यात्। ननु लक्षितलक्षणात्यन्तं जघना, लिङ्गाच्छादने च वासःखण्डे झटिति प्रतीतिः कौपीनशब्दादित्याशङ्क्य पक्षान्तरमाह — **अथवेति**। अदृष्टव्यत्वे हेतुः — **लज्जेति**। लज्जाहेतुर्दर्शनं यस्य स तथा तत्त्वात्। **अस्पृश्यत्वादिति**। लिङ्गाच्छादनस्य स[र्वदाशुचित्वादिति भावः॥]

---

[1] पा. सू. १.२.४८.
[2] पा. सू. ६.४.१४६.
[3] गौतमधर्मसूत्रम् ५.१.
[4] तै. सं. २.५.१.
[5] प्रदीपे 'तत्र वृत्तिविषये' इत्यत्र 'एतद्वृत्तिविषये' इति पाठोऽभिमतः।

व्रातेन जीवति ५.२.२१.

[४, १०९–११०]

(उद्द्योतनम्) ननु लोके व्रातशब्दस्य संघे प्रसिद्धत्वात् प्रश्नो न युक्तः, अत आह — **व्रात-शब्द इति**। व्रातीयेति। [1]"तस्येदम्' इत्यर्थे [2]'वृद्धाच्छः'। [3]पदानां कृत्यमाह — [4]**नानेति**। छप्रसङ्गं निराह — **अत एवेति**। प्रयोगनियममाह — [5]**तेषामेवेति**॥

[४, १०९–११०]

(नारायणीयम्) ननु व्रातकर्मणि वर्तमानाद् व्रातशब्दात् प्रत्ययः क्रियतामिति, तत्राह — **व्रात-कर्मणि चेति**। [6]"तस्येदम्' इत्यत्रार्थे वृद्धाच्छे सति व्रातकर्मणि व्रातीयशब्द एव स्यादित्यर्थः। 'नानाजातीयाः' इत्यादिविशेषणकृत्यं दर्शयति — **एकजातीयेति**। **अत एव निपातनादिति**। अणन्तो व्रातशब्दः सूत्र उपात्त इत्यस्माद् भाष्यादवसीयते। **यस्त्वन्य इति**। अनभिधानमत्र हेतुः॥

ह्यञ्ञ्वीनं संज्ञायाम् ५.२.२३.

[४, ११०]

(उद्द्योतनम्) पदसमुदायात् प्रत्ययानुत्पत्तिशङ्कां निराह — **ह्यःशब्दस्येति**। वृत्तौ ह्यः-शब्दः प्रत्यासन्नकालपर इत्याह — **ह्यश्शब्देनेति**। विकृतगन्धरूपे ह्यस्तनेऽपि न प्रयुज्यत इत्यर्थः॥

[४, ११०]

(नारायणीयम्) **प्रकृतिसंदेहादिति**। कात्र प्रकृतिः, यस्याम[र्थोऽ]नुसृतः स्यादिति प्रश्नः। प्रत्य[यः खञे]वेति विज्ञायत इति न तद्विषयः प्रश्नः। **सुप्सुपेति समास इति**। लक्षणान्तरा-भावात्। **दुह्यत इति** [**दोह इति**।] गोर्दोहो गोदोहः। [ह्यःशब्देन न] पूर्वेद्युरेवोत्पन्नः [प्रतिपाद्यत इत्याह — **ह्यःशब्देनेति**।] घृतशब्देन न घृतमात्रमुच्यते। किं तर्हि, तद्विशेष इत्याह — **तेनाविकृतेति**। [घृतं नव]नीतमित्यर्थः॥

... ...तथा.. ... ..महाकविभिः प्रयुज्य-माना दृश्यन्ते॥

---

[1] पा. सू. ४.३.१२०.

[2] पा. सू. ४.२.११४.

[3] पादानां — अ.

[4] 'नानाजातीया इत्येकजातीय' इति प्रदीप-ग्रन्थत्वेनाभिमतम्। तथैव निर्णयसागरमुद्रिते। हरयाणामुद्रिते तु 'नानाजातीया इति।' इति प्रतीकतया मुद्रितं दृश्यते।

[5] प्रदीपे 'तेषामेषामन्यतमः' इत्यत्र 'तेषामेवा-न्यतमः' इति पाठो निर्णयसागरमुद्रिते।

[6] पा. सू. ४.३.१२०.

पक्षात्तिः ५.२.२५.

[४, ११०]

(विवरणम्) एकयोगनिर्दिष्टानामित्यस्यैकसूत्रनिर्दिष्टानामित्यर्थ इति भ्रमं व्युदस्यति — **एकस्मिन्नर्थ इति** ॥

[४, ११०]

(उद्द्योतनम्) [१]वचनप्रयोजनमाह — **अन्यथेति**। नन्वेकसूत्रनिर्दिष्टानामप्येकदेशानुवृत्तिर्दृश्यते, [२]'बहुवचने झल्येत्' [३]'ओसि च इत्यत्रात[४] इत्येकदेशानुवृत्तिदर्शनात्, अत आह — **एकस्मिन्निति**। एकयोगशब्दोऽर्थपर इत्यर्थः। यथाश्रुतानुरोधेन सूत्रविवक्षायामनुपपत्तिमाह — **एकसूत्रेति**। [५]'अतो दीर्घो यञि' इत्यत्रात इत्यस्योत्तरत्रानुवृत्तिदर्शनादित्यर्थः। द्वन्द्वार्थस्यैकत्वात् कथमेकदेशानुवृत्तिः, अत आह — **अर्थाधिकारेति**। ननु शब्दस्यापि द्वन्द्वैकदेशस्य कथमनुवृत्तिः, अत आह — **तत्सदृशेति** ॥

[४, ११०]

(नारायणीयम्) एकस्मिन्नर्थ इति। समुदा[यरू]पे। **तेनेति**। त . . . [स]र्वत्र यस्येति यच्छ . . .प्यते। ततश्चायमर्थ इत्या[ह — **द्वन्द्वस्य तद**]**र्थस्य चेति**। अनेन शब्दाधिकारपक्षेऽर्थाधिकारपक्षे चैकदेशानुवृत्तिर्दुर्लभेति दर्शय[ति। कथं तर्हि] परिहारोत्थितिरित्यत्राह — [**अर्थाधिकारे**]**ति**। तत् . . [यो]गान्तरे संनिधानं यतो द्वन्द्व . . . . . ॥

विनञ्भ्यां नानाञौ न सह ५.२.२७.

[४, १११]

(विवरणम्) प्रकृतिप्रत्यययोर्भिन्नार्थत्वाय 'न सह' इति प्रत्ययार्थ उचित इति यो मन्येत, तं प्रत्याह — **लोकेति** ॥

[४, १११]

(उद्द्योतनम्) प्रकृत्यर्थविशेषणत्वपक्षे नायं दोषः, अत आह — **न सहेति**। तथापि कथमयं दोषः, अत आह — **प्रकृत्यर्थेनेति**। ननु प्रकरणानुसारात् प्रत्ययार्थत्वमेवोचितम्, अत आह

---

[१] मूल इति चोदितवचनेत्यर्थः।
[२] पा. सू. ७.३.१०३.
[३] पा. सू. ७.३.१०४.
[४] 'अतो दीर्घो यञि' इत्यत इत्यादिः।
[५] पा. सू. ७.३.१०१.

— **लोकेति**। प्रकरणसंगतिं लाघवं च शङ्कते — **यद्येवमिति**। विशब्दस्य नञर्थत्वे प्रयोगमाह — **विगार्दभरथिक इति**। **नैतदिति**। यदि विशब्दस्य निषेधार्थत्वमेव नियतं स्यात् तदा त्वदुक्तं युज्येत। तस्य क्रियावाचित्वमप्यस्ति। [1]तस्मात् सहार्थे प्रत्ययनिरासाय 'न सह' इति प्रकृत्यर्थविशेषणमेव युक्तमित्यर्थः। क्रियावाचिनमुदाहरति — **विगतावि**ति। अत्रापि नाप्रत्ययप्रसङ्ग इत्यर्थः। ननु 'न सह' इत्यस्य प्रकृत्यर्थविशेषणत्वे [2]स्वार्थे प्रत्यये चासत्त्वभूतार्थस्य भेदनिरूपकत्वाभावाद् 'विना देवदत्तेन' इति भेदनिबन्धनतृतीया कथं स्यात्, अत आह — **इह त्विति**। **यथेति**। प्रयोगानुसारात् क्वचिदसत्त्वभूतोऽप्यर्थो भेदप्रतियोगीत्यर्थः॥

[४, १११]

(नारायणीयम्) कथं पुनः सहार्थावगतिः स्यादित्यत आह — **न सहेति प्रत्ययार्थेति**। ननु प्रत्ययस्य विधेयत्वात् प्राधान्यात् 'न सह' इति प्रत्ययार्थेन भाव्यमित्यत आह — **लोकप्रसि[द्धेति**। ननु वेः] प्रतिषेधार्थत्वमसिद्धमि[त्यत आह — **विगार्दभरथिक इति**। [3]'नञो गु]णप्रतिषेधे' इत्यत्र नञ इत्यस्य प्रत्युदाहरणमेतत्। अर्हार्थेऽयं तद्धितः। **क्रियावाचिन इति**। क्रियापदाक्षेपात् क्रियावाचित्वमुक्तम्। नन्वसहार्थवचनयं विनानानाशब्दयोरसत्त्वभूतार्थयोर्व्यतिरेकनिबन्[धनतृतीया]हेतुत्वमयुक्तमिति, तत्राह — **इह तु विनेति**। यथा 'मातुः स्मरति' इत्याख्यातवाच्यायाः क्रियाया असत्त्वभूतत्वेऽपि तन्निमित्तव्यतिरेकनिबन्धना [4]'अधीगर्थ' इत्यादिना कर्मणि शेषत्वेन विवक्षिते विधीयमाना षष्ठी भवति। उक्तं च — [5]'श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते॥' इति॥

वेः शालच्छङ्कटचौ ५.२.२८.

[४, १११–११२]

(उद्द्योतनम्) वक्ष्यमाणेति। कटजाद्यपेक्षयेत्यर्थः। 'न सह' इत्यनुवृत्तेः प्रश्नो न युक्तः, अत आह — **असहार्थस्येति**। **गमनात्** प्रसरात्। शब्दशक्तेर्लोकगम्यत्वात् 'किं वक्तव्यम्' इत्ययुक्तम्, अत आह — **शब्दान्तरेति**। क्रियोपसर्जनमिति बहुव्रीहिः। आनर्थक्यमुक्तं निराह — **नियतेति**। ननु 'उपसर्गेभ्यः' इत्ययुक्तम्, क्रियायोगाभावेनोपसर्गसंज्ञाया अभावात्, अत आह — **अन्यत्रेति**। क्रियायोगस्थल इत्यर्थः। ननु विशालशब्दाद् गव्यभिधेये मतुप् कस्मान्न भवति, अत आह — **मतुबिति**। अनभिधानमेवाह — [6]**विशालवानिति**। ननु 'विशालो गौः' इत्युक्ते गोनिष्ठविशालत्वगुणः प्रतीयते, न तु विगतियुक्तशृङ्गवत्त्वम्। अतः कथमेवं व्युत्पत्तिः, अत आह — **व्युत्पत्तीति**। **इदं** मत्वर्थीयोऽकार इति। **गुणशब्दाः** मृद्वादिवद् गुणयुक्तद्रव्यवचनाः। **यथेति**। अनुलोमप्रतिलोमशब्दौ क्रमव्युत्क्रमरूप[7]गुणवचनौ 'अनुगतं लोम, प्रतिगतं लोम' इति प्रादिसमासात् "अच्प्रत्यन्वव' इति समासान्तेन व्युत्पादितौ॥

---

[1] क्रियावाचिनो विशब्दादित्यर्थः।
[2] 'स्वार्थे' इत्यस्यानन्तरं चकारोऽधिकः — अ, ऋ, लृ.
[3] पा. सू. ६.२.१५५.
[4] पा. सू. २.३.५२.
[5] वाक्यपदीयम् ३.७.१५६.
[6] विशालवदिति — अ, ऋ, लृ.
[7] गुणवाचिनौ — अ.
[8] पा. सू. ५.४.७५.

[४, १११–११२]

(नारायणीयम्) नन्वेतत्सूत्रविहितयोः प्रत्यययोर्द्वित्वात् 'शालजादयः' इति बहुवचनमनुपपन्नमित्यत आह — **वक्ष्यमाणेति**। वक्ष्यमाणेष्वपि प्रत्ययेषु समानन्यायत्वात् तेषामुपक्षेपाय बहुवचनप्रयोग इत्यर्थः। ननु प्रकृतार्थानुवृत्त्या प्रत्यया विधीयन्ताम्, किं प्रश्नेनेत्यत्राह — **असहार्थस्येति**। ननु विशाले शृङ्गे इत्यादावसहार्थत्वं नोपलभ्यत इत्यत्राह — **नानादेशेति**। ननु विगताद्यर्थवृत्तिभ्यो व्यादिभ्यः शालजादयः सन्तु, किं वचनेनेत्यत आह — **शब्दान्तरेति**। 'ससाधनम्' इत्यत्र साधनस्य गुणत्वं न विवक्षितमित्याह — **क्रियोपसर्जनमिति**। कथं पुनः क्रियाविशेषस्य द्योतका उपसर्गाः क्वचित् ससाधनक्रियावचनाः स्युरिति, तत्राह — **नियतविषया इति**। **यथा द्विदशा इति**। द्विर्दश द्विदशा इति वृत्तिविषये कृत्वोऽर्थविगतिः, सप्तपर्णोऽष्टापद इति वीप्सा गम्यते। क्रियायोग एवोपसर्गत्वादुपसर्गग्रहणमत्र प्राद्युपलक्षणमित्याह — **अन्यत्रेति**। **शृङ्गन्योरेवेति**। क्रमेण नानादेशगमनात्। ननु योगाश्रयेण गोरभिधाने मतुबपि स्यादित्यत्राह — **मतुप्प्रत्ययस्त्विति**। अनभिधा[नमुपपाद] यति — **विशालवानित्युक्त इति**। **व्युत्पत्त्यनुसारेण चेति**। व्युत्पत्तिरेवमेव कर्तुं शक्यते, नान्या गतिरस्तीत्यर्थः। न त्वियं वस्तुगतिः, सा त्वेवमित्याह — **गुणशब्दस्त्विति**। विस्तीर्णत्वादिगुणनिमित्ता इत्यर्थः। [ततश्च यद्]गुणयोगाच्छृङ्गे वृत्तिस्तद्गुणयोगादेव गव्यपि वृत्तिः सिद्धेति भावः। तथा च प्रयोगो दृश्यते 'विशालो देशः, विशालः पटः' इति। **यथा प्रतिलोम इति**। लो[म प्रतिगतः, प्रतिगतं] लोमास्येति बहुव्रीहिर्वा। प्रतिकूले तु रूढः, एवमनुलोमोऽनुकूल उच्यते॥

संप्रोदश्च कटच् ५.२.२९.

[४, ११२–११४]

(विवरणम्) अणि प्राप्त इति। [1]'अवयवे च प्राणि' इत्यनेन। कथं चकारोऽनुबन्ध आसञ्जक्तव्य इति व्यज्ञायीत्यत्राह — **तथा हीति**। त्रिषु गणपाठाभावाद् व्यवस्थावाच्यादिशब्दानुपपत्तिमाशङ्क्याह — **सर्वत्रेति**। **विस्तार इत्यत्रार्थ इति**। अणि प्राप्त इत्यनुषङ्गः। **आद्युदात्तत्वादिति**। [2]'अनुदात्तादेः' इत्यञ्नः प्राप्त्यभावादिति शेषः। **पान्तानां** पकारान्तानां, गुर्वक्षरादीनामित्यर्थः। **तत्र गोष्ठेति**। मूर्धन्यादेशस्तु [3]'अम्बाम्ब' इत्यनेन। गौणप्रयोगस्यापि प्रचुरत्वात् झटिति गौणार्थस्यापि बुद्ध्युपारोहात् तं निवर्त्य मुख्यार्थप्रतिपत्तये गवापि विशेषणमुचितमेवेत्यभिप्रेत्याह — **मुख्येति**। **विशिष्टेति**। बीजोद्भवस्नेहद्रव्यवाचीत्यर्थः। ननु तिलतैलम्' इत्येतत्तु तैलचापि सिध्यतीति 'एवं च' इत्ययुक्तमित्यत आह — **अपिशब्दादिति**। **तथा चेति**। लोक इति शेषः॥

[४, ११२–११४]

(उद्द्योतनम्) रजः विकारोऽवयवो वा। तत्र विकारावयवाधिकारविहितप्रत्ययबाधनार्थं

---

[1] पा. सू. ४.३.१३५.

[2] पा. सू. ४.३.१४०.

[3] पा. सू. ८.३.९७.

कटज्विधीयत इत्याह — **अलाबूशब्दादिति**। **द्वयषां** द्वयचाम्। **आण** प्राग्दीव्यतोऽण्। ननु गोष्ठप्रत्यये चकारः स्वरार्थ आवश्यकः। स कथं न पठितः, अत आह — **प्रयोगेति**। ननु चकारानासङ्गाद् भाष्यकारस्य चित्स्वरो नाभिमतः, अत आह — **तथा हीति**। समासेन प्रत्याख्यानं चकारं विना न संभवति, स्वरभेदप्रसङ्गादिति चकारोऽभिमत एवेत्यर्थः। क्वचित् संनिवेशाभावादाह — **सर्वत्रेति**। [1]अत्रापि बाध्यप्रत्ययमाह — **तस्येदमिति**। **सर्वत्रेति**। [2]'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति सूत्रस्थमिदं वार्तिकम्। कटच इव पटचोऽपि सामूहिकाण्बाधकत्वमित्याशयेनाह — **अप्रसृत इति**। **द्वाविति**। अत्र नापवाद्यः कश्चित् प्रत्ययः। [3]'लघावन्ते द्वयोश्च बह्वषो गुरुः' इतीकारस्य गुरुत्वादुदात्तत्वम्। **अण् प्राप्तः** [4]'विकारे। तस्यायमपवादः। एवमग्रेऽपि। **आद्युदात्तत्वे** [5]प्राप्त इति शेषः। [6]**विकारे** [7]'अनुदात्तादेश्च' इत्यनेन। **इक्षूणामिति**। अत्र न कश्चिदपवाद्यः। **घञर्थ इति**। [8]'अकर्तरि च कारके' इत्यधिकरणे कः। ननु गौणे विशेषप्रतीतेरनुप्रयोगसापेक्षत्वेऽपि मुख्ये तदनपेक्षणात् 'गोगोष्ठम्' इति न स्यात्, अत आह — **मुख्येति**। अन्यथा गौणमुख्यसंदेहः स्यात्। यद्यपि मुख्यप्रत्ययः सर्वत्रानुप्रयोगनिरपेक्षः, तथाप्यत्र प्रयोगानुसारात् तदपेक्षत्वं ज्ञेयम्। **रज्ज्विति**। संनिवेशविशेषेण बद्धानां तृणानां कटत्वाद् द्वयोरुपादानम्। ननु युगशब्दस्य बन्धनकाष्ठपरत्वे नपुंसकत्वं [9]न स्यात्, अत आह — **तत्रेति**। **विशिष्टेति**। घृतभिन्नेत्यर्थः। प्रत्ययपक्षे केवलस्यासिद्धिमाह — **यदीति**। [10]**अज् बाध्येतेति**। तिलशब्दस्य घृतादित्वेनान्तोदात्ततया [11]'अनुदात्तादेश्च' इत्यनेन प्राप्त इत्यर्थः। अव्युत्पन्नत्वे तु सिद्धिमाह — **यदा त्विति**। अव्युत्पन्नतैलशब्दस्यापि तिलविकारमात्रवाचित्वपक्षेऽप्याह — **उपमानेति**। नन्वेवं 'तिलतैलम्' इति न स्यात्, अत आह — **तिलविकार इति**। 'तिलतैलम्' इति प्रयोगं प्रकारान्तरेण साधयति — [12]**केचिदाहुरिति**। अर्थान्तरे व्युत्पादितानामप्यर्थान्तरे रूढौ दृष्टान्तः — **यथेति**॥

[४, ११२–११४]

(नारायणीयम्) ओषधित्वादिति। रजसो यदावयवत्वेन विवक्षा तदेदमुच्यते। **ओरञ्नित्य-**

---

[1] 'अत्रापि' इत्यादि 'सर्वत्रेति' इत्यन्तं नास्ति — अ.

[2] पा. सू. ४.१.८५.

[3] फिट्सूत्रम् ४२.

[4] प्रदीपे "'तस्य विकारः' इत्यण् प्राप्तः" इति दृश्यते। अन्नंभट्टपाठे 'तस्य विकार इति' इति न स्यादिति भाति।

[5] प्रदीपे 'इत्याद्युदात्तत्वे परत्वात्' इत्यन्नंभट्टपाठ इति ज्ञायते। दृश्यमानेषु तु प्रदीपपुस्तकेषु 'इत्याद्युदात्तत्वे प्राप्ते परत्वात्' इत्येवोपलभ्यते।

[6] प्रदीपेऽत्र 'विकारे' इति पदं न दृश्यते। 'ततोऽनुदात्तत्वादञ् प्राप्तः' इत्यत्र 'ततोऽनुदात्तत्वादञ् विकारे प्राप्तः' इत्यन्नंभट्टपाठ इति सूच्यते।

[7] पा. सू. ४.३.१४०.

[8] पा. सू. ३.३.१९.

[9] 'यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु' इत्यमरकोशादिति भावः॥ 'न' इति नास्ति — अ.

[10] अज् बाध्यत इति — अ, ऋ, लृ.

[11] पा. सू. ४.३.१४०.

[12] 'केचिदाहुः' इत्यस्य पूर्वशेषत्वेन मुद्रणं कोशेषु दृश्यते। उत्तरवाक्यसंबन्धित्वमन्नंभट्टाभिमतम्।

जीति। उपलक्षणमेतत्। [1]'मयड्वैतयोः' इति मयटोऽपि प्राप्तिः। एवमुत्तरत्रापि [2]'उमोर्ण-योर्वा' इति वुञश्च। **तृणधान्यानां चेति**। तृणवाचिनां धान्यवाचिनां च द्व्यचामादिरुदात्तो भवतीति सूत्रार्थः। **प्रयोगसमवायीति**। अनुबन्धरहितमित्यर्थः। अस्यैव प्रयोगे समवायात्। कुत एतदवगम्यत इत्यत्राह — **तथा हीति**। **तत्र चित्स्वरेति**। अन्यथा प्रत्ययस्वरेण मध्योदात्त-त्वात् फलभेदः स्यात्। **अत्रार्थे पटजिति**। अणि प्राप्त इत्यनुषङ्गः। नन्ववीनां विस्तारो-ऽपि समूह एवेति कोऽयमर्थभेद इत्यत आह — **अप्रसृत इति**। [3]'द्वित्वे' इति प्रकृत्यर्थविशेषणम्, न तु प्रत्ययार्थ इत्याशयेनाह — **द्वावुष्ट्राविति**। द्वयमित्यादिवद् द्व्यवयवसंघाभिधायित्वादेकवचनम्। एतच्च प्रत्याख्याने स्पष्टीभविष्यति। **लघावन्त इति**। **बह्वृषः** बह्वृचः प्रातिपदिकस्यैकस्मिन् लघुनि द्वयोर्वा गुरुसंज्ञकोऽजुदात्त इति सूत्रार्थः। **अण् प्राप्त इति**। न त्वञ्, अनुदात्तादित्वा-भावात्। **सादीनां शाकानामिति**। शाकवाचिनां सकारादीनामादिरुदात्त इत्यर्थः। **पान्ताना-मिति**। पकारान्तानां गुर्वक्षरादीनां द्वितीयमक्षरमुदात्तमित्यर्थः। **घञर्थ इति**। अधिकरण इत्यर्थः। यस्तु [4]'सुपि स्थः' इति कः स कर्तरि भवति। [5]'अम्बाम्ब' इति मूर्धन्यः। **उप-मितिः** उपमानम्, साध[र्म्यमित्यर्थः। **तत्र गोष्ठ]साधर्म्यादिति**। नन्वेवं सति 'गोगोष्ठम्' इति प्रयोगोऽनुपपन्नः स्यादित्यत आह — **मुख्यगोष्ठेति**। 'उष्ट्रगोष्ठं महिषगोष्ठम्' इत्यादि-प्रयोगस्य प्रचुरत्वात् केवलगोष्ठशब्देन स्थानमात्रमेव गम्येत। यथा [स्वामिमात्रपरतया गोपतिरिति प्रयो]गाद् गोभिर्विशेष्यते [6]'गवामसि गोपतिरेक इन्द्र' [7]'विद्मा हि त्वा गोपतिं शूर-गोनाम्' इति। ननु गवोर्युगमिति व्युत्पत्त्यङ्गीकारे कथं लौकिकोऽर्थो[ऽभिधीयत इत्यत आह — **युगश]ब्देनेति**। तथा चाभिधानका]राः....। ननु ग्रीवा [बन्धनकाष्ठे वृत्तौ गोयु]ग-मिति नपुंसकलिङ्गप्रयोगो न युक्तः स्यादित्यत्राह — **तत्र यानेति**। द्व्यात्मकत्वसाम्यादन्य.. ...लिङ्गो.... विशेषणोप... युगमिति। **विशिष्टेति**। तिलविकाररूपस्नेहद्रव्याभिधायी-त्यर्थः। अपिशब्देन प्रत्ययाश्रयेण न तैलशब्दसि[द्धिः समुच्चीयते। ए]वमिङ्गु[दतैलेऽपीत्याह — **उपमा]नेति। गौणसंभव इति**। गौणस्य प्रचुरप्रयोगे सतीत्यर्थः। [आहुरि]त्यनेनात्रा[रुचिः सूचिता। न हि] तैलमित्युक्ते [विका]रमात्रं प्रति[यन्ति द्रव]रूपम्॥

इनच्पिटच्चिकचि च ५.२.३३.

[४, ११५]

(**विवरणम्**) ननु 'लजन्यतयस्याम्' इत्यन्यतरस्यांग्रहणस्य मत्वर्थीयप्रकरणे सर्वत्रानुवर्तनान्मतुबपि प्राप्नोतीत्यत आह — **मतुबिति**॥

[४, ११५]

(**उद्द्योतनम्**) ननु सूत्रोक्तस्य वार्तिके पुनर्वचनं किमर्थम्, अत आह — **सूत्र इति**। सूत्र-

---

[1] पा. सू. ४.३.१४३.
[2] पा. सू. ४.३.१५८.
[3] भाष्ये 'गोयुगशब्दश्च' इत्यत्र 'द्वित्वे गोयुगच्-शब्दश्च' इति पाठान्तरं हरयाणानिर्णयसागर-मुद्रितयोरधः प्रादर्शि।
[4] पा. सू. ३.२.४.
[5] पा. सू. ८.३.९७.
[6] तै. ब्रा. २.८.२.
[7] तै. ब्रा. २.८.२.

स्याधिकप्रक्षेपेण न्यासान्तरसूचनार्थं तदुक्तिरित्यर्थः। नन्वस्येत्यनुक्तौ कः प्रत्ययार्थः, अत आह — **स्वार्थ इति**। **विधेय इति**। प्रकृत्यादेशाश्च चिलादयोऽपि विधेयाः। यद्यप्यर्शआदिराकृतिगणः, तथापि तत्र पाठोऽप्यस्तीत्याह — **अर्शआदिष्विति**। 'चिल्लवान्' इति मतुप् [1]कस्मान्न भवतीत्यत आह — **मतुबिति**॥

[४, ११५]

(नारायणीयम्) ननु [सूत्रेणैव सिद्धत्वात्]किं वार्तिकेनेत्यत आह — **सूत्र इति**। नन्व[2]सत्यस्यग्रहणे कथमिष्टसिद्धिरित्यत्राह — **क्लिन्नशब्दादिति**। तयोरेव वर्तमानात् क्लिन्न[शब्दात् स्वार्थे ल इतीष्टसिद्धिरित्यर्थः।] नन्वज्विषयेऽन्यत्र मतुपोऽपि विधानात् सोऽपि प्राप्नो[तीत्यत आह — **मतुप् त्विति**॥]

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ५.२.३७.

[४, ११५–११८]

(उद्द्योतनम्) सप्तमीति। [3]'किमः संख्यापरिमाणे डति च' इत्यत्र परिमाणं प्रकृत्यर्थः। [4]'गोत्रे कुञ्जादिभ्यश्चफञ्' इत्यत्र गोत्रं प्रत्ययार्थः। **नन्वेवमपीति**। अस्येत्यनुवर्तनेऽपि प्रमाणवाचिनः प्रमेये प्रत्ययवत् प्रमेयवाचिनः प्रमाणे प्रत्ययः किं न स्यादित्यर्थः। प्रसङ्गमेवाह — **उदकमिति**। **नैष इति**। प्रमेयस्य प्रमाणपरिच्छेदकत्वाभावात् प्रमेयान्न प्रत्यय इत्यर्थः। अविशेषणत्वे हेतुः — **अनियतेति**। ऊरुप्रमाणस्य प्रमेयमुदकमित्यादिकमनेकविधम्। तत्रोदकं प्रमेयमस्येति विशेषणं न संभवति, प्रमेयान्तरस्य संभवात्, विशेषणस्येतरव्यावर्तकत्वात्। ऊरुः प्रमाणमस्योदकस्येति तु संभवति, उदकस्य प्रमाणान्तराभावादित्यर्थः। नन्वनियतमपि प्रमेयं संभव-

[४, ११५–११८]

(विवरणम्) सप्तमीति। [3]'स्त्रियाम्' इत्यादौ सप्तमीनिर्दिष्टस्य प्रकृत्यर्थता [4]'कर्तरि कृत्' इत्यादौ सप्तमीनिर्दिष्टस्य प्रत्ययार्थता दृश्यत इत्यर्थः। [5]**परिच्छेदमात्रमिति**। करणसाधनः परिच्छेदशब्दः। प्रमाणशब्देनापि परिच्छेदहेतुमात्रमुच्यत इति भ्रमं व्युदस्यति — **प्रमाणशब्दा इति**। 'तेभ्यः' इत्यनेन विषयसप्तम्या प्रकृतिरभिधीयते, पञ्चम्यर्थे वा व्यत्ययेन सप्तमीत्युक्तं भवति। **तदन्तविध्यभावादिति**। 'प्रमाणे लः' इत्यत्र प्रातिपदिकेन प्रमाणस्य विशेषणादित्यर्थः॥

[४, ११५–११८]

(उद्द्योतनम्) सप्तमीति। [6]'किमः संख्यापरिमाणे डति च' इत्यत्र परिमाणं प्रकृत्यर्थः। [7]'गोत्रे कुञ्जादिभ्यश्चफञ्' इत्यत्र गोत्रं प्रत्ययार्थः। **नन्वेवमपीति**। अस्येत्यनुवर्तनेऽपि प्रमाणवाचिनः प्रमेये प्रत्ययवत् प्रमेयवाचिनः प्रमाणे प्रत्ययः किं न स्यादित्यर्थः। प्रसङ्गमेवाह — **उदकमिति**। **नैष इति**। प्रमेयस्य प्रमाणपरिच्छेदकत्वाभावात् प्रमेयान्न प्रत्यय इत्यर्थः। अविशेषणत्वे हेतुः — **अनियतेति**। ऊरुप्रमाणस्य प्रमेयमुदकमित्यादिकमनेकविधम्। तत्रोदकं प्रमेयमस्येति विशेषणं न संभवति, प्रमेयान्तरस्य संभवात्, विशेषणस्येतरव्यावर्तकत्वात्। ऊरुः प्रमाणमस्योदकस्येति तु संभवति, उदकस्य प्रमाणान्तराभावादित्यर्थः। नन्वनियतमपि प्रमेयं संभव-

---

[1] कस्मान्न भवतीत्याह — अ.
[1] असति, अस्यग्रहण इति छेदः।
[3] पा. सू. ४.१.३.
[4] पा. सू. ३.४.६७.
[5] हरयाणामुद्रिते प्रदीपे 'परिच्छेदकमात्रम्' इति दृश्यते। 'परिच्छेदमात्रम्' इति निर्णयसागरमुद्रिते दृश्यते।
[6] पा. सू. ५.२.४१.
[7] पा. सू. ४.१.९८.

मात्रेण विशेषणं स्यात्, अत आह — **लोक इति**। उदकमात्रमूरुरिति प्रयोगाभावादित्यर्थः। [1]'ऊर्ध्वमानम् उन्मानम्, आयामः प्रमाणम्' इति [2]'आर्हादगोपुच्छ' इति सूत्र उक्तम्। तदनुसंधायाह — **यदीति**। **अथेति**। उन्मानप्रमाणसाधारणपरिच्छेदकमात्रमित्यर्थः। अयमेव पक्षः सिद्धान्तः, अन्यथा 'ऊरुमात्रम्' इत्यूर्ध्वमाने मात्रज् न स्यादित्याहुः। ऊरुमात्रमित्यादौ लोपाभावार्थमाह — **प्रमाणशब्दा इति**। **इतरयोरिति**। 'प्रमाणे लः' इत्यत्र प्रमाणशब्द आयामपर इत्यर्थः। 'प्रमाणे लः' इत्यत्र तदन्तविधिनैव सिद्धे 'द्विगोः' इति व्यर्थम्, अत आह — **तदन्तेति**। तदन्तविध्यभावात् 'द्विगोः' इति वक्तव्यमेवेति प्रश्नायोगः, अत आह — **नित्यग्रहणं प्रतीति**। तस्याभिप्रायमाह — **न हीति**। संशयनिश्चययोर्विषयभेदः केन ज्ञेयः, अत आह — **प्रकरणेति**। प्रमाणार्थस्य स्तोमेऽसंभवात् कः प्रकृत्यर्थः, अत आह — **अत्रेति**। संख्येयवाचिनो विंशतिशब्दात् प्रत्ययशङ्कां निराह — **विंशतिशब्दादिति**। **भाष्यकारेति**। 'विंशिनः' इत्युच्चारणात्। अन्यथा आद्गुणे 'विंशेनः' इति स्यात्। डविधिनैव 'पञ्चदशः' इत्यादिसिद्धेरत्र [3]डड्विधानं किमर्थम्, अत आह — **तदस्येति**। डटष्टित्त्वात्। स्तोमवाचिनः स्त्रियां [4]वृत्त्यभावाट्टित्त्वं व्यर्थम्, अत आह — **स्तोमसाहचर्यादिति**। **सप्तदशीति**। सप्तदशस्तोमसंबन्धिन्यां रात्रौ यदा सप्तदशशब्दः [5]प्रयुज्यते, तदा ङीबित्यर्थः। तर्हि [6]'संख्यायाः संज्ञा' इति सूत्रे डविधानं व्यर्थम्, अत आह — **तत्र त्विति**। प्रमाणपरिमाणयोः पौनरुक्त्यं निराह — **रूढिशब्दाविति**। [7]'आर्हादगोपुच्छ' इत्यत्रानयोरर्थभेदः स्थितः। संशये प्रत्ययं दर्शयति — **शम इति**। ननु पञ्चशब्दस्य संख्येयवाचित्वात् कस्मिन् संदिग्धे प्रत्ययः, अत आह — **पञ्च स्युरिति**। **द्व्येकयोरिति**। संख्येयपरत्वे बहुवचनापत्त्या संख्यापरत्वं तत्राश्रितम्। तदेवाह — **पञ्चत्वेति**। ननूत्तरसूत्रे वत्वन्तान्मात्रादीनां वक्ष्यमाणत्वादत्र तद्विधानं व्यर्थम्, अत आह — **ततः स्वार्थ इति**। **डावतोरिति**। वतुप्यात्वम् "आ सर्वनाम्नः' इति विहितम्। पूर्वाचार्येण तु डावतुप्रत्ययो विहित इति तदनुसारेण डावतोरित्युक्तम्। **अर्थान्तरे** तत् परिमाणमस्य तावद्धान्यं राशीकृतम्, तावत् परिमाणमस्य कुड्यादेः, तावन्मात्रमित्यर्थ इत्यर्थः॥

[४, ११५–११८]

(नारायणीयम्) प्रत्ययार्थप्रकृत्यर्थविशेषणत्वविषयं संदेहमुपपादयति — **सप्तमीनिर्दिष्टस्येति**। **नन्वेवमपीति**। अस्येत्यनुवृत्तावपि प्रमाण इति कस्य विशेषणमिति विशये प्राधान्यात् प्रत्ययार्थविशेषणं स्यात्, तत्र प्रमेयः प्रकृत्यर्थः स्यादित्यनिष्टप्रसङ्ग इति चोद्यम्। अर्थसंगत्यभावादेवमाश्रयणमयुक्तमित्याशयेन परिहरति — **नैष इति**। तस्मात् प्रकृत्यर्थविशेषणमेव प्रमाणग्रहणमित्यर्थः। **यद्यायामेति**। **आयामः** दैर्घ्यम्, [निश्चये संशयश]ब्दः, तत्रैव प्रमाणशब्दस्य रूढत्वात्। यथा वस्त्रादेर्हस्तादिः। **तदोर्ध्वमान इति**। ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानम्। यथोदकादेरूर्वादि। तत्र सूत्रेणाप्राप्तयोर्द्व्यसज्दध्नचोरनेन वचनेन विधिरिति केषां[चिन्मतम्।] अन्येषां दर्शनमाह — **अथ त्विति**। प्रमीयते परिच्छिद्यते येन तत् प्रमाणमिति सूत्रे सर्वमेव

---

[1] महाभाष्यम् ५.१.१९.
[2] पा. सू. ५.१.१९.
[3] डड्विधानं व्यर्थम् — अ.
[4] वृत्त्यसंभवात् — अ.
[5] प्रयोज्यते — अ; ऋ, लृ.
[6] पा. सू. ५.१.५८.
[7] पा. सू. ५.१.१९.
[8] पा. सू. ६.३.९१.

परिच्छेदकं वस्तु गृह्यत इत्याश्रीयमाणे नियमार्थमिदम्। ऊर्ध्वमान एव न प्रमाणादाविति। 'प्रमाणे लः' इत्यत्र प्रमाणशब्देन न परिच्छेदकमात्रमुच्यत इत्याह — **प्रमाणेति**। 'लः' इति लुकः पूर्वाचार्यसंज्ञेत्याह — **लुग् भवतीति**। **परिच्छेदकमात्रेति**। सूत्रे प्रमाणशब्देन परिच्छेदकमात्रमभिधीयत इत्यर्थः। **तदन्तेति**। प्रमाणान्तस्य द्विगोरप्रमाणवाचित्वात् तदन्तविध्यभावाच्च पूर्वेणाप्राप्तस्य लुको विधानार्थमिदं वचनमित्यर्थः। नन्वेवं सति किमर्थमिदमिति प्रश्नोऽनुपपन्न इत्यत आह — **नित्यग्रहणमिति**। 'श्रावी' इति कस्याभिधानमित्यत्राह — **श्रवणमिति**। **तस्य परत्वादिति**। 'प्रमाणपरिमाणाभ्याम्' इत्यादिना वक्ष्यमाणस्य मात्रचः 'प्रमाणे लः' इति लुङ् न भवति। किं तर्हि, श्रवणमेव, परत्वात्। ततोऽसौ श्रावी। तस्य द्विगावपि श्रवणे प्राप्ते नित्यग्रहणेन लुग् विधीयत इत्यर्थः। **द्वौ शमाविति**। अस्मादेव लुग्वचनादत्र तदन्तविधेरनुमानान्मात्रच उत्पन्नस्य लुक्। ननु निश्चये संशये च रूपाभेदात् कथमर्थविशेषावधारणं स्यादित्यत्राह — **प्रकरणादीति**। **पञ्चदश मन्त्रा इति**। 'साम्ना स्तुवीत, एकं साम तृचे क्रियते' इति स्तुतिविधिः। तत्र तृचस्य पञ्चकृत्व आवृत्त्या पञ्चदश मन्त्रा भवन्ति। तत्समूहः पञ्चदशः स्तोमः। एवं 'सप्तदशः स्तोमः'। अत्रान्त्यायाः सप्तकृत्व आवृत्तिः। **संख्यामात्रवाचिन इति**। न तु संख्येयवाचिनः। प्रवरभेदेन [विंशतिर्भेदा इति] विंशिनोऽङ्गिरस उच्यन्ते। ननु तिलोपस्य [1]'यस्य' इति लोपे कर्तव्ये [2]'असिद्धवदत्र' इत्यसिद्धत्वात् [3]स न स्यादित्यत्राह — **तस्येति**। अन्यत्र पञ्चदशादीनां व्युत्पादितत्वादिह वचनस्यानर्थक्यमाशङ्क्य परिहरति — **तदस्येति**। ननु स्तोमवृत्तेः पूँल्लिङ्गत्वान्ङीबर्थं वचनमनर्थकमित्यत आह — **स्तोमसाहचर्यादिति**। यस्यां रात्रौ सप्तदशः स्तोमः क्रियते सा सप्तदशी। नन्वेवमनेनेष्टरूपसिद्धेरन्यत्र डविधिरनर्थक इत्यत्राह — **तत्र त्विति**। [4]**डनेः सामान्येनेति**। छन्दसि भाषायां चात्र डनेर्विधानादित्यर्थः। **रूढिशब्दाविति**। भेदेनोपादानाद् रूढिशब्दाविह गृहीतौ। [5]'आयामस्तु प्रमाणं स्यात्' [6]'परिमाणं तु सर्वतः' इति लक्षिताविति्यर्थः। अत एवोदाहृतं भाष्ये 'शममात्रम्' इत्यादि। ननु वत्वन्तात् स्वार्थ एव द्वयसज्मात्रचाविति चेन्नेत्याह — **उत्तरसूत्रे त्विति**॥

यत्तदेतेभ्यः परिमाणे वतुप् ५.२.३९.

[४, ११८–१२०]

(विवरणम्) सादृश्ये प्रत्ययावाच्ये तद्वति प्रत्ययस्य प्रयोगो न स्यादित्यत आह — **विषयेति**॥

[४, ११८–१२०]

(उद्द्योतनम्) नकारस्य प्रश्नाननुगुणत्वं परिहरति — **काक्वेति**। **आयामस्त्विति**।

---

[1] पा. सू. ६.४.१४८.
[2] पा. सू. ६.४.२२.
[3] यस्येति लोप इत्यर्थः।
[4] प्रदीपे 'डनेः सामान्यविधानात्' इत्यत्र 'डनेः सामान्येन विधानात्' इति पाठोऽभिमत इति भाति।
[5] महाभाष्यम् ५.१.१९.
[6] महाभाष्यम् ५.१.१९.

[1]'आर्हादगोपुच्छ' इति सूत्रे उक्तम्। परिमाणग्रहणस्य प्रयोजनम् 'मात्रादि' इति। तद्विशदयति — **यदीति**। **प्रमाणोपाधिकेभ्यः** प्रमाणार्थेभ्यः। **प्रमाणोपाधौ** प्रमाणरूपे। पूर्वसूत्रे 'अर्थान्तरे' इति यदुक्तं तदाह — **तत्परिमाणमस्येति**। 'तावन्मात्रम्' इत्यस्यार्थान्तरविषयत्वकथने हेतुमाह — **एकविषयत्वे त्विति**। यस्मिन्नर्थे वतुप् तस्मिन्नेव [2]मात्रादयश्चेदित्यर्थः। **तदन्तात्** वत्वन्तात्। ननु परिमाणे वतुप् प्रमाणे मात्रजित्येकस्मिन्नप्यर्थभेदः संभवति, अत आह — **यस्य हीति**। **तत्रापि** प्रमाणेऽपि। यथा — ऊरुः प्रमाणमस्योरुमात्रमित्यूरौ न भवति, किं तूरुशब्द एव तत्र प्रयुज्यते, तद्वदित्यर्थः। यद्यपि केवलसादृश्यस्य प्रत्ययवाच्यत्वेऽपि तदाश्रयद्रव्ये प्रयोगः संभवति, तथापि 'त्वावतः' इत्यादौ त्वत्सदृश इति प्रतीतेर्मुख्यविषयत्वे संभवत्युपचरितविषयत्वमयुक्तमित्याह — **विषयेति**॥

[४, ११८–१२०]

(**नारायणीयम्**) ननु 'प्रमाणे' इत्यनुवृत्त्या परिमाणे न सिध्यतीति तस्य कर्तव्यत्वात् प्रश्नोऽयमसमञ्जस इत्यत आह — **प्रमाणेति**। द्वयोरपि परिच्छेदकवाचित्वात्। नन्वनुवृत्तौ कथितव्यायां नञ्ना निवृत्तिकथनमसंगतमित्याशङ्क्य व्याचष्टे — **काक्वेति**। ध्वनेर्विकारः काकुरुच्चारणविशेषजन्यः, तेन सह नञः प्रयोगे किंशब्दार्थलाभादनुवर्तत एवेत्यर्थलाभः। एतद्व्याख्यानं सर्वत्र बोद्धव्यम्। **आचार्यदेशीय इति**। बाध्यत्वादस्य पक्षस्य। नन्वत्रासिद्धो डावतुप्रत्यय इति, तत्राह — **पूर्वाचार्येति**। कः पुनरर्थभेद [3]इत्याह — **परि[माणं त्विति**। 'मात्राद्य]प्रतिघाताय' इत्यस्य शङ्कोत्तरत्वेन विनियोगं वक्तुमारभते — **यदीति**। प्रमाण इत्य[न]नुवृत्त्या वतुपो विधाने प्रयोजनान्तरं प्रतिपादयितुं 'भावः सिद्धश्च डावतोः' इत्युक्तमित्याह — **तत्परिमाणमिति**। [वतुप्प्रत्यय एव डावतु]च्यते। वतुपैवोक्तत्वमुपपादयति — **यस्य हीति**। **तावच्छब्दस्यैवेति**। अन्यथा मात्रजादिप्रत्ययमाला प्रसज्येत। ननु 'सादृश्ये' इत्युक्त्वा सदृशस्य प्रत्ययार्थ[त्वप्रदर्श]नमयुक्तमित्यत्राह — **विषयनिर्देश इति**॥

किमिदंभ्यां वो घः ५.२.४०.

[४, १२०]

(**उद्द्योतनम्**) वस्य घविधानेन प्रत्ययः कथं लभ्यते, अत आह — **आदेशेति**॥

[४, १२०]

(**नारायणीयम्**) यथा पीनत्वान्यथानुपपत्त्या रात्रिभोजनानुमानम्॥

---

[1] पा. सू. ५.१.१९.

[2] मात्रजादयश्चेदित्यर्थः।

[3] इत्यत आहेत्यर्थः।

किमः संख्यापरिमाणे डति च ५.२.४१.

[४, १२०–१२१]

(**विवरणम्**) नन्वबहुषु संख्याप्रश्नाभावादेव प्रत्ययो न भविष्यतीत्यत आह — **का संख्येति**। ननु वर्गस्येत्युक्ते एकत्वस्य विवक्षितत्वात् संख्याप्रश्नानुपपत्तिरित्यत आह — **यदा वर्गेति**। नन्ववयवद्वारावबहुष्वपि[1] प्रश्न उपपादित इत्यत आह — **इहास्येति**॥

[४, १२०–१२१]

(**उद्द्योतनम्**) नन्वेकस्मिन् द्वयोश्च प्रश्नाभावादेव प्रत्ययो न भविष्यति, अत आह — [का] **संख्येति**। अवयवप्रश्नेनावयविनि प्रत्यय इत्येतन्निराह — **इहेति**। **संघसंघिनोरिति**। तत्रापि [2]संघिष्वेव प्रत्ययः, न संघ इत्यर्थः। नन्वस्मिन्नेवार्थे चकारेण वतुबपि विधीयते, तस्यैकस्मिन्नपि प्रयोगो दृश्यते, तद्वड्डतेरपि भवतु, अत आह — **कियानिति**। परिमाणार्थस्यैकस्मिन् प्रयोगः, न संख्याप्रश्नार्थस्येत्यर्थः॥

[४, १२०–१२१]

(**नारायणीयम्**) ननु संख्याप्रश्ने व[र्तमानात्] किमः प्रत्ययविधानादनि[ज्ञातविष]यत्वाच्च [प्रश्नस्य बहुष्वेव भव]तीति किं वचनेनेत्यत्राह — **का संख्येति**। [न केवलं प्रश्न एव] आपाद्यते, किं तर्हि, उत्तरमपीत्याह — **तदा चेति**। उत्तरवादिन आशयमाह — **इहास्येति**। [प्रकृत्यर्थेनैव] प्रत्ययार्थसमन्वयात् [वर्गावयवगत] संख्याप्रश्नेऽवयवेष्वेव साक्षात् पृच्छ्यमानेषु प्रत्ययो भवति। . . . ज्ञातत्वादवृ . . . तत्र भेदाश्रयेण . . . प्र . . . तिसिद्धिः क . . विवक्षायां . . . पञ्चवगा . . . प्रसङ्गः। यदा तु साक्षाद्वर्गगतसंख्याप्रश्नस्तदा 'कति वर्गाः' 'पञ्च वर्गाः' इति भवति। नन्वेवं 'कियान् कियन्तौ' इति प्रयोगः कथमित्याह — **कियानि [ति त्विति**। पूर्वसूत्रे]णात्र प्र[त्ययः। अनेन प्रत्य]ये बहुवचनमेव भवतीत्याह — **संख्या[प्रश्ने त्विति**॥]

संख्याया अवयवे तयप् ५.२.४२.

[४, १२१–१२२]

(**विवरणम्**) ननु सामान्यविशेषभावे कथमवयवावयविभाव इत्यत आह — **उत्सृष्टभेदस्येति**। ननु सूत्रे संख्याशब्दस्य परिच्छेदहेतुविशेषाभिधायित्वेऽर्थरूपात् तस्मात् प्रत्ययविधानानुपपत्तेः 'संख्यायाः' इति पञ्चमीनिर्देशोऽनुपपन्न इत्यत आह — **अवयवे य इति**। **न चेति**। समवायिकारणतत्समवेतकार्ययोरेवावयवावयविभावः प्रसिद्धः। न च सामान्यविशेषयोः परस्परमारभ्यारम्भकभाव इति भावः। अवयविनि वर्तमानादवयवे प्रत्ययनिवृत्तयेऽवयविनि प्रत्यय इत्युच्यते चेत्, तन्न, 'अवयवे' इत्यनेन संख्याया विशेषणादित्यत आह — **स्वार्थ इति**॥

---

[1] अबहुष्वपीति छेदः।

[2] संघेष्वेव — अ.

[४, १२१–१२२]

(**उद्द्योतनम्**) ननु संख्याया अमूर्तत्वेनावयवाभावात् कथं प्रत्ययापादनम्, अत आह — **उत्सृष्टेति**। **विशेषानेकत्वादीन्** विशेषाणां सामान्यावयवत्वं मत्वा प्रश्न इत्यर्थः। सूत्रे संख्याशब्देन संख्यावाची शब्दः सामर्थ्यल्लक्षणया वा विवक्षित इत्याह — **अवयव इति**। शङ्कामाशयं निराह — **न चेति**। **अथेति**। यद्यपि विंशतिसंख्याया अप्येकत्वानि नावयवाः, तथापि विंशतिसंख्यैका, तदाश्रये च बहून्येकत्वानि, तैर्विना विंशतिसंख्याया अभावादवयवत्वोपचारेण शङ्का। **तत्समुदायेति**। यद्यपि विंशतिसंख्या नैकत्वसमुदायरूपा, तथाप्यवयवत्वस्फोरणाय समुदायरूपत्वमुक्तम्। यद्यपि विंशतिसंख्याया एकत्वसमुदायरूपत्वाभावादवयवित्वं नास्ति, तथाप्यभ्युपेत्याह — **तथापीति**। विंशतेर्बह्वेकत्वमविशेषणम्, अव्यभिचारित्वादित्यर्थः। इतिकरणेन शब्दपरत्वात् कथं तस्यावयवित्वम्, अत आह — **संख्याशब्देति**। संख्याशब्दवाच्यस्य संख्यात्वनिषेधो न युक्तः, अत आह — [१]**संख्याशब्देनेति**। [२]विशिष्टसंख्याभिधायित्वं निषिध्यत इत्यर्थः। विशेषानभिधायित्वे हेतुः 'संज्ञैषा' इति। तद्व्याचष्टे — **एकत्वादीनामिति**। भवतु संख्यासामान्यवाचित्वम्, सामान्यस्यैवावयवित्वमस्तु, अत आह — **तत्रेति**। ननु सामान्यविशेषयोरवयवावयवित्वाभावे 'बहुतयं रूपम्' इति कथं स्यात्, अत आह — **बहुतयमिति**। वचनकृत्यमाह — **स्वार्थं इति**। नन्ववयविन्युच्यमानं स्वामिनि कथं स्यात्, अत आह — **अवयवा इति**। 'गुणशब्दः' इत्यनेन समाधानं किमपि न लभ्यते, अत आह — **संबन्धिशब्दादिति**। भवतु संबन्धिनि मत्वर्थीयः, तथापि स्वामिव्यावृत्तिः कथम्, अत आह — **यथेति**॥

[४, १२१–१२२]

(**नारायणीयम्**) [ननु संख्या]लक्षणस्यार्थस्यावयवयोगोऽसिद्धः, गुणत्वात्तस्येत्यत आह — **उत्सृष्टभेदस्येति**। अवयवे वृत्तिः शब्दस्यैव संभवतीति संख्येत्यनेन तद्वाचिशब्दो लक्ष्यत इत्याह — **संख्यावाची शब्द इति**। तस्मादित्यादिनोपस्कारो [दर्शितः, तस्य] तात्पर्यमाह — **न चेति**। यथा सितनीलादिव्यतिरेकेण विलक्षणकार्यस्वभावं रूपं नाम वर्णान्तरमवयवि न समस्ति तथा संख्या नामैकत्वादिव्यतिरेकेणानुपलम्भान्नावयविनी विद्यत इत्यर्थः। **बहुशब्दवाच्य इति**। न हि संख्याया [बहुशब्दोऽवयव इति] शङ्कैवास्ति। यद्यपि मुख्योऽवयवावयविभावोऽत्र नास्ति, तथापि यथा वनादौ काल्पनिकस्तद्व्यवहारस्तथात्रापि स्यादिति शङ्कते — **अथैवमिति**। परिहरति — **तथापीति**। ननु संख्यायाः संख्यात्वं न निषेधार्हमित्यत्राह — [३]**संख्याशब्देनेति**। संख्येत्यनेन शब्देनैकत्वादयो विशेषा नाभिधीयन्ते, किं तर्हि, तेषामविशेषेण नामधेयमेतत्। तदेतदुपपादयति — **एकत्वादीनामिति**। यथा रूपत्वजातियोगाच्छुक्लादिषु रूपव्यपदेशस्तथैकत्वादिषु संख्याव्यपदेशः। **सामान्यस्य विशेषस्य वेति**। 'बहुतयी संख्या, बहुतयी विंशतिः'

---

[१] प्रदीपे 'संख्याशब्देन संख्याविशेषो नाभिधीयत इत्यर्थः' इति पाठो निर्णयसागरमुद्रिते दृश्यते। हरयाणामुद्रिते तु 'संख्याशब्देन' इति न दृश्यते।

[२] विशिष्टाभिधायित्वं — ऋ, ॡ.

[३] प्रदीपे 'संख्याशब्देन संख्याविशेषो नाभिधीयत इत्यर्थः' इति निर्णयसागरमुद्रिते पाठः। हरयाणामुद्रिते तु 'संख्याशब्देन' इति न दृश्यते।

इत्यादिप्रयोगाभाव इत्यर्थः। **बहुतयं यूथमिति**। अत्र व्यवच्छेद्यं संभवति द्व्यवयवमिति भवति प्रत्ययः। **बहुतयं रूपमिति**। किंचित् किल चित्रं नीलपीतारब्धद्व्यवयवम्, किंचित्तु सितनील-पीतादिबहुविधावयवारब्धमित्यत्रापि व्यवच्छेदोपपत्तिः। रूपसामान्यविवक्षायां तु 'बहुतयं रूपम्' इति न भवतीत्याह — **यदा त्विति**। **स्वार्थ इति**। [1]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति स्वार्थे प्रत्ययनिवृत्त्यर्थं वचनम्। कथं पुनः स्वामिनोऽवयवित्वम्, यतोऽतिप्रसङ्गः स्यादित्यत आह — **अवयवा इति**। अवयविशब्दस्य स्वाम्यभिधाने सामर्थ्याभावमाश्रित्य परिहार इति दर्शयति — **संबन्धिशब्दादिति**। **यथा पितृमानिति**। यं प्रति पितुः पितृत्वं स एव, नान्यस्त-त्संबन्धीत्यर्थः। नन्वस्मिन्नित्यपि प्रकृतम्, तस्यानुवृत्तिः कस्मादत्र नोक्तेत्यत्राह — **सप्तम्यर्थे त्विति**॥

उभादुदात्तो नित्यम् ५.२.४४.

[४, १२२–१२३]

(विवरणम्) आमन्त्रितस्वरस्तु षाष्ठिकः॥

[४, १२२–१२३]

(उद्द्योतनम्) 'उभयो मणिः' इति प्रयोगं साधयति — **उभय इति**। [2]अवयवद्वित्वमेवाह — **उभाविति**। अवयविबहुत्वस्थले कथमयजादेशः, अत आह — **उभय इति**। वर्गद्वयापेक्ष-त्वे कथं बहुवचनम्, अत आह — **अतिरोहितेति**। **अप्राप्तमिति**। चित्स्वरेण प्रत्ययस्वरस्य बाधात्। **उतेति**। परत्वादामन्त्रिताद्युदात्तत्वेन [3]'चितः' इत्यन्तोदात्तस्य बाधात्। आद्यन्तयोः कस्योदात्तत्वविधिः, अत आह — **आदेरिति**। **स्थानीति**। अयचस्तयबादेशत्वात्। अयचः स्थानिवद्भावात्प्रत्ययत्वमित्याह — **स्थानिवदिति**। चित्स्वरस्य तदपवादत्वात् कथं तेन सिद्धिः, अत आह — **चित्स्वरमिति**। अदर्शने हेतुः — **सर्वेति**। स्वरान्तरमेवाह — **हे उभयेति**। आमन्त्रितस्वरबाधनार्थत्वमेतस्य [4]न संभवतीत्याह — **पुरस्तादिति**। अतः 'हे उभय' इत्यत्रा-मन्त्रितस्वरेण चित्स्वरो बाध्यत एवेत्यर्थः॥

[४, १२२–१२३]

(नारायणीयम्) वृत्तिकारैः 'उभयो मणिः' 'उभये देवमनुष्याः' इत्येकवचनान्तं बहुवचनान्तं चोदाहृतम्। तत्रैकत्वबहुत्वे उपपादयति — **उभय इति**। ननु वर्गद्वयापेक्षत्वे कथं बहुवचनं स्यादित्यत उक्तम् — **अतिरोहितभेदानामिति**। [संदेहा]त् प्रश्नः, न त्वा[क्षेप इत्या]ह — **किम-प्राप्तमिति**। 'उदात्तो यथा स्यात्' इत्यनेन वचनेन [कथं] संदेहनिवृत्तिरित्याशङ्क्याह —

---

[1] परिभाषा १२२.
[2] अवयविद्वित्वमेवाह — ऋ, लृ.
[3] पा. सू. ६.१.१६३.
[4] 'न' इति नास्ति — लृ.

आदेरिति। [1]'अलोऽन्त्यस्य' इत्यस्मिन् जीवति कथमा[देः स्यादित्याश]ङ्क्य सामर्थ्यादित्याह — **स्थानिवद्भावात् पित्त्वादिति**। [यदाभशब्दः संख्येति] पक्षस्तदा [2]'संख्याया अवयवे तयप्' इति विहितस्य तयपोऽयजादेशोऽनेन विधीयते। अथ न संख्या, कृत्वसुजादिसंख्याकार्यदर्शनात् 'एकः, उभौ, त्रयः' इत्येवं लोके गणनाभावाच्च, तदा योगविभागेन तयपं विधाय तस्यादेशो विधीयते। **चित्स्वरं त्विति**। न्या[याभ]सात्रयेण [पूर्वप]क्षोत्थितिः। समीचीनन्यायानुसंधाने तु सिद्धान्त एव स्यात्, न पूर्वपक्ष इति, तदाह — **सर्वदर्शित्व इति**। नन्वन्त्यस्य विधाने वचनानर्थक्यमुक्तमिति, तत्राह — **स्वरान्तरेति**। [3]'अन्त्यस्यैव' इत्यनेनैवं सत्यलोऽन्त्यपरिभाषा न बाधिता भवतीति दर्शयति। स्वरान्तरं दर्शयति — **हे उभयेति**। पदात् परत्वादाष्टमिकेन [4]'आमन्त्रितस्य च' इत्यनेन[5], अन्यत्र षाष्ठिकेनाद्युदात्तप्राप्तिरित्यर्थः। सिद्धान्तवादिन आशयं दर्शयति — **पुरस्तादिति**॥

तदस्मिन्नधिकमिति दशान्ताड्डः ५.२.४५.

[४, १२३–१२५]

(विवरणम्) ननु 'समानजातौ' इत्येतदधिक इत्यस्य समानाधिकरणे विशेषणे बहुव्रीहिणो बन्धुनि वृत्त्या [6]'जात्यन्ताच्छ बन्धुनि' इति स्वार्थिकश्छः स्यादित्यत आह — **समाना येति**। अस्तु तर्हि शब्दान्तरप्रयोगेण भिन्नजातीयविषयोऽप्यधिकाधिकिभावः, अत आह — **न च वृत्ताविति**। 'यस्य' इति सर्वनामनिर्देशस्तदा सप्रयोजनः, यदैकादशाधिका अस्मिन् शतसहस्रे इत्यत्र पर्यायेणोभयोरप्याधिक्ये प्रत्ययः प्राप्नोति। न च शतानां सहस्रमित्येव शतसहस्रमिति प्रसिद्धविग्रहे क्रियमाणे शतानामेव संख्येयत्वान्वयात् संख्येयाधिक्ये डः प्राप्यमाणः सहस्रा[णामाधिक्ये प्राप्नो]ति। अतः 'शताधिक्ये' इत्येव वक्तव्यम्, प्रतिपत्तिलाघवात्, न तु 'यस्य संख्या' इति। लाघवानपेक्षया कथंचित् 'यस्य संख्या' इति निर्देशोपपत्तावपि 'अथ सहस्राणि' इति भाष्यमनुपपन्नमेव स्यात्, अत आह — **शतानामिति**। **प्रत्ययार्थेनेति**। प्राधान्याच्च संख्येयस्य प्रत्ययार्थत्वं द्रष्टव्यम्। पतनप्रतिबन्धकत्वगुणित्वादिरूपाभावाच्छतानां समुदायत्वेनाधिकरणत्वं वक्तव्यम्। तच्चैकादशानां समुदायत्वेन शतान्तर्भावे भवति। न चासावस्तीत्याह — **तेषामिति**॥

[४, १२३–१२५]

(उद्द्योतनम्) 'समानजातीये' इति वाच्ये 'समानजातौ' इति कथम्, अत आह — **समानेति**। कुत्र समानजातौ सत्याम्, अत आह — **प्रकृतीति**। एतन्न वाच[नि]कमित्याह — **न्यायेति**। वाक्यवद् वृत्तावप्युपस्थितस्यैव ग्रहणमित्याह — **एकादशेति**। नन्वेकादशाधिका अस्मिन् शते

---

[1] पा. सू. १.१.५२.
[2] पा. सू. ५.२.४२.
[3] प्रदीपपुस्तकेषु 'अन्तस्यैव' इत्युपलभ्यते।
[4] पा. सू. ८.१.१९.
[5] सर्वानुदात्तत्वप्राप्तिरिति शेषः।
[6] पा. सू. ५.४.९.

'एकादशं शतम्' इत्यत्र कथं तुल्यजातीयत्वलाभः, गवादि[1]शब्दासंनिधानात्, अत आह — **शब्दान्तरेति**। ननु समानजातावित्यनुक्तौ 'एकादश माषा अधिका अस्मिन् कार्षापणशते' इत्यत्रापि प्रत्ययप्रसङ्गः, अत आह — **न चेति**। [2]'शतसहस्रम्' इत्यत्र समासभेदेन संख्येयभेदं वक्तुं समासद्वयमाह — **शतानामिति**। द्वितीयसमासे सहस्रस्य पूर्वनिपातं वारयति — [3]**संख्याया इति**। द्वन्द्वमात्रविषयत्वशङ्कां निराह — **द्वन्द्वे चेति**। समासद्वये संख्येयभेदं दर्शयति — **तत्रेति**। ननु 'शतसहस्रम्' इत्येकरूपे कथमर्थद्वयावगतिः, अत आह — **प्रकरणेति**। 'यस्य संख्या तदाधिक्ये' इत्येतदपि न्यायलभ्यमित्याह — **यस्येति**। 'वने वृक्षः' इतिवत् समुदायिनः समुदायोऽधिकरणं स्यात्, अत आह — **तेषामिति**। अधिकशब्दयोगे कथं पञ्चमी, अत आह — **यस्मादिति**। **बुद्धीति**। कारकप्रकरणे गौणमुख्यन्यायानाश्रयणादिति भावः। **एवं चेति**। [4]'यस्मादधिकम्' 'अस्मिन्नधिकम्' इति निर्देशात्। **अधिकेति**। अध्यारूढार्थे [5]'अधिकम्' इत्यधिकशब्दो निपातितः। द्रोणेनाधिरूढा खारीत्यर्थे कर्तरि तृतीयेत्यर्थः॥

[४, १२३–१२५]

(नारायणीयम्) 'अधिके समानजातौ' इति सामानाधिकरण्येनान्वयप्रतीतिमपाकरोति — **समानेति**। केन कस्य समानजातीयत्वमित्यत्राह — **प्रकृतीति**। नेदं वचनसामर्थ्यं[लभ्य-]मित्याह — **न्यायेति**। **शब्दान्तरेति**। 'एकादशाधिका अस्मिन् शते, एकादशं शतम्' इति वाक्ये वृत्तौ च शब्दान्तरप्रयोगाभावेऽप्यधिकाधिकिनोस्तुल्यजातीयत्वं प्रसिद्धिवशात् प्रतीयते। प्रकरणादिवशाच्च संख्येयविशेषावसायः, किं पुनः संख्येयविशेषवाचिशब्दप्रयोग इत्यर्थः। ननु यथा 'एकादश माषा अधिका अस्मिन् कार्षापणशते' इति वाक्येऽन्यार्थसंनिहितं श्रुत्या बाध्यते तथा वृत्तावपि बाध्यतामित्यत्राह — **न चेति**। **संख्याया इति**। यद्यपि [6]'द्वन्द्वे घि' [7]इत्यत्रैतदुपसंख्यातम्, तथापि सर्वत्रेष्यते। अत एव 'द्वित्राः' इत्युदाहृतम्[8]। ननु शतसहस्रशब्दस्य सामान्यवाचित्वात् तत्प्रयोगे कथं विशेषावसाय इत्यत्राह — **प्रकरणादीति**। एतदपि न्यायसिद्धमित्याह — **यस्य संख्येति**। तस्मात् 'इष्टं शतसहस्रयोः' इत्येतदेव वाचनिकम्। तदपीतिकरण[सामर्थ्याल्लभ्य-]ते। अत एव 'इष्टम्' इत्युक्तम्। **तेषां शत इति**। यथा तिलेषु तैलमिति तिलेषु तैलस्यान्तर्भावादाधारत्वात् तेषामधिकरणत्वं नैवमिहेति निर्देशानुपपत्तिरित्यर्थः। कथ[मधिकशब्द]योगे पञ्चमी स्यादित्यत्राह — **यस्मादधि [कमिति। अधिकेति। यदा]** कर्मसाधनक्रियावचनात् [9]'अधिकम्' इति कन्प्रत्ययो निपात्यते तदा कर्तुरनभिहितत्वात् तृतीया भवति। यदा तु कर्तरि निपातनं तदा कर्मणि द्वितीया [भवति। अपादानत्वविवक्षया]धिकरणत्वविवक्षया वा [10]'यस्मादधिकम्, तदस्मिन्नधिकम्' इति प्रयोग इति भावः॥

---

[1] शब्दसंनिधानात् — अ.
[2] शतसाहस्रमित्यत्र — अ, ऋ, लृ.
[3] 'संख्यायाः' इत्यतः प्राक् इतिशब्दोऽधिकः — अ, ऋ, लृ.
[4] पा. सू. २.३.९.
[5] पा. सू. ५.२.७३.
[6] पा. सू. २.२.३२.
[7] 'अल्पाच्तरम्' इत्यत्र द्वन्द्व इत्यनुवृत्त्यभिप्रायेणैतदुक्तम्।
[8] वृत्ताविति आदिः।
[9] पा. सू. ५.२.७३.
[10] पा. सू. २.३.९.

शदन्तविंशतेश्च ५.२.४६.

[४, १२५–१२६]

(**विवरणम्**) यो हि संख्यासमुदायः संख्याग्रहणेन [न] गृह्यत इति वदेत्, तं प्रत्याह — **एकेति** ॥

[४, १२५ –१२६]

(**उद्द्योतनम्**) **केवलस्य** प्रत्ययरूपस्येत्यर्थः । यद्यपि शतमाचष्टे शतयति, शतयतेरप्रत्ययः 'शत्' इति केवल एव संभवति, **तथापि** विंशतिशब्दसाहचर्यात् [१]पञ्क्त्यादिसूत्रोपात्तशत एव ग्रहणं युक्तमिति **भावः** । नेदमपूर्वं **वक्तव्य**मित्याह — **संख्याया इति** । ननु 'एकं च त्रिंशच्च एकत्रिंशत्' इत्येकत्वत्रिंशत्त्वसमुदाय एकत्रिंशच्छब्देनोच्यते । संख्यासमुदायश्च न संख्येति 'एकत्रिंशम्' इति न सिध्येत्, अत आह — **एकत्रिंशदादय इति** । [२]नृसिंहादयो जात्यन्तरस्येवेत्यन्वयः । इदं वक्तव्यमेवेत्याह — **ग्रहणवतेति** । [३]'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' इति निषेधादित्यर्थः ॥

[४, १२५–१२६]

(**नारायणीयम्**) सामर्थ्याद्वचनाद्वा तदन्तग्रहणे सिद्धेऽन्तग्रहणमनर्थकमित्याशङ्क्याह — **केवलस्येति** । ['संख्याग्रहणम्' इति नापूर्वम्, संख्याया इत्यनु]वृत्त्यैव सिद्धत्वादित्याह — [**संख्याया इति** । ननु 'एकत्रिंशत्' इति संख्या]समुदायोऽयम्, न संख्येति संख्याग्रहणानुवृत्तौ प्रत्ययो न प्राप्नोति, [यथा] स्वाङ्गसमुदायो [न स्वाङ्गमिति 'कल्याण] पाणिपादा' इति [४]"स्वाङ्गाच्च' [इति ङीष् न भवतीत्यत आह — **एकत्रिंशदादय इति** ।] केवलं पूर्वपदोत्तरपदार्थविभागादन्यैवेयं संख्या । न हि प्रत्यवयवमावर्ततेऽत्र बुद्धिः, संख्यान्तरस्यैवाभेदेन परिच्छेदात्, नरसिंहवदित्यर्थः । उक्तं च —

[५]"एकविंशतिसंख्यायां संख्यान्तरसरूपयोः ।
एकस्यां बुद्धयनावृत्त्या भागयोरिव कल्पना ॥
असंख्यासमुदायत्वात् संख्याकार्यं विधीयते ।
समूहत्वे तु तन्न स्यात् स्वाङ्गादिसमुदायवत् ॥ इति ।

गोत्रिंशदादयस्तु न संख्यावचना इति तेषामग्रहणम् । ननु विंशतिशब्देन प्रातिपदिकस्य विशेषणात् तदन्तविधौ सति किं वचनेनेत्यत आह — **ग्रहणवतेति** ॥

---

[१] पा. सू. ५.१.५९.
[२] प्रदीपपुस्तकेषु 'नरसिंहादय इव' इति दृश्यते । 'नृसिंहादय इव' इत्यन्नंभट्टपाठ इति प्रतीयते ।
[३] परिभाषा ३१.
[४] पा. सू. ४.१.५४.
[५] वाक्यपदीयम् ३.११.२०, २१.

संख्याया गुणस्य निमाने मयट् ५.२.४७.

[४, १२६–१२९]

(विवरणम्) **निमेय इति**। निमेयरूपेऽस्येति षष्ठीनिर्दिष्टे भवतीत्यर्थः। कयाचिद्विभक्त्या निर्देष्टव्यमित्येव निर्देशः स्यादित्यत आह — **एतदर्थमिति**॥

[४, १२६–१२९]

(उद्द्योतनम्) सूत्रार्थं तावदाह — **तदस्येति**। **करण इति**। मीयतेऽनेनेति मानम्। **समानावयवः** समानभागः। **निमेयं** मूल्येन ग्राह्यम्। **गुणत्वं** समानभागत्वम्, तादृशस्थल एव प्रयोगदर्शनादिति भावः। **उदाहरणमाह — यवानामिति**। 'यवानाम्' इत्यस्य फलमाह — **भागविशेषेति**। **नित्येति**। संख्यायाः संख्येयसापेक्षत्वाद् भागस्य भागिसापेक्षत्वाद् देवदत्तस्य गुरुकुलमितिवद् वृत्तिर्भवतीत्यर्थः। प्रत्युदाहरणमाह — **संख्याया इति किमिति**। **द्विमयमिति**। उदश्वित्सामानाधिकरण्यसिद्ध्यर्थं 'गुणिनि' इति वक्तव्यमित्यर्थः। स्वार्थे प्रत्ययेऽनिष्टप्रसङ्गमाह — **अन्यथेति**। अन्यतरशब्दो निमेयपर एवेत्याह — **अन्यतरशब्देनेति**। [1]यथाश्रुतमपि विवक्षाभेदेन समर्थयते — **अथवेति**। अत्रापि यथाश्रुते दोषं वदन् उदाहरणान्तरमाह — **भूयस इत्येतदिति**। **अन्ये त्विति**। 'अध्यर्धम्' इति निमानपरम्, 'एको यवानाम्' इति निमेयपरमिति मन्वाना इत्यर्थः। **तदयुक्तमिति**। [2]'अध्यर्धग्रहणं च समासकन्विध्यर्थम्' इति वचनात्। प्रसङ्गादाह — [3]**अर्धपञ्चमादयोऽपीति**। [4]'अर्धपूर्वपदश्च पूरणप्रत्ययान्तः' इति समासकनोरेव संख्यासंज्ञाविधानान्न तेभ्योऽपि प्रत्यय इत्यर्थः। ननु क्षीरादेर्भागत्वाभावात् कथं तत्र प्रत्ययः, अत आह — **स्वेति**। स्वभागापेक्षया लब्धो गुणिव्यपदेशो येन क्षीरादिना निमेयेनेति विग्रहः। भागे विधीयमानोऽपि प्रत्ययोऽभिधानस्वाभाव्याद् भागवन्तमाचष्ट इत्यर्थः। गुणमात्रं तु नाभिदधातीत्याह — **गुणमात्र इति**। **गुणस्येति**। गुणस्येत्यत्रैकत्वं विवक्षितमित्यर्थः। ननु गुणस्येत्यर्थनिर्देशः, अर्थो न विधीयते, किं त्वर्थेन प्रत्यय इति पश्वेक[त्व]वैषम्यमित्याशङ्क्याह — **एतदर्थमेवेति**। एकत्वविवक्षार्थमेवेत्यर्थः। यद्यपि वृत्तावेकत्वनियमात् समासेऽपि तद्विवक्षितुं शक्यम्, तथापि प्रकरणादिवशाद्यत्र द्वित्वबहुत्वावगतिस्तत्रापि समाससंभवाद्व्यस्तनिर्देश एकत्वविवक्षार्थ एवेति भावः। प्रत्ययान्तस्य कस्मिन्नभिधानसामर्थ्यम्, अत आह — **अन्यूनेति**। निमानभागेन तुल्यमेकं भागं वक्ति, न न्यूनम्, नाधिकमित्यर्थः। अत्रापि प्रत्ययार्थस्यैकत्वं विवक्षितमित्यभिप्रेत्य विग्रहमाह — **उदश्वित इति**। 'यावता' इत्यस्य तात्पर्यमाह — **तथा चेति**। भाष्ये [5]**उभयमिति**। कार्षापणादिकं क्रेत्रा विक्रेत्रे दीयते, [6]धान्यादिकमपि विक्रेत्रा क्रेत्रे। तत्रोभयत्र त्यागसाम्ये निमाननिमेयत्वस्य किंकृता व्यवस्थेत्यर्थः। भाष्ये **प्रसृततरेति**। यत्र विक्रेय-

---

[1] यथाश्रुतमिति विवक्षा — अ.

[2] का. वा. १.१.२३–५.

[3] प्रदीपपुस्तकेषु 'अध्यर्धपञ्चमादयोऽपि' इति दृश्यते। 'अर्धपञ्चमादयोऽपि' इत्यन्नंभट्टपाठ इति भाति। अयमेव पाठ उचितो भाति, वार्तिकानुगुण्यात्।

[4] का. वा. १.१.२३–७.

[5] तदुभयमिति — अ, ऋ, लृ.

[6] धान्यादिकमिति विक्रेत्रा — अ.

त्वप्रतीतिस्तन्निमेयम्, इतरन्निमानमित्यर्थः। तथापि यद्विक्रेयं तदेव निमानमितरन्निमेयमिति वा, द्वयोरपि निमानत्वं निमेयत्वं वा किं न स्यात्, अत आह — भाष्ये **अथवेति**। तद्व्याचष्टे — **येनेति**। ननु धान्येनापि धनं प्राप्यते, धनेनापि धान्यमितीदमप्यविनिगमकम्, अत आह — **देशेति**। यत्र मूल्यमिति व्यवहारस्तन्निमानम्, इतरन्निमेयम्। न हीदानीमुभयत्र मूल्यव्यवहारः, किं तु कार्षापणादावेवेति 'निमेये च' इति वक्तव्यमेवेति भावः॥

[४, १२६–१२९]

(**नारायणीयम्**) अनुवृत्तिं दर्शयति — **तदस्य संजातमित्यत इति**। तत्र 'तदस्य' इति समुदायस्य स्वरितत्वप्रतिज्ञानात्, बहुषु योगेष्वनुवृत्तिदर्शनाच्च। [1]'तदस्मिन्नधिकम्' इत्यत्र पुनस्तच्छब्दोपादानादसंबन्धेऽपीह प्रतिबन्धाभावात् स एव समुदायोऽनुवर्तत इत्यर्थः। [तेनैतन्न] चोदनीयम् — 'तदस्मिन्' इत्यस्यैव तच्छब्दस्यानन्तर्यादनुवृत्तिर्युक्ता, अस्मिन्नित्यनेन विच्छिन्नत्वादस्येत्यस्य न युक्तेति। **मेङ् प्रणिदान इति**। न तु माङ् मान इत्यस्य, अर्थसंगत्यभावात्। **करणे ल्युटीति**। निमीयते क्रीयतेऽनेनेति [2]'करणाधिकरणयोश्च' इति करणे ल्युट्। **प्रकृत्यर्थविशेषणमिति**। न तु प्रत्ययार्थनिर्देशः। ततश्चायं सूत्रार्थ इत्याह — **निमान इति**। **गुणशब्दः समानावयववचन इति**। 'द्विगुणा रज्जुः' इत्यादौ तथा दर्शनात्। निमानस्य प्रकृत्यर्थत्वे तत्संबन्धित्वेन प्रसिद्धस्य निमेयस्य प्रत्ययार्थत्वमर्थात् सिद्धमित्याह — **निमानस्येति**। **निमानस्य च गुणत्वमिति**। गुणस्येति निमानापेक्षया कर्मणि षष्ठीति निमेयस्य प्रत्ययार्थस्य गुणत्वं सिद्धम्। गुणशब्दश्च सापेक्षेऽर्थरूपे वर्तते। तथा हि — द्विगुणमित्युक्ते किंचिदपेक्ष्येति गम्यते। तत्र निमेयस्य गुणत्वं संनिहितनिमानमपेक्ष्येति सामर्थ्यात् सिद्धमित्यर्थः। उक्तं सूत्रार्थमुदाहरणे योजयितुमाह — **यवानामिति**। यद्यप्युभयत्रापि स्वस्य धनस्य त्यागः परकीयस्य च ग्रहणं समानम्, तथापि लोके यवादेर्निमानत्वमुदश्विदादेर्निमेयत्वं प्रसिद्धिवशादवगतमिति तदाश्रयेण शब्दप्रयोगः। देशकालादिवशाद्वा निमाननिमेयत्वव्यवस्था। **द्विमयमिति**। एकगुणस्योदश्वितो द्विगुणा यवा मूल्यमित्यर्थः। ननु प्रकृत्यर्थस्य यवाद्यपेक्षणादसामर्थ्यात् प्रत्ययो न स्यादित्यत्राह — **नित्यसापेक्षत्वादिति**। द्विशब्दस्य वृत्तिविषये भागवृत्तित्वात् संबन्धिशब्दत्वेन भागवतो नित्यमपेक्षणादित्यर्थः। **यवभा[गाविति**। द्विवचना]न्ताद्यवभागशब्दात् [प्रत्य]यो न भवति, असंख्यावाचित्वात्। **द्वौ कार्षापणाविति**। अत्र व्रीहेरेव नि[मानं कार्षा]पणद्वयम्, न तद्भागस्येति। न भा[गवाचकगुणश]ब्देन गुणभूतप्रकृत्यर्थनिमानसंबन्धी[निमेयभाग उच्यते, किं तु गु]णशब्देन प्रत्य[यस्यार्था]भावात् प्रकृत्यर्थ उच्यत इत्याह — [3]**गुणेष्विति**। स्वार्थे प्रत्यये लक्ष्यगतं दोषं दर्शयति — **अन्यथेति**। ननु 'भूयसः' इत्यनेन प्रत्ययार्थात् प्रकृत्यर्थस्य बहुतरत्वे प्रत्ययेन भाव्यम्। [4]'बहोर्लोपो भू च बहोः' इति भूयश्शब्दस्य व्युत्पादितत्वादिति द्विशब्दान्न स्यादित्याशङ्क्य बहुत्वमत्राविवक्षितम्, आधिक्यमात्रमेव विवक्षितमित्याह — **निमेयभागेति**। [5]**यदा चेति**। निमाननिमेययोः साम्यविषये न भवतीत्यर्थः। **निमेयमेवेति**। न तु निमानम्। निमाननिमेययोर्विपर्यासमाश्रित्य भाष्योक्तमुदाहरणं समर्थयते—

---

[1] पा. सू. ५.२.४५.
[2] पा. सू. ३.३.११७.
[3] प्रदीपे 'गुणेषु मा भूदिति' इति प्रतीकतया मुद्रणं दृश्यते। 'गुणेषु मा भूदित्यस्य स्वार्थे' इति प्रदीपग्रन्थत्वेनाभिमतमिति भाति।
[4] पा. सू. ६.४.१५८.
[5] प्रदीपे 'यदाधिका' इति दृश्यते। 'यदा चाधिका' इति पाठोऽभिमतः स्यादिति भाति।

— **अथवेति** । **द्वौ यवानामध्यर्धमिति** । अत्रैकगुणस्याधिक्यात् समानत्वाभावात् प्रत्ययाभावः । **अन्ये त्विति** । निमाननिमेयभावस्य विपर्ययमाश्रित्य, 'अध्यर्धमुदश्वितो निमानं, यवानामेको भागो निमेयम्' इति विवक्षायामध्यर्धशब्दात् प्रत्ययो मा भूदिति वचनमित्याहुः । एवं च भूयस्त्वं निमानस्य युज्यते । **समासकनोरेवेति** । तथा च वार्तिकम् — [1]'अध्यर्धग्रहणं च समासकन्विध्यर्थम्' इति । [2]**अर्धपञ्चमादयोऽपीति** । [3]'अर्धपूर्वपदश्च पूरणप्रत्ययान्तः' इत्यत्रापि समासकन्विध्यर्थमित्यनुषज्यते । **तेभ्योऽपीति** । अर्धपञ्चमा यवा निमानमस्योदश्विद्भागस्येत्यादौ प्रत्ययो न भवतीत्यर्थः । **निमेये क्षीरादाविति** । अत एव [4]'द्विमयं क्षीरम्' इति सामानाधिकरण्यमुपपद्यते । ननु गुणस्येति वचनाद् भाग एव प्रत्ययेन [भाव्यमित्यत आह] — **निमेयगुणमात्र इति** । तन्त्रं प्रधानम्, अर्थस्य विवक्षितत्वादिति व्याचष्टे — **पशुनेति** । गुणगतसंख्याया विवक्षितत्वं [5]ग्रहाधिकरणन्यायसिद्धम्, तद्वदत्राप्येकत्वं विवक्षितमित्यर्थः । लिङ्गादपि संख्याया विवक्षितत्वं दर्शय[ति — **एतदर्थमेवेति** । अनभिधा]नमेव दर्शयति — **अन्यूनेति** । निमेये वर्तमानात् संख्याशब्दात् निमाने प्रत्ययो दृश्यत इति वार्तिकार्थं दर्शयति — **उदश्वित इति** । एतदपि सूत्रेणैव सिद्ध्यति, तन्त्रादिन्यायाश्रयणात् । द्वे अत्र वाक्ये । तत्र द्वितीये ['निमानम्' इति [6]'कृत्यल्युटो बहु]लम्' इति कर्मणि ल्युट् । **गुणस्येति** । करणस्य कर्तृत्वविवक्षया कर्तरि षष्ठी । निमेयस्य निमानापेक्षत्वान्निमानं प्रत्ययार्थः । अन्यत् [सर्वं] पूर्ववदिति । ['यावता' इति भाष्यस्य] संगतिं दर्शयति — **तथा चेति** । इदमुपलक्षणमित्याह — **देशकालेति** । देशकालाश्रयो यो लोकव्यवहारस्तदपेक्षत्वादित्यर्थः । पूर्वं [निमाननिमेययोर्व्य]वस्थोक्ता, इदानीं दे[शकालापेक्षत्वेनाव्यवस्थोच्यते] ॥

तस्य पूरणे डट् ५.२.४८.

[४, १२९–१३३]

(विवरणम्) 'संख्यापूरणे' इतीममर्थं सूत्रारूढं कुर्वन् वचनं व्याख्यानमभिप्रेतमित्याह — **द्वे इत्यादिना** । अर्थाच्चैकं षष्ठ्यन्तमर्थपदार्थकं च भविष्यतीति भावः । 'सूत्रं च' इति चशब्देन वार्तिकभेदो द्योत्य इति भ्रमं व्युदस्यति — **न [च] केवलमिति** । प्रकृत्यर्थ एव प्रत्ययार्थः स्वार्थिकन्यायेन भविष्यतीत्याशङ्क्यास्वार्थिकप्रकरणे स्वार्थिकत्वमयुक्तम्, पञ्चम इत्युक्ते च पञ्चापि प्रतीयेरन्नित्यभिप्रेत्याह — **अयमर्थ इति** । कनादिवद्वा तरबादिवद्वा स्वार्थिकत्वमिति भ्रमं व्युदस्यति — **प्रकृत्यर्थेति** । 'वचनात्' इति संख्याग्रहणद्वयानुवर्तनमभिप्रेतम्, न्यायो वेत्याह — **तत्रेति** । **सर्वा वृत्तिः** प्रत्ययानामिति शेषः । 'तस्याः' इति श्लोकस्यायमर्थः — [7]'येन या पञ्चत्वादिसंख्या पूर्यते तस्याः पूर्वा तु या संख्या चतुष्ट्वादिरूपा तस्यां वर्तमानात् संख्याशब्दात्

---

[1] का. वा. १.१.२३–५.

[2] प्रदीपे 'अध्यर्धपञ्चमादयोऽपि' इति दृश्यते । 'अर्धपञ्चमादयोऽपि' इत्येवोचितो भाति, वार्तिकानुगुण्यात् ।

[3] का. वा. १.१.२३–७.

[4] द्विगुणं क्षीरं — घ.

[5] मीमांसातृतीयाध्यायप्रथमपादसप्तमाधिकरणेत्यर्थः ।

[6] पा. सू. ३.३.११३.

[7] येनार्थेनेत्यर्थः, अस्य प्रतिनिर्देशस्तस्मिन्नभिधेय इति ।

तस्मिन्नभिधेये भवतु तद्धित इति। [1]चशब्देन वार्थेन 'बहूनाम्' इत्यनेन परिहारान्तरमभिधीयत इति द्योतितम्, तत् पूर्वस्मात् 'अन्योन्यं वा' इत्युक्ताद् भेदाभावादयुक्तमित्यत आह — **पूर्वस्मादिति** ॥

[४, १२९–१३३]

(उद्द्योतनम्) 'गुणस्य' इत्यत्रैव 'तस्य' इत्यत्रापि संख्याविवक्षाशङ्कां निराह — **तस्येतीति**। ननु संख्यापूरणे प्रत्ययविधानेऽयं दोषो नास्ति, अत आह — **संख्यावाचिन इति**। **एतावानेवेति**। तावन्मात्रस्यैव सूत्रे श्रुतत्वात्। **लब्धेति**। घटान्तर्भावं विनापीत्यर्थः। **उष्ट्रिकाः** जलधारिकाः, ता जलपूर्णाः क्रियन्ते येन घटेन स पूरणो घटः। अत्र पूरणस्य संख्यासंबन्धो नास्ति, अत आह — **आधारेति**। उष्ट्रिकासु जलपूरणमस्ति। तस्य पञ्चत्वसामानाधिकरण्यात् तत्संबन्धोऽस्तीत्यर्थः। वाचनिकत्वं निराह — **द्वे इति**। [2]'संख्याया अवयवे तयप्' [3]'संख्याया गुणस्य निमाने मयट्' इत्यत इत्यर्थः। **स प्रत्ययार्थ इति**। घटस्तु जलपूरको न संख्याया इति न तत्र प्रत्ययार्थः। एकानुवृत्त्यापि संनिधानादुक्तार्थलाभ इत्याह — **अथवेति**। [4]**अनन्तर्भूते** घटादौ। अनेन सूत्रस्य कोऽर्थ उक्तः, अत आह — **न्यासान्तरमिति**। अनेनोक्तदोषनिरास इत्याह — **तेनेति**। ननु गणनाया गणयित्रधीनत्वाद् द्वितीयत्वमव्यवस्थितम्, अत आह — **प्रसिद्धेति**। गणयितृविवक्षया तत्राप्यष्टमव्यपदेश इष्यत इत्याह — **यदा त्विति**। तद् भाष्यकृतः संमतमित्याह — **तथा चेति**। यथाश्रुतसूत्रे तु नायं दोष इत्याह — **पूरणेति**। संख्येयस्य स्थायित्वात् 'अनपगते' इति व्यर्थम्, अतीतानामपि संख्येयत्वावगमश्च, अत आह — **बुद्ध्येति**। उपजननं बुद्धिविषयत्वमित्याह — **बुद्धाविति**। उक्ताव्याप्तिं स्फोरयति — **द्वादशीति**। चरमदशकस्य शततमोऽन्त्य इति 'नवानाम्' इत्युक्तम्। 'वृत्तिस्थानम्' इत्यत्र वृत्तिं व्याचष्टे — **वृत्तिरिति**। तत्र हेतुः — **उपसर्जनेति**। वाक्यतात्पर्यमाह — **तदयमिति**। 'वृत्तिस्थानम्' इत्यस्य [5]प्रत्ययार्थपरत्वे व्युत्पत्तिमाह — **प्रत्ययार्थे हीति**। **स्वार्थोपसर्जन इति**। बहुव्रीहिः। तस्याक्षेपप्रकारमाह — **अयमत्रेति**। प्रकृत्यर्थान्तर्भावमेवाह — **तथा हीति**। अनिष्टविषय एव प्राप्नोतीति यदुक्तं तदाह — **ततश्चेति**। पूरणत्वस्याधिकस्य प्रत्ययार्थे प्रवेशात् सर्वात्मना स्वार्थिकत्वं नास्तीत्याह — **प्रकृत्यर्थेति**। ननु तथापि प्रकृत्यर्थभिन्नघटादावेव प्रत्ययः किं न स्यात्, अत आह — **तत्रेति**। **अन्तरङ्गत्वादिति**। द्वितीयसंख्याग्रहणाननुवृत्तावपि प्रकृत्यर्थसंख्याया उपस्थितत्वात् तत्पूरण एव प्रत्ययो भविष्यति, न घटादावित्यर्थः। तर्हि पूरणत्वं प्रत्ययार्थस्य कथम्, अत आह — **तेनेति**। चतुर्षु स्वान्तर्भावे पञ्चत्वसंख्योपजननात् पञ्चत्वपूरकत्वमस्तीत्यर्थः। [6]अर्धद्रोणेऽपि द्रोणशब्दवृत्तिवद् वृत्तिविषये चतुर्ष्वपि पञ्चशब्दप्रवृत्तिरित्याह — **यथेति**। अर्धं तृतीयं येषामिति विग्रहः। द्रोणस्यार्धमर्धद्रोणः। [7]'अर्धं नपुंसकम्' इति समासः। [8]'अभिधाने हेतुः — **तथा चेति**। नन्वर्धस्यापि समासार्थत्वे कथमयमन्यपदार्थे बहु-

---

[1] 'पूरणश्चैक इष्यते' इत्यत्रत्येन चशब्देनेत्यर्थः।
[2] पा. सू. ५.२.४२.
[3] पा. सू. ५.२.४७.
[4] अनन्तर्भूतघटादौ — अ, ऋ, लृ.
[5] प्रत्ययार्थत्वे — अ.
[6] अद्रोणेऽपि — अ, ऋ, लृ.
[7] पा. सू. २.२.२.
[8] अनभिधाने — अ, ऋ, लृ.

व्रीहिः, अत आह — **अवयवेनेति**। उक्तो विग्रहः। **समुदायः** उद्भूतावयवभेदः, तेन बहुवचनोपपत्तिः। अनेन प्रत्ययार्थः क उक्तः, अत आह — **तेनेति**। नन्वेवं त्रयोऽपि न्यूनाः पञ्चेति तत्पूरणयोर्द्वयोरपि प्रसङ्गः, अत आह — **न्यूनाश्चेति**। [1]**तथा हीति**। एकोन एव न्यूनशब्दः प्रयुज्यते, न द्वयून इत्यर्थः। अन्योन्यापेक्षत्वेन कः प्रत्ययार्थ उक्तः, अत आह — **सर्वेष्वेवेति**। न चतुर्ष्वित्येवकारार्थः। **एकतममिति**। [2]'एकाच्च प्राचाम्' इति बहूनामेकस्य निर्धारणे डतमः। ननु प्रसिद्धसंनिवेशग्रन्थे द्वितीयादेः पञ्चमत्वं न संभवति, अत आह — **गणनेति**। **यथेति**। 'यदा तु व्युत्क्रमेण' इत्यादिना। ननु 'अन्योन्यं वा' इति पक्षात् 'बहूनां वा' इत्यस्य को भेदः, अत आह — **पूर्वस्मादिति**। **अतिरोहितेति**। तत्रैकः प्रत्ययार्थः। [3]'स्नुवृश्चिकृत्यृषिभ्यः कित्' इति सप्रत्ययान्तो वृक्षशब्दोऽन्तोदात्तः। अवयवे चाञ् प्रत्ययः॥

[४, १२९–१३३]

(नारायणीयम्) [ननु] प्रत्ययार्थं प्रति [प्रकृत्यर्थस्य विशेषणत्वात् पशुनेत्या]दिवद्विवक्षितत्वात् तस्येत्येकत्वविशिष्टसंख्यावाचिनः प्रत्ययेन भाव्य[मिति 'एका]दशः, द्वादशः' इ[त्युदाहरणमयु]क्तमित्यत आह — **तस्येति**। [ननु तस्येत्येकवचनस्य विद्यमान]त्वात् कथमविवक्षितत्वमित्याशङ्क्य च सामर्थ्यमत्र [हेतुरित्याह — **न हीति**। अतिप्रसङ्गं] सूत्रार्थप्रदर्शनेनोपपादयति — **संख्यावाचिन इति**। **पूरणे घट इति**। पूर्यतेऽनेनेति पूरणः, [येन पञ्चो]ष्ट्रिकाः पूर्यन्ते तस्मिन्नित्य[र्थः।] संख्यापूरण [इत्युक्तेऽत्र प्रत्य]यप्राप्तिः कथमित्यत्राह — **आधारधर्मेणेति**। संख्या नाम [सा, या संख्येये स]मवैति। तत्राधारभूतसंख्येयपूरणेनाधेयभूतायाः संख्याया अपि संबन्धात् संख्यापूरणत्वं घटस्योपपद्यत इत्यर्थः। ननु प्रकृतिविशेषणे संख्याग्रहणस्योपयुक्तत्वात् पूरणविशेषणे रूपा[न्तरं नास्तीत्यत आह — **द्वे इ]ति**। [4]'संख्याया अवयवे' इति [5]'संख्याया गुणस्य' इति च द्वयोः प्रकृतत्वात्। एकेनैव संख्याग्रहणेनानुवर्तमानेनेष्टस्य सिद्धत्वात् संख्याग्रहणद्वितयानुवृत्त्याश्रयणप्रयासो निष्फल इत्याशयेन पक्षान्तरमाह — **अथवेति**। संख्यावाचिनः पूरणे प्रत्ययविधाने कस्य पूरण इति विषये यस्य संख्यावाचिनो यत् प्रवृत्तिनिमित्तं संख्यानं पञ्चत्वादि तस्य पूरण इत्यन्तरङ्गत्वाद् विज्ञायते, न तु पञ्चादिशब्दवाच्याद्बहिर्भूते संख्येये। यथा [6]'अतिशायने [7]'कुत्सिते' इत्यादाविति्यर्थः। न्यासान्तरे सतीष्टसिद्धिं दर्शयति — **तेनेति**। चतुर्षु घटेषु संपन्नेषु येनोपजातेन पञ्चत्वसंख्या संपद्यते स पञ्चमशब्दवाच्यः। 'सर्वेषां हि' इति भाष्यं व्याचष्टे — **तद्भाव इति**। द्वितीयाध्यायस्याष्टमशब्देनाभिधानं सर्वथा नानिष्टमित्याह — **यदा त्विति**। यथान्यासे त्वयं दोषो नावतरतीत्याह — **पूरणग्रहग इति**। 'अनपगते' इत्येतद् व्याचष्टे — **बुद्ध्येति**। 'चरमोपजाते' इत्येतद्विवृणोति — **पश्चादुपजायत इति**। अत्रोक्तामव्याप्तिमुपपादयति — **एकादशीति**। **एवमिति**। द्वितीयतृतीयशब्दयोर्युगपत्प्रयोगे दोषावतर इत्यर्थः। वाक्यार्थसमुच्चयार्थश्चशब्द इत्याह — **न [च] केवलमिति**। वृत्ति-

---

[1] प्रदीपे 'तथा पञ्चसु' इत्यत्र 'तथा हि पञ्चसु' इति निर्णयसागरमुद्रिते पाठः।
[2] पा. सू. ५.३.९४.
[3] उणादिसूत्रम् ३५३.
[4] पा. सू. ५.२.४२.
[5] पा. सू. ५.२.४७.
[6] पा. सू. ५.३.५५.
[7] पा. सू. ५.३.७४.

शब्दार्थं तावदाह — **वृत्तिः परार्थेति**। ननु 'नेयं वृत्तिरुपालभ्यते' इत्युपक्रम्य 'वृत्तिरेव न प्राप्नोति' इत्युपसंहारोऽनुपपन्न इत्याशङ्क्य तात्पर्यमाह — **तदयमिति**। **अनिष्ट एवेति**। पञ्चानामुष्ट्रिकाणां पूरणो घट इत्यादावेवेत्यर्थः। **प्रत्ययार्थो वृत्तिस्थानमिति**। प्रकृते वृत्तिस्तिष्ठत्यस्मिन्नित्यधिकरणे ल्युट्। प्रत्ययार्थाभावमुपपादयितुमाह — **अयमत्रेति**। 'वृत्तिरेव न प्राप्नोति' इत्येवकारेणेष्टे विषये नैव प्राप्नोतीत्युक्तम्। तदेतदाह — **अत्रैवानिष्ट इति**। अत्र हि प्रकृत्यर्थव्यतिरिक्तः प्रत्ययार्थः स्फुटमवभासत इति भावः। यदि स्वार्थे प्रत्ययः पञ्चपञ्चमशब्दयोः पर्यायत्वं स्यात्। यथा पञ्च पञ्चकाः शकुनय इत्यादा[वित्यत आह — **प्र]कृत्यर्थेति**। **तत्र संख्येति**। एतत् पूर्वमेव [प्रतिपादितम्]। ननु च[तुःशब्दादिभ्यः] प्रत्ययविधा[ने पञ्च]म इत्यादौ लौकिकोऽर्थो [न] संगृहीतः स्यादित्यत आह — **तेनेति**। चतुर्षु पञ्चन्शब्दस्य प्रवृत्तिमुपपादयति — **यथार्थेति**। [ननु न्यूनानां] पञ्चानां पूरणप्रत्ययविधानेऽत्र [कथमिष्टं सिध्य]तीत्यत्राह — **न्यूनाश्चेति**। 'अथवा' इत्यादिनोक्तस्य पक्षान्तरस्य पूर्वस्माद् भेदं विशदयति — [1]**"सर्वेष्वेवेति**। अन्योन्यापेक्षामुपपादयति — [2]**ते त्विति**। एवमपि कथं पूरणे प्रत्ययो विधीयेतेत्यत्राह — **इति पञ्चभ्य इति**। अतिव्याप्तिं निवारयति — **गणनापेक्षायामिति**। **यथा पूर्वमिति**। 'यदा तु व्युत्क्रमेण' इत्यादिना। 'प्रकृत्यर्थात्' इत्यादेः पौनरुक्त्यमाशङ्क्य परिहरति — **पूर्वोक्तार्थेति**। तथा चाहुः — [3]"इष्टं हि विदुषां लोके समासव्यासधारणम्' इति। यदिशब्दो यदेत्यस्यार्थे वर्तत इत्याह — **यदेति**। 'तया' इत्यनेन प्रत्ययार्थभूत[त]योत्तरा संख्याभिधीयत इत्याह — **प्रत्ययार्थेनेति**। तेन प्रकृतिप्रत्ययार्थयोरेकार्थीभावलक्षणस्य संबन्धस्य भावान्न्याय्या वृत्तिरिति भाष्यार्थः। **अतिरोहितभेद इति**। उद्भूतभेद इत्यर्थः। **उत्तरत्र तु समुदाय इति**। तिरोहितभेद इत्यर्थः। तदेवाह — **अवयवस्त्विति**। **अनुदात्तादेरिति**। वृक्षशब्दस्य प्रातिपदिकस्वरेण प्रत्ययस्वरेण वान्तोदात्तत्वादनुदात्तादित्वम्॥

नान्तादसंख्यादेर्मट् ५.२.४९.

[४, १३३–१३४]

(विवरणम्) [4]**मट्थटोरिति**। अकारस्योच्चारणार्थत्वेनागमपक्षे व्यञ्जनमात्रस्यैवागमत्वात् डट्स्वरेण पञ्चमादीनामन्तोदात्तत्वात्, साच्कत्वेऽप्येकादेशस्वरेण,[5] प्रत्ययपक्षेऽपि [साच्कस्यैव] प्रत्ययस्य विधानात् प्रत्ययस्वरेणान्तोदात्तत्वाद् विशेषाभाव इत्यर्थः॥

[४, १३३–१३४]

(उद्द्योतनम्) ननु [6]"आद्यन्तौ टकितौ' इत्यत्र षष्ठीनिर्दिष्टस्येत्यनुक्तेः कथं तन्निर्देश

---

[1] पूरणेष्वेवेति — घ.

[2] प्रदीपे 'एकैकमन्तरेण पञ्च न भवन्ति' इत्यत्र 'एकैकमन्तरेण ते तु पञ्च न भवन्ति' इति पाठोऽभिमतः स्यादिति भाति।

[3] महाभारतम् आदिपर्व. १.४९.

[4] प्रदीपे 'मट्थट्थुकाम्' इत्यत्र 'मट्थटोः' इति पाठ इति नागेशेनोक्तम्। 'थट् च छन्दसि' इति थट् विहितः।

[5] अन्तोदात्तत्वादित्यनुषङ्गः।

[6] पा. सू. १.१.४६.

आपाद्यते, अत आह — **षष्ठीति**। [1]'षष्ठी स्थानेयोगा' इति सूत्र इत्यर्थः। तस्य परत्वात् कथमत्रान्वयः, अत आह — **तत्रेति**। तत्रानुवृत्तिप्रयोजनं सूचयति — **चरेष्ट इति**। तत्र षष्ठीनिर्दिष्टस्येत्यनुक्तौ टितः प्रत्ययस्य प्रकृत्यादित्वप्रसङ्गः। तस्मिन् सूत्रे भाष्य एवैतत् प्रपञ्चितम्। भाष्योक्तविंशतितमोदाहरणस्य तात्पर्यमाह — **तत्रेति**। मकाराकारस्य प्रत्यय-स्वरेणोदात्तत्वे डट उदात्तत्वे वोभयथापि पञ्चमशब्दस्यान्तोदात्तत्वात् स्वरे विशेषाभावः। **अनु-दात्तो भवतीति**। आगमानामनुदात्तत्वात्॥

[४, १३३–१३४]

(नारायणीयम्) ननु प्रकृतस्य डड्ग्रहणस्यानुवर्तनादागमिनः सिद्धत्वात् किं तदर्थेन यत्नेनेत्यत आह — **षष्ठी स्थान इति**। नन्वेवमपि मडादीनां टित्त्वादिलिङ्गयोगादागमत्वमेव युक्तम्, न तु प्रत्ययत्वमित्याशङ्क्याह — **चरेष्ट इत्यादिवदिति**। भाष्ये 'विंशतितमः' इत्यत्र स्वरदोष उक्तः। तत्र प्रथमातिक्रमे कारणमाह — [2]**मड्डटोरिति**। **स्वरितत्वादिति**। स्वरितत्वप्रति-ज्ञानादवश्यमनुवृत्त्या भाव्यम्, तत्र विधानार्थत्वायोगादागमसंबन्धप्रतिपत्त्यर्थैवानुवृत्तिरिति। तदाह — **न तत इति**॥

षट्कतिकतिपयचतुरां थुक् ५.२.५१.

[४, १३४–१३५]

(विवरणम्) चतुर इति। [3]डटीति शेषः। 'सर्वम्' इति सानुबन्धकपरामर्शे विधेयेन विरोधादुक्तम् — **थकाररूपमिति**॥

[४, १३४–१३५]

(उद्द्योतनम्) हल्मात्रस्य लोपशङ्कां निराह — **अक्षरेति**। 'आदिलोपः' इत्येव सिद्धेऽक्षर-ग्रहणं समुदायप्रतिपत्त्यर्थमित्यर्थः। आभ्यां डटो बाधशङ्कां निराह — **छयद्भ्यामिति**। ननु 'सर्वत्र' इति वक्तव्यम्, न 'सर्वम्' इति, थट्थुकोरेकत्वासंभवात्, अत आह — **सर्वं थकाररूप-मिति**। पदान्तविधेः प्रतिषेध इति समासशङ्कां निराह — **विधिप्रतिषेधाविति**। व्यवस्थामेवाह — **थटि सतीति**। थटः प्रत्ययावयवत्वेन पदसंज्ञेत्यर्थः। **थकारान्तस्येति**। थुकः प्रकृति-भक्तत्वेन डटोऽजादित्वाद् भत्वं स्यादित्यर्थः। यद्यपि थान्तस्य पदत्वेऽपि नकारस्य पदान्तत्वा-

---

[1] पा. सू. १.१.४९.

[2] प्रदीपे 'मट्तट्थुकाम्' इति पाठो दृश्यते। अयं 'मट्थुकोः' इति चापपाठ इत्युक्त्वा 'मट्-थटोः' इत्येव पाठ इति नागेशेनोक्तम्। "'मड्डटोः' इति पाठे तयोर्मध्ये मट इत्यर्थः" इति चोक्तम्। अयं पाठोऽत्राभिमतः।

[3] एतेन प्रदीपे 'डटि' इति विवरणकृत्पाठे नासीदिति प्रतीयते। इदानींतनप्रदीपपुस्तकेषु 'डटि चतुरस्थुग्विधानात्' इत्येव दृश्यते।

भावाल्लोपाप्रसङ्गः[1]। अन्तर्वर्तिविभक्त्याश्रयेण तु पदान्तत्वे थान्तस्य [2]भत्वेऽपि लोपः सिध्यति, तथापि डट् प्रातिपदिकादेव विधीयत इति नान्तर्वर्तिविभक्त्याश्रयेण लोपः संभवति। भत्वकथनं तु पदावयवस्य प्रातिपदिकान्तस्य नस्य लोप इति कल्पने न सिध्यतीत्यभिप्रायेणेत्याहुः॥

[४, १३४–१३५]

(नारायणीयम्) अच्सहितमिति। न तु व्यञ्जनमात्रम्। ननु विशेषविहिताभ्यां छयद्भ्यां डटो बाधनाच्चतुर्थ इति न स्यादित्यत आह — **छयद्भ्यामिति**। **डटि चतुर इति**। प्रकृतस्य डड्ग्रहणस्यात्रार्थात् सप्तम्या विपरिणामात्। **सर्वमिति**। रूपे स्वरे च विशेषाभावात् थटः प्रत्ययत्वे लोपसिद्धिमुपपादयति — **थटि सतीति**॥

बहुपूगगणसंघस्य तिथुक् ५.२.५२.

[४, १३५–१३६]

(उद्द्योतनम्) ननु लिङ्गविशेषानुपादानात् स्त्रीवृत्तिभ्योऽपि बह्वादिभ्यः प्रत्ययागमौ स्यातामिति वचनं व्यर्थम्, अत आह — [3]**लिङ्गसहचरितेति**। यस्य पुंवद्भावस्तस्य भत्वमपेक्षितम्। न चात्र तदस्तीत्याह — **तियुकि कृत इति**। ननु डटि परत आगमविधानात् कथमुत्पत्तिसंनियोगः, अत आह — **यदैवेति**। प्रत्यये विवक्षिते ततः पूर्वमेवागमः, पश्चात् प्रत्यय इत्यर्थः। उभयाश्रयणे हेतुः — **भस्येति**। **प्रागिति**। पुंवद्भावोऽपि पूर्वमेव भवतीत्यन्तरङ्गत्वमुभयोरपि सममित्यर्थः॥

[४, १३५–१३६]

(नारायणीयम्) ननु पूर्वभक्तस्य तिथुकः कथं व्यवधायकत्वमित्याशङ्क्य स्त्रीप्रत्ययान्तस्य भसंज्ञाभावप्रदर्शनपर[मेतदित्याह — **तियुकीति**।] ननु डटि परतस्तिथुको विधानादुत्पन्ने प्र[त्यय एवागम इत्यत] आह — **यदैवेति**॥

षष्ट्यादेश्चासंख्यादेः ५.२.५८.

[४, १३६–१३७]

(विवरणम्) ननु 'षष्ट्यादेः' इत्यनेन लोकप्रसिद्धानां षष्ट्यादिसंख्यापरिगणनार्थानां षष्ट्येक-

---

[1] लोपप्रसङ्गः — अ.
[2] भत्वे टिलोपः — अ.
[3] 'लिङ्गसहचरितः प्रत्ययः' इति प्रदीपे दृश्यते। 'लिङ्गसहचरितप्रत्ययः' इत्यन्नंभट्टपाठ इति भाति।

षष्ट्यादीनां ग्रहणे 'असंख्यादेः' इति प्रतिषेधोऽर्थवानित्यत आह — **इहेति**। **एकान्नविंशतितम इति**। एकेन न विंशतिरिति विगृह्य समासे [1]'एकादिश्चैकस्य' इति प्रकृतिभावान्नलोपाभावे अ[2]अदुकि च 'एकान्नविंशति'शब्दः साधुः। तस्मात् [3]'विंशत्यादिभ्यः' इति तमटि [4]डे च रूपम्॥

[४, १३६–१३७]

(उद्द्योतनम्) इहादिशब्दः प्रकारे। तत्र सूत्रोपात्ताः केवलषष्ट्यादयः, लोकप्रसिद्धास्त्वेकषष्ट्यादयोऽपीत्यभ्युपेत्य प्रश्नाशयमाह — **इहेति**। **लौकिकग्रहणात्** लौकिकस्यापि ग्रहणात्। तमटः प्रत्ययत्वाभावादाह — **प्रत्ययभक्तत्वादिति**। ननु विशेष्यासंनिधानात् कथं तदन्तविधिः, अत आह — **शास्त्रीयाणामिति**। प्रत्यासत्त्येत्यादिः। **संख्याया इति**। ननु लौकिकसंख्याग्रहणज्ञापनेनाप्येकविंशतितमसिद्धेस्तदन्तविधेर्ज्ञापनं किमर्थमुक्तम्, अत आह — **तत्र यदीति**। **तदेति**। [5]'एकोनविंशत्यादिशब्द एव लोके प्रसिद्धः, नैकान्नविंशतिशब्दः, तस्य शास्त्रमात्रप्रसिद्धत्वात्। तदन्तविधौ तु प्राप्यत इत्याह — **भाष्यकारेणेति**। ननु तदन्तविधिज्ञापने केवलान्न स्यात्, अत आह — **यत्रेति**। ननु [6]'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्युक्तेः कथं केवलात् प्राप्तिः, अत आह — **ज्ञापकेनेति**। [7]लक्षणविशेषे [8]'विंशत्यादिभ्यस्तमट्' इत्यादौ। 'सामान्येन' इत्येतदेव विशदयति — **ग्रहणवतेति**। तदन्तविधिमात्रज्ञापनेऽपि केवलात् प्रत्ययोत्पत्तिप्रकारमाह — **अथवेति**। ज्ञापकेन तदन्तस्यापि क्वचिद् भवतीति वाक्यान्तरं कल्प्यत इत्यर्थः। केवलादुत्पत्तिसाधनस्य प्रयोजनमाह — **तेनेति**। तर्ह्येकषष्ट्यादेस्तमण्न भवत्येव, भवति विकल्पेन वा, नेत्याह — **एकषष्ट्यादिभ्य इति**। केचित्तु 'एकषष्टितमम्' इति पाक्षिकप्रयोगमपि नेच्छन्ति। तदुपन्यस्य भाष्यविरोधाद् दूषयति — **केचित्त्विति**। **प्राप्तिमात्रेति**। विंशत्यादिसूत्रेण 'षष्ट्यादेः' इत्यनेन च या प्राप्तिः सा सर्वा 'असंख्यादेः' इति निषिध्यत इत्यर्थः। ननु स्वसूत्रे निषेध्यसंभवे सूत्रान्तरप्राप्तिः कथं निषिध्यते, अत आह — **असंख्यादेरिति**। न्यायविरोधमप्याह — **अनन्तरस्येति**। योगविभागेऽपि 'षष्ट्यादेः' इत्यनेन प्राप्तस्यैव निषेधः, न विंशत्यादिभ्य इत्यनेन प्राप्तस्येत्यर्थः॥

[४, १३६–१३७]

(नारायणीयम्) ननु लौकिकानां षष्ट्यादीनामिह ग्रहणादेकषष्ट्यादिभ्योऽपि तमटः प्रसङ्गे 'असंख्यादेः' [इति प्रतिषेधो व]क्तव्य [एवेत्यत आह —] **प्रत्यासत्त्येति**। उत्तरवादिन आशयमाह — [**इतर इति**। षष्टिशब्दात् कस्यचित्] प्रत्ययस्याविधानात् 'प्रत्ययो विधीयते' इत्य-

---

[1] पा. सू. ६.३.७६.
[2] आदुकि च — व.
[3] पा. सू. ५.२.५६.
[4] डट्प्रत्यय इत्यर्थः। तस्मात् डे तमटि चेत्यन्वयः।
[5] एकविंशत्यादि — लृ.
[6] परिभाषा ३२.
[7] प्रदीपे 'ज्ञापकेन सामान्येन' इत्यत्र 'ज्ञापकेन लक्षणविशेषे सामान्येन' इत्यन्नंभट्टपाठ इति भाति।
[8] पा. सू. ५.२.५६.

युक्तमित्यत्राह — **प्रत्ययभक्तत्वादिति**। ननु वि[शेषणेन तदन्त]विधिर्भवन् कथमत्र [प्राप्नोतीत्यत आह — **शास्त्रीयाणामिति**। नन्वसंख्या]दिग्रहण एवैकषष्ट्यादेः प्रसङ्ग इत्य[त आह — **प्रकरण**] **इति**। न त्वस्मिन् सूत्र एव। किं तु सर्वत्र पूरणप्रकरण इत्यर्थः। नन्वसंख्यादेरित्यस्य लौ[किकग्रहणेऽ]प्युपपन्नत्वात् तदनादृत्य शा[स्त्रीयग्रहणेन] तदन्तविधिज्ञापने किं प्रयोजनमित्याशङ्क्याह — **तत्र यदीति**। [**एकान्नविंशतिश**]**ब्दादिति**। विंशतेः प्राग्भावित्वादस्याः संख्यायाः। यदि तदन्तविधिर्ज्ञाप्यते तर्हि केवलानां विंशत्यादि[शब्दानां] न स्यात्। प्रातिपदिकग्रहणे [व्यपदेशिव]द्भावादित्य[त आह — **स**।]**मान्येनेति**। यत्र प्रातिपदिकश्रुतिरस्ति तदुभयमपि न भवतीति ज्ञापयतीत्यर्थः। तदन्तानामपि भवतीति ज्ञापनरूपम्, न तु तदन्तानामेव भवतीति परिहारान्तरमाह — **अथवेति**। **प्राप्तिमात्रेति**। न त्वनन्तरप्राप्तेरेव। ननु [1]"अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्याये जीवति कथमेतदुपपद्यत इत्यत्राह — **असंख्यादेरिति**। योगविभागकरणसामर्थ्यान्न्यायोऽयं नाश्रीयत इत्यर्थः। योगविभागाश्रयणे प्रमाणाभावान्न्यायबाधनं निर्मूलत्वादयुक्तमिति तेषां मतं दूषयति — **एतत्त्विति**॥

मतौ छः सूक्तसाम्नोः ५.२.५९.

[४, १३७–१४०]

(**विवरणम्**) दृष्टान्तत्वेनोपन्यास इत्युपपादयति — **न त्विति**॥

[४, १३७–१४०]

(**उद्द्योतनम्**) मतौ शब्दे प्रत्ययादर्शनादाह — **मतुशब्देनेति**। **प्रधानेति**। प्रत्ययार्थः प्रधानम्, तदनुसारिणी प्रकृतिः। 'तदस्यास्त्यस्मिन्' इति मत्वर्थः। तत्रास्त्युपाधिकस्य प्रथमान्तस्यैव प्रकृतित्वयोग्यतेत्यर्थः। निर्दोषमुदाहरणमाह — **अच्छावाकशब्द इति**। [2]अनेकपदशब्दस्य नञ्समासशङ्कां निराह — **कर्मधारय इति**। पदसमुदायत्वं व्यनक्ति — **अस्येति**। समुदायस्याप्यनुकरणस्य प्रातिपदिकसंज्ञास्तीत्याह — **अस्येति**। एकदेशानुकरणद्योतनाय 'वामस्य' इत्युक्तम्। **अनुकार्येणेति**। अनुकार्यानुकरणयोर्भेदविवक्षायामित्यर्थः। [3]"स्वं रूपम्' इत्यस्य स्वशास्त्र[4]मात्रविषयत्वेन लौकिकानुकरणेऽप्रवृत्तेर्दृष्टान्ततया व्याचष्टे — **दृष्टान्तत्वेनेति**। पद**समुदायेति**। 'वाम' इत्येतावदंशस्य पदत्वाभावादित्यर्थः। व्याख्यानबीजमाह — **न त्विति**। **अस्य** [5]"स्वं रूपम्' इत्यस्य। 'एवं'शब्दस्य [6]"स्वं रूपम्' इति सूत्रविषयत्वभ्रमं निराह — **एवंशब्द इति**। ननु 'अन्यस्य भावोऽन्यभावः', तस्य भावे ष्यञ् वाच्यः। स च प्रकृतासंगतः, अन्यत्वमात्रस्य विवक्षितत्वात्, अत आह — **अन्यस्येति**। **अर्थभेदादिति**। अनुकार्यस्यान्योऽर्थः, अनुकरणस्य शब्दस्वरूपमित्यर्थभेदः। **ऊडिदमिति**। [7]"ऊडिदंपदाद्यप्पुम्रैद्युभ्यः'। एभ्यः परा-

---

[1] परिभाषा ६२.
[2] एकपदशब्दस्य — अ, ऋ, लृ.
[3] पा. सू. १.१.६८.
[4] 'मात्र' इति नास्ति — अ.
[5] पा. सू. १.१.६८.
[6] पा. सू. १.१.६८.
[7] पा. सू. ६.१.१७१.

सर्वनामस्थानविभक्तिरुदात्ता। **कर्षेति**। [1]'कर्षात्वतो घञोऽन्त उदात्तः' कर्षतेराकारवतश्च घञन्तस्यान्त उदात्तः। **प्रातिपदिकस्वरेणेति**। [2]'फिषोऽन्त उदात्तः' इत्यनेन। [3]'प्रकृतिवत्' इत्यतिदेशादुदात्तद्वयमनुकरणेऽस्तु, अत आह — **प्रकृतीति**। विरोधमेवाह — **अनुकरण इति**। [4]'अनुदात्तं पदमेकवर्जम्' इति वचनादित्यर्थः। नन्वनुकार्यसदृशस्यैवानुकरणत्वात् कथं वर्णानुपूर्वीभेदः, अत आह — **अनुकरणं त्विति**। पदैकदेशस्य सुबलोपस्य च दर्शनाच्चेत्येवं वार्तिकार्थमुपपादयति — **आम्नाय इति**। 'सुबलोपदर्शनात्' इत्येतत् पदैकदेशहेतोरसिद्धिशङ्कानिरासकत्वेन योजयति — **यदीति**। 'अस्यवामीयम्' इत्यत्र 'अस्य वामस्य' इत्येव प्रकृतिः, ततश्छप्रत्यये तदन्तस्य प्रातिपदिकत्वात् [5]'सुपो धातु' इति वामशब्दात् षष्ठ्या लुकि 'अस्यवामीयम्' इति भवतीति नैकदेशस्य प्रकृतित्वमित्यर्थः। पूर्वपदे लुक् कस्मान्न भवति, अत आह — **अनुकरणस्येति**। **विभक्त्यर्थेति**। [6]'स्वौजसमौट्' इत्यस्य [7]'कर्मणि द्वितीया, [8]'द्व्येकयोर्द्विवचनैकवचने' इत्यादिभिरेकवाक्यत्वात् कर्मैकत्वे द्वितीयैकवचनं भवतीत्यादिरर्थः। तथा चैकत्वादौ विहितानां स्वादीनां सुप्प्रत्याहारेण ग्रहणम्। स्यशब्दानुकरणस्यशब्दश्च नैकत्वादौ विहितः, किंतु स्यशब्दानुकरणमखण्डं शब्दान्तरम्, न ङस आदेशरूपमिति सुप्त्वाभावाल्लुकोऽप्रसङ्गः। एवं च 'अस्यवाम' इत्येकदेशानुकरणमेव। षष्ठ्यन्तानुकरणत्वे षष्ठ्या लुगभावेन 'अस्य वामस्य' इत्यस्यैव प्रकृतित्वं स्यादिति 'अस्यवामीयम्' इति न सिध्येदिति भावः। 'न संज्ञा' इति समाधानाभिप्रायमाह — **अनुकरणमिति**। संज्ञासंज्ञिनोर्वैयधिकरण्येनाव्यभिचाराभावात्[9] तादृशाव्यभिचारस्य प्रकृतानुपयोगाच्चाह — **अव्यभिचारश्चेति**। एवं चानुकरणमनुकार्यमवश्यमुपस्थापयतीति भाष्यार्थः। अनेन कथं शङ्कानिरासः, अत आह — **तत्र यथेति**। ननु त्रयी शब्दानां प्रवृत्तिः, चतुष्टयी वा। तत्रानुकरणस्यानन्तर्भाविनालक्ष्यत्वात् कथं ततः प्रत्ययविधानम्, अत आह — **अनुकरणशब्द इति**। अनुकार्यगतशब्दत्वावान्तरजातिविशिष्टमनुकरणवाच्यमिति जातिशब्देऽन्तर्भावोऽनुकरणस्येत्यर्थः। जातेः समावेशो यस्मिन् तत् [10]जातिसमावेशम्। **लृकारेति**। 'कुमार्यर्लृतक इत्याह' इत्यनुकरणस्यापि लक्ष्यत्वसिद्ध्यर्थमित्यर्थः॥

[४, १३७–१४०]

(नारायणीयम्) मुख्यार्थासंभवाद् गौणार्थस्य मतुशब्दस्येह ग्रहणमित्याह — **मतुशब्देनेति**। समर्थविभक्तेः प्रकृत्युपाधेश्चात्रानुपादानात् कथं लाभ इत्यत्राह — **प्रधानानुयायित्वादिति**। यथा ब्राह्मणा भोज्यन्तामित्युक्तेऽनुक्ता अप्याचमनादयोऽङ्गत्वादाक्षिप्यन्ते तथेहापि प्रधाने प्रत्ययार्थे निर्दिष्टे तदङ्गभूतं समर्थविभक्त्यादिकमाक्षिप्यत इत्यर्थः। **बहुव्रीहिर्नेति**। अत्र पक्षेऽवयवेन विग्रहः समुदायः समासार्थः। तदेतदाह — **पदसमुदायादिति**। कर्मधारयपक्षेऽप्ययमेव वस्त्वर्थः। 'अस्यवामीयम्' इत्यादौ पदसमुदायादुत्पत्तिं विशदयति — **अस्य वाम इति**। पदसमुदायरूपत्व-

---

[1] पा. सू. ६.१.१५९.
[2] फिट्सूत्रम् १.
[3] परिभाषा ३६.
[4] पा. सू. ६.१.१५८.
[5] पा. सू. २.४.७१.
[6] पा. सू. ४.१.२.
[7] पा. सू. २.३.२.
[8] पा. सू. १.४.२२.
[9] वैयधिकरण्येनाव्यभिचारात् — अ.
[10] प्रदीपे 'अनुकार्यं स्वजातिसमवेतं वक्ति' इत्यत्र 'अनुकार्यं स्वजातिसमावेशं वक्ति' इत्यन्नंभट्टपाठ इति भाति।

मप्रातिपदिकत्वे हेतुत्वेनोक्तमित्याह — **पदसमुदायेति**। समासग्रहणस्य नियमार्थत्वात्। 'प्रातिपदिकविज्ञानात्' इति हेतोरसिद्धिं परिहरन् व्याचष्टे — **अस्य वामस्येति**। **पदसमुदाय[रूप]त्वाभावाच्चेति**। अनुकार्य एव पदसमुदायः, न त्वनुकरणमिति नियमार्थसमासग्रहणेन [1]'प्रातिपदिकत्वानिवृत्तिरित्यर्थः। ननु यथाश्रुतमन्वये संभवत्यध्याहारेण 'दृष्टान्तत्वेनोपन्यासः' इति कथमुक्तमित्याशङ्क्याह — **न त्विति**। भाष्यमप्युक्तेऽर्थे योजयति — **एवंशब्द इति**। 'आन्यभाव्यम्' इत्यत्र भावशब्दस्य प्रत्ययस्य चोपादानमर्थाभेदादयुक्तमित्याशङ्क्य व्याचष्टे — **अन्यस्येति**। भावाधिकारस्याबाधेनोपपत्तौ तथैवाश्रयणमुचितमित्याशयेन पक्षान्तरमाह — **अथवेति**। **अर्थभेदादिति**। अनुकरणस्यानुकार्यः शब्दोऽर्थः। तेन बाह्योऽर्थः प्रतिपाद्यते। अर्थभेदे[सति] शब्दभेदः, कार्यभेदात् कारणभेदानुमानात्। **वामशब्द इति**। वमतेर्घञा व्युत्पा[दितत्वात्।] **अथवेति**। ज्वलादिषु वमतेः पाठात् कर्तरि णः। ननु [2]'प्रकृतिवदनुकरणम्' इत्यतिदेशादनुकार्यस्वरोऽनुक[रणे स्यादि]त्याशङ्क्य नायमतिदेशविषय [इत्याह — **प्रकृ]तिवदिति**। नन्वनुकरणेऽपि वर्णानुपूर्व्या न [भेदः] अस्यवा[मीयं क]याशुभीयमित्य[त्रेत्यत आह — **अ]नुकरणं त्विति**। **अनुकरणस्य त्विति**। अस्यवामीयादिशब्दाः सर्वत्र सर्वदा प्रयुज्यन्त इत्यर्थः। नन्वाम्नाये पदैकदेशप्रयोगोऽसिद्ध इत्याशङ्क्य सोपस्कारं भाष्यं योजयति — **आम्नाय इति**। पूर्वत्र हेतावनुपपत्त्याशङ्कां परिहर्तुमुत्तरो हेतुरुपात्त इति व्याचष्टे — **यदीति**। कस्मात् पुनरस्यवामीयमित्यादौ विभक्तेर्लुग् न भवतीत्यत आह — **अनुकरणस्य त्विति**। [3]'सुपो धातु' इति सुप्शब्देन संख्याकर्मादीनां प्रतिपादक उच्यते। अनुकरणस्थस्तु न तथेति लुगभावः। प्रकृते संज्ञासंज्ञित्वासिद्धिं परिहरन्नाह — **अनुकरणमिति**। सर्वत्र न स्वरूपेण तद्वति मत्वर्थीय उत्पद्यते, किं तर्हि, स्वार्थेनेति व्याप्तिं दर्शयति — **तत्र यथेति**। ननु त्रयी चतुष्टयी वा शब्दानां प्रवृत्तिः। तत्रानुकरणशब्दानामनुकार्ये वृत्तौ किं निमित्तमित्यत आह — **अनुकरणशब्द इति**॥

अध्यायानुवाकयोर्लुक् ५.२.६०.

[४, १४०]

(**विवरणम्**) स्तम्भादिशब्दो नाध्यायस्यानुवाकस्य वाभिधायक इति ततः परस्य 'अध्यायानुवाकाभ्याम्' इति पञ्चमीपक्षे [4]'न प्राप्नोतीत्यत आह — **तादर्थ्य इति**॥

[४, १४०]

(**उद्द्योतनम्**) अध्यायानुवाकयोरभिधेययोर्मत्वर्थे उत्पन्नस्य छस्य लुक्। गर्दभाण्डशब्दोऽस्मिन्नस्ति गर्दभाण्डोऽध्यायः, अनुवाको वा। अध्यायानुवाकाभ्यामिति न पञ्चमी, अर्थाभ्यां प्रत्ययानुत्पत्त्या लुग्विकल्पयोरप्रसङ्गात्। अतश्चतुर्थीमङ्गीकृत्य व्याचष्टे — **तादर्थ्य इति**। ननु

---

[1] प्रातिपदिकत्वान्निवृत्तिरित्यर्थः — घ.
[2] परिभाषा ३६.
[3] पा. सू. २.४.७१.
[4] छप्रत्यय इति शेषः।

सूक्तसाम्नोर्विहितस्य छस्याध्यायानुवाकयोः कः प्रसङ्गः, येन लुगुच्यते, अत आह — **लुग्विधानमेवेति**। वचनं विनापि विकल्पसिद्धिमाह — **मतुप्प्रकरण इति** [1]अस्मिन् सूत्रे मतुपश्छस्य वा लुकि विशेषाभावादित्यर्थः। **पाक्षिक** इति। अत्र [2]लुग्विधानं पक्षे छश्रवणार्थमेवेत्यर्थः॥

[४, १४०]

(नारायणीयम्) नन्वध्यायानुवाकयोः प्रत्ययार्थविशेषणत्वं, न प्रकृतित्वमिति कथं पञ्चमीनिर्देश इत्यत आह — **तादर्थ्यं एषा चतुर्थीति**। विकल्पविधानस्य प्रयोजनमाह — **तेनेति**। ननु सूक्तसाम्नोरेव छो विहित इति कथं तस्यानेन लुग्विधीयत इत्यत आह — **लुग्विधानमेवेति**। विकल्पोऽपि न विधेयः, लिङ्गादेव सिद्धत्वादित्याह — **तत्रेति**। ननु भाष्यवार्तिकयोरनुक्तत्वात् किमत्र प्रमाणमित्यत्राह — **इत्याहुरिति**। भाष्यकाराशयविदामभियुक्तानां वचनादित्यर्थः॥

धनहिरण्यात् कामे ५.२.६५.

[४, १४०–१४१]

(उद्द्योतनम्) कामशब्दस्य कर्तृपरत्वेऽपि कामाभिधानमस्ति, अत आह — **इच्छामात्रेति**। **यद्यपीति**। [3]सप्तम्यन्तप्रकृतेः प्रत्ययविधानात् प्रत्ययार्थविशेषणस्य तस्य कुतश्चिदप्यननुवृत्तेश्चेत्यर्थः। **कर्त्रिति**। कर्मेणिङन्तात् पचाद्यचि कामयिता कामशब्देन वक्तुं शक्यत इत्यर्थः। **सामर्थ्यादिति**। यो धनं कामयते तस्य धने कामोऽस्तीत्यर्थः। **कामशब्देनेति**। भावार्थघञन्तस्यैव कामशब्दस्य प्रयोगः, न कर्तर्यजन्तस्येत्यर्थः। यद्वा प्रकृतिर्घञन्त एव गृह्यते, नाजन्त इत्यर्थः॥

[४, १४०–१४१]

(नारायणीयम्) ननु 'कामे' इति सप्तम्या कामाभिधाने प्रत्ययस्य सिद्धत्वात् किं वार्तिकेनेत्यत आह — **इच्छामात्रेति**। न तु कामयितुरभिधान इत्यर्थः। **कर्तृसाधनेति**। कर्तरि पचाद्यचा व्युत्पन्नत्वात्। **सामर्थ्यात् षष्ठ्यर्थ इति**। धने कामोऽस्येत्यर्थावगमात्। अनभिधानमेव दर्शयति — **कामशब्देनेति**॥

शीतोष्णाभ्यां कारिणि ५.२.७२.

[४, १४१]

(उद्द्योतनम्) मुख्यग्रहणेन प्रश्न इत्याह — **शीतोष्णेति**। **समासस्येति**। इवशब्दस्य शीतादिना समासविधायकाभावात्। [4]'इवेन नित्यसमासः' इत्यस्य छन्दोविषयत्वादित्यर्थः। तस्य

---

[1] अस्मिन् प्रकरणे — अ.
[2] लुग्विधानपक्षे — अ.
[3] पञ्चम्यन्तप्रकृतेः — अ
[4] का. वा. २.१.४–२.

लोपविधायकाभावादाह — **गतार्थत्वादिति**। इवशब्देन विना शीतशब्दस्य मन्दार्थत्वं कथमायाति, अत आह — **यथेति**। शीतशब्दस्य मन्दवृत्तित्वे हेतुः — **सतीति**। एवं प्रकृत्यर्थमुक्त्वा समर्थ-विभक्तिमाह — **तत्रेति**। मुख्यत्यागे गौणग्रहणे हेतुमाह — **प्रयोगेति**। प्रयुक्तान्वाख्यानरूप-त्वाद् व्याकरणस्येति भावः॥

[४, १४१]

(नारायणीयम्) तत्संप्रत्ययेनेति। [1]'गौणमुख्ययोर्मुख्ये संप्रत्ययः' इति न्यायात्। तेन तु-षारादित्ययोः प्रत्ययार्थत्वं स्यात्, तच्च नेष्टमिति प्रश्नार्थः। उत्तरपदशब्दोऽत्र यौगिको गृह्यते, न तु [समासचरमावयवे] रूढः। लोपोऽपि न शास्त्रीयः, किं तर्हि, उक्तार्थत्वादप्रयोग एवे-त्याह — **नात्रेति**। गतार्थत्वमुपपादयति — **यथेति**। शीतशब्देन साहचर्यान्मन्दता लक्ष्यत इत्यर्थः। **क्रियाविशेषणाभ्यां कर्मभ्यामिति**। क्रियावि[शेषणत्वात्] कर्मत्वम्, तेन [द्वितीयान्ता]-भ्यां प्रत्ययः। गौणमुख्यन्यायानाश्रयणे हे[तुः — [2]**प्रयोग] दर्शनादिति**॥

अधिकम् ५.२.७३.

[४, १४१–१४२]

(उद्द्योतनम्) अधिशब्दस्य वृत्तिविषये आरूढार्थवृत्तित्वमेवोत्तरपदलोप इत्यभिप्रेत्य प्रश्नाशय-माह — **यदीति**। **अन्यतरस्येति**। युगपदुभयाभिधानस्य वाक्यभेदप्रसङ्गेनासंभवादित्यर्थः। **अनङ्गीकृतेति**। कर्मकर्तृविशेषमविवक्षित्वाध्यारूढशब्दात् कः, तस्याध्यादेशश्च निपात्यत इति न वाक्यभेदप्रसङ्ग इत्यर्थः। **स च** अध्यारूढशब्दः। ननु कर्तरि[क्त इति] पक्षे 'ग्रामं गतः' इतिवत् 'खारीमधिकः' इति भवितव्यम्, कथं पञ्चमी, अत आह — **यदेति**। **ज्ञापकादिति**। तथा च पञ्चम्या द्वितीया बाध्यत इत्यर्थः। ज्ञापकान्तरात् सप्तम्यपि भवतीत्याह — **औप-श्लेषिकेति**। तत्र ज्ञापकमाह — **तदस्मिन्निति**। एवं कर्तृसाधनत्वपक्षे [3]द्वयम्। [4]कर्मसाधनत्व-पक्षे तु [5]कर्तुरनभिधानात् तृतीया 'अधिका द्रोणेन खारी' इति॥

[४, १४१–१४२]

(नारायणीयम्) अनङ्गीकृतेति। यद्यपि सकृदुपात्तः, तथापि निपातनसा[मर्थ्यात् प्रयो]गानु-सारेणे[त्थमङ्गीक्रियत इति भावः। **निर्देशः कृत इति**।] तस्मादधिको द्रोणः खार्याः, अधिको द्रोणः खार्यामिति [प्रयोगद्वयं सिध्यतीति भावः॥]

---

[1] परिभाषा १५.
[2] प्रदीपे 'प्रयोगवशाच्च' इत्यत्र 'प्रयोगदर्शनाच्च' इति निर्णयसागरमुद्रिते पाठः।
[3] विभक्तिद्वयमित्यर्थः।
[4] कर्तृसाधनत्वपक्षे — अ.
[5] कर्तुरभिधानात् — अ.

पार्श्वेनान्विच्छति ५.२.७५.

[४, १४२]

(**उद्द्योतनम्**) राजपुरुषे मुख्यार्थसद्भावमाह — **स हीति**। प्रयोगानुसाराद् गौणग्रहणमिति मन्वानो गौणमर्थमाह — **यथेति**॥

[४, १४२]

(**नारायणीयम्**) [कथं राज]पुरुषे प्राप्तिरित्यत्राह — **स हीति**। मुख्यार्था[संभवा]द् गौणार्थवृत्तिः पार्श्वशब्दो गृह्यत इत्युत्तरभाष्याशयं दर्शयति — **यथा पार्श्वमिति**॥

अयश्शूलदण्डाजिनाभ्यां ठक्ठञौ ५.२.७६.

[४, १४२]

(**उद्द्योतनम्**) शैवस्य शूलधारणेनार्थान्वेषणं मुख्यमिति 'शिवभागवते प्राप्नोति' इत्युक्तम्। तत्र शिवो भगवान् भक्तिरस्येत्यर्थे सापेक्षत्वाद् भगवच्छब्दात् तद्धितो न प्राप्नोति, अत आह — **भगवानिति**। तर्हि शिवस्य भजनीयत्वं कथं लभ्यते, अत आह — **अवयवेति**। भगवद्भजनयुक्तस्य शिवो विशेषणम्। [1]तत्र योग्यतया भगवदभेदेनैव विशेषणत्वम्, न यत्किंचित्संबन्धेनेतीष्टसिद्धिरित्यर्थः। तीक्ष्णोपायेऽयश्शूलशब्दस्य प्रवृत्तिनिमित्तमाह — **यथेति**॥

[४, १४२]

(**नारायणीयम्**) [शिवो भगवान् भक्ति]रस्येत्य[र्थे शैवभगवत] इति भाव्यमित्याशङ्कां परिहरति — **भगवानिति**। अवयवार्थेऽभेदादर्थसंस्पर्शद्वारेणेत्यर्थः। यथा 'देवदत्तस्य गुरुकुलम्' इति। अयश्शूलसाम्यमुपायस्य दर्शयति — [**यथेति**॥]

तावतिथं ग्रहणमिति लुग्वा ५.२.७७.

[४, १४३]

(**उद्द्योतनम्**) वार्तिककाराभिप्रेतं सूत्रार्थमाह — **तावतिथमिति**। **पञ्चमकमिति**। अस्मिन् पक्षे पूरणप्रत्ययस्य लुगभावात् कनो वा लुकि 'पञ्चमं, पञ्चमकम्' इति रूपद्वयमित्यर्थः। एतदाश्रयेण वार्तिकमित्याह — **एतदिति**। पूरणप्रत्ययस्य लुक्पक्षे वाग्रहणं विना 'पञ्चमकम्' इति न सिध्यतीत्याह — **यदा त्विति**। **रूपद्वयं** 'पञ्चकं, पञ्चमकम्' इति। अत्र वार्तिककारेण कन एव लुगङ्गीकाराद् भाष्यकृता चाप्रत्याख्यानात् स एव सिद्धान्त इत्याहुः। कैयट-

---

[1] तत्र युक्ततया — अ.

स्यापि टीकास्वारस्यदर्शने द्वितीयव्याख्यानमेव सम्यगित्यन्ये। विकल्प इति त्वृजवः। वचनस्यावश्यकत्वमाह — **स्वार्थ इति**॥

[४, १४३]

(नारायणीयम्) [1]'तस्यापत्यम्' इत्यत्र [यथा तस्येति षष्ठ्यन्तानां] सामान्येन निर्देशः, तथा 'तावतिथम्' इति पूरणप्रत्ययान्तानामित्यर्थः। **तस्य च कन इति**। न तु पूरणप्रत्ययस्य। 'एतत्सूत्रार्थाश्रयेण' इत्यनेन यदर्थान्तरं सू[त्रस्य तदेव भाष्यकृ]तोऽभिमतमिति [सूच्यते।] 'तावतिथेन' इति वार्तिकस्य प्रयोजनमाह — **स्वार्थ इति**। **लुक् [च] पूरणप्रत्ययस्यैवेति**। अत एव 'षट्कः' इत्युदाहृतं भाष्ये। नित्यं लुग् भवति, न तु विकल्पेन॥

शृङ्खलमस्य बन्धनं करभे ५.२.७९.

[४, १४३–१४४]

(उद्द्योतनम्) 'न हि तस्य' इत्यस्यार्थमाह — **बध्यत इति**। शृङ्खलमस्वतन्त्रीकरणे करणं न भवतीति सूचयितुं तदर्थमाह — **काष्ठमयमिति**। शृङ्खलस्य पाशकमिति नामान्तरम्। **यद्यपीति**। रज्जुकाष्ठयोरेव करणत्वम्, न केवलरज्जोरित्यर्थः। **रज्जुरिति**। शृङ्खलशब्देन लक्षणया रज्जुरेवोच्यत इत्यर्थः॥

[४, १४३–१४४]

(नारायणीयम्) [बन्धन] शब्दार्थमाह — [**बध्यत**] **इति**। शृङ्खलस्यास्वतन्त्री [करणे] करणत्वाभावं दर्शयितुं तत्स्वरूपमाह — **काष्ठमयमिति**। काष्ठविकाररूपं पाशकं पाशलक्षणम्, स्वार्थे कन्। ['अथवा' इत्यस्य] पक्षान्तरत्वं विशदयति — [2]**रज्जुरेवेति**॥

तदस्मिन्नन्नं प्राये संज्ञायाम् ५.२.८२.

[४, १४४]

(विवरणम्) वटकिनीशब्देन फाल्गुनीपौर्णमास्यभिधीयत इत्याहुः॥

[४, १४४]

(उद्द्योतनम्) मत्वर्थीयेनिनान्यथासिद्धिं निराह — **सप्तम्यां चेति**॥

---

[1] पा. सू. ४.१.९२.

[2] प्रदीपे 'रज्जुः शृङ्खलशब्देन' इति दृश्यते। 'रज्जुरेव शृङ्खलशब्देन' इति पाठोऽभिमतः।

[४, १४४]

(**नारायणीयम्**) ननु संज्ञाग्रहणात् कन् न भविष्यति, तस्मिंश्चासति मत्वर्थीयेनेनिना सिद्धमित्यत आह — **मत्वर्थीयस्त्विनिरिति** ॥

श्रोत्रियंश्छन्दोऽधीते ५.२.८४.

[४, १४४–१५५]

(**विवरणम्**) **व्यपवर्गाभावेऽपीति**। निदन्तत्वाभावेऽपीत्यर्थः। **अण इति**। [1]'तदधीते' इति विहितस्य ॥

[४, १४४–१५५]

(**उद्द्योतनम्**) वाक्यार्थस्यासत्त्वभूतस्य सत्त्वभूतश्रोत्रियशब्दार्थत्वानुपपत्तिं परिहरति — **वाक्यार्थस्येति**। छन्दोविषयकाध्ययनक्रियासंबन्धो वाक्यार्थः। [2]'क्रियाप्रधानमाख्यातम्' इत्यङ्गीकारे छन्दोविषयकाध्ययनक्रिया कर्तृसहिता वाक्यार्थः। 'पदवचनम्' इत्यस्यार्थमाह — **तत्रेति**। छन्दोऽध्यायिनीत्यर्थः। निति प्रत्यये परतः प्रकृतेर्विधीयमानमाद्युदात्तत्वं समुदायनिपातने कथं सिध्यति, अत आह — **नित्करणेति**। **व्यपवर्गः** प्रकृतिप्रत्ययभेदः। [3]**अस्मिन् पक्ष इति**। समुदायनिपातनपक्षे सोऽपि प्रयोगः साधुरित्येतावन्मात्रम्, न त्वणो बाधः। [4]'अबाधकान्यपि निपातनानि' इति वा। घना तु विशेषविहितेनाणो बाधो मा भूदिति वाग्रहणमनुवर्त्यमित्यर्थः। वाकाराननुवृत्तावप्यर्थभेदान्न बाध इत्याह — **अथवेति** ॥

[४, १४४–१४५]

(**नारायणीयम्**) [श्रोत्रियशब्दस्य वाक्यार्थाभिधायित्वानु]पपत्तिमाशङ्क्य परिहरति — **वाक्यार्थस्येति**। ननु प्रकृतिप्रत्ययविभागाभावे नित्प्रत्यये परतो विधीयमानः स्वरः कथं सिध्येदित्यत्राह — **नित्करणसामर्थ्यादिति**। घना [विशिष्टार्थाभिधा]नादर्थभेदादेव बाधकत्वाभावाच्छान्दसशब्दः सिध्यतीति नार्थो वाग्रहणानुवृत्त्याश्रयणप्रयासेनेति पक्षान्तरमाह — **अथवेति**। [5]'एकां शाखामधीत्य तदर्थं चानुष्ठाय श्रोत्रियो भव[तीति धर्मशास्त्रम् ॥]

---

[1] पा. सू. ४.२.५९.

[2] 'भावप्रधानमाख्यातम्' इति निरुक्तम्। तस्यार्थानुवादोऽयम् ॥ 'क्रियाप्रधानम्' इत्यादि 'कर्तृसहिता वाक्यार्थः' इत्यन्तं नास्ति — अ.

[3] प्रदीपे 'तस्मिन् पक्षे' इत्यत्र 'अस्मिन् पक्षे' इत्यन्नंभट्टपाठ इति भाति।

[4] सर्वादिसूत्रे 'बाधकान्येव निपातनानि' इति भाष्य उक्तम्। प्राञ्चः 'अबाधकान्यपि' इति वदन्ति। इदं भाष्यविरुद्धमिति परिभाषेन्दुशेखरे नागेशः।

[5] 'एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च। षट्कर्मनिरतो विप्रः श्रोत्रियस्त्वभिधीयते ॥' इति दानकमलाकरः ॥

श्राद्धमनेन भुक्तमिनिठनौ ५.२.८५.

[४, १४५]

(**उद्द्योतनम्**) केन समानकालत्वम्, अत आह — **भुजिनेति**। तर्हि भोजनाव्यवहितोत्तरकाले प्रयोगो न स्यात्, अत आह — **यस्मिन् काल इति**। तथापि कस्यचिद् द्वितीयदिवसपर्यन्तमन्नस्याजीर्णौ[1] द्वितीयदिवसेऽपि प्रयोगप्रसङ्गः, अत आह — **स च समान इति**। अभिधानमेवात्र शरणम्॥

[४, १४५]

(**नारायणीयम्**) [समानका]लायां [भुक्तौ] श्राद्धं भुक्तमनेनेति भूतत्वमनुपपन्नमित्याशङ्क्य तत्फलभूततृप्त्यपेक्षया समानकालत्वमभिमतमित्याह — **यस्मिन् काल इति**। नन्वेवं भोक्तृविशेषवशात् प्रयोगस्यानियमः स्यादित्या[शङ्क्याह — **स चेति**। तेन तस्मिन्नेव दिनेऽ]स्य प्रयोग इति सिद्धम्॥

साक्षाद् द्रष्टरि संज्ञायाम् ५.२.९१.

[४, १४५–१४६]

(**विवरणम्**) [**संज्ञायत इतीति**।] न तु करणे, [2]'स्त्रियाः खलनौ' इति वचनात्। अङं बाधित्वा ल्युट् स्यादित्यत आह — **निपातनादिति**॥

इति प्रदीपविवरणे पञ्चमस्याध्यायस्य द्वितीयपादे प्रथममाह्निकम्

[४, १४५–१४६]

(**उद्द्योतनम्**) ननु संज्ञाशब्दस्य करणसाधनत्वे [3]'करणाधिकरणयोश्च' इति ल्युटा भाव्यम्, अत आह — **संज्ञायत इति**। [4]'आतश्चोपसर्गे' इति कर्मण्यङ्प्रत्ययः, [5]'अकर्तरि च कारके' इत्यधिकारात्। [6]'कृत्यल्युटो बहुलम्' इति बहुलवचनात् क्वचिदेव कर्मणि ल्युट्, न सर्वत्रेति भावः। **व्यपदिश्यमानः** शब्देनेत्यादिः। तथा च द्रष्टरि संज्ञायां [7]'संज्ञिनीति सप्तमीद्वयं समानाधिकरणम्। करण एवाङ्, संज्ञायामिति निपातनाच्च ल्युटोऽभाव इत्याह — **अथवेति**। शब्द एव, न त्वर्थः। तर्हि सप्तमीद्वयस्य कथं सामानाधिकरण्यम्, अत आह — **संज्ञायां विषय इति**। वैयधिकरण्येनान्वय इत्यर्थः। एवं संज्ञाशब्दार्थमुक्त्वा प्रश्नाशयमाह — **लक्ष्येति**। अभिधानस्वाभाव्यादुपद्रष्टर्येव प्रयोगो भविष्यतीति प्रश्न इत्यर्थः। **लक्षणानुसारीति**। लक्षणेनैव

---

[1] अन्नस्यार्जितौ — अ, ऋ, लृ.
[2] का. वा. ३.३.१२६–२.
[3] पा. सू. ३.३.११७.
[4] पा. सू. ३.३.१०६.
[5] पा. सू. ३.३.१९.
[6] पा. सू. ३.३.११३.
[7] कर्मण्यङन्तस्य संज्ञाशब्दस्यार्थः 'संज्ञिनि' इति।

यः साधुत्वं प्रतिपादयति तं प्रति नियमसिद्धये संज्ञाग्रहणं कर्तव्यमित्यर्थः। अन्तेवासिशब्दोऽधमर्णे पारतन्त्र्यलक्षणगुणयोगाद् गौण इत्याह — **अन्तेवासिशब्देनेति**।

[४, १४५–१४६]

(नारायणीयम्) संज्ञायत इति। सम्यक् संशयविपर्ययरहितं ज्ञायते प्रतीयत इति वाच्योऽर्थ उच्यते। [1]'आतश्चोपसर्गे' इति कर्मण्यङ्। संज्ञायते [ञ्नयेत्युक्ते करणे ल्युट् कुतो न भवतीत्यत आह] — **निपातनादिति**। **संज्ञायां विषय इति**। लोके योऽर्थः प्रतीयते सा[क्षिशब्देन तस्मि]न्विषये, अथवार्थप्र[त्यायनाय] लोके यः साक्षिशब्दः प्रयुज्यते [तस्मिन्विषय] [इत्यर्थः। प्रष्टु]राशयं दर्शयति — **लक्ष्यानुसारीति**। ननु गुरोरन्ते समीपे वसतीत्यन्तेवासी शिष्य उच्यते। स नात्रोपयुज्यत इत्यत आह — **अन्तेवासीति**। **पारतन्त्र्यादिति**। यथान्तेवासी गुरुपरतन्त्रः, एवमधमर्णो[ऽपीत्यर्थः। ध]नादाने यः पार्श्वे स्थितः पश्यति स साक्षिशब्देनोच्यते — साक्षाद् द्रष्टा साक्षीति। [2]'अव्ययानां भमात्रे' इति टिलोपः॥

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ५.२.९२.

[४, १४६]

(उद्द्योतनम्) परक्षेत्रशब्दस्यार्थभेदेन प्रयोगचतुष्टयमत्रेष्यत इत्याह — **परक्षेत्र इति**। **परक्षेत्रे जातानीति**। परस्य धान्यस्य क्षेत्रे जातानीत्यर्थः॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने पञ्चमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्।

[४, १४६]

(नारायणीयम्) क्षेत्रियशब्दस्यानेकार्थत्वमनया व्युत्पत्त्या दर्शयति — **परक्षेत्रे जन्मान्तरेति**। [क्षि निवासगत्योरित्यस्मा] दधिकरणे ष्ट्रन्। परं च तत् क्षेत्रं चेति कर्मधारयः। **चिकित्स्य इति**। प्रतिकार्यः, अपनेय इत्यर्थः, न तु तत्र भिषजितव्य इति। तदाह — **असाध्यत्वादिति**। नामृतस्य निवर्तत इत्यर्थः। **धान्य[र्थं इति**। परकीयत्वं सूचय]त्ययम्। **परदारेष्विति**। अत्र कर्मणि ष्ट्रन्। क्षेतज्या गमनार्हा दाराः क्षेत्रम्, तद्विषये निग्राह्यः, दण्डादिना निग्रहार्ह इत्यर्थः। पारदारिक उच्यते॥

इति नारायणीये [भाष्यप्रदीपविवरणे पञ्चमाध्यायस्य द्वितीयपा]दे प्रथममाह्निकम्

---

[1] पा. सू. ३.३.१०६.

[2] का. वा. ६.४.१४४–५.

पञ्चमाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्

तदस्यास्त्यस्मिन्निति मतुप् ५.२.९४

[४, १४७–१५३]

(विवरणम्) कर्मधारयभ्रमं व्युदस्यति — **कस्मा इति**। नपुंसकनिर्देश एकवचननिर्देशश्च। किं षष्ठ्यर्थं आक्षिप्यते उत सप्तम्यर्थं इति विकल्प्याद्यं प्रत्याह — **यदेत्यादिना**। द्वितीयं प्रत्याह — **तथेति**। **न भाव्यमिति**। अनभिधानादिति भावः। **सत्तामिति**। बुद्धौ सत्तामित्यर्थः। ननु प्रकृत्यर्थविशेषणत्वेनास्त्यर्थस्योपादानात् 'सत्तायां प्रत्ययो यथा स्यात्' इत्ययुक्तमित्यत आह — **सत्तायामिति**। तथापि सत्तापर्यायादेव स्यादित्यत आह — **सत्तेति**। सत्ताविशिष्टार्थाभिधायिन इत्यर्थः। ननु शशविषाणादिपदस्यार्थः सत्तां व्यभिचरत्येवेत्यत आह — **यावदित्यादिना**। **उपचरितेति**। या हि बुद्ध्यारूढा बहिःपदार्थाश्रया च सा मुख्या। या तु बहिःपदार्थाश्रयत्वे सदसद्भावापर्यालोचनेन बुद्धिविषयमात्रेण विवक्षिता सोपचरितोच्यते। **संबन्धेति**। तात्पर्येणेति शेषः। ननु बुद्ध्यारूढसत्ता सर्वत्र वर्तमानैवेति 'भूतभविष्यत्सत्तायाम्' इत्यप्ययुक्तम्, अत आह — **भूतेति**। मुख्यसत्ताभिप्रायेण व्याख्याने दोषमाह — **या त्विति**। ननु विद्यमान एव देवदत्ते प्रकृत्यर्थस्यातीतानागतत्वप्रतिपादनायैतद्वाक्यं प्रयुज्यते। कथं तर्हि 'आसीत्' इत्यस्य प्रत्ययान्तेन सामानाधिकरण्यम्, अत आह — **गुणेति**। गोमानस्तीत्यस्तेः प्रयोगस्यापि दर्शनादसंप्रतिपन्नो दृष्टान्तः, अत आह — **प्रत्ययान्तेनैवेत्यादिना**। **यथा दाण्डेति**। [1]'तदस्यां प्रहरणमिति क्रीडायां णः' इति णः। 'अस्त्येव' इत्यादिः सिद्धान्तिन एव चेत् 'तर्हि' इत्याद्यनुपपन्नं स्यादित्यत आह — **चोदक इति**। नन्वसत्यस्तिग्रहणे कथं वर्तमानकालसत्तायुक्तप्रत्ययार्थः प्रतीयतामित्यत उक्तम् — **गोमानित्यादाविति**। **तत्रारम्भेति**। [2]'धातुसंबन्धे प्रत्ययाः' इत्येतत्सूत्रारम्भेत्यर्थः। **अन्तरङ्गस्येति**। निर्वृत्तस्येति शेषः। **यथा ग्रामादिति**। [3]अपायनिबन्धनापादानसंज्ञाया इति शेषः॥

[४, १४७–१५३]

(उद्द्योतनम्) परस्परसमावेशस्य क्वचिदप्यदर्शनात् प्रश्नायोगः, अत आह — **शाखावानिति**। शाखास्यास्ति अस्मिन्वास्तीत्यर्थद्वयमत्र संभवतीत्यर्थः। 'किमर्थाविमौ' इति वाच्ये 'किमर्थम्' इति कथं नपुंसकत्वमित्याशङ्क्य व्युत्पत्तिपूर्वकं तदुपपादयति — **कस्मा इति**। [4]'अर्थेन नित्यसमासः' इति वचनादस्वपदविग्रहः। बहुव्रीहौ स्वपदविग्रहोऽपि संभवतीत्याह — **कोऽर्थ इति**। **निर्देशक्रियेति**। [5]'क्रियाविशेषणानां नपुंसकत्वं वक्तव्यम्' इति वचनादित्यर्थः। **नशब्द इति**।

---

[1] पा. सू. ४.२.५७.
[2] पा. सू. ३.४.१.
[3] का. वा. २.१.३६–४.
[4] इयं परिभाषा प्राचीनोक्तेति परिभाषेन्दुशेखरभैरव्यां 'सर्वविधिभ्यो लोपविधिः' इति परिभाषाव्याख्याने उक्तम्।

[1]'निपातानामनेकार्थत्वात् नन्वर्थे वा' इत्युक्तत्वादिह नोक्तम्। **निपातनाद्वेति**। [2]'ओरावश्यके' इति निपातनम्, 'आवश्यकः' इत्यत्रैव भाष्यनिर्देशो वा। परस्परव्यभिचारमुपपादयति — **यथेति**। **षष्ठ्यर्थमात्रनिर्देश इति**। संबन्धमात्रं षष्ठ्यर्थः। तदुदाहरति — **वृक्षा इति**। ननु 'वृक्षस्य शाखा' इतिवदत्रापि संबन्धोऽस्ति, अत आह — **न ह्यत्रेति**। तत्र हेतुः — **वृक्षैरिति**। **न भाव्यमिति**। आनन्तर्यादिष्वनभिधानान्मत्वर्थीयानङ्गीकारात्। सप्तम्यर्थमात्रग्रहणेऽपि गोमानित्येतत्सिद्धिं शङ्कते — **नन्विति**। गौणाधारस्य कथमधिकरणसंज्ञा, कथं वा सप्तमी, अत आह — **कारकप्रकरण इति**। [3]'स्वरितेनाधिकारः' इत्यत्राधिकः कारोऽधिकार इत्याश्रयणेन तत्र गौणमुख्यन्यायानङ्गीकारादित्यर्थः। अनाश्रयणस्य प्रयोजनमाह — **यथेति**। **नैतदस्तीति**। अत्र गौणमुख्यन्यायानाश्रयणे हेत्वभावात् [4]'तत्रेति मुख्याधिकरणग्रहणे गोमानिति सिद्ध्यर्थं तस्येत्यपि वक्तव्यमित्यर्थः। **तामिति**। पदार्थसत्तामन्तरेण तद्बोधाय पदोच्चारणं न संभवतीत्यर्थः। सर्वेषां शब्दानां **वृत्तिः** अर्थे प्रवृत्तिः, अर्थप्रतिपादनं तत्रेति विग्रहः। प्रत्ययार्थत्वभ्रमं निवारयति — **सत्तायामिति**। सत्तामित्यत्र सत्ताशब्देन बुद्धिविषयत्वरूपौपचारिकी सत्ता विवक्षिता, न वास्तवी बहिस्सत्ता, तस्या एव शब्दप्रयोगहेतुत्वादित्याह — **यावदिति**। **बुद्धिसत्ता** बुद्धौ सत्ता, तद्विषयत्वलक्षणा। विध्यादिकमुदाहरति — **वृक्षोऽस्तीति**। बुद्धिविषयत्वलक्षणसत्तैव शब्दप्रयोगहेतुरित्यत्र हेत्वन्तरमाह — **अत्यन्तेति**। बहिरत्यन्तासत इत्यन्वयः। **बुद्ध्यारूढा** बुद्ध्यारोहणरूपा। भावे निष्ठा। **प्रयोगाश्रयत्वात्** प्रयोगनिमित्तत्वात्। ननु वृक्ष इत्युक्ते बहिस्सत्तापि प्रतीयते। तत् कथम्, अत आह — **सैव त्विति**। **बहीरूपतयेति**। प्रायेणाव्यभिचारादित्यर्थः। वृक्षादिशब्दानां [5]सत्ताविशिष्टवाचकत्वे सत्ताव्यभिचाराङ्गीकारेऽनिष्टमाह — **यदि त्विति**। बुद्धिविषयत्वरूप[6]सत्ताव्यभिचाराङ्गीकारे तु नायं दोष इत्याह — **उपचारेति**। तत्र हेतुः — **बुद्धीति**। वृक्षादिशब्दानामस्तिसामानाधिकरण्याद् बाह्यसत्ताव्यभिचार[7]परत्वेनैतद् भाष्यं कैश्चिद्व्याख्यातम्। तदाह — **अन्ये त्विति**। तद् दूषयति — **तेषामिति**। तत्रास्तिसामानाधिकरण्याभावेऽपि भूतभविष्यतोः सत्ताङ्गीकारादित्यर्थः। अस्तिसामानाधिकरण्यस्य व्यभिचारमप्याह — **राजेति**। राजपुरुष इत्यत्र पुरुषस्येव राजपुरुषसंबन्धस्यापि सत्ता प्रतीयते। तत्र पुरुषस्यास्तिसामानाधिकरण्येऽपि न संबन्धस्य तदस्ति। बुद्धिसत्ता तु तत्राप्यस्तीति भावः। अतीतानागतवस्तुनः परामर्शि तद्विषयकं यद्बुद्धितत्त्वं बुद्धिपरिणामरूपं ज्ञानं तेनोत्प्रेक्षिता विषयीकृता, तद्विषयत्वलक्षणेति यावत्। मुख्यसत्ताभिप्रायं तु न संभवतीत्याह — **या त्विति**। तत्र हेतुः — **सदित्यस्येति**। सतो भावः सत्ता। सदिति च शत्रन्तं वर्तमानमात्रप्रतिपादकमित्यर्थः। ननु सत्ताजातिर्नित्या, तस्या आश्रयभूतभावित्वाभ्यां भूतभावित्वव्यपदेश इति पक्षे भूतभाविसत्तायामपि प्रत्ययप्रसङ्गः, तस्याः संप्रत्यपि सत्त्वात्, अत आह — [8]**यद्याश्रयस्येति**। **असौ** भूतत्वादिविशिष्टा। **तत्र** भूतभविष्यत्सत्तायाम्। तदेव व्यनक्ति — **तेनेति**। अनुपपत्तिं स्फोरयति — **विद्यमान एवेति**। ननु गोमत एवात्रातीतत्वादिकं प्रतीयते, आसीदित्यादिसामानाधिकरण्यात्, न तु गवाम्, अत

---

[1] 'यत्तदेतेभ्यः' इति सूत्रव्याख्याने प्रदीपे उक्तमिदम्।
[2] पा. सू. ३.१.१२५.
[3] पा. सू. १.३.११.
[4] 'अस्मिन्' इति सूत्रोपात्तसप्तम्यर्थोऽत्र विवक्षितः।
[5] बाह्यसत्तेत्याशय इति भाति।
[6] सत्ताया अव्यभिचारेत्यर्थः।
[7] अव्यभिचारेति छेदः।
[8] प्रदीपे 'अथाश्रयस्य' इत्यत्र 'यद्याश्रयस्य' इति पाठोऽन्नंभट्टस्येति भाति।

आह — **गुणेति**। प्रत्ययार्थे गुणभूता गावः, तद्धर्मस्यातीतत्वादेर्मत्वर्थे आरोपादासीदित्यादिना सामानाधिकरण्योपपत्तिरित्यर्थः। अवस्थातरि विद्यमानेऽप्यवस्थाया [1]अतीतत्वेनातीतत्वप्रयोगे दृष्टान्तः — **यथेति**। यथैश्वर्यकालमीश्वर इति प्रयुज्यते, तदत्यये आसीदिति, तथा गोस्वामित्वकाले गोमानिति प्रयोगः, तदत्यये आसीदित्यादिप्रयोग इत्यर्थः। 'एतस्मिन्' इत्यस्य व्यवहितपरामर्शित्वमाह — **गाव इति**। 'न प्रयुज्यते' इत्यनेनानभिधानमत्र निमित्तमुक्तम्। 'न त्वेतस्मिन्' इत्येतदेव विपक्षेऽनिष्टापादनेनोपपादयति — भाष्ये [2]**यदि हीति**। 'गोमान्' इत्यत्रास्त्यप्रयोगे हेतुमाह — **प्रत्ययान्तेनैवेति**। **प्रकृत्यर्थोपाधिः** सत्ता। **उपाधिवाचिनः** अस्तीत्यस्य। प्रत्ययान्तेन प्रकृत्यर्थोपाधिप्रतीतावुपाधि[3]वाचिनोऽप्रयोगे दृष्टान्तः — **यथेति**। उक्तार्थानामप्रयोगात् [4]"सति वा' इत्ययुक्तम्, अत आह — **सामान्येति**। **उत्पुच्छयत इति**। [5]"पुच्छभाण्डचीवराण्णिङ्' कृञ्नर्थविशेषे विधीयते। कृञ्नर्थसामान्यस्य प्रत्ययेन प्रतीतावपि विशेषप्रतीतिरुदादि[6]व्यतिरेकेण न भवतीति तेषां प्रयोगः। उदाहरणान्तरमाह — **अभिमनायत इति**। प्रत्ययार्थो यो [7]भावस्तद्विशेषावगमायेति विग्रहः। "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' इति भवत्यर्थे क्यङ्विधानात् तद्विशेषप्रतिपत्तये स्वादिप्रयोगः 'सुमनायते, उन्मानायते, दुर्मनायते, अभिमनायते' इति। **प्रकृत्यर्थेति**। गावोऽस्यासन्निति प्रकृत्यर्थस्य गोरूपस्य सत्ताया यः कालविशेषोऽतीतत्वादिः, तत्प्रतिपादनाय [8]लङ्प्रयोगे तद्बहुत्वप्रतिपादनाय बहुवचनस्यापि प्रयोगप्रसङ्ग इत्यर्थः। एतच्छब्दद्वयस्य वैयर्थ्यं निराह — **यैषेति**। विशिष्टसत्ता विशेषणमपि स्पृशति, अत आह — **साक्षादिति**। आसीदित्यनेन वर्तमानसत्ता न कथ्यते, अत आह — **अतीतेति**। वर्तमानस्य गोमतः कथमतीतानगतत्वम्, अत आह — **अवस्थेति**। संप्रतिसत्तायां प्रत्ययसिद्ध्यर्थमस्तिग्रहणमित्येतदाक्षेपपरतया [10]"अस्त्यत्र' इत्यादि 'धातुसंबन्धे प्रत्ययाः' इत्यन्तं भाष्यमवतारयति — **अस्त्यत्रेति चोदक इति**। तद्व्याचष्टे — **गोमानिति**। तत्र हेतुः — **अस्तिरिति**। तदपि न्यायसिद्धमित्याह — **अन्तरङ्गत्वादिति**। सत्तासंबन्धानन्तरं कार्यान्तरसंबन्ध इत्यन्तरङ्गता। [11]"अस्तिर्भवन्तीपरः' इति प्रत्ययार्थस्य सत्तासंबन्धोऽवगम्यते, न प्रकृत्यर्थस्येति तदवगमाय गोमानस्तीति प्रयोगः किं न स्यात्, अत आह — **तथा चेति**। आक्षेपमुपसंहरति — **तस्मादिति**। **अङ्गीकृतसत्तः** सत्ताविशिष्टः। **चोदक एवेति**। गोमानित्यत्र वर्तमानसत्तासंबन्धाङ्गीकारे गोमानासीदित्यादौ कथमतीतत्वादिप्रतीतिरित्यर्थः। कृत्सु तत्सूत्रप्रवृत्तिः, न तद्धितेषु, अत आह — — **तत्रारम्भपक्ष इति**। [12]"धातुसंबन्धे' इति सूत्रस्येत्यर्थः। प्रत्ययाधिकारात् 'धातुसंबन्धे' इत्येतावति सूत्रेऽप्यनुवृत्तप्रत्ययपदस्य संज्ञिपरत्वेन 'धातुसंबन्धे प्रत्ययाः' इति लाभेन प्रत्ययमात्रग्रहणार्थं प्रत्ययग्रहणमिति तत्रैवोक्तम्। तत्सूत्रप्रत्याख्यानपक्षे कथं कालान्तरे प्रत्ययप्राप्तिः,

---

[1] अतीतत्वेनातीतप्रयोगदृष्टान्तः — अ.

[2] भाष्ये 'यद्येतस्मिन् वाक्ये' इत्यत्र 'यदि त्वेतस्मिन् वाक्ये' इति चौखाम्बामुद्रिते दृश्यते। 'यदि ह्येतस्मिन्' इत्यन्नंभट्टपाठ इति प्रतीयते।

[3] वाचिनः प्रयोगे — अ.

[4] भाष्ये 'सति चास्तेः प्रयोगे' इति भाष्ये दृश्यते। 'सति वास्तेः प्रयोगे' इत्यन्नंभट्टपाठ इति भाति।

[5] पा. सू. ३.१.२०.

[6] उत्, वि, परि, इत्येतेषां प्रयोगाभाव इत्यर्थः।

[7] प्रदीपे 'प्रत्ययार्थभवनविशेषावगमाय' इत्यत्र 'प्रत्ययार्थभावविशेषावगमाय' इति पाठोऽन्नंभट्टाभिमत इति भाति।

[8] पा. सू. ३.१.१२.

[9] 'लङ्प्रयोगे तद्बहुत्वप्रतिपादनाय' इति नास्ति — अ.

[10] अस्त्वत्रेत्यादि — अ. ऋ, लृ.

[11] का. वा. २.३.१–११.

[12] पा. सू. ३.४.१.

अत आह — **यदेति**। प्रत्याख्यानप्रकारमेवाह — **तदा हीति**। 'गोमानासीत्' इत्यत्र प्रकृत्यर्थस्य वर्तमानसत्तासंबन्धाभावे मतुप् कथं स्यात्, अत आह — **तत्र प्रकृत्यर्थस्येति**। [1]**अन्तरङ्गत्वादिति**। अतीतादिकालसंबन्धनैरपेक्ष्येण गोमानिति प्रत्ययेऽन्तरङ्गसत्तासंबन्धेनोत्पादिते पश्चादासीदित्यादिसंबन्धेऽपि संस्कारो न निवर्तत इत्यर्थः। **यथेति**। [2]गमनक्रियाकर्मत्वेन संस्कारः 'न गच्छति' इति गमननिषेधेऽपि नापैति तद्वदित्यर्थः। 'संप्रतिसत्तायां यथा स्यात्' इति प्रयोजने चोदकेन निरस्ते प्रयोजनान्तरं वक्तुम् 'इदं तर्हि' इति भाष्यम्। तत्रास्तिग्रहणेन कथमानन्तर्यादिनिवृत्तिः, अत आह — **पूर्वोक्तेनैवेति**। आनन्तर्यसामीप्ययोर्भेदमाह — **अनन्तरमिति**। नन्वस्तिग्रहणस्यानन्तरादि[3]व्यावर्तकत्वात् कथं प्रसङ्गः, अत आह — **केवलानामिति**। अगमकत्वलक्षणमसामर्थ्यमिहाभिमतमित्याह — **इहेति**। मतुब्विधाने गोमानित्युक्ते गोस्वामित्वप्रतीतिः कथम्, अत आह — **स्वस्वामीति**। अस्य सन्तीति षष्ठ्यर्थः स्वस्वामिभाव एवेत्यर्थः। ननु 'गावोऽस्य सन्त्यनन्तराः' इत्यत्रानन्तरा इति चतुर्थम्, तृतीयस्येति कथम्, अत आह — **प्रकृत्यर्थेति**। अस्येति प्रत्ययार्थपरम्, 'गावः सन्त्यनन्तराः' इति प्रकृत्यर्थपरमिति तदपेक्षया तृतीयत्वमित्यर्थः। तात्पर्यमाह — **तत्रास्तिग्रहण इति**। **धर्मान्तरम्** आनन्तर्यादिकम्। अक्षरार्थमाह — **तत्र क्रियमाण इति**॥

[४, १४७–१५३]

(नारायणीयम्) ननु संबन्धाधारयोर्भेदादन्यतरोपादानेन सर्वत्रासिद्ध्यार्थद्वयोपादानं कर्तव्यमेवेत्ययुक्तोऽयं प्रश्न इत्याशङ्क्याह — **शाखा[वानिति। संबन्धित्वम्]** अवयवावयविभाव[संबन्धः, तत्र षष्ठ्या] भावात्। **कस्मा इदमिति**। [4]"चतुर्थी तदर्थार्थ' इति चतुर्थीसमासः। [5]"अर्थेन नित्यसमासः, सर्वलिङ्गता च वक्तव्या' इति तत्रोक्तमिति। **नपुंसकैकवचनेति**। अन्यथा पुंल्लि[ङ्गद्विवचनं स्यात्। **काकुः** स्व]रः, तेन सह [क्रियाया युक्त]त्वात् किंशब्दार्थलाभः। अत एवाह — **भवत्येवेति विधिं गमयतीति**। समावेशस्यानावश्यकत्वमुपपादयति — **इह यदेति**। तथा चोक्तम् — [6]"संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः' इति। **वृक्षैः पर्वतस्यानारम्भादिति**। [ये यमा]रभन्ते, यथा शाखादयो वृक्षम्, ते [तस्या]वयवाः। वृक्षास्तु पर्वतं नारभन्त इति ते तस्य नावयवाः। **न भाव्यमिति**। अनभिधानादिति वक्ष्यते। अत्रस्थस्य भाष्यस्य प्रदेशान्त[रस्थभाष्येण विरोधमाशङ्क्य परिहरति — **नन्वित्यादिना**। नन्वत्र का]ल्पनिकमाधारत्वम्, न तु मुख्यमिति कथमधि[करणसंज्ञेत्यत्रा]ह — **कारकप्रकरण इति**। [7]"साधकतमम्' इति तमग्रहणात् कारकप्रकर[णे गौणमुख्यन्यायो न] प्रवर्तते। .....निरूपि.....गात्। एवं च सर्वेषां शब्दानां....थोक्तं ....अ....न्न तु...तुं सर्वेषां शब्दानामौपचारिकीमेतां सत्तां पदार्थो हि न कश्चिदतिवर्तत इत्यादि। ननु न सत्ता [प्रत्ययार्थ] त्वेन सूत्रे निर्दिष्टा, किं तु [विशे]षणत्वेनेति 'सत्तायां प्रत्ययः स्यात्' इत्ययुक्तमित्यत आह — **सतायां वर्तमानादिति**। पदार्थ

---

[1] प्रदीपे 'अन्तरङ्गस्यानिवृत्तिः' इत्यत्र 'अन्तरङ्गत्वादनिवृत्तिः' इत्यन्नंभट्टपाठ इति भाति।

[2] प्रदीपपुस्तकेषु 'ग्रामान्नागच्छति' इति पाठो दृश्यते। 'ग्रामं न गच्छति' इत्यन्नंभट्टपाठ इति भाति।

[3] आनन्तर्यादि — अ.

[4] पा. सू. २.१.३६.

[5] का. वा. २.१.३६–४, ५.

[6] वाक्यपदीयम् ३.७.१५६.

[7] पा. सू. १.४.४२.

[[1]सत्ता]व्यभिचारमुपपादयति — **यावद्बुद्धचेति**। नन्वत्यन्तमसतां शशविषाणालातचक्रप्रभृतीनां सत्तासंबन्धाभावात् तस्या अव्यभिचारो [न स्यादि]त्यत आह — **अत्यन्तेति**। [**बुद्धचारूढोप**]-**चरितेति**। बुद्धचुपारूढत्वादेवोपचरिता, न वास्तवीत्यर्थः। **शब्दप्रयोगाश्रयत्वादिति**। शब्दप्रयोगकारणत्वादित्यर्थः। ननु शब्दान्मुख्यतया सत्ता प्रतीयते, न तूपचाररूपेणेत्यत्राह — **सैवेति**। **बहीरूपतयावभासत इति**। संविदुपारोहे हि व्यवहार इति प्रतीतिलक्षणैवार्थस्य सत्ता-श्रयितुं युक्तेत्यर्थः। बाह्ये त्वर्थे सत्ताभिमानो लौकिकानामिति तदनुरोधेनेयमौपचारिकीति भण्यते। उक्तमेवार्थमवस्थापयितुं विपक्षे बाधमाह — **यदि त्विति**। [**सता**] **विरोधादिति**। यदि 'वृक्षः' इत्यतः सत्तावगम्यते, तर्हि नास्तीति सत्तया विरुद्धाया असत्तायाः प्रतिपादनमनुपपन्नमिति तत्प्रयोग एव न स्यादित्यर्थः। असत्त्वे तु तद्विषयो निषेधोऽनुपपन्न इति सर्वथा प्रयोगानुपपत्तिरेव बाह्य-शब्दार्थवादिनाम्। उक्तं च —

सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः॥ इति।

सतो जन्मविरोधादिति। आत्मलाभो हि जन्मोच्यते। सतश्चात्मलाभायोगः। लब्धात्मा हि सन्नुच्यत इत्यर्थः। एवं बाह्यसत्ताश्रयेऽनुपपत्तिमुक्त्वोपचारसत्ताभ्युपगमेनोपपत्तिमाह — **उपचारेति**। यथा स्फटिकद्रव्यं नीलादिसंसर्गे सत्यपरित्यक्तस्वरूपं तद्रूपमिवावभासते तथोपचारसत्तापि सद्रूप-मत्यजन्ती प्रतिषेधादिभिरपि संबध्यमाना प्रतिषेधाद्यात्मिकैव भाति। ततश्च पदात् प्रतीत्यवसरे ज्ञानाकाररूपायां सत्तायामवस्थितोऽर्थो वाक्यावस्थायां व्यवहारकाले विरोधिभिरविरोधिभिश्च धर्मैः संबन्धं प्रतिपद्यते। तदेवम् 'अस्ति, नास्ति, जायते' इति प्रयोगत्रयमुपपादितम्। एते च त्रयो विकारा जन्मस्थितिविनाशा उक्ताः। एष्वेवान्ये त्रयोऽन्तर्भवन्ति। जन्मनि वृद्धिरवयवोपचया-त्मिकेति जायत इति वर्धत इति प्रयोगः समर्थनीयः। एवं परिणामो धर्मान्तराविलक्षणोऽत्रै-वान्तर्भूत इति 'परिणमते' इत्ययमपि प्रयोग एवमेव द्रष्टव्यः। परिक्षयस्तु विनाशेऽन्तर्भवतीति नास्तीतिवत् 'परिक्षीयते' इति प्रयोग इति षड्भावविकारयोगित्वम्। [गम्यमान]सत्ताश्रयेण सर्वप्रयोग [इति] यद् व्याख्यानान्तरं केषांचित् तस्यानुपपत्तिं दर्शयितुमाह — **अन्ये त्विति**। **तेषां संप्रतीति**। वर्तमानलक्षणा मुख्या संप्रतिसत्तोच्यते। अस्मिन् व्याख्याने मुख्यो [दोष उच्यते] — **राजपुरुष इत्यादौ चेति**। राजसंबन्ध्ययं पुरुषः, न त्वन्यसंबन्धीत्यर्थः। एवं नीलोत्पलादावपि द्रष्टव्यम्। **वर्तमानसत्तायां बाह्यायामिति**। वर्तमानत्वेन विशेषणाद् बाह्या सत्ता गृह्यते। बौद्धसत्ताया वर्तमानत्वाव्यभिचारादित्यर्थः। 'भूतभविष्यत्सत्तायाम्' इति षष्ठी-समासः, न तु समानाधिकरणसमास इत्याह — **भूतभविष्यतोरिति**। एतदेव विशदयति — **अतीतेति**। कथं पुनरनेन मुख्या सत्ता व्यावर्त्यत इत्यत्राह — **या त्विति**। **नापीति**। पूर्वोक्तादेव हेतोः। ननु वर्तमानसत्ताविशिष्टा या गावस्तासां स्वामिनो देवदत्तस्य सत्ताया अतीतत्वमनागतत्वं वा प्रतिपादयितुं 'गोमानासीत्' इत्यादिप्रयोग उपपन्न एवेत्यत आह — **विद्य-मान एवेति**। नन्वेवं प्रकृत्यर्थसत्ताया अतीतानागतत्वे कथं प्रत्ययार्थस्य तद्व्यपदेश उपपद्यत इत्यत आह — **गुणधर्मस्य चेति**। सिद्धान्तिन आशयं दर्शयति — **अवस्थातुरिति**। **अवस्थाविशेष-स्येति**। वर्तमानसत्ताविशिष्टानां गवां स्वामित्वस्येत्यर्थः। **यथेश्वर इति**। ईश्वरत्वाव-स्थाया भूतत्वमत्र प्रतीयते, न त्ववस्थातुः — ईश्वरोऽयं पूर्वमासीत्, इदानीं दरिद्रः संपन्न इति, एवमिहापि गोमत्त्वावस्थाया भूतत्वादिकमिह गम्यते, न तु गोमतो देवदत्तस्येत्यर्थः। एत-

---

[1] सत्ताया अव्यभिचारमित्यर्थः।

च्छब्दार्थमाह — **गावोऽस्येति**। वाक्यशब्देन वाक्यार्थो लक्ष्यत इत्याह — [1]**वाक्यार्थ इति**। कथं पुनर्गोमानित्यादौ गोसत्ताप्रतिपादनायास्तेः प्रयोगो न भवतीति, तत्राह — **प्रत्ययान्तेनेति**। **यथा दाण्डेति**। दण्डः प्रहरणमस्यां क्रियायामिति [2]'तदस्यां प्रहरणम्' इति णः। नन्वेवं सति [3]'सेति वा' इत्यादिनास्तेः प्रयोगाभ्युपगमो न युक्त इत्याशङ्क्याह — **सामान्याभिधान इति**। **अभिमनायत इति**। अत एव भृशादिषु 'सुमनस् दुर्मनस् अभिमनस्' इति पठ्यते। वाचोयुक्तेरनुपपत्तिं स्फोरयति — **गोमत इति**। सर्वनामद्वयप्रयोगस्योपयोगमाह — **यैषेति**। एकं प्रकृतपरामर्शि, अपरं वक्ष्यमाणार्थपरामर्शकमित्यर्थः। ननु गोसत्तैवातीतानागता वेति कथं तन्निषेधः क्रियत इत्यत्राह — **साक्षादित्यर्थ इति**। ननु गोमत्[सत्ताया] वर्तमानत्वात् कथम् 'आसीत्' इत्यादिप्रयोगो युज्यत इति, तत्राह — **अवस्थाविशेषस्येति**। एकग्रन्थाशङ्कां परिहरति — **अस्त्यत्रेति चोदक इति**। तस्याशयमाह — **गोमानित्यादाविति**। **शब्दशक्तीति**। गावोऽस्य गो[मानित्यु]क्ते किमित्यपे[क्षायाम् 'अस्ति' इत्येव शब्दशक्]त्येष्यत इत्यर्थः। **अङ्गीकृतसत्त इति**। असतो विशेष[णत्वायोगा]त्। नन्वेवं सति 'कथं तर्हि' इति चोद्यग्रन्थोऽनुपपन्न इत्याशङ्क्याह — **चोदक इति**। ननु प्रकरणाद् धात्वधिकारविहितानां [प्रत्ययानां] कालान्तरे साधुत्वाभ्यनुज्ञार्थं सूत्रमिति कथं तेनात्र साधुत्वसिद्धिरित्यत आह — **तत्रारम्भपक्ष इति**। सूत्र-प्र[त्याख्यानपक्षे] निर्वाहमाह — **यदा त्विति**। **विरुद्धकालेति**। अग्निष्टोमेनेष्टवान् इति भूते णिनेर्विधानाद् भूतकालता गम्यते, जनितेति भविष्यति लुड्विधानाद् भविष्यत्कालत्वम्, तयोः सामानाधिकरण्ये[नान्वयायोगात्] सोऽस्य पुत्रो जनिता, योऽभिवृद्धोऽग्निष्टोमयाजीतीमं व्यपदेशं लप्स्यत इत्ययमर्थोऽवगम्यते। यथा 'भावि कृत्यमासीत्' इति भविष्यतः कृत्यस्य भूतता प्रतीयते। तदुक्तं भाष्ये — 'तदा चैवं व्यपदेक्ष्यते यदानेनेष्टं भवति' इति। एतत् प्रकृते योजयति — **तथेहेति**। नन्वेवं गोसत्ताया वर्तमानत्वाभावप्रतीतौ मतुपो निवृत्तिः स्यादित्यत आह — **तत्रेति**। **यथा ग्रामादिति**। आगमनापेक्षया लब्धापादानत्वस्य ग्रामस्यागमननिषेधेऽपादानत्वाभावप्रतीतावप्यन्तरङ्गत्वात् कृतस्य संस्कारस्यानिवृत्तिरित्यर्थः। 'अस्तियुक्तात्' इत्यत्र सामर्थ्यप्राप्तमवधारणमित्याह — **अस्तिनैवेति**। एतदेवोपपादयति — **पूर्वोक्तेनेति**। अनन्तरसमीपयोरैकार्थ्यशङ्कां परिहरति — **अनन्तरमिति**। नन्वस्तिनैव युक्तादिति नियमात् कथं 'गावोऽस्य सन्त्यनन्तराः' इत्यादौ प्रत्ययप्राप्तिरिति, तत्राह — **केवलानां त्विति**। ननु यथा स्वस्वामिसंबन्धस्य प्रत्ययान्तेऽन्तर्भावः तथानन्तर्यादिसंबन्धस्यापि [4]प्रत्ययान्तेनान्तर्भावनादनन्तरादिशब्दस्य वृत्तौ प्रयोगाभावात् कथमसामर्थ्यमित्यत आह — **इहेति**। **सत्तयैवेति**। 'गावोऽस्य सन्ति' इत्येतावता स्वस्वामिसंबन्धः प्रतीयत एवेत्यर्थः। नन्वस्त्यर्थापेक्षयानन्तरादेर्द्वितीयत्वमेवेत्यत्राह — **प्रकृत्यर्थेति**। नन्वक्रियमाणे क्रियमाणे वास्तिग्रहणे तुल्यत्वादसामर्थ्यस्य कथमयं विशेष उक्त इत्यत आह — [5]**तत्रास्तिग्रहण इति**। तस्मादनन्तरादियुक्तात् प्रत्ययनिवृत्त्यर्थमस्तिग्रहणमिति स्थितम्॥

[४, १५३–१६२]

(विवरणम्) ननु समर्थात् तद्धितोत्पादात् प्रातिपदिकत्वानपेक्षणात् 'अप्रातिपदिकत्वात्' इत्य-

---

[1] प्रदीपे 'इत्यत्रार्थे' इत्यत्र 'इत्यत्र वाक्यार्थे' इति पाठोऽभिमतः।

[2] पा. सू. ४.२.५७.

[3] भाष्ये 'सति चास्तेः प्रयोगे' इत्यत्र 'सति वास्तेः प्रयोगे' इति पाठोऽभिमतः।

[4] प्रत्ययान्तेनानन्तर्भावनात् — घ.

[5] अत्रास्तिग्रहण इति — घ.

युक्तम्, अत आह — **यदेति**। ननु भवतूक्तेऽपि द्विगोस्तद्धितः, बहुव्रीहेः किमायातम्, अत आह — **पञ्चगुशब्दमिति**। अवश्यमस्तीत्यव्ययमभ्युपगन्तव्यमित्याह — **तथा चेति**। ननु 'तस्मान्मतुवन्तान्मतुप्' इत्येतावतालमित्यत आह — **न केवलमित्यादिना**। वचनग्रहणस्य प्रयोजनमाह — **शुक्लादय इति**। आध्यासिकोऽव्यतिरेकः, न तत्त्वतो विवक्षित इत्याह — **गुणगुणिनोरिति**। ननु सत्येव गुणिनि पार्थिवपरमाणौ रूपादीनां पीलुपाकपक्षेऽपि निवृत्तेरङ्गीकारात् पिठरपाकपक्षेऽपि तुल्यं कार्येऽपीति कथं [1]"न च गुणो गुणिनं व्यभिचरति' इत्युक्तमित्यत आह — **गुणेति**॥

[४, १५३–१६२]

(**उद्द्योतनम्**) 'चित्रगुः' इति समासान्मतुबापाद्यते। तत्र प्राप्तिमुपपादयति — **सत्तेति**। चित्रा गावोऽस्य सन्तीत्यर्थे समासविधानादित्यर्थः। **षष्ठ्यर्थ एवेति**। समस्यमानपदानां स्वार्थसंबन्धं विनान्यपदार्थे वृत्त्यसंभवात् षष्ठ्यर्थ एव बहुव्रीहिविधानमित्यर्थः। संशयबीजमाह — **समुदायेति**। अवयवपक्षे चित्रपदाद् गोपदाद्वा। उभयत्रापि सापेक्षत्वमाह — **गुणपदमिति**। तत्र हेतुः — **द्रव्यद्वारेणेति**। तर्हि गोमानित्यत्र कीदृशं विग्रहवाक्यं प्रदर्शनीयम्, अत आह — **तस्मादिति**। **वृत्तौ** गोमानित्यत्र। यदि गोमानित्युक्ते गवां चित्रत्ववैशिष्ट्यमपि प्रतीयेत तदा गमकत्वात् सापेक्षत्वेऽपि प्रत्ययः स्यात्। तच्च न प्रतीयत इति नोक्तविग्रहे प्रत्ययोत्पत्तिरित्यर्थः। समर्थात् सुबन्तात् प्रत्ययो भवति, स च प्रातिपदिकात् परः श्रूयत इति पक्षेऽपि समुदायादनुत्पत्तिमाह — **यदेति**। [2]"कृत्तद्धित"[3] सूत्रे समासस्यार्थवत्सूत्रेणैव प्रातिपदिकत्वे सिद्धे पदसमुदायस्य चेत् प्रातिपदिकसंज्ञा समासस्यैव नान्यस्येति नियमात् समुदायस्य न प्रातिपदिकत्वमित्यर्थः। समुदायस्य सुबन्तत्वमपि नास्तीत्याह — **सुबन्तत्वमिति**। अन्तशब्दस्यावयववचनत्वादित्यर्थः। गोचित्रपदसमुदायस्याप्रातिपदिकत्वेऽपि प्रातिपदिकसमुदायस्य प्रातिपदिकत्वात् तस्मात् प्रत्ययोऽस्तु, अत आह — **प्रातिपदिकसमुदायस्येति**। ननु चित्रगोशब्दार्थयोर्विशेषणविशेष्यभाव एव प्रातिपदिकसमुदायार्थ इति समुदायस्य प्रातिपदिकसंज्ञा स्यात्, अत आह — **विशेषणेति**। केवलप्रातिपदिकस्य प्रयोगाभावेन विशेषणविशेष्यभावानवगमकत्वात्। 'ननु' इत्यनेन समुदायात् प्रत्यय आशङ्क्यते। तदुपपादयति — **जताविति**। [4]**संख्याविशेषः** एकत्वम्। **यथेति**। एकोऽपि न हन्यते, द्वावपि। [5]"तद्यथा' इत्यनेन प्रकृतोपयुक्तं किमुच्यते, अत आह — **अनेनेति**। तदेव व्यनक्ति — **यदि हीति**। **यथेति**। उपादेयगता संख्या विवक्ष्यते। 'ब्राह्मणो न हन्तव्यः' इत्यत्रोद्देश्यगतत्वाद् ग्रहैकत्ववदविवक्षेति भावः। ननु [6]"ङ्याप्प्रातिपदिकात्' इति समासनिर्देशाद् द्विबहुवचनान्तानामपि समाससंभवात् कथमेकत्वविवक्षा, अत आह — **ङ्याबिति**। अभेदैकत्वसंख्या प्रायेण समासे प्रतीयत इत्यर्थः। उक्तेऽपि प्रत्ययोत्पत्तौ ज्ञापकमाह — **द्विगोर्लुग्विधानादिति**। **अर्थशब्दस्येति**। अर्थशब्दस्यार्यमाण[7]परतया प्रत्ययानुत्पत्तौ तत्प्रत्याय्यत्वासंभवादित्यर्थः। पञ्च गावोऽस्येति पञ्चगुः। बहुव्रीहिरयम्, न द्विगुः, अत आह — **पञ्चगुशब्दमिति**। तत्र-

---

[1] भाष्ये चकाररहित एव पाठ उपलभ्यते।
[2] पा. सू. १.२.४६.
[3] अस्य नियमादित्यनेनान्वयः।
[4] संख्याविशेषकत्वम् — अ, ऋ, लृ.
[5] तथेत्यनेन — अ, ऋ, लृ.
[6] पा. सू. ४.१.१.
[7] 'ऋ गतौ' इति धातोः कर्मणि अर्यत इति अर्थशब्दनिष्पत्तिः। 'उषिकुषिगार्तिभ्यस्थन्' इति थन्विधानात। बोध्यमानपरतयेत्यर्थः।

कौण्डिन्यन्यायेन बाधकत्वमुपपादयति — **अन्यपदार्थेति**। मात्रशब्दः सामान्यवाची। द्विगोर्विशेषविहितत्वेनानवकाशत्वादन्तरङ्गमपि बहुव्रीहिं बाधत इति शङ्कते — **नन्विति**। **यत्रेति**। पञ्चानां पूलानां समाहारः, पञ्च पूलान्यस्य समाहारस्येत्यत्र। **अस्त्यर्थमिति**। अस्त्यर्थविशिष्टषष्ठ्यर्थस्य मत्वर्थत्वात्। अस्त्यर्थापेक्षायां भाष्यं संवादयति — **तदाहेति**। [1]'अल्पापेक्षमन्तरङ्गं बह्वपेक्षं बहिरङ्गम्' इति बहुव्रीहिणा द्विगुबाधो युक्त इत्याह — **तेनेति**। 'तद्वै क्रियमाणम्' इत्यनेन मतुप्प्रकृतित्वेनास्तिग्रहणं क्रियते, न तु प्रकृत्युपाधित्वेन। तथा च द्विगुना बहुव्रीहेर्बाध इत्युक्तम्। तत्र पञ्चमीनिर्देशाभावात् कथं प्रकृतित्वप्रतीतिः, अत आह — **अस्तीति**। तिङन्तेनास्य समानार्थत्वमित्याह — **कर्तृविशिष्टेति**। 'अस्तित्वम्' इति प्रयोगदर्शनादप्यव्ययत्वमित्याह — **तथा चेति**। नन्वव्ययस्यास्तेरस्तिसामानाधिकरण्यमस्तु, अत आह — **गवादीनामिति**। अस्तिमानित्यस्यार्थमाह — **तत्रास्तिमानिति**। **विशेषणायोगादिति**। अव्यभिचारादित्यर्थः। 'तस्मात्' इत्येतदुपपादयति — **उपाधीति**। 'अस्ति' इति प्रकृतिनिर्देशः, न तूपाधिरित्यङ्गीकारेऽपीत्यर्थः। भाष्ये **सर्वत्रेति**। वार्तिकं [2]'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रस्थम्। **बहुव्रीहेर्भावादिति**। तथा च बहुव्रीहिणोक्तत्वात् तद्धिताप्रसङ्ग इति भावः। तद्धितप्रतिषेधद्विगुप्रतिषेधयोर्विशेषमाह — **द्विगुप्रतिषेध इति**। द्विगुमङ्गीकृत्य तद्धितनिषेधे समासान्तोदात्तत्वमनिष्टं स्यात्। [3]द्विगुप्रतिषेधे तु बहुव्रीहिस्वरस्तद्धितानुत्पत्तिश्च सिध्यतीति भावः। आपादनस्य स्थलमाह — **यवमानिति**। ननु यवमत्संबन्धप्रतीत्यर्थं मत्वन्तादपि प्रत्ययेन भाव्यम्, अत आह — **यस्येति**। **यवमान्** कृष्यादिः। [4]अत्राप्युक्तार्थत्वमाह — **यस्यामिति**। यवमानस्यास्तीत्येतद्वैषम्यमाह — **एकजातीये हीति**। तद्देशेऽसंनिहिता गावो यस्य स देशः **असंनिहितगुः**। तस्यापि **गोमत्त्वात्** गोस्वामित्वात्। उक्तार्थत्वान्मत्वन्तात् कथं मतुप्, अत आह — **पूर्वोक्तेति**। 'अर्थान्तरे वृत्तात्' इति न्यायस्येत्यर्थः। गोस्वामिस्वामिनो गोस्वामित्वाभावादाह — **गावो विद्यन्त इति**। तत्र गोभिः साक्षात् संबन्धो नास्ति, अत आह — **द्विविध इति**। [5]'तर्हि गोमानित्युक्ते कथं गोमत्संबन्धप्रतीतिः, अत आह — **तत इति**। अन्तर्भावप्रकारमाह — **तत्रेति**। प्रकारान्तरेणोक्तार्थत्वाभावमाह — भाष्ये **अन्यथाजातीयक इति**। तत्र मतुब्द्वयस्यैकजातीयत्वादाह — **संबन्ध इति**। संबन्धभेदेन तत्प्रतिपादकमतोरपि भेदोऽवगम्यत इत्यर्थः। तदेव व्यनक्ति — **गोमानित्युक्त इति**। ननु वृत्तिवाक्ययोरर्थभेदात् कथं साम्यापादनम्, अत आह — **वृत्तीति**। एकार्थीभावरूपविशेषसत्त्वेऽपीतरसाम्यात् तुल्यत्वम्। अन्यथा विग्रहवाक्यप्रयोगः क्वापि न स्यादिति भावः। 'मत्वर्थीयात्' इत्युक्तेरादिशब्दस्य च प्रयोजनमाह — **न केवलमिति**। **विशेषेति**। 'दण्डिमती' इत्यादिसिद्ध्यर्थमित्यर्थः। तद्धितवृत्तित्वेन मत्वर्थवृत्तित्वेन च समानत्वात् 'दण्डिमती' इति कथं सिध्येत्, अत आह — **समान इति**। उत्तरश्लोकेन ठन्नन्तादिनिः प्राप्नोति, सोऽप्यनेन निरस्त इत्याह — **तेनेति**। **विरूपोऽपीति**। ठंस्तु सरूपत्वादपि न भवतीत्यर्थः। उत्तरश्लोकस्थस्य सरूपग्रहणस्य प्रयोजनमाह — **तथाभिन्नेति**। **अथेति**। हस्तोऽस्यास्तीति हस्ती, हस्तिनोऽस्य सन्तीति हस्तिमान्, इत्युभयत्र षष्ठ्यर्थ एव वृत्तिः। **न संबन्ध इति**। [6]'हस्ताज्जातौ' इति जातिग्रहणादिति **भावः**। हस्ति-

---

[1] एतादृशान्तरङ्गबहिरङ्गभावः प्राचीनैरङ्गीकृतः।
अयं खण्डयते नागेशेन परिभाषेन्दुशेखरे।

[2] पा. सू. २.१.५१.

[3] द्विगुनिषेधे तु — ऋ, ॡ.

[4] अत्राप्यनुक्तार्थत्वमाह — अ, ऋ, ॡ.

[5] न्यासस्येत्यर्थः — अ.

[6] तत्र गोमानित्युक्ते — अ.

[7] पा. सू. ५.२.१३३.

शब्दस्य जातिवाचित्वे उपोद्बलकमाह — **अत एवेति**। **मत्वर्थीये नञ्**इति। [1]'मत्वर्थे बहुव्रीहिः' इति वचनाद्बहुव्रीहिं त्यक्त्वापीत्यर्थः। तत्र हेतुः — **न हीति**। **समानार्थत्वं** मत्वन्तबहुव्रीह्योः। 'बहुव्रीहिरेव' इत्येवकारेण नञ्समासनिषेधः, परत्वादिति भावः। न विद्यन्ते गावो यस्य सोऽयम् **अगुः** [2]'गोस्त्रियोः' इति ह्रस्वः। मत्वन्तस्य जातिवाचित्वाभावेऽपि नञ्समासेन योऽर्थो भासते स बहुव्रीहिणा न भासते चेत् नञ्समास एव भवतीत्याह — **यत्रापीति**। **आहिच्छत्र इति**। [3]'प्राग्दीव्यतोऽण्'। शालीयशब्दादपि छो न भवति, अण् तु भवत्येवम्। ननु 'समानवृत्तौ' इत्यनेनैव मत्वन्तान्मतुब् न भवति, 'सरूपः' इति किमर्थम्, अत आह — **समानेति**। यवा अस्मिन् सन्तीति यवमान् ग्रामः। सो[4]ऽस्यास्तीत्यर्थभेदान्न तेनात्र तन्निरास इति तस्येदं व्यावर्त्य नोक्तमित्यर्थः। तर्हि तस्य किं प्रयोजनम्, अत आह — **पूर्वमेवेति**। ठन्नन्तादिनिरासस्तत्प्रयोजनमित्यर्थः। स्वार्थसन्नन्तात् सनङ्गीकारादाह — **सरूप इति**। शब्दस्वरूपेण सरूपत्वं नात्र विवक्षितम्, किं त्वर्थत इत्याह — **सारूप्यं चेति**। शब्दतः सारूप्यस्य स्वार्थेच्छासनोर्व्यभिचाराभावेन विशेषणत्वायोगादर्थतः समानत्वं सारूप्यं विवक्षितमिति भावः। **तेन** सारूप्येण। **तच्च** समानत्वम्। वक्ष्यमाणाभिप्रायेणोत्तरमित्याह — **अभिधानत इति**। अनिष्टविषयेऽनभिधानान्न भवतीत्यर्थः। भूमशब्देन यादृशबहुत्वे यवमानित्यादिप्रयोगस्तादृशं विवक्षितम्, न बहुत्वमात्रमित्याह — **यद्यपीति**। इतिशब्दो हेत्वाद्यर्थकः प्रसिद्धः, न विवक्षितार्थः, अत आह— **इतिशब्दस्येति**। निपातानामनेकार्थत्वादित्यर्थः। यवसामान्याभावस्यापि कुत्रचित्संभवादाह — **मत्वर्थीयेति**। 'यावतीभिः' इत्यस्य परिगणनानुपयोगे तात्पर्यमाह — **त्रियमाणेऽपीति**। ननु 'यवमतीभिः' इत्यत्र कथं सत्तामात्रे मतुप्, अत आह — **संस्कारस्येति**। रूपादौ लुगभावार्थमाह — **शुक्लादय एवेति**। जातिगुणयोर्वैधर्म्यमाह — **जातिरिति**। शब्देनाभिधानमभिनयति — **गौरिति**। भेदेनाभिधानं निराह — **न त्विति**। गुणस्य तु द्रव्यव्यभिचारः। अत एव भेदप्रतीतिर्भेदेनाभिधानं चास्तीत्याह — **गुणाः पुनरिति**। भेदोक्तेः प्रयोजनमाह — **ततश्चेति**। तथा चेत्यस्य भेदोपोद्बलकत्वमाह — **यस्मादिति**। **वरणेति**। यथा [5]'जनपदे लुप्' [6]'वरणादिभ्यश्च' [7]'लुपि युक्तवद्व्यक्तिवचने' इत्यादि[ना] रूढिरेवान्वाख्यायते, तद्वदत्र मतुब्लुका रूढिर्नोच्यते, किं तु यौगिकत्वमेवेत्यत्र द्रव्यलिङ्गसंख्यानुपादानोपादाने एव हेतू इत्यर्थः॥

[४, १५३–१६२]

(नारायणीयम्) 'चित्रगुः' इत्यादौ निमित्तसद्भावात् तद्धितप्राप्तिं दर्शयति — **सतावितिशिष्टेति**। बहुव्रीहिणा तद्धितार्थस्योक्तत्वं कथमित्यत्राह — **षष्ठ्यर्थं एवेति**। यस्मिंस्तद्धितोत्पत्तिस्तस्मिन्नेवेत्यर्थः। **समुदायावयवेति**। अत एवोक्तं भाष्ये 'किमवयवात्' इत्यादि। अवयवपदयोः सापेक्षत्वमुपपादयति — **चित्रा इति गुणपदमिति**। विशेषणस्य विशेष्योपकारकत्वाद् गुणत्वम्। **द्रव्यद्वारेणैवेति**। न स्वतः, न हि निराधारो गुणः संभवति। तस्मादेवमादौ विग्रहवाक्ये वृत्तिर्न

---

[1] का. वा. २.२.२४–१७. अर्थानुवादोऽयम्। नास्ति — अ.
[2] पा. सू. १.२.४८.
[3] पा. सू. ४.१.८३.
[4] 'सोऽस्य' इत्यादि 'नोक्तमित्यर्थः' इत्यन्तं
[5] पा. सू. ४.२.८१.
[6] पा. सू. ४.२.८१.
[7] पा. सू. १.२.५२.

भवति। कथं तर्हि विग्रहवाक्यं प्रदर्शनीयमित्यत्राह — **तस्मादिति**। ननु 'अप्रातिपदिकत्वात्' इत्यसिद्धो हेतुरित्याशङ्क्याह — **यदा सुबन्तादिति**। अत्र हेतुमाह — **समर्थादिति**। उपलक्षणं चैतदित्याह — **सुबन्तत्वमपीति**। न केवलमप्रातिपदिकत्वम्, किं तर्हि, असुबन्तत्वम[पीत्यर्थः।] ननु सुपोऽन्ते श्रवणात् कथं सुबन्तत्वाभाव इत्यत्राह — **समुदायादिति**। [1]'प्रत्ययग्रहणे' इति वचनाद्यस्मात् सुब्विधिस्तदाद्येव सुबन्तमित्यर्थः। ननु प्रातिपदिकसमुदायस्यार्थवत्त्वादेकस्यां प्रातिपदिकसंज्ञायां तस्मात् सुपो [विधा]नात् सुबन्तत्वं प्रातिपदिकत्वं च समुदायस्योपपद्यत एवेत्यत्राह — **प्रातिपदिकसमुदायस्येति**। प्रातिपदिकसमुदायस्य विशेषणविशेष्यभावादर्थान्तरमुपजायत इति, तत्राह — **विशेषणेति**। द्वयोः पदयोरेव लोके प्रयुक्तौ विशेषणविशेष्यभावो वाक्यार्थपर्यालोचनया भवति, न तु प्रातिपदिकयोरित्यर्थः। नन्वाकृतौ कार्यप्रवृत्तिकथनेन प्रकृते किमायातमित्यत्राह — **जातौ कार्यमिति**। **यथा ब्राह्मण इति**। अहननं ब्राह्मणसामान्ये प्रवर्तते, न तु कस्मिंश्चिद्विशेष इत्यर्थः। फलितमाह — **ततश्चेति**। 'अन्यस्य चान्यस्य च' इत्यस्य सर्वव्यक्तिविषयः समासः प्रवर्तते जातिपदार्थपक्षाश्रयणादित्यर्थं वक्तुमाह — **अनेनेति**। समर्थनमेवोपपादयति — **यदि हीति**। ननु जातौ प्रत्येकं परिसमाप्तावपि प्रकृते किमायातमित्यत्राह — **आश्रयगतेति**। ननु [2]'ङ्याप्प्रातिपदिकात्' इति समासनिर्देशे संख्याविशेषप्रतीत्यभावात् कथं तद्विवक्षा स्यादित्यत आह — **ङ्याप्प्रातिपदिकादित्यत्रेति**। **एकवचनान्तानामिति**। न तु द्विवचनबहुवचनान्तानाम्, प्रथमातिक्रमे कारणाभावाद् व्याख्यानाद्वा। **गुणे संख्याया इति**। प्रत्ययस्य विधीयमानत्वात् प्राधान्यात् प्रकृतेस्तच्छेषत्वाद् गुणत्वात्। अनेन 'यावत्येतत्' इत्यादि भाष्यं व्याख्यातम्। ननु [3]'उक्तार्थानामप्रयोगः' इति न्यायात् कथमुक्तेऽर्थे तद्धितः स्यादित्यत्राह — **द्विगोर्लुग्विधानादिति**। [4]'द्विगोर्लुगनपत्ये' इति द्विगोः परस्य तद्धितस्य लुग्विधानं ज्ञापकम् — उत्पद्यते द्विगोस्तद्धितः, इति। **स्यादर्थस्येति**। न तद्धितार्थेऽभिधेये द्विगुर्भवतीति विज्ञायते। कथं तर्हि, तद्धितार्थे द्विगुः, तद्धितो यथा स्यादिति। यथा दारार्थं घटामहे — दाराः स्युरिति घटामह इति। 'द्विगुं मन्यते' इत्यनेन नासौ सिद्धान्त इति दर्शयति। सामान्यविशेषभावेन द्विगोरपवादत्वमुपपादयति — **अन्यपदार्थेति**। **ननु चानवकाशेनेति**। तथा चाहुः — [5]'परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसंनिपाते तेषां मिथः [6]'प्रसङ्गे परपरबलीयस्त्वम्, इति। **यत्रैकनिमित्तेति**। यदि षष्ठ्यर्थमात्रे द्विगुः स्यात् तर्हि बाध्यबाधकभावः सुवचः स्यात्। प्रकृते तु नैवमित्याह — **इह त्विति**। **यदि वचनमन्तरेणेति**। बहुव्रीहिरप्यनन्तरादिषु नेष्यते, तदर्थं तत्राप्यस्तिग्रहणं कर्तव्यं स्यादित्यर्थः। कथं पुनरन्तरेण वचनं बहुव्रीहावतिप्रसङ्गनिवृत्तिर्लभ्यत इत्यत्राह — **अनभिधानादेवेति**। कथं पुनः सूत्रे 'अस्ति' इति विशेषणत्वें [नोपात्तस्य प्रत्ययविध्यर्थत्वमित्यत आह —] **अस्तीति लुप्तपञ्चमीक इति**। **कर्तृविशिष्टेति**। अव्ययत्वेऽपि शब्दशक्तिस्वाभाव्याल्लडर्थे वर्तत इत्यर्थः। प्रयोगान्तरप्रदर्शनेनाव्ययत्वं [समर्थयति — **तथा चेति**।]....बहुल... [**कर्तृसामान्येने**]**ति**। यत्किंचिद्वस्तु सर्वस्य सर्वदास्तीति व्यभिचाराभावाद्विशेषणं नोपयुज्यत इत्यर्थः। 'तस्मात्' इति पूर्वोक्तस्यार्थस्य हेतुत्वेन परामर्श इति तदु [पपादयति — **उपाधीति**। द्विगुप्रतिषे] धवचनेन प्र[कृते] कथमिष्टसिद्धिरित्यत्राह — **द्विगौ प्रतिषिद्ध इति**। ननु 'पञ्चगुः' इत्यादौ द्विगुबहुव्रीह्योः स्वरे

---

[1] परिभाषा २३.
[2] पा. सू. ४.१.१.
[3] महाभाष्यम् १.१.४४.
[4] पा. सू. ४.१.८८.
[5] प्रत्ययोत्तरपदयोश्चेति सूत्रे प्रदीपे इदमुक्तम्।
[6] 'प्रसङ्गे परबलीयस्त्वम्' इति तत्र दृश्यते।

रूपे च विशेषाभावात् किं द्विगुप्रतिषेधेन। द्विगावपि [1]'इगन्तकाल' [इत्यादिना पूर्वपदप्रकृति-स्वर एवेत्यत आह — **पञ्चखट्व इति**। ननु यवसंब]न्धादन्यो यवमत्संबन्ध इति कथं यव-शब्दादुत्पन्नेन प्रत्ययेन यवमत्संबन्धाभिधानमुपपद्यत इत्याशङ्क्याह — **यस्य यवमानिति**। यव-मत्स्वामिनो यवस्वामित्वं कैमु[तिकन्यायसिद्धम्। तत्र बीजमाह — **एकजा]तीये हीति**। **हस्तित्वजा।तिसंबन्धादिति**। हस्तिशब्दस्य जातिः प्रवृत्तिनिमित्तम्, अत एव [2]'हस्ताज्जातौ' इत्युक्तमिति भावः। **तद्देशासंनिहितेति**। स्वस्वामिसंबन्धस्य देशान्तरस्थैरपि [संभवात्। **पूर्वोक्तेति**। 'अर्थान्तरे] वृत्तात्' इति न्यायस्येत्यर्थः। एतदेव दर्शयति — **गावो विद्यन्त इति**। **द्विविधो हीति**। यस्य गाव एव स्वत्वेन विद्यन्ते तस्य साक्षाद् गोभिः संबन्धः। यस्य तु गोयुक्त-ग्रामस्वामित्वं तस्य ग्रा[मद्वारेति भावः। **अन्त]र्भावयितुं शक्त इति**। शब्दशक्तिस्वाभाव्यमत्र हेतुरित्यर्थः। ननु गोमानित्यनेन गोसंबन्ध एव प्रतीयते, न तु गोमत्संबन्ध इति कथं तदन्तर्भावने सामर्थ्यं स्यादित्यत आह — **[तत्रेति। न्यायस्येति**। पूर्वो]क्तस्य न्यायस्येत्यर्थः। **मत्वन्तादिति**। 'गोमन्तोऽस्य सन्ति' इत्यादौ। ननु मतुप्प्रत्ययस्य गोभिरभिसंबन्धे तद्वता [3]वा समानत्वादन्यथा-जातीयत्वमयुक्तमित्यत आह — **प्रत्ययोऽवगम इति**। प्रतीतेरन्यथा[त्वमित्यर्थः। 'अथ मत्वन्ता-न्मतुपा भवित]व्यमित्युपक्रम्य 'तस्मान्मत्वर्थीयान्मतुबादिप्रतिषेधो वक्तव्यः' इति सामान्येनोपसंहृत-वतः कोऽभिसंधिरित्यत्राह — **न केवलमिति**। वृत्तिशब्देन वर्तते प्रत्ययोऽस्मिन् वाचकत्वेनेति प्र[त्ययार्थ उच्यत] इत्याशयेनाह — **समान इति**। तदुपपादयति — **षष्ठ्यर्थ इति**। एतदेवो-दाहरणप्रदर्शनेन विशदयति — **तेनेति**। सरूपः प्रत्ययो न भवतीति विशेषणकृत्यं दर्शयति — **तथा भिन्नेति। यवमन्त इति**। यवा येषु सन्तीति मतुप्। तदन्तात् [षष्ठ्यर्थेऽपि मतुप् नास्ती-त्यर्थः। **अथेति**।] हस्तोऽस्यास्तीति हस्ती, हस्तिनोऽस्य सन्तीति हस्तिमानिति समान[वृत्ति]त्वाद-सरूपः प्रत्ययो मतुप् [न] स्यादेवेति चोद्यम्। भिन्नप्रवृत्तिनिमित्तत्वादसमानार्थत्वाद्युक्तः प्रत्यय इत्युत्तरम् — **हस्तिशब्दस्य जा[तीति। अत एवेति**। 'अहस्ती' इत्यनेन जातिपर्युदास] प्रतीतेः। अन्यथा लाघवाद् बहुव्रीहिरेव स्यात्, न तु मत्वर्थीयनञ्समासाविति। व्यतिरेकप्रदर्शनायाह — **यत्र त्विति**। एवमन्यत्राप्ययं न्यायो द्रष्टव्य इति प्रसङ्गादाह — [4]**यत्रापि मत्वर्थीयेनेति। दण्ड-पुच्छेति**। दण्डसंयुक्तपुरुषनिषेधप्रतीतिर्मत्वर्थीयेन नञ्समासे स्यात्। अन्यथा दण्डसंबन्धाभाव एव प्रतीयेत। एवमवाग्गमीति समीचीनबहुभाषणयुक्तपुरुषनिषेध[प्रतीतिः। श्लोकार्थमुदाह]-रणप्रदर्शनेन विशदयति — **शौषिकादिति**। **श्लोकानुरोधादिति**। श्लोके तस्य प्रक्षेपासंभवा-दित्यर्थः। तर्हि कथं तदर्थलाभ इत्यत्राह — **पूर्वमेवेति**। पूर्वं विस्तरेणोक्त[त्वादित्यर्थः। 'अ]-व्यभिचाराद्' इत्यनेन मुख्यार्थसंभवं दर्शयति — **तेन समानत्वमिति**। समरूपाणां समानत्व-योगात्। **जुगुप्सिषत इति**। [5]'गुप्तिज्किद्भ्यः सन्' इत्यादिना स्वार्थे यः सन् तदन्तादिच्छा[र्थे सन्। 'एवं भवितुम]र्हति' इति चोदकोक्तस्यानुज्ञानमनुपपन्नमित्यत आह — **अभिधानत इति**। ननु यस्य त्रयो यवाः स यवमानिति नोच्यत इति सत्यपि भूमादिग्रहणेऽतिप्रसङ्गनिवृत्तिर्न स्यादि-[त्याशङ्क्य] 'उक्तं वा' इति सिद्धान्तयिष्यत [6]इत्याह — **यद्यपीति**। ननु हेत्वादाविति शब्दः प्रसिद्ध इति कथं तस्य विवक्षार्थत्वमुच्यत इत्यत्राह — **इतिशब्दस्येति**। निपातानामनेकार्थ-त्वात्। तथा चाहुः — .... पतीति। तत्राह — **मत्वर्थीयान्तेति**। यस्य यवमच्छब्देनाभि-

---

[1] पा. सू. ६.२.२९.
[2] पा. सू. ५.२.१३३.
[3] अत्राभिसंबन्ध इत्यनुषङ्गः।
[4] यत्र तु मत्वर्थीयेनेति — घ.
[5] पा. सू. ३.१.५.
[6] इत्यत्राह — क.

धानं ततोऽन्यस्यापि कस्यचिद्यवसंबन्धोऽस्तीत्यनभिधानमेव तत्र प्रत्ययाभावे शरणमिति भाष्यार्थः। एवमुत्तरत्रापि द्र[ष्टव्यम्। अर्थान्तरे उ]पपत्त्यभावा[दा]ह — **संखादको दशन इति**। एवं 'न हि कस्यचिद्रूपं नास्ति' इत्यत्रापि द्रष्टव्यमित्याह — **रूपमात्रेति**। '[गोमान्] यवमान्' इत्यत्र 'यावतीभिः खल्वपि' इत्यादिभाष्यस्य प्रकृतेऽनुप[योगादाह — **क्रियमाणेऽपीति**। एवं चाभिधाना] द्यभावे [व्यर्थं भूमादिग्र]हणमिति स्थितम्। गुणवचनशब्देन गुणमुक्तवन्त इति व्युत्पत्त्या ये गुणमुक्त्वा द्रव्ये वर्तन्ते, त एव गृह्यन्ते, न तु गुणमात्रवचना इत्याह — **शुक्लादय एवेति**। 'अव्यतिरेकात्' इत्यसिद्धो हेतुः, गुणगुणिनोर्भेदस्य [नि]रू[ढत्वा] दित्यत आह — **गुणगुणिनोरिति**। **युतसिद्धयभावादिति**। पृथक्त्वाभावादित्यर्थः। गुणानां जातिसाम्यमुक्तं व्यतिरेकप्रदर्शनेन विघटयति — **जातिरुत्पत्तीति**। [1]**तदात्मेवेति**। वस्तुतो जातितद्वतोर्भेदादिव-शब्दः। अत एवाह — **प्रतीयत इति**। प्रतीत्यनुसारेण चाभिधानमित्याह — **शब्देन चेति**। **गुणाः पुनरिति**। आमद्रव्यस्य घटादेरग्निसंयोगादिना पूर्वगुणप्रहाणेन गुणान्तरप्राप्तिदर्शनात्। फलितमर्थमाह — **ततश्चेति**। 'तथा च' इत्यनेनोक्तस्यार्थस्य वक्ष्यमाणे हेतुत्वमुक्तमित्याह — **यस्माद् द्रव्य इति**। **वरणपञ्चालादिवदिति**। यद्यपि वरणानामदूरभवं नगरं वरणाः, पञ्चा-लानां निवासो जनपदः पञ्चाला इति व्युत्पत्तिः, तथापि रूढिरेव प्रवृत्तिनिमित्तम्। अत एव [2]'तदशिष्यं संज्ञाप्रमाणत्वात्' [3]'लुब्योगाप्रख्यानात्' इत्यादिना लिङ्गसंख्यातिदेशशास्त्रं लुप्शास्त्रं च प्रत्याख्यातम्। **नियतेति**। यथा 'पञ्चालाः, वरणाः' इत्यादौ। **सर्वत्र वेति**। यथा तटस्तटी तटमिति ॥

रसादिभ्यश्च ५.२.९५.

[४, १६२]

(उद्द्योतनम्) 'दृश्यन्ते' इत्यस्य तात्पर्यमाह — **प्रयोगेति** ॥

[४, १६२]

(नारायणीयम्) ननु लक्षणानुगमाभावात् 'रूपिणी' इत्यादीनामसाधुत्वमेव स्यादिति, नेत्याह — **प्रयोगमूलत्वादिति** ॥

प्राणिस्थादातो लजन्यतरस्याम् ५.२.९६.

[४, १६३]

(उद्द्योतनम्) मृतशरीरे प्राणाभावात् 'चूडालः' इति प्रयोगो न स्यात्, अत आह — **लोकेति**। शरीरपर्यायः प्राणिशब्दो लोके प्रयुज्यत इत्यर्थः ॥

---

[1] प्रदीपे 'तदात्मैव' इत्यत्र 'तदात्मेव' इति पाठोऽभिमतः।

[2] पा. सू. १.२.५३.

[3] पा. सू. १.२.५४.

[४, १६३]

(**नारायणीयम्**) ननु मृतावस्थायां प्राणित्वाभावाच्चूडालादिशब्दप्रयोगो न स्यात्। दृश्यते च प्रयोग इत्याशङ्क्याह — **लोकप्रसिद्धेति** ॥

सिध्मादिभ्यश्च ५.२.९७.

[४, १६३–१६५]

(**विवरणम्**) अप्रसिद्धिभयादाह — **अथ वेति** ॥

[४, १६३–१६५]

(**उद्द्योतनम्**) सूत्रे वाग्रहणाभावादाह — **प्राणिस्थादिति**। [1]विकल्पार्थत्वेऽपि ज्ञापकात् समुच्चये पर्यवसानमित्याह — **अथवेति**। लोमादिसूत्रेऽपीदमेवान्यतरस्यांग्रहणमनुवर्तत इत्यभ्युपेत्य 'पिच्छादिभ्यः' इति वार्तिकम्। तदुपपादयति — **तुन्दादिभ्य इति**। **सिध्मादीति**। सिध्मादिषु पिच्छादिषु चैकस्यैवान्यतरस्यामित्यस्यानुवर्तनात् तस्य समुच्चयार्थत्वं ज्ञायत इत्यर्थः। **इष्येते इति**। तुन्दादिसूत्रे 'अतः' इति नानुवर्तते। किं त्विनिठनावेव। अतः प्रत्ययचतुष्टयसिद्धिः। तुन्दादीनि वा पिच्छादिषु पठ्यन्ते, पिच्छादीनि वा तुन्दादिष्विति [2]व्याख्याविकल्परूपेण भाष्ये उक्तम्। तत्र 'नैतदस्ति' इत्युभयत्र ज्ञापकत्वमुक्तम्। तदुपपादयति — **तत्र यदीति**। 'यानि' इत्यनेनाकारान्तानामुभयत्र पाठो ज्ञापक इत्युक्तम्। तदुपपादयति — **कानिचिदिति**। **यथोक्तार्थस्येति**। सिध्मादिपिच्छादिष्वन्यतरस्यांग्रहणं मतुप्समुच्चयार्थम्, [3]न विकल्पार्थमित्यर्थस्येत्यर्थः। [4]वस्य विकल्पार्थं [5]वाग्रहणं पूर्वस्य समुच्चायार्थत्वस्य ज्ञापकम्। पूर्वस्य विकल्पार्थत्वे तदनुवृत्त्यैव परस्य विकल्पसिद्धेः पुनरन्यतरस्यामिति व्यर्थमित्येवं [6]'वस्य' इति वार्तिकं व्याचष्टे — **केशाद्व इत्येवेति**। [7]'द्युद्रुभ्याम्' इत्यनेनेदं ज्ञापकं दूषितमित्याह — **सतीति** ॥

[४, १६३–१६५]

(**नारायणीयम्**) ननु सिध्मादिभ्यः प्रतिपदविहितेन लचेनिठनोर्बाधनात् कथं तत्प्राप्तिश्चोद्यत इत्यत्राह — **प्राणिस्थादिति**। नन्वन्यतरस्यांग्रहणस्य विकल्पार्थत्वे 'लजन्यतरस्यामिति समुच्चयः' इति वार्तिकं कथमुपपद्यत इत्यत आह — **इति सामर्थ्यादिति**। पृथग्योगकरणस्योक्तेऽर्थे ज्ञापकत्वमुपपादयति — **तुन्दादिभ्य इति**। **चत्वार इति**। चकारेणेनिठनौ समुच्चीयेते। अन्यतर-

---

[1] विकल्पार्थत्वाज्ज्ञापकात् — अ.
[2] व्याख्यानविकल्परूपेण — अ.
[3] न विकल्पार्थमित्यर्थः — अ, ऋ, लृ.
[4] तस्य — अ, ऋ, लृ.
[5] वार्थकान्यतरस्यांग्रहणमित्यर्थः। केशाद्वोऽन्यतरस्यामिति विवक्षितम्।
[6] तस्येति — अ, ऋ, लृ.
[7] पा. सू. ५.२.१०८.

स्यांग्रहणानुवृत्त्या मतुबभ्यनुज्ञायते। **तुन्दादिष्वेवेति**। फलभेदाभावादिलचो विकल्पितत्वादिनिठनोः सिद्धत्वात् तयोरपि विकल्पितत्वान्मतुपश्च[1]। **पिच्छादिष्वेव वा तुन्दादय इति**। अनेन भाष्ये दर्शितं व्याख्यानद्वयं संगृहीतम्। भाष्ये पिच्छादिग्रहणं सिध्मादिग्रहणस्याप्युपलक्षणम्, अन्यतरस्यांग्रहणानुवृत्तेरुभयत्र समानत्वादित्याह — **सिध्मादिपिच्छादिभ्य इति**। पृथग्योगकरणस्य प्रयोजनान्तरसद्भावात् ज्ञापकत्वानुपपत्तिमुपपादयति — **तुन्दादिभ्योऽनकारान्तेभ्य इति**। यथा [2]शालयोऽस्य सन्ति — 'शालिलः, शाली, शालिकः, शालिमान्' इति। **तत्र भेदेनेति**। अकारान्तानां सर्वेषामेकस्मिन् गण एव पाठेनेष्टस्य सिद्धत्वात् पृथक्पाठोऽन्यतरस्यांग्रहणस्य मतुप्समुच्चयार्थत्वं ज्ञापयतीत्यर्थः। **ठन्निनिमतुप इति**। तत्र चातूरूप्यमिष्यते — 'केशवः, केशिकः, केशी, केशवान्' इति। तच्च प्रकृतान्यतरस्यांग्रहणस्य विकल्पार्थत्वे तेनैव सिद्धम्। तत्र पुनरन्यतरस्यांग्रहणमुक्तेऽर्थे ज्ञापकमित्यर्थः॥

लोमादिपामादिपिच्छादिभ्यः शनेलचः ५.२.१००.

[४, १६५]

(उद्द्योतनम्) नकारस्योत्तरत्राननुवर्तनात् कथं तस्य प्रकरणम्, अत आह — **प्रस्ताव इति**। 'शाकी, पलाली' इति जातिलक्षणो ङीष्, अजातित्वेऽपि भाष्यकारवचनाद्वा। **विषु नानेति**। [3]'ऋत्विक्' इत्यादिनाञ्चेः सुप्युपपदे क्विन्। 'विष्वग् गतानि' इति भाष्यमर्थकथनपरम्, विग्रहवाक्यं तु स्वोक्तमित्याह — **अर्थप्रदर्शनेति**। तदेवाह — **यानीति**। **विष्वग्गतं गमनमिति**। भावे निष्ठा, मत्वर्थीयाकारस्तदन्तादित्यर्थः[4]। विषुणशब्दस्योक्तविग्रहानुरोधिनमर्थमाह — **तत्रेति**। **काल इति**। तुलामेषकालः, मकरकर्कटकालो वा। तत्र [5]योगसद्भावमाह — **तस्य हीति**। तत्र हेतुः — **तदाश्रयत्वादिति**। मकराद्वृद्धिः, कर्कटान्न्यूनता। वाय्वादौ प्रवृत्तिनिमित्तमाह — **तत्र वृत्तिविषय इति**॥

[४,१६५]

(नारायणीयम्) प्रकरणं प्रस्ताव इति। न तु प्रकृतानुवृत्तम्। **महच्छाकमिति**। स्त्रीलिङ्गस्यार्थान्तरे दर्शनात्, यथा महदरण्यमरण्यानी। **विषुवदाख्य इति**। यत्र सूर्यः समरेखायां वर्तते स विषुवानिति ज्योतिश्शास्त्रे प्रसिद्धिः। तत्र हि रात्रिदिवसौ समौ भवतः। तदाह — **तस्य हीति**। **तदाश्रयत्वादिति**। कंचिद्विषुवन्तमाश्रित्य दिवसा न्यूनाः, कंचिदाश्रित्याधिकाः। कथं पुनर्वाय्वादेर्विषुणशब्देनाभिधानं स्यादित्यत आह — **तत्र वृत्तिविषय इति**॥

---

[1] सिद्धत्वादित्यनुषङ्गः।

[2] अनेन तुन्दादिषु शालिशब्दः पठित इति ज्ञायते। दृश्यमानगणपाठे तु शालिशब्दो न दृश्यते।

[3] पा. सू. ३.२.५९.

[4] गतमित्यत्र भावक्तान्तत्वात् तस्माद्विष्वग्गतशब्दात् मत्वर्थीयाकारे 'विष्वग्गतानि' इति भाष्योक्तस्य शब्दस्यार्थविवरणम्। अत्र विष्वक्शब्दो नानाप्रकारे रूढो बोध्यः।

[5] अवयवार्थसद्भावमित्यर्थः।

प्रज्ञाश्रद्धार्चाभ्यो णः ५.२.१०१.

[४, १६६]

(उद्द्योतनम्) 'वृत्तेश्च' इति वार्तिकं दृष्ट्वा वृत्तिशब्दः सूत्रे प्रक्षिप्त इत्याहुः। वृत्तिशब्दार्थमाह — [1]**विच्छेदेति**। प्रज्ञशब्दात् [2]'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण् विधीयते। अत्र प्रज्ञाशब्दात् मत्वर्थे णः। तत्र प्रत्ययभेदेन प्रयोगविशेषं दर्शयति — **इहेति**। प्रकर्षेण जानातीति प्रज्ञः, [3]ततः स्वार्थेऽणि प्राज्ञः, तत्र ज्ञानकर्मणि व्याकरणे षष्ठ्या भाव्यम्। [4]'कर्तृकर्मणोः कृति' इति कृद्ग्रहणात् षष्ठ्यभावे द्वितीया। तत्र दृष्टान्तः — **यथेति**। **संबन्धाभाव इति**। अतो न द्वितीयेत्यर्थः। केचिदत्रापि द्वितीयामिच्छन्तीत्याह — **केचिदिति**। द्वितीयानङ्गीकारे कात्र विभक्तिः, अत आह — **विषयत्वेति**॥

[४, १६६]

(नारायणीयम्) विच्छेदप्रतिविधानादिष्विति। विच्छेदे सति प्रतिविधानं समाधानमित्यर्थः। आदिशब्देन सूत्रविवरणादि संगृह्यते। सूत्रे प्रज्ञाग्रहणमनर्थकम्, प्रज्ञशब्दात् [5]'प्रज्ञादिभ्यश्च' इति स्वार्थेऽणि 'प्राज्ञः' इति रूपस्य सिद्धत्वात्। अर्थोऽप्यभिन्नः, प्रजानातीति प्रज्ञः, यस्य हि प्रज्ञास्ति स प्रजानातीत्याशङ्क्य णविधानस्य प्रयोजनमाह — **इह प्रज्ञशब्दादिति**। **केचित्त्विति**। अस्मिन् पक्षे स्त्रियां विशेषः। अणि सति ङीप् भवति 'प्राज्ञी' इति। अस्मिंस्तु णे टाप् भवति 'प्राज्ञा' इति। तर्हि 'प्राज्ञो व्याकरणम्' इति सर्वदा व्याकरणादेर्द्वितीययैव भाव्यम्। तन्न, विवक्षावशाद्विभक्त्यन्तरस्यापि भावादित्याह — **विषयत्वविवक्षायां त्विति**॥

तपःसहस्राभ्यां विनीनी ५.२.१०२. अण् च ५.२.१०३.

[४, १६६–१६७]

(उद्द्योतनम्) तद्यत्रास्तीति। अनेन तमिस्रशब्दादयमण्विधिरित्युक्तं भवति। [6]'ज्योत्स्नातमिस्रा' इति सूत्रेण रप्रत्ययान्तत्वेन निपात्यमानतमिस्राशब्दाद्वायमण्विधिरित्याह — [7]**तमिस्रा**

---

[1] प्रदीपे 'वृत्तिशब्दो विच्छेदप्रतिविधानादिषु' इत्यत्र अविच्छेदेत्यकारप्रश्लेषो दृश्यते हरयाणामुद्रिते निर्णयसागरमुद्रिते च। उद्द्योते च 'अविच्छेदेति छेदः' इत्युक्तम्। चौखाम्बामुद्रिते त्वकारप्रश्लेषो न दृश्यते। तत्त्वबोधिन्यां 'विच्छिन्नस्य प्रतिविधानम्' इत्यर्थः क्रियते। पदमञ्जर्यां च वृत्तिर्विच्छेदप्रतिविधानत्वात्' इत्यस्ति। विच्छेदप्रतिविधानेत्येवान्नंभट्टाभिमतः पाठ इति ज्ञायते।

[2] पा. सू. ५.४.३८.

[3] 'ततः' इत्यादि 'प्राज्ञः' इत्यन्तं नास्ति — अ.

[4] पा. सू. २.३.६५.

[5] पा. सू. ५.४.३८.

[6] पा. सू. ५.२.११४.

[7] प्रदीपपुस्तकेषु 'तमिस्रा रात्रिर्वा यस्मिन्नस्ति तत् तामिस्रम्' इति पाठो दृश्यते। 'तमिस्रा वा रात्रिस्तत् तामिस्रम्' इत्यन्नंभट्टपाठ इति प्रतीयते।

वेति। यत्रास्तीत्यन्वयः। समानवृत्तौ मत्वर्थीयानङ्गीकारे [1]पूर्वः कल्पः। वृत्तिभेदपक्षे सरूपस्यानङ्गीकाराद्विरूपो भवतीति द्वितीय इति विवेकः। **कुण्डलार्ह इति**। अन्यत्र 'कुण्डली' इत्येव भवति॥

[४, १६६–१६७]

(नारायणीयम्) तमस्समूहस्तमिस्रमिति। तत्रावयवभूतानां तमसां विद्यमानत्वान्मत्वर्थीयो र उपधाया इकारश्च [2]'ज्योत्स्नातमिस्रा' इति निपात्यते। अत्र हि स्त्रीत्वमतन्त्रम्। **तमिस्रा रात्रिरिति**। तमो यस्यामस्तीति पूर्ववन्मत्वर्थीयः। **तत्तामिस्रमिति**। अपरपक्षादिकमुच्यते। **कुण्डलार्ह इति**। कुण्डलार्हस्य कुण्डलसत्तामारोप्य यथाकथंचिन्मत्वर्थीय उत्पाद्यः। एतच्च प्रयोगानुसरणार्थेतिकरणानुवृत्त्या लभ्यते। अत एवाह — **इत्याहुरिति**। संसक्तकुण्डले तु 'कुण्डली' इति भवति॥

ऊषसुषिमुष्कमधो रः ५.२.१०७.

[४, १६७–१६८]

(उद्द्योतनम्) द्रव्ये केवलमधुशब्दस्य प्रयोगः। रसे तु वृत्तिविषय एव प्रयोग इति 'आतश्च' इत्यस्याभिप्राय इत्याह — **रसमात्र इति**। रसवाचिग्रहणे हेतुः — **अभिधानेति**। 'मधुरः' इत्युक्ते रसविशिष्टस्यैव प्रतीतेरित्यर्थः। [3]**मतुबपीति**। 'मधुमान्' इत्युक्ते द्रव्यवत्त्वस्यैव प्रतीतेरित्यर्थः। **महदस्येति**। गर्दभस्येत्यर्थः। मुखशरदोऽपि वाचाटे प्रयुज्यत इत्याह — **स्वव्यापारेति**। **हस्तिशब्दवदिति**। तथा च न योगे आग्रहः कार्य इत्यर्थः। 'नगाच्च' इति न वक्तव्यमित्याह — **नगशब्द इति**। तदस्मिन्नस्तीत्यर्थेऽश्मादिभ्यो रप्रत्ययो विधीयते। तेनैव नगरमिति सिध्यतीत्यर्थः॥

[४, १६७–१६८]

(नारायणीयम्) कस्मिन् द्रव्ये मधुशब्दो वर्तत इत्यत्राह — **माक्षिक इति**। मक्षिकाभिः कृतमिति [4]'संज्ञायाम्' इत्यण्, एवं [5]'माध्वीकम्' इति। ननु शुक्लादिवन्माधुर्ये गुणे मधुशब्दवृत्तेरुपपन्नत्वात् किं यत्नेनेत्यत आह — **रसमात्र इति**। रसवाचिन एवात्र ग्रहणमिति नियमे हेतुमाह — **अभिधानेति**। **मतुबपीति**। तेन 'मधुमान्' इत्यनेन तस्यैवाभिधानं, यत्र मधु द्रव्यं

---

[1] पूर्वकल्पः — अ.

[2] पा. सू. ५.२.११४.

[3] 'मतुबपीति' इत्यादि 'प्रतीतेरित्यर्थः' इत्यन्तं नास्ति — अ.

[4] पा. सू. ४.३.११७.

[5] 'मार्तिकम्' इति 'घ' कोशे वर्तते। माध्वीकशब्दो मधुकपुष्पमद्ये वर्तत इति शब्दकल्पद्रुमे। मधुशब्दो मधुकपुष्पवाची, तेन कृत इत्यर्थेऽणि ङीपि स्वार्थे कप्रत्यय इति च। यद्वा मधुकशब्दादणि माधुकशब्दे पृषोदरादित्वादुकारस्येत्वम्। इदं चामरसुधायां स्पष्टम्।

विद्यते, यथा [1]'मधुमान्नो वनस्पतिः' इति। गर्दभे खरशब्दस्य व्युत्पत्तिं दर्शयति — **शब्दनिष्पत्तिकारणमिति**। तैक्ष्ण्ये त्वव्युत्पन्नः। वाचाले मुखरशब्दस्य व्युत्पत्तिमाह — **स्वव्यापारेति**। **मुखं** वा[गिन्द्रियम्, तस्य हि सर्वस्मिन् वक्तव्ये मुखमस्ति, वक्तव्याव]क्तव्यविवेकाभावात्। हस्तिनि कुञ्जरशब्दस्य व्युत्पत्तिं दर्शयति — **वृत्तिविषय इति**। यद्यप्यन्यत्रार्थान्तरे कुञ्जशब्दः प्रसिद्धः। यथोक्तम् — [2]'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इति, तथाप्येतद्वृत्तिविषये हस्तिहनू अभिधीयेते। [एतच्च] कथंचिदवयवार्थे संभवति तत्त्यागो न युक्त इत्याशयेनोक्तम्। रूढिरेव त्वत्र प्रवृत्तिनिमित्तमित्याह — [3]**हस्तिशब्दवत्त्विति**। **नगरशब्दोऽपीति**। अत एव जातिलक्षणो ङीष् भवति 'नगरी' इति। [4]**रस्येति**। तदस्मिन्नस्ति देश इत्यस्मिन्नर्थे॥

केशाद्वोऽन्यतरस्याम् ५.२.१०९.

[४, १६८–१६९]

(उद्द्योतनम्) 'वश्च मतुप् च' इत्यस्य तात्पर्यमाह — **चशब्द इति**। **सर्वसंबन्धादिति**। ईवनिप्वप्रत्ययैः संबन्धादित्यर्थः। ननु [5]'मत्वर्थे बहुव्रीहिः' इति बहुव्रीहिणात्र भाव्यम्, कथं मत्वर्थे ईकारः, अत आह — **लाघवादिति**। प्रत्ययं विनापि बहुव्रीहिणा मत्वर्थलाभाल्लाघवम्। **छान्दसत्वादिति**। 'सुमङ्गलीः' इति प्रयोगस्येकारं [6]विनासंभवादित्यर्थः। [7]'केवलमामक' इत्यादिना ङीपि सुमङ्गली स्यात्, न तु विसर्गान्तित्वमिति भावः। **मतुपीति**। 'अन्यतरस्याम्' इति वनिपो विकल्पितत्वात्। [8]'मघवा' इति सूत्रं प्रत्याचष्टे — **मघवेति**। निपातनान्नकारान्तस्य, मघमस्यास्तीति मतुपा [9]मघवच्छब्दस्य च सिद्धत्वादित्यर्थः। प्रकृत्यर्थमाह — **उद्गतमिति**॥

[४, १६८–१६९]

(नारायणीयम्) मणिरस्यास्तीति व्युत्पत्तिमात्रम्, नागविशेषे तु रूढ्या वर्तत इत्याह — **नागविशेषस्येति**। एवं हिरण्यव इति, तदाह — **निधिविशेषस्येति**। सुष्ठु मङ्गलं सुमङ्गलम्, [10]'स्वती पूजायाम्' इति प्रादिसमासः। [11]तदस्या अस्तीति मत्वर्थीय ईकारः। अत्र [12]'कर्म-

---

[1] तै. सं. ४.२.९.
[2] अमरकोशे शैलवर्गे श्लोक : ८.
[3] प्रदीपे 'हस्तिशब्दवज्जातिशब्दोऽयम्' इत्यत्र 'हस्तिशब्दवत्तु जातिशब्दोऽयम्' इति पाठोऽभिमतः।
[4] प्रदीपे 'वुञ्छण्कठजित्यादिना नगरशब्दस्य सिद्धत्वात्' इत्यत्र 'नगरशब्दस्य' इत्यस्य स्थाने 'रस्य' इति पाठोऽभिमत इति भाति।
[5] का. वा. २.२.२४ – १७.
[6] विना, असंभवादिति छेदः।
[7] पा. सू. ४.१.३०.
[8] पा. सू. ६.४.१२८.
[9] 'मघवच्छब्द' इत्यतः परं षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तो भागो नास्ति — अ, ऋ. 'मघवच्छब्दस्य' इत्यस्यानन्तरमितिशब्दोऽधिकः — ल.
[10] महाभाष्यम् २.२.१८.
[11] तद्यस्याः — ध.
[12] महाभाष्ये 'तत्र कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानमस्तु बहुव्रीहिणेति, बहिव्रीहिणा भविष्यति लघुत्वात्' इत्ययं न्यायः प्रतिपादितः।

धारयमत्वर्थीयाभ्यां बहुव्रीहिर्लघुत्वात् प्रक्रमस्य' इति न्यायः कथं नाश्रित इत्यत आह — **लाघवादिति**। **मघमिति**। **मघं** धनम्। ननु भाषायामपि 'मघवानौ, मघवानः, मघवन्तौ मघवन्तः' इत्यादिरूपसिद्ध्यर्थं [1]'मघवा बहुलम्' इति वक्तव्यमेवेति चेन्नेत्याह — **श्वन्नुक्षन्निति**। कथं पुनरुच्छब्दादसत्त्वभूतार्थाभिधायिनो मत्वर्थीय उपपद्यत इत्यत्राह — **उद्गतमिति**॥

रजःकृष्यासुतिपरिषदो वलच् ५.२.११२.

[४, १६९]

(**उद्द्योतनम्**) [2]'वले' इत्यनेन दीर्घप्रसङ्गं निराह — **अण्ग्रहणेति**। [3]'वले' इति सूत्र इत्यर्थः। तत्र 'पुत्रवलः' इत्यत्र दीर्घः कथं नास्ति, अत आह — **दीर्घत्वमिति**॥

[४, १६९]

(**नारायणीयम्**) **अण्ग्रहणानुवर्तनादिति**। पूर्वेण णकारेण तत्र ग्रहणमिति भावः। 'पुत्रावलः, पुत्रवलः' इति दीर्घश्चादीर्घश्च दृश्यते, तत्कथमुपपद्यत इत्यत आह — [4]**वल इति दीर्घत्वमिति**॥

स्वामिन्नैश्वर्ये ५.२.१२६.

[४, १७३]

(**उद्द्योतनम्**) **धनवाचीति**। स्वं धनमस्यास्तीत्यत्रार्थे स्वामीति नाङ्गीक्रियत इत्यर्थः। नन्वस्यास्मिन्निति वा प्रत्ययार्थः, न त्वैश्वर्यमिति 'न प्रत्ययार्थः' इत्यप्रसक्तप्रतिषेधः, अत आह — **प्रत्ययार्थेति**। विषयसप्तमीपक्षेऽतिप्रसङ्गमाह — **ऐश्वर्य इति**। प्रकृत्यर्थत्वपक्षे नायं प्रसङ्ग इत्याह — **प्रकृत्यर्थस्त्विति**। स्वशब्दस्यैश्वर्यार्थत्वं लोके न प्रसिद्धम्, अत आह — **वृत्तिविषय इति**। **ऐश्वर्यं** नियन्तृत्वम्। तन्निर्धनस्यापि संभवतीति 'निर्धनोऽपि' इत्युक्तम्। तेन धनवाचिनः 'स्ववान्' इत्येव भवति॥

[४, १७३]

(**नारायणीयम्**) नन्वस्यास्मिन्निति प्रत्ययार्थनिर्देशादैश्वर्य इत्यस्य प्रत्ययार्थत्वायोगात् तन्निषेधो न युक्त इत्यत आह — **प्रत्ययार्थविषयत्वादिति**। [5]**एतद्वृत्तिविषय एवेति**। अन्यत्रात्मात्मीयज्ञातिधनवचनोऽपि स्वशब्दोऽस्यां वृत्तावैश्वर्यवाची स्वभावादित्यर्थः। **तेन धनवानिति**। एवं

---

[1] पा. सू. ६.४.१२८.
[2] पा. सू. ६.३.११८.
[3] पा. सू. ६.३.११८.
[4] प्रदीपे 'दीर्घत्वं वनगिर्योः संज्ञायाम्' इति दृश्यते। 'वल इति दीर्घत्वम्' इति पाठोऽभिमत इति प्रतीयते।
[5] प्रदीपे 'वृत्तिविषय एव' इत्यत्र 'एतद्वृत्तिविषय एव' इति पाठोऽभिमतः।

च 'धनस्वामी' इति प्रयोगोपपत्तिः। धनयोगादैश्वर्यमिति नियमोऽपि नास्ति, वागादिविषयेऽपि दर्शनात् — वाचस्पतिः, वाचःस्वामीति। न ह्यत्र धनत्वप्रसिद्धिरस्ति॥

पुष्करादिभ्यो देशे ५.२.१३५.

[४, १७४–१७६]

(**विवरणम्**) **सत्तोपाधिकादिति**। अर्थशब्दादिति शेषः। धान्यमर्थयत इति व्युत्पत्तावौपसंख्यानिकेनिर्नोपपद्यत इत्यत उक्तम् — **धान्यमिति**। असंनिहितार्थ एव यथा स्यात्, [1]सत्तोपाधिकान्मा भूदिति नियमार्थं तर्हीदं वक्तव्यमित्यत आह — **यदीत्यादिना**॥

इति प्रदीपविवरणे पञ्चमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः॥

[४, १७४–१७६]

(**उद्द्योतनम्**) नन्वस्तीति प्रकृत्यर्थविशेषणे मत्वर्थीया उच्यन्ते। तत्रासंनिहितत्वं विरोधान्न प्रकृत्यर्थविशेषणम्, अत आह — **विरोधादिति**। अस्त्युपाधिकात्तु नेनिरित्याह — **तंक्रेति**। ननु धान्यमर्थयते [2]'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिनाप्येतत्सिद्धम्, अत आह — **धान्यमर्थ इति**। **तृतीयासमास इति**। अर्थिशब्देऽप्यर्थशब्दो वर्तत इति मन्यते। 'सुप्सुपा' इति समासोऽस्ति, अत आह — **सुप्सुपेति**। अभिधानस्य मानत्वादाह — [भाष्ये] **यदि पुनरित्यादिना**। उद्भूतं यत्क्रियासाधनं कर्त्रादि तदभिधायित्वादिति विग्रहः। **नन्विति**। अर्थनक्रियासमय एवेदं स्यात्, न तदभावसमय इत्यर्थः। णिनिवैषम्यमाह — **नैष इति**। क्रियां कुर्वद्धि कारकम्, [3]'कारकं नियतक्रियम्' इति वचनात्। **शेषसंबन्ध इति**। तदस्येति वचनात्। 'एवं च कृत्वा' इत्यनेन 'अर्थाच्चासंनिहिते' इत्येतद् दूष्यत इत्याह — **यद्यर्थाच्चेति**। तर्हि क्रियावाचिनो मतुबपि स्यात्, अत आह — **मतुबिति**। धनवाचिनोऽर्थशब्दान्मतुबेव, [न] इनिठनाविति आह — **धनवाचिनोऽपीति**। 'अर्थी' इतीहावानुच्यते। ईहा चेहासंनिहित एवेति 'अर्थाच्चासंनिहिते' इति न वक्तव्यम्। तदभावाच्च 'तदन्तात्' इत्यपि न वक्तव्यमिति स्थितम्॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने पञ्चमाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः॥

[४, १७४–१७६]

(**नारायणीयम्**) **विरोधादिति**। कालतो ह्यत्रासंनिधानम्, न देशतः। ततश्चार्थसत्ताया

---

[1] प्रदीपे 'अस्त्युपाधिकात्' इत्यत्र 'सत्तोपाधिकात्' इति पाठ आश्रितः।

[2] पा. सू. ३.२.७८.

[3] वाक्यपदीयम् ३.७.२५.

वर्तमानत्वाभावादस्तीति संबन्धो नोपपद्यत इत्यर्थः। अत एव सूत्रेणाप्राप्त इत्याह — **अप्राप्त एवेति**। **धान्यमर्थ इति**। धान्यं व्रीह्यादि, तद्रूपं धनमित्यर्थः। अत्राप्यसंनिहित इति संबध्यत इत्याह — **असंनिहित इति**। **तृतीयासमास इति**। 'सुप्सुपा' इति योगविभागाश्रयेण। **एतन्नाश्रितमिति**। इदं समाधानमगतिका गतिः। गत्यन्तरसंभवे तु तन्नाश्रयितुं युक्तमिति, तदाह — **न्याय्यस्येति**। **कृतामुद्भूतेति**। उद्भूता या क्रिया तस्या यत् साधनं कर्त्रादि, तत् कृतोऽभिदधतीत्यर्थः। एतदेवोपपादयति — **न हीति**। **निरीहे न प्राप्नोतीति**। अर्थनयुक्तस्याभिधानात्। णिनेर्मत्वर्थीयस्य चातुल्यार्थतां दर्शयन् निरीहे तद्धितान्तस्य वृत्त्युपपत्तिमाह — **नैष इति**। **निरीहेऽपीति**। अर्थनमर्थः प्रार्थना, सास्यास्तीति सोऽर्थी, धान्यस्यार्थः प्रार्थना धान्यार्थः, स यस्यास्ति स धान्यार्थी। 'एवं च' इत्यनेन क्रियापदार्थकत्व एवार्थिकादिसिद्धिरित्युक्तमितीतरयोः पक्षयोस्तदसिद्धिं दर्शयति — **यद्यर्थादिति**। **इनेरेवेति**। [1]तत्रकौण्डिन्यन्यायेनासंनिहिते विहितेनेनिना ठनो बाधनात्। **अत इनिठनाविति**। [2]'एकाक्षरात् कृतो जातेः' इति प्रतिषेधस्यानित्यत्वात्, यथा कार्यी कार्यिक इति। नन्वेवमर्थिशब्दपर्यायोऽर्थवानिति प्राप्नोतीत्यत्राह — **मतुबिति**। एवमपि धनवाचिनोऽर्थशब्दात् संनिहितादपीनिठनौ स्याताम्, न चेष्येते इत्यत आह — **धनवाचिनोऽपीति**। तदेवम् 'अर्थाच्चासंनिहिते' 'तदन्ताच्च' इति न वक्तव्यमिति स्थितम्॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे
पञ्चमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः॥

---

[1] अयं न्यायो मिदचोऽन्त्यात् सूत्रे भाष्य उक्तः। [2] महाभाष्यम् ५.२.११५.

पञ्चमाध्यायस्य तृतीयपादे प्रथममाह्निकम्

प्राग्दिशो विभक्तिः ५.३.१.

[४, १७७–१७८]

(विवरणम्) नन्वनेककार्यार्थित्वात् संज्ञाया विधानस्य बहुप्रयोजनत्वेऽवगते [1]सामान्यतस्तु विशेषावगमाय कानि प्रयोजनानीति प्रष्टुमुचितमित्यत आह — **प्रयोजनसामान्येति**। ननु 'इतः' इत्यत्र [2]'ऊडिदम्' इत्यनेन तसिलो विभक्तित्वेऽप्युदात्तत्वं न प्राप्नोति। तत्र हि तृतीयादिर्विभक्तिरित्यनुवर्तते। तृतीयादिशब्देन स्वादिसूत्रविहितानामेव विभक्तीनां ग्रहणमिति यो मन्यते तं प्रत्याह — **तृतीयादीति**। अन्यथा लाघवाय विभक्तिरित्यपनीय 'आप्' इत्येव [3]'अनाप्यकः' इतिवत् कुर्यादिति भावः॥

[४, १७७–१७८]

(उद्द्योतनम्) ननु त्यदाद्यत्वादिप्रयोजनानामनेकत्वादेकवचनेन प्रश्नो न युक्तः, अत आह — **प्रयोजनसामान्येति**। इत्संज्ञायामनिष्टमाह — **अन्यथेति**। इत्संज्ञा केन, अत आह — **हलन्त्यमिति**। **तवर्गस्येति**। तवर्गस्येत्संज्ञाप्रतिषेधे उक्तमित्यर्थः। वार्तिके 'अतद्धिते' इति न वक्तव्यमित्याह — **थमोरिति**। **तद्धितपर्युदासोऽपीति**। अपिना [4]"विभक्तौ तवर्गप्रतिषेधोऽतद्धिते' इत्येतत् सर्वं न वक्तव्यम्, निषेधस्यानित्यत्वज्ञापनेनैव तकारस्येत्संज्ञासिद्धेरित्युक्तम्। **मुख्यम्** अनन्यथासिद्धम्। तत्र हेतुः — [5]**अत्र हीति**। **प्रत्ययस्वरेण** आद्युदात्तत्वेन। 'इतः' इत्यत्र परत्वाद्विभक्तिस्वरं बाधित्वा लित्स्वर एव भवति। विभक्तिस्वरस्त्वनुदात्तत्वमात्रं बाधेत, कथं तन्मुख्यमुदाहरणमिति शङ्कते — **नन्विति**। **विभक्तिस्वरः** ऊडिदंपदादिभ्यस्तृतीयादिर्विभक्तिरुदात्तेति स्वरः। **नैष इति**। अनुवृत्तिसामर्थ्यात् 'लिति' इत्यनन्तरम् [6]'ऊडिदम्' इति स्वरः परत्वाल्लित्स्वरं बाधत इत्यर्थः। तृतीयादौ तसिलोऽनन्तर्भावात् कथम् 'इतः' इत्यत्र विभक्तिस्वरः, अत आह — **तृतीयादीति**॥

[४, १७७–१७८]

(नारायणीयम्) ननु संज्ञाकरणस्यानेकप्रयोजनसंपादनार्थत्वादेकवचनेन प्रश्नोऽनुपपन्न इत्यत आह — **प्रयोजनेति**। नन्वित्कार्याभावादेव दानीमो मकारस्येत्संज्ञा न भविष्यतीत्यत आह —

---

[1] सामान्यतस्तु बहुप्रयोजनत्वेऽवगत इत्यन्वयः।
[2] पा. सू. ६.१.१७१.
[3] पा. सू. ७.२.११२.
[4] का. वा. १.३.४–१.
[5] तत्र हीति — लृ.
[6] पा. सू. ६.१.१७१.

अन्यथेति। ननु [1]'न विभक्तौ तुस्माः' इत्यत्रातद्धित इति वक्तव्यत्वाद् गौरवं स्यादिति चेन्नेत्याह — **थमोरिति**। **अनित्यत्वमिति**। अनित्यत्वमेव ज्ञाप्यते, न तु तद्धितेष्वभाव इति दानीमो मकारस्येत्संज्ञा सिद्धा भवति। **ऊडिदमित्येतदिति**। तत्र वाक्यभेदेन संबन्धात् पुनर्विधानाल्लित्स्वरो बाध्यत इत्यर्थः। अपर आह — नात्राकृते लित्स्वरे विभक्तिस्वरः प्राप्नोति, किं कारणम्, अन्तोदात्तादिति वर्तते, तत्र निमित्तमेव लित्स्वरो विभक्तिस्वरस्येति। ननु [2]'ऊडिदम्' इत्यत्र [3]'सावेकाचः' इत्यतस्तृतीयादिग्रहणमनुवर्तत इति कथं तसिलादेः स्वरः स्यादित्यत आह — **तृतीयादीति**॥

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ५.३.२.

[४, १७८]

(विवरणम्) किम उपसंख्याननिराकरणाय द्व्यादिभ्यः प्राक् पाठः क्रियतामिति यो मन्यते तं प्रत्याह — **द्व्यादिष्विति**॥

[४, १७८]

(उद्द्योतनम्) ननु वार्तिकस्थे उपसंख्यानशब्दो युक्तः, न तु सूत्रस्थेऽपीत्यत आह — **उपेति**। ननु द्व्यादिभ्यः प्रागेव सर्वादिगणे किंशब्दः पठ्यताम्, ततश्चात्र किंग्रहणं न कर्तव्यमिति लाघवं भवति, अत आह — **द्व्यादिष्विति**॥

[४, १७८]

(नारायणीयम्) सर्वत्र सूत्रेणासिद्धस्य सूत्रसमीपे वचनमुपसंख्यानमुच्यते, इह तु नैवमित्याह — **उपेत्येति**। सूत्रे प्रणीयेत्यर्थः। ननु लाघवाय द्व्यादिभ्यः पूर्वं किंशब्दः पठ्यताम्, को दोष इत्यत आह — [4]**द्व्यादिषु चेति**॥

एतदोऽन् ५.३.५.

[४, १७८–१८०]

(विवरणम्) ननु [5]'तवर्गप्रतिषेधोऽतद्धिते' इति वचनान्नकारस्येत्संज्ञायां लोपे च [6]न श्रवणं भविष्यति, अत आह — **नेदिति**। स्वरस्तु नित्प्रत्ययान्तस्य विधीयते। न चायं प्रत्यय इति

---

[1] पा. सू. १.३.४.
[2] पा. सू. ६.१.१७१.
[3] पा. सू. ६.१.१६८.
[4] प्रदीपे 'द्व्यादिषु किंशब्दस्य' इत्यत्र 'द्व्यादिषु च किंशब्दस्य' इति पाठोऽभिमतः।
[5] का. वा. १.३.४–१.
[6] न ग्रहणं — व.

भावः। **बुद्धिस्थः** 'अन्' इत्येतदित्यर्थः। **[1]तद्व्यतिरिक्तेति**। **[2]**'अग्नेर्ढक्' इत्यादावपि संज्ञास्वरूपातिरिक्तं संज्ञिस्वरूपम्। तेन बाह्यार्थेनार्थवत्त्वसंभवात् स्वरूपातिरिक्त**[3]**बाह्यार्थग्रहणे न काचनानुपपत्तिः। नन्वलोऽन्त्यपरिभाषया दकारस्यात्वं प्राप्नोतीति किमुच्यते 'अकारस्याकारवचने' इति, अत आह — **त्यदाद्यत्वमिति**॥

[४, १७८–१८०]

(उद्द्योतनम्) ननु सूत्रे **[4]**नकाराभावाद्विचारोऽसंगतः, अत आह — **इहेति**। **[5]**'हलन्त्यम्' इतीत्संज्ञायां लोपात् श्रवणप्रश्नो न युक्तः, अत आह — **इत्कार्याभावादिति**। नकारस्येत्त्वे व्यपवर्गाभावेऽप्याद्युदात्तत्वं प्रयोजनम्। तच्च **[6]**लित्स्वरेणैव सिद्धमितीत्कार्याभावः। इत्संज्ञाया अभावात् कथं लोपः, अत आह — **नेत्संज्ञेति**। इत्संज्ञाया अभावादादेशात् पूर्वं लोपाभावं शङ्कते — **नन्विति**। अतिदेशात् पूर्वमपि शब्दस्वरूपार्थेनार्थवत्त्वात् प्रातिपदिकत्वं मत्वेदमुक्तमित्याह — **एवं मन्यत इति**। शङ्काशयं निराह — **यदुक्तमिति**। **अन्यथा** बाह्यार्थग्रहणे। धनमित्यादीनां **[7]**नावधि स्वपरत्वेनार्थवत्त्वात् प्रातिपदिकत्वे स्वाद्युत्पत्तौ पदान्तत्वप्रातिपदिकान्तत्वयोः संभवादित्यर्थः। ननु स्थान्यर्थाभिधानसमर्थस्यादेशत्वेनादेशस्याप्यर्थवत्त्वात् प्रातिपदिकत्वं स्यादिति 'नाकृते' इत्ययुक्तम्, अत आह — **अर्थवत इति**। आदेशस्य पृथक्प्रयोगाभावेनादेशत्वानन्तरमेवार्थवत्त्वाभिव्यक्तिरिति भावः। ननु **[8]**'अलोऽन्त्यस्य' इति दकारस्याकारः प्राप्नोति, न तु मध्यवर्त्यकारस्य, अत आह — **त्यदाद्यत्वमिति**। **बाध्येति**। त्यदाद्यत्वस्येदमत्वं विशेषविहितत्वाद्बाधकमित्यर्थः[9]। तदपेक्षायामपि वैयर्थ्यं तुल्यमित्याह — **तदपेक्षायामिति**। प्रकृतेऽकारस्याकारवचने किं प्रयोजनम्, अत आह — **एतच्छब्देति**। त्यदाद्यत्वं बाधित्वा दकारस्याकारवचनस्याप्येतदेव प्रयोजनं ज्ञेयम्। योगविभागस्य प्रयोजनमाह — **अन्बाधनार्थमिति**। रथोः परयोरेतदोऽन्बाधनार्थमित्यर्थः। रेफाप्रश्नस्याशयमाह — **तत्र रेफादिरिति**। भाष्ये **इदमेति**। 'एतदः' इति योगे इदम इत्यनुवर्तते। तेन थकारादिर्विशेष्यते — इदमो यस्थकारादिरिति। स च थमुरेव, न थालिति, नातिप्रसङ्ग इति भावः। इदम इवैतदोऽपि थमुना थाल् बाध्यत इत्याह — **एवं चेति**॥

[४, १७८–१८०]

(नारायणीयम्) ननु **[10]**'एतदोऽश्' इति सूत्रपाठान्नकाराभावाद्विचारोऽयमसंगत इत्यत आह — **इह केचिदिति**। ननु नकारस्य **[11]**'हलन्त्यम्' इतीत्संज्ञायां लोपे सति श्रवणाभावात् प्रश्नोऽयम-

---

[1] प्रदीपे 'व्यतिरिक्तबाह्यार्थं' इत्यत्र 'तद्व्यतिरिक्तबाह्यार्थं' इति पाठोऽभिमतः।
[2] पा. सू. ४.२.३३.
[3] बाह्यार्थस्मरणे — व.
[4] 'एतदोऽश्' इति काशिकावृत्त्यभिमतसूत्रपाठानुसारेण शङ्का।
[5] पा. सू. १.३.३.
[6] तसिल्त्रलोर्लित्त्वादिति भावः।
[7] नकारावधि स्वरूपपरत्वेनेत्यर्थः।
[8] पा. सू. १.१.५२.
[9] बाधनमित्यर्थः — लृ.
[10] काशिकावृत्तावयं पाठः।
[11] पा. सू. १.३.३.

युक्त इत्यत आह — **इत्कार्येति**। **नेत्संज्ञाद्वारेणेति**। इत्संज्ञकत्वाल्लोपे सति [1]'नानुबन्धकृतमनेकाल्त्वम्' इत्यनेकाल्त्वाभावात् सर्वादेशो न स्यात्। **ननु यावदिति**। स्थान्यर्थेनार्थवत्त्वादेवानादेशस्य[2] प्रातिपदिकत्वं ..... [**अन्यथेति**।] वनं धनमित्यादावपि वन् धन् इत्यादेः स्वरूपेणार्थेनार्थवत्त्वात् प्रातिपदिकत्वान्नलोपः स्यादित्यर्थः। ननु विशेषविहितत्वात् त्यदाद्यत्वं बाधि[त्वाकारादे]शेन भाव्यमिति किमुच्यते 'अकारस्याकारवचने' इति, तत्राह — **त्यदाद्यत्वमिति**। **बाध्यबाधकभावमनपेक्ष्येति**। नासौ सिद्धान्त इति न्यायाभासाश्रयेणैतदुक्तमित्यर्थः। बाध्यबाधकभावापेक्षायां तु प्रकारान्तरेणैतत्प्रयोजननिराकरणं द्रष्टव्यमित्याह — **तदपेक्षायामिति**। कः पुनरादेशोऽकारस्य प्राप्नोतीत्यत्राह — **एतच्छब्देति**। योगविभागस्य प्रयोजनमाह — **अन्बाधनार्थमिति**। एकयोगे त्वनेव स्यात्। रेफादिरादेशोऽस्त्येवेत्याह — **तत्रेति**। **एवं चेति**। ज्ञापकेनैतदस्थमोर्विधान इत्यर्थः॥

पञ्चम्यास्तसिङ् ५.३.७. सप्तम्यास्त्रल् ५.३.१०.

[४, १८०–१८२]

(उद्द्योतनम्) षष्ठीं विहाय पञ्चम्याश्रयणे हेतुमाह — **आदेशपक्षस्येति**। **प्राथम्यादिति**। षष्ठीपञ्चम्योरन्यतरग्रहणे प्राथम्यं नियामकमित्यर्थः। ननु 'तसेः' इति निर्देशात् 'तसु उपक्षये' इति धातोः कथं ग्रहणं स्यात्, अत आह — [3]**तसेरिति चेति**। **तद्धितादेशवदिति**। यथा [4]"अपादाने चाहीयरुहोः' इति विहितस्य तद्धितस्य तसेरयमादेशस्तद्वद् धातोरपि स्यादित्यर्थः। ननु धात्वादेशस्य [5]"भूरादिवत् स्थानिवद्भावेन धातुत्वात् 'तस्यति' इत्यादिरूपसिद्धेः किमनिष्टम्, अत आह — **तद्विधानेति**। 'पञ्चम्याः' इति षष्ठीपक्षे तु नायं दोष इत्याह — **आदेशेति**। ननु [6]"प्रतियोगे पञ्चम्यास्तसिः' इत्यत्र पञ्चम्यन्तात् तसिप्रत्ययो विधीयत इत्यादेशत्वाभावात् तस्येह ग्रहणं कथम्, अत आह — **अपादान इति**। अत्र ग्रहणार्थं तत्र स पक्ष आश्रीयत इत्यर्थः। स्वशब्दार्थमाह — **पञ्चम्यन्तेति**। पञ्चम्यन्ता या प्रकृतिस्तस्या अर्थे वर्तमानस्येत्यर्थः। ननु [7]"अपादाने चाहीयरुहोः' इति पञ्चम्याः स्थाने विधीयमानोऽपि तसिर्न स्वार्थे विधीयत इति कथं तस्य स्वार्थिकत्वम्, किं वात्र स्वार्थिकग्रहणे नियामकम्, अत आह — **इहेति**। **स्वार्थिकैः** तसिलादिभिः। आदेशस्य स्वार्थिकत्वसिद्धये स्थानिनोऽपि स्वार्थिकत्वसिद्धिः। अन्यथादेशस्य तदसिद्धेरित्यर्थः। ननु प्रत्ययसाहचर्यात् प्रत्ययस्य स्वार्थिकत्वं भवति, न त्वादेशस्य। तस्य स्थान्यर्थमात्रानुविधायित्वात्, अत आह — **अथवेति**॥

[४, १८०–१८२]

(नारायणीयम्) ननु पक्षद्वयेऽपि दोषे समाने प्रत्ययपक्षाश्रयणे को हेतुरित्यत आह — **आदेश-**

---

[1] परिभाषा ६.

[2] अन् इत्यादेशस्येत्यर्थः।

[3] प्रदीपे 'तसेरिति निर्देशे चेकारः' इत्यत्र तसेरिति च निर्देशे इकारः' इति निर्णयसागरमुद्रिते पाठः।

[4] पा. सू. ५.४.४५.

[5] अस्तेर्भूरिति विहितभूरादेरिवेत्यर्थः।

[6] पा. सू. ५.४.४४.

[7] पा. सू. ५.४.४५.

पक्षस्येति। यस्मिन् पक्षे दोषस्याल्पत्वं तत्रैव समाधानं सुवचं स्यादित्याशयेनैतदुक्तम्। अत एव प्रथमातिक्रमे कारणाभाव इत्याह — **प्राथम्यादिति**। 'तस्मात् तस्यति' इत्यादावतिव्याप्तिदोषमुपपादयति — **पञ्चमीनिर्देश इति**। **इकार उच्चारणार्थ इति**। इकारस्य विवक्षितत्वे नायं दोषः स्यात्, धातोरिकाराभावात्। नन्वादेशवचने प्रयोजनं विभक्तिसंज्ञा लित्स्वरश्च। उभयमप्यत्र नोपपद्यते, विभक्तिकार्यस्य त्यदाद्यत्वादेरत्रासंभवात्। लित्स्वरस्यापि लिति प्रत्यये पूर्वस्य विधानादिहाभावादित्याशङ्क्याह — **तद्विधानसामर्थ्यादिति**। यथा डित्यभस्याप्यनुबन्धकरणसामर्थ्यात्टिलोपः। नन्वादेशपक्षेऽपि समानोऽयं दोष इत्यत्राह — **आदेशपक्षे त्विति**। स्वशब्दार्थमाह — **पञ्चम्यन्तेति**। ननु 'स्वार्थे वर्तमानस्य' इति विशेषः कुतो लभ्यत इत्यत आह — **इह स्वार्थिकैरिति**। **यदि चेति**। आदेशस्य स्वतः प्रकृत्यर्थे वृत्त्यसंभवात् स्थानिद्वारेण तल्लाभात्। **अथवेति**। अस्मिन् पक्षे 'स्वार्थे वर्तमानस्य' इति विशेष इकारस्य विवक्षितत्वाद् बोद्धव्यः॥

तसेश्च ५.३.८.

[४, १८३–१८४]

(उद्द्योतनम्) रूपे विशेषसत्त्वात् स्वरार्थमिति नियमानुपपत्तिं शङ्कते — **नन्विति**। 'तस्मादागतः' इत्यत्र [१]'अपादाने च' इति तसिप्रत्ययं कृत्वा विभक्तेर्लुकि तसेर्विभक्तित्वाभावात् त्यदाद्यत्वं न स्यात्। तसिलादेशस्य तु [२]प्राग्दिशीयस्य विभक्तित्वात् तत्सिद्धिरित्यर्थः। ननु [३]'प्रतियोगे पञ्चम्यास्तसिः' इत्ययं तसिः पञ्चम्या आदेशः। ततः स्थानिवद्भावेन विभक्तित्वात् त्यदाद्यत्वं सिध्यतीति न तदर्थं तसिलादेशापेक्षा, अत आह — **न चेति**। तस्मादागतः 'तत आगतः' इत्यत्र तसेः स्मादादेशप्रसङ्गदोषः। प्रत्यय एव कर्तव्य इत्यन्वयः। [४]अयं तसिल् परस्यापि तसेर्बाधको[५]ऽङ्गीक्रियते। तस्याप्ययं परत्वाद्बाधक इत्यर्थः। **तस्य** 'तसिश्च' इति विहिततसिप्रत्ययस्य। **उक्तमिति**। तसिप्रत्यये प्रत्ययस्वरः स्यात्, तसिलादेशे तु लित्स्वर इति विशेष इत्यर्थः॥

[४, १८३–१८४]

(नारायणीयम्) भाष्ये स्थान्यादेशभाव एवाक्षिप्तः, न तु सूत्रम्, तस्य [६]'तत आगच्छति' इत्यादिरूपसिद्ध्यर्थमवश्यकर्तव्यत्वादिति प्रतिपादयितुं चोदयति — **ननु त्यदाद्यर्थत्वादिति**। परत्वात् तसिलो बाधकस्य तसेर्बाधक इति योजना॥

---

[१] पा. सू. ५.४.४५.

[२] प्राग्दीव्यतीयस्य — लृ.

[३] पा. सू. ५.४.४४.

[४] 'पञ्चम्यास्तसिल्' इत्यनेन विहितस्तसिलित्यर्थः।

[५] तसेर्बहिर्भूतक्रियापेक्षत्वाद्बहिरङ्गत्वम्, तसिलस्तु तदनपेक्षत्वादन्तरङ्गत्वमित्याशय इत्युद्द्योताद्विज्ञायते।

[६] अत्र 'अपादाने चाहीयरुहोः' इति तसिप्रत्यये तस्य विभक्तित्वाभावात् त्यदाद्यत्वं न स्यादित्यत्र तसिप्रत्ययो विधातव्य इत्याशयः।

दानीं च ५.३.१८.

[४, १८४]

(उद्द्योतनम्) 'इदानीम्' इति सूत्रपक्षे [1]'ऊठ्' इति स्वरप्रसक्तिर्नास्ति, अत आह — **केचि-दिति**। 'दानीं च' इति पाठमाश्रित्यायं विचार इत्यर्थः ॥

[४, १८४]

(नारायणीयम्) केषांचिद्विना [2]चकारेण सूत्रपाठः, अन्येषां तत्सहिततयेति संप्रदायभेद इत्याह — **केचिदिति**। तत्र पूर्वस्मिन् पाठे पूर्वसूत्रे प्रत्ययो निर्दिष्टः 'अधुना' इति, इदम इत्यनुवर्तत इत्ययं पक्ष आश्रीयते तस्यैवेहाप्यनुवर्तनाच्चकारो न कर्तव्यः। द्वितीये तु 'अधुना' इति प्रकृति-प्रत्ययसमुदायो निपात्यत इति पक्षः। तत्रेदम इत्यसंबन्धाद्विच्छिन्नत्वादिह चकारेणानुकृष्यते। **अन्त्यस्योदात्तत्वमिति**। आदेस्त्विष्यते। **आदेरिति**। [3]'ऊडिदंपदाद्यप्पुम्रैद्युभ्यः' इति पञ्चमी-निर्देशात् ॥

तदो दा च ५.३.१९.

[४, १८४]

(उद्द्योतनम्) अकारप्रश्लेषेण वैयर्थ्यं कैश्चित् परिहृतम्। तदुपन्यस्य दूषयति[4] — **सूत्र-कारेणेति**। स्वरविशेषमेवाह — **अदाप्रत्यय इति** ॥

[४, १८४]

(नारायणीयम्) भाष्यवार्तिकयोर्दावचनं प्रत्याख्यातम्। सूत्रकारमतेन त्वदाप्रत्यये स्वर-विकल्पोत्पत्तिरित्याह — **सूत्रकारेण त्विति**। इत्याहुरित्यनेनास्मिन् पक्षेऽभियुक्तवचनं प्रमाण-त्वेन दर्शयति ॥

तयोर्दार्हिलौ च च्छन्दसि ५.३.२०.

[४, १८५]

(उद्द्योतनम्) प्रातिपदिकग्रहणपक्षे इदंतद्भ्यां यथासंख्यमेतौ प्रत्ययौ, चकाराद्यथाप्राप्तमपि।

---

[1] पा. सू. ६.१.१७१.

[2] प्रदीपे "केचित् 'इदानीम्' इति सूत्रं पठन्ति" इति दृश्यते। " 'दानीं' इति सूत्रं पठन्ति" इति पाठोऽभिमत इति प्रतीयते।

[3] पा. सू. ६.१.१७१.

[4] 'आहुः' इत्यनेन भाष्यविरोधरूपदूषणस्य सूचितत्वादेवमुक्तम्।

तत्रेदमो दाप्रत्यये 'इदा, इदानीं, अधुना, एतर्हि' इति रूपचतुष्टयमिष्यते। तदो र्हिल्प्रत्यये 'तर्हि, तदा, तदानीम्' इति रूपत्रयम्। सूत्रे प्रत्ययग्रहणपक्षे एतन्न सिध्यतीत्याह — [1]**तत्रेति**। सूत्रयोः प्रकृतित्वासंभवेनानन्तर्यसंबन्धे षष्ठ्यसंभवाद् विषयसप्तमी वाच्या। तथा च चकारेण तत्सूत्रद्वयविहितप्रत्ययानामेवेहाभ्यनुज्ञा, न सूत्रान्तरविहितयोर्धुनार्हिल्प्रत्यययोरित्यर्थः। यथासंख्याश्रयणे रूपद्वयमेवेदमः सिध्येत्, न चतुष्टयमित्याह — **तत्र यदीति**। तत्र हेतुः — **विशेषेति**। अस्मिन्नपि पक्षे तदो रूपत्रयं सिध्यत्येवेत्याह — **तदस्त्विति**। [2]'तदा दा च' इति चकारेण दानींप्रत्ययस्यापि पूर्वसूत्रेण विधानादत्रत्यचकारेण तस्याप्याकर्षणादिति भावः। यथासंख्यानाश्रयणेऽपीदमो रूपचतुष्टयं न सिध्यतीत्याह — **अथेति**। प्रत्ययग्रहणपक्षेऽपि तदो रूपत्रयं सिध्यत्येव। इदमः 'इदा' इति रूपं तु न सिध्यतीत्याह — **अथ तयोरिति**। **न सिध्येदिति**। उपलक्षणमिदम् — दाग्रहणं च व्यर्थम्, 'तयो र्हिल् च' इत्येव सूत्रं स्यादित्यपि ज्ञेयम्। प्रातिपदिकपरामर्शे तु नायं दोष इत्याह — **प्रातिपदिकेति**॥

[४, १८५]

(नारायणीयम्) तच्छब्देन योगपरामर्शे कथं सूत्रार्थ इत्यत्राह — **तत्र पूर्वयोरिति**। पूर्वयोः सूत्रयोः [3]'दानीं च, [4]तदो दा च' इत्येतयोर्विषये ये प्रकृती ताभ्यां तत्र विहितयोर्दादानीमोः प्राप्तयोर्दार्हिलौ भवतः। चकाराद् दादानीमौ चेति सूत्रार्थः। **तत्र यदीति**। स्वरितत्वप्रतिज्ञानात्। **विशेषविहिताभ्यामिति**। छन्दोविषयत्वाद्विशेषविहितत्वम्, तेन च बाधः। इदमश्छन्दसि 'इदा, इदानीम्, अधुना, एतर्हि' इति रूपचतुष्टयमिष्यते। तत् सर्वमस्मिन् पक्षे न सिध्यतीति दोषः। [5]तदस्तु रूपत्रयमिष्यते। तत्सिध्यत्येवेत्याह — **तदस्त्विति**। यथासंख्यानाश्रयणेऽपीदमो रूपत्रयमेव स्यादित्याह — **अथापीति**। प्रत्ययपरामर्शे तु प्रकृतिरनन्तरैव संबध्येतेति तद एव छन्दसि दार्हिलौ स्यातामितीदमः 'इदावत्सरीयः' इति न प्राप्नोतीति दोष इत्याह — **अथेति**। **प्रातिपदिकपरामर्शे त्विति**। अस्मिन् पक्षेऽयं सूत्रार्थः — तयोरिति पञ्चम्याः स्थाने षष्ठी, आनन्तर्यसंबन्धे वा। ताभ्यामिदमस्तदश्च छन्दसि विषये यथासंख्यं दार्हिलौ भवतः। चकाराद्यथाप्राप्तं च प्रत्यया इति तेन सर्वेष्टसिद्धिरित्यर्थः॥

दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ५.३.२७.

[४, १८६–१८७]

(विवरणम्) तदर्थमिति। 'यथासंख्यमनुदेशः समानां स्वरितेन' इत्याश्रयणाद्यत्र स्वरितसञ्ज्ञस्तत्रैव सा परिभाषोपतिष्ठते। अत्र तु स्वरितस्याधिकारार्थं प्रतिज्ञानेऽपि यथासंख्यार्थं प्रतिज्ञा नास्ति॥

---

[1] अत्रेति — ल्.
[2] पा. सू. ५.३.१९.
[3] पा. सू. ५.३.१८.
[4] पा. सू. ५.३.१९.
[5] तच्छब्दस्य त्वित्यर्थः।

[४, १८६–१८७]

(**उद्द्योतनम्**) ननु 'दिग्भ्यः' इत्युक्तेऽप्यर्थस्य प्रकृतित्वासंभवाद् दिक्छब्देभ्य एव प्रत्ययः स्यादिति शब्दग्रहणं व्यर्थम्, अत आह — **दिशामिति**। 'दिग्देशकालेषु' इत्यस्य प्रयोजनमाह — **दिश उपलक्षणत्वेनेति**। दिग्वाचकशब्दपरिग्रहार्थं दिग्ग्रहणम्, तस्य लक्षणया [1]दिगादिव्यतिरिक्ते प्रयोगेऽपि दिक्छब्दत्वानपायादतिप्रसङ्ग इत्यर्थः। सप्तम्यादीनां दिगादीनां च यथासंख्यं निराह — **उपाधीनामिति**। तत्र हेतुः — **तदर्थमिति**। 'यथासंख्यमनुदेशः समानां स्वरितेन' इति विभागमङ्गीकृत्य यत्र स्वरितत्वप्रतिज्ञा तत्रैव यथासंख्यमित्युक्तत्वादित्यर्थः। पूर्वादिशब्दानां दिङ्मात्रवाचकत्वे देशकाल[योर]वृत्तिः, त्रितयवाचकत्वे दिक्छब्दत्वानुपपत्तिः, अत आह — **तत्र यथेति**। यद्यपि दिङ्मात्रवाचकत्वेऽपि तत्संबन्धेन देशकालवृत्तित्वं संभवति। सूत्र उपादानाच्च गौणमुख्यन्यायानाश्रयणम्, तथापि वास्तवकथनमेतत्। **स्वभावात्** इतरनिरपेक्षत्वेन। 'अस्मादयं पूर्वजः' इत्यादौ केवलकालवृत्तित्वसंभवेऽपि देशे दिक्संबन्धेनैव पूर्वशब्दप्रवृत्तेः कथं तत्र स्वभावाद्वृत्तिः, अत आह — **यथेति**। **तथेति**। स्वापेक्षया दक्षिणभागे पौर्वापर्येणावस्थितयोरेकस्मिन् पूर्वदेशस्थत्वस्येतरस्मिन्नपरदेशस्थत्वस्य च सत्त्वात् तथा व्यवहाराच्चेति भावः। **यद्यपीति**। अर्थभेदेन शब्दानामपि भेदः, युगपद्वृत्तिद्वयविरोधेन सकृत्प्रवृत्तस्यानेकार्थप्रतिपादकत्वाभावात्। सैन्धवादावप्यर्थभेदेन शब्दभेद एवेति भावः। **तथापीति**। वर्णानुपूर्वीसादृश्यान्नानार्थेष्वप्येकशब्दत्वव्यवहार इति भावः। प्रत्ययार्थमाह — **अनिर्दिष्टेति**। एवं सूत्रार्थं विविच्य भाष्यमवतारयति — **एवमिति**। प्राप्तिमाह — **पूर्वशब्दस्येति**। अत्र देशस्यैव पूर्वविशेषणत्वमस्तु, पूर्वस्य देशविशेषणत्वेऽपि वा प्रत्ययोऽस्तु, अत आह — **अयमर्थ इति**। **काणेति**। काणखञ्जः, खञ्जकाण इति वा विशेषाभाव इत्यर्थः। तर्हि पुरस्तादित्युक्ते देशादिप्रतीतिः कथम्, अत आह — **वृत्ताविति**। तर्हि पुरस्ताद्देशादिति प्रयोगो न स्यात्, वृत्तावेव देशादेरन्तर्भावात्, अत आह — **सत्यपीति**। त्रयाणामपि वृत्तावन्तर्भावात् प्रत्येकविशेषप्रतिपत्त्यर्थं देशादिविशेषप्रयोग इत्यर्थः। तत्र हेतुः — **दिग्देशकालेष्विति**। **उपाधिभावः** प्रकृत्यर्थविशेषणत्वम्। किं च पूर्वार्थस्य प्राधान्ये विशेषणभूतान् देशादीन् वृत्तावन्तर्भावयितुं शक्नोति, प्रधानस्य गुणवशीकारसमर्थत्वात्। देशादीनां प्राधान्ये तु गुणभूतस्य पूर्वार्थस्य देशाद्यन्तर्भावसामर्थ्यं नास्तीत्याह — **नेति**। यो हि पूर्वादिरर्थद्वारा देशादिना विशेष्यते तस्मात् प्रत्यय इति 'यो हि' इत्यादेरर्थः। 'नैष देशः' इत्यस्य तात्पर्यान्तरमाह — **अन्ये त्विति**। **दक्षिणापथमिति**। दक्षिणापेक्षया पूर्वत्वाभावात् तत्रावध्यपेक्षार्थाभिधानं नास्तीत्यर्थः। उक्तेऽर्थे भाष्यं योजयति — **तत्रेति**। तर्हि पूर्वस्मिन् देशे वसतीत्यत्र पूर्वस्मिन्निति न स्यात्, अवध्यपेक्षारूपव्यवस्थाया अभावेन सर्वनामसंज्ञाया अभावात्, अत आह — **वास्तवीति**। व्यवस्थायां विवक्षितायामयं प्रत्ययः। वास्तवव्यवस्थामात्रेण सर्वनामसंज्ञेत्यर्थः॥

[४, १८६–१८७]

(**नारायणीयम्**) अनिर्ज्ञाते सूत्रार्थेऽतिव्याप्तिचोद्यं प्रतीतिपथं नावतरतीति दुर्ज्ञानत्वात् सूत्रार्थं तावदाह — **दिशां शब्दा इति**। षष्ठीसमासः। ननु संबन्धे षष्ठी विधीयते, कः पुनरत्र

---

[1] 'दिग्व्यतिरिक्ते' इत्येवालम्, आदिशब्दोऽधिको भाति।

[1]दिक्छब्दयोः संबन्ध इत्यत्राह — **ये रूढयेति। न त्वैन्द्र्यादय इति।** ऐन्द्रीशब्दोऽयमिन्द्रसंबन्धिस्त्रीलिङ्गं वस्तुमात्रमाह। दिक्शब्दसंनिधौ तु दिशि वर्तत इति दिक्छब्दः, न तु रूढया। **तत्र दिश इति।** 'दिक्छब्देभ्यः' इति शब्दग्रहणाद्दिशि दृष्टा ये शब्दास्ते दिक्छब्दा इत्यर्थाङ्गीकाराद् दिश उपलक्षणत्वम्। **तदर्थमिति।** तत्र प्रत्ययनिवृत्त्यर्थमित्यर्थः। **तदर्थमिति।** 'यथासंख्यमनुदेशः समानां स्वरितेन' इति स्वरितशब्दस्य पूर्वत्रापि संबन्धाद्यत्र यथासंख्यसंबन्धार्थं स्वरितत्वप्रतिज्ञानं तत्रैव तत्प्रवृत्तिः, नान्यत्रेति भावः। कथं पुनर्दिक्छब्दा देशकालयोर्वर्तन्त इत्यत्राह — **तत्र यथेति।** ननु देशे दिशं निमित्तीकृत्य पूर्वादिशब्दो वर्तत इति किं देशग्रहणेनेत्यत्राह — **यथा काल इति। दिगनपेक्षा इति।** 'पूर्वस्मादागतः' इत्युक्ते झटिति देशप्रतीतेर्दिगपेक्षया पाश्चात्येऽपि पूर्वदेश इति व्यवह्रियते। तथा च दक्षिणापथात् पूर्वदेशं गच्छन् पूर्वदेशं गच्छामीति ब्रूते। दिग्व्यवस्थया तु स उत्तरो भवति। ननु प्रत्यर्थं शब्दभेद इति दर्शने देशकालवृत्तीनां [दिक्छ]ब्देभ्यो [भिन्नत्वात् कथं दिक्छब्देभ्य इति व्यपदेश इत्याशङ्क्य] परिहरति — **यद्यपीति।** कस्मिन्नर्थे पुनरयं प्रत्यय इत्यत्राह — **अनिर्दिष्टेति।** चोदकस्याशयं दर्शयति — **पूर्वशब्दस्येति।** एकग्रन्थाशङ्कां निरस्यति — **आचार्य आहेति।** तात्पर्यार्थं दर्शयति — **अयमर्थ इति।** [2]पूर्वार्थस्य विशेष्यत्वे प्रत्यय इत्यत्र हेतुमाह — **वृत्तौ विशेष्यमिति।** यदि वृत्तौ विशेषणस्यान्तर्भावनं तर्हि तद्वाचिनः प्रयोगो न स्यादित्यत्राह — **सत्यपीति।** एतदेव व्यतिरेकप्रदर्शनेन विशदयति — **यदा त्विति।** उक्तेऽर्थे भाष्यं योजयति — **नैष इति। यो हीति।** [3]पूर्वार्थः। **तत इति।** तद्वाचिन इत्यर्थः। **अन्ये त्विति।** हेलाराजादयः। **अवध्यपेक्षेति।** यो दिक्शब्दः सन् देशे वर्तते तस्मात् प्रत्ययः। दिक्छब्दाश्च देशकालयोरवध्यपेक्षार्थाभिधायिन इति तथाभूतेभ्य एव प्रत्ययः। अत्र तु रूढया पूर्वशब्दो देशे वर्तत इति नातः प्रत्ययो भवतीत्यर्थः। रूढिशब्दत्वमेवोपपादयति — [4]**तथा हीति। पूर्वदेशादागतोऽहमिति।** अवध्यपेक्षत्वे तु 'उत्तरदेशात्' इति वाच्यं स्यात्। अत्रापि भाष्ययोजनामाह — **नैष देश इति।** ननु रूढया पूर्वशब्दस्य देशविशेषे प्रवृत्तौ 'पूर्वस्मिन् देशे' इत्यादौ सर्वनामकार्यं न स्यादित्यत आह — **वास्तवी त्विति।** यद्यपि व्यवस्था न प्रवृत्तिनिमित्तम्, वस्तुतस्तु सा विद्यत इति तदाश्रया संज्ञा भवत्येव। [5]'व्यवस्थायाम्' इति विषयो निर्दिश्यते, न तु प्रवृत्तिनिमित्तमिति भावः॥

दक्षिणोत्तराभ्यामतसुच् ५.३.२८.

[४, १८८–१९०]

(विवरणम्) पूर्वादिशब्दा भागविशेषसंबन्धसापेक्षा अपि [6]व्यवस्थालक्षणान्यनिमित्तनिरपेक्षा इत्याह — **दिशीति।** कथं मर्यादानपेक्षणम्, अत आह — **कुरूनिति। असंज्ञायामिति।** सर्वनामसंज्ञाविधाविति शेषः। **यावद्द्रव्यमनपायः** धर्मस्य कस्यचिदिति शेषः। **दिग्देशेति।** [7]व्यवस्थाया भाव इत्यर्थः। **मेरुमिति।** मेरुः सह्योत्तर इति प्रसिद्धेः। सप्तमीसमासलक्षणा-

---

[1] दिशः शब्दस्य चेत्यर्थः।
[2] पूर्वशब्दार्थस्येत्यर्थः।
[3] पूर्वशब्दार्थ इत्यर्थः।
[4] तथा चेति — घ.
[5] पा. सू. १.१.३४.
[6] व्यवस्थालक्षणं यदन्यनिमित्तं तन्निरपेक्षा इत्यर्थः।
[7] प्रदीपे 'व्यवस्थासद्भावः' इत्यत्र 'व्यवस्थाभावः' इति पाठोऽभिमत इति भाति।

भावादाह — **अर्थप्रदर्शनमिति**। **स्वरूपेति**। शब्दस्वरूपेत्यर्थः। देशकालवृत्तीनां द्वन्द्वे न पुंवद्-भावेन प्रयोजनमित्यत उक्तम् — **दिग्वाचिनामिति**। नन्वियं पञ्चमी षष्ठीमुपपदविभक्तिं कारकविभक्तित्वाद् बाधिष्यते, अत आह — **अन्यादीति**॥

[४, १८८–१९०]

(उद्द्योतनम्) आकृतिशब्देन प्रवृत्तिनिमित्तमुच्यत इत्यभिप्रेत्याह — **अन्येति**। आकृतिभेद-मेवाह — **दिशीति**। **निमित्तान्तरं** व्यवस्थारूपम्। **सर्वत्रेति**। दिश्यपीत्यर्थः। तथा च समानाग्रामाकृतौ भाषितपुंस्कत्वात् पुंवद्भावसिद्धिरिति भावः। व्यवस्थाशब्दार्थमाह — **व्यवस्थेति**। तद् दूषयति — **एवं त्विति**। [1]मर्यादानपेक्षात् प्रयोगादित्यन्वयः। मर्यादानपेक्षत्वे हेतुः — **कुरूनुत्तरेणेति**। **आसीनानामिति**। कर्तरि षष्ठी। तत्कर्तृकप्रयोगदर्शनादित्यर्थः। कुरूत्तरा-वस्थितापेक्षया कुरूणामुत्तरत्वाभावान्नात्र व्यवस्था गम्यत इत्यर्थः। **आनर्थक्येति**। [2]'व्यव-स्थायाम्' इत्यनेनैव तत्र सर्वनामसंज्ञाव्यावृत्तेरित्यर्थः। तर्हि को व्यवस्थाशब्दार्थः, अत आह — **यावद्द्रव्यमिति**। तथा च कुरुषूत्तरत्वस्य यावद्द्रव्यभावित्वाद्व्यवस्थासत्त्वेन सर्वनाम-संज्ञायाम् 'असंज्ञायाम्' इति वक्तव्यमिति भावः। 'दक्षिणा गाग्रकाः' इत्यत्रोक्तव्यवस्थाभावमाह — **दक्षिणा इति**। व्यवस्थाया अभाव इति विग्रहः। **संज्ञासु** तत्प्रतिपादकेषु पूर्वादिषु। तथा च तत्र सर्वनामसंज्ञा भवतीत्यर्थः। मर्यादावादिनामपि 'उत्तराः कुरवः' इत्यत्र व्यवस्थास्तीति 'असंज्ञायाम्' इति वक्तव्यमित्याह — **मर्यादेति**। **मेरुमिति**। मेरोर्दक्षिणतो जम्बूद्वीपस्य मेरु-संनिहितो देश उत्तरो व्यवस्थितः, तद्देशस्था अप्युत्तरा व्यवस्थिता इत्यर्थः। तर्हि कुरूनुत्तरेणा-सीनानाम् 'उत्तराः कुरवः' इति प्रयोगः कथम्, अत आह — **प्रयोगकाल इति**। **परस्परेति**। पूर्व इत्यस्य परसापेक्षत्वं पर इत्यस्य पूर्वसापेक्षत्वम्, इयमेव व्यवस्थेत्यर्थः। आक्षेपाभिप्रायमाह — **व्यवस्थेति**। उपलक्षणत्वाभावे हेतुः — **तस्या इति**। दिगसाधारणधर्मप्रवृत्तिनिमित्तकशब्द-त्वं दिक्शब्दत्वम्, व्यवस्थाप्रवृत्तिनिमित्तकत्वे [3]तत्त्वं न स्यादित्यर्थः। **निमित्तवतोऽपीति**। व्य-वस्थारूपनिमित्तेन दिग्वृत्तित्वेऽपि दिक्शब्दा इति दिश उपलक्षणत्वं संभवतीत्यर्थः। **अर्थस्य** दिग्रूपस्य। दृष्टान्तसाधारण्यार्थम् 'अर्थस्य' इत्युक्तम्। तत्र दृष्टान्तः — **तथा चेति**। [4]'तम-धीष्टो भृतो भूत भावी'। द्वितीयान्तात् कालवाचिनोऽधीष्टादिष्वर्थेषु ठञ्। षष्टिशब्दस्य संख्या-वाचिनः संख्यापुरस्कारेण यदा काले वृत्तिस्तदा कालशब्दत्वमस्तीति कालाट्ठञ् भवतीत्यर्थः। **गुणेति**। रमणीयेति क्रियानिमित्तः, शोभनेति गुणनिमित्तः। पूर्वादिशब्दानां देशकालयोरपि दर्शनाद् दिशं न व्यभिचरतीत्ययुक्तम्, अत आह — **व्यवस्थानिमित्त इति**। दिशि दृष्ट इति भाष्यं न विग्रहवाक्यमित्याह — **दिशि दृष्ट इति**। षष्ठीसमासे रमणीयादिव्यावृत्तिः कथम्, अत आह — **स्वरूपेति**। तदाश्रयणे हेतुः — **शब्दग्रहणादिति**। पूर्वादीनां दिङ्नामत्वेऽनिष्टं शङ्कते — **यदीति**। 'पौरुषेय' इति परिहारः। ननु दिग्वाचिनां व्यवस्थानिमित्तकत्वाभावे कथं सर्वनामसंज्ञा। शब्दप्रवृत्तिनिमित्तत्वाभावेऽपि वास्तविक्यस्तीत्यदोषः। **प्रवृत्तिनिमित्तेति**। प्राची दिगेका, प्रतीची दिगप्येकेत्यभिप्रायेणेदम्। प्रवृत्तिनिमित्तसत्त्वेऽपि दिश्यन्यत् स्वरूपविशेषरूपं प्रवृत्तिनिमित्तम्, अन्यत्र व्यवस्थेति समानायामाकृतावुक्तपुंस्कत्वाभाव उक्तः। एवं व्यवस्थाया-

---

[1] प्रदीपे 'मर्यादानपेक्षणात्' इत्यत्र 'मर्यादान-पेक्षात्' इति पाठोऽन्नंभट्टाभिमत इति भाति।

[2] पा. सू. १.१.३४.

[3] दिक्शब्दत्वमित्यर्थः।

[4] पा. सू. ५.१.८०.

मभिधेयायामित्यर्थे सर्वनामसंज्ञा न सिध्यति, अत आह — **व्यवस्थायामिति**। **अयमिति**। दक्षिणा चोत्तरा च पूर्वा चेति दिङ्मात्रवाचिनामभाषितपुंस्कानां द्वन्द्वः। **तद्धितेति**। दक्षिणस्या आगतः, दक्षिणत आगतः। ननु [१]'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति कथमत्र षष्ठीप्रसङ्गः, अत आह — **अन्यादियोग इति**। 'यतो ग्रामादन्यः' इत्यत्र पञ्चमीं बाधित्वा परत्वात् षष्ठी स्यादित्यर्थः॥

[४, १८८–१९०]

(नारायणीयम्) आकृत्यन्तरत्वमुपपादयति — **अन्येति**। एतदेव स्फोरयति — **दिशि वर्तमाना इति**। [२]**सर्वत्रैवेति**। उत्तरा दिगित्युक्ते कुत इत्यवश्यमवधेरपेक्षणीयत्वाद् दिश्यपि व्यवस्थैव प्रवृत्तिनिमित्तमिति सर्वत्रैकमेव प्रवृत्तिनिमित्तमिति लाघवं भवतीत्यर्थः। व्यवस्थाशब्दार्थं मतभेदेन दर्शयति — **व्यवस्था मर्यादेति**। मर्यादानपेक्षामुपपादयति — **कुरूनुत्तरेणेति**। य उत्तरकुरूणामुत्तरत आसते तेऽपि 'उत्तराः कुरवः' इति प्रयुञ्जते। मर्यादापेक्षायां तु 'दक्षिणाः' इति प्रयुञ्जीरन्। **प्रतिषेधानर्थक्येति**। [३]'व्यवस्थायाम्' इत्येव सिद्धत्वात्। **यावद्द्रव्यमनपाय इति**। धर्मिषु सत्सु धर्मस्यानपगम इत्यर्थः। तथा च कुरूणामुत्तरत्वं सर्वदा भवतीति यावद्द्रव्यमनपायाद्व्यवस्थासद्भावात् 'उत्तराः कुरवः' इत्यत्र [४]'असंज्ञायाम्' इति सर्वनामसंज्ञाप्रतिषेधोपपत्तिः। [५]'व्यवस्थायाम्' इत्यस्य च 'दक्षिणा गाथकाः' इति प्रत्युदाहरणमप्येवमुपपद्यत इत्याह — **सत्स्वेवेति**। इत्थं च दिगादिवृत्तीनां पूर्वादीनां सर्वनामसंज्ञाप्रवृत्तिः संज्ञायां निषेधश्च युज्यत इत्याह — **दिग्देशेति**। तर्हि 'व्यवस्था मर्यादा' इति केषांचिद्व्याख्यानमयुक्तमेवेति चेन्नेत्याह — **मर्यादालक्षणेति**। **परस्परापेक्षात्मस्थितिरिति**। पूर्वस्य पूर्वत्वं परमपेक्ष्य, परस्यापि परत्वं पूर्वमपेक्ष्येत्येवं परस्परापेक्षत्वम्। दिश उक्तानि दिक्छब्दोच्चारणेन विहितानि दिगपदिष्टानीति व्याचष्टे — **दिक्छब्देभ्य इति**। कथं तदसिद्धिरित्यत्राह — **व्यवस्थाशब्दत्वे हीति**। यच्छब्दप्रवृत्तिनिमित्तं तस्यैवोपलक्षणत्वं युक्तम्, नान्यस्येत्यर्थः। **निमित्तवतोऽपीति**। यद्यपि व्यवस्था प्रवृत्तिनिमित्तम्, तथापि तद्विशिष्टो योऽर्थो दिगाख्यस्तस्याप्युपलक्षणत्वं युक्तमेवेत्यर्थः। एतदेवोपपादयति — **तथा चेति**। **कालाधिकारेति**। [६]'तमधीष्टो भृतो भूतो भावी' इत्यत्र कालादित्यधिकारात्। तथा च [७]'तदस्य परिमाणम्' इत्यत्र [८]"जीवितपरिमाणे चेत्यनर्थकं वचनं कालादिति सिद्धत्वात्' इत्युक्तम्। यो हि षष्टिं वर्षाणि भूतः, तस्य षष्टिर्जीवितपरिमाणं भवत्येवेत्युपसंख्यानेन न प्रयोजनम्। **एतत्पक्षाश्रय इति**। यद्यर्थान्तरनिमित्ता दिशि वर्तमाना दिक्छब्दाः स्युस्तदातिप्रसङ्ग इत्यर्थः। एतदेव स्फोरयति — **रमणीयादयोऽपीति**। ननु सर्वत्र दिग्देशकालेषु व्यवस्थानिमित्तत्वाच्छब्दप्रवृत्तेः, 'दिशं यो न व्यभिचरति' इत्ययुक्तमुक्तमित्यत आह — **व्यवस्थानिमित्त इति**। 'दिशि दृष्टः शब्दो दिक्छब्दः' इति विग्रहे केन समास उत्तरपदलोपश्चेत्यत आह — **दिशि दृष्ट इत्यर्थप्रदर्शनमिति**। **दिशां शब्द इति त्विति**। दिशां ये

---

[१] परिभाषा १०३.
[२] प्रदीपे 'सर्वत्र व्यवस्थाशब्दाः' इत्यत्र 'सर्वत्रैव व्यवस्थाशब्दाः' इति पाठोऽभिमतः।
[३] पा. सू. १.१.३४.
[४] पा.सू. १.१.३४.
[५] पा. सू. १.१.३४.
[६] पा. सू. ५.१.८०.
[७] पा. सू. ५.१.५७.
[८] का. वा. ५.१.५७–४.
[९] प्रदीपे 'रमणीयादयो गुणक्रियानिमित्ताः' इत्यत्र 'रमणीयादयोऽपि गुणक्रियानिमित्ताः' इति पाठोऽभिमतः।

वाचका वाचकत्वेन दृष्टास्त इह दिक्छब्दा विवक्षिताः, न तु दिशमभिदधाना एवेति भावः। उक्तमर्थमुपपादयति — **स्वरूपव्यतिरिक्तेति**। अयमाशयः — 'पूर्वा दिक्' इत्युक्तेऽन्तर्णीतावधिभावनामधेयत्वेन रूढ्यार्थः प्रतीयत इति स्वरूपमेव तत्र प्रवृत्तिनिमित्तम्। 'पूर्वो ग्रामः, पूर्वो मासः' इत्यादौ तु कुत इत्यवश्यमपेक्ष्यत्वाद् ग्रामादिशब्दात् स्वार्थेऽवगते तदुपरि व्यवस्थां गमयति पूर्वादिशब्दः, न तु नामधेयमिति व्यवस्थैव देशकालयोः प्रवृत्तिनिमित्तम्। एतन्न्यायाश्रयेण पूर्वमुक्तम् 'दिशि वर्तमानाः पूर्वादयः' इत्यादि। **यद्येवमिति**। यदि रूढ्या दिशि वर्तते पूर्वादिशब्दस्तदा दिग्वाचिनां पूर्वादिशब्दानाम् [1]'असंज्ञायाम्' इति सर्वनामसंज्ञापर्युदासात् तत्कार्यं न स्यादिति चोद्यम्। परिहरति — **पोरुषेयेति**। डित्थादिशब्दसमानाः पूर्वादिशब्दाः [2]'असंज्ञायाम्' इत्यनेन पर्युदस्यन्ते, न तु रूढ्या ये वर्तन्ते, तेऽपीत्यर्थः। कथं पुंवद्भावाप्राप्तिरित्यत्राह — **दिशि वर्तमानानामिति**। स्वरूपव्यतिरिक्तप्रवृत्तिनिमित्तानाश्रयणादित्यर्थः। देशकालयोस्तु व्यवस्था प्रवृत्तिनिमित्तमिति समानाकृतित्वाभावः। नन्वेवं दिशि वर्तमानानां पूर्वादिशब्दानां व्यवस्थायां विधीयमाना सर्वनामसंज्ञा न स्यादित्याशङ्क्यामनूद्य परिहरति — **यद्यपीति**। **तथापि वास्तवीति**। यथा शोणशब्दो लोहित एवार्थे वर्तते, न तु लौहित्यं प्रवृत्तिनिमित्तत्वेनापेक्षते, अश्वविशेषे रूढत्वात्। यथा वा कृष्णशब्दो भगवति वासुदेवे रूढः, न तु कृष्णं गुणं निमित्तत्वेनोपादत्ते, एवं पूर्वादिशब्दोऽपि स्वरूपनिमित्तो दिशि वर्तते, अवधिं तूपाधित्वेन स्पृशतीति तदाश्रया सर्वनामसंज्ञा भवत्येवेत्यर्थः। अत्र हेतुमाह — **व्यवस्थायामिति** [3]**हीति**। ननु सूत्रे[णात्र कुतो न सिध्यतीत्यत आह — **अयमि]ति**। **दिग्वाचिनां चेति**। दक्षिणा चोत्तरा [च] पूर्वा चेति द्वन्द्वः। [4]'द्वन्द्वे च' इति सर्वनामसंज्ञानिषेधाद् 'दक्षिणोत्तरपूर्वाणाम्' इति सुडभावः। कथं पुनरनेन वचनेनात्र पुंवद्भावप्राप्तिरित्यत्राह — [भाष्ये] **वृत्तिमात्रेति**। मात्रशब्दः कात्स्न्र्यवचनः। ननु ['ततो ग्रामात्'] इत्यादौ [5]'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति सिद्धैव पञ्चमीत्यत आह — **अन्यादियोग इति**। 'ततो ग्रामादन्यः' इत्यादौ। [6]'निरनुबन्धकपरिभाषया तसिलादियोगे न भविष्यतीति चेत् यस्तर्हि निरनुबन्धकः [7]'प्रतियोगे पञ्चम्यास्तसिः' [8]'तेनैकदिक्' [9]'तसिश्च' इति, तत्र मा भूत्। 'अर्जुनतः प्रत्यभिमन्युः, सुदामतो विद्युत्' इति॥

दक्षिणादाच् ५.३.३६.

[४, १९२]

(विवरणम्) नन्वसंदेहाय[10] 'अञ्चूत्तरपदाह्यायुक्ते' इति करिष्यते, नार्थश्चकारेणेत्यत आह — **वाक्येति**॥

---

[1] पा. सू. १.१.३४.
[2] पा. सू. १.१.३४.
[3] प्रदीपे हिशब्दरहितः पाठो दृश्यते।
[4] पा. सू. १.१.३१.
[5] परिभाषा १०३.
[6] निरनुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषयेत्यर्थः।
[7] पा. सू. ५.४.४.
[8] पा. सू. ४.३.११२.
[9] पा. सू. ४.३.११३.
[10] आचि चकाराभावे 'आजाह्यियुक्ते' इत्यत्र सवर्णदीर्घेण निर्देशे सति 'आह्यियुक्ते' इति निर्देष्टव्यं स्यात्। तत्र केवल आहिप्रत्ययो निर्दिष्टो वा आसहितो वेति संदेहः स्यात्। तद्वारणाय आहिप्रत्ययात् पश्चादाप्रत्ययस्य घटनं करिष्यत इत्याशयः।

[४, १९२]

(**उद्द्योतनम्**) विशेषणस्य प्रयोजनमाह — **वाक्येति** ॥

[४, १९२]

(**नारायणीयम्**) **वाक्यस्मरणयोरिति**। ईषदर्थादौ यः सानुबन्धकस्तस्याननुबन्धकपरिभाषया[1] व्यावृत्तिः सिध्यतीति भावः ॥

संख्याया विधार्थे धा ५.३.४२.

[४, १९२–१९३]

(**विवरणम्**) **धातुकृत इति**। धातुशब्देन धात्वर्थं उच्यते। तेन द्रव्यं कारकं क्रियते, क्रियापेक्षत्वात् कारकव्यपदेशस्येति भावः। **भेदकः** व्यावर्तकः ॥

[४, १९२–१९३]

(**उद्द्योतनम्**) लोकव्यवहारगम्येऽर्थे प्रश्नायोगः, अत आह — **यदेति**। **अनेकेति**। अन्नाद्यर्थत्वादित्यर्थः। ह्रस्वदीर्घयोः सन्ध्यविशेषाद् विधशब्दो विधाशब्दो वेति प्रश्न इत्यर्थः। अतिप्रसङ्गानुद्धारादाह — **आचार्येति**। अत्र विधाशब्दार्थमाह — **अन्नमिति**। क्रियारूपो धात्वर्थः प्रसिद्ध इति प्रश्नायोगः, अत आह — **किमिति**। धातुशब्दो धात्वर्थवाची, तेन कृतः कारकत्वेनाभिमतार्थो धात्वर्थः, धातोर्वाच्यो वेति विकल्पार्थः। अत्र न क्रियापृथक्त्वम्, अत आह — **कालपृथग्भावादिति**। ननु धात्वर्थपृथग्भावप्रश्नस्य क्रियास्वरूपकथनं नोत्तरम्, व्यधिकरणत्वात्, अत आह — **पूर्वपदार्थेति**। 'कस्तर्हि धात्वर्थपृथग्भावः' इत्यत्र समासे पूर्वपदार्थस्य धात्वर्थस्यैव प्रश्नः, न पृथग्भावस्य। तस्मिन् ज्ञाते तस्य सुज्ञानत्वात्। ततश्च को धात्वर्थ इति प्रश्नस्य क्रियेत्युत्तरं न व्यधिकरणमित्यर्थः। 'पञ्चधा' इत्यादौ क्रियापृथक्त्वं दर्शयति — **तत्रेति**। गच्छतीत्यनेन भेदानवगमात् 'निवृत्तभेदायाः' इत्युक्तम्। 'यद्येवम्' इत्यनेन वार्तिकन्यासे किमुच्यते, अत आह — **सूत्रेति**। कारकादिपृथक्त्वेऽतिप्रसङ्गनिरासः कथम्, अत आह — **तथा हीति**। 'पञ्चधा गच्छति' इत्यादौ गमनसामान्यस्य प्रकारभेदः प्रत्ययेनाप्युच्यत इत्यर्थः। सूत्रवार्तिकयोर्भिन्नप्रयोजनत्वान्न सूत्रेण वार्तिकान्यथासिद्धिरिति शङ्कते — **नन्विति**। **न भाव्यमिति**। क्रियाया अभावेन तत्पृथक्त्वाभावात्। वार्तिकन्यासे 'एकधा' इत्यपि न भाव्यम्, अत आह — **एकधा भुङ्क्त इति**। सूत्रवार्तिकयोः फलाभेदमाह — **नैष इति**। **अस्तीति**। [2]'अस्तिर्भवन्तीपरः' इति न्यायात्। प्रकारस्य विवक्षाविवक्षाभ्यां प्रत्ययस्य भावाभावौ दर्शयति — **एकः पाक इति** ॥

---

[1] निरनुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषयेत्यर्थः।

[2] का. वा. २.३.१–११.

[४, १९२–१९३]

(**नारायणीयम्**) पूर्वपक्षसिद्धान्तौ संगृह्य दर्शयन् विचारस्य प्रयोजनं तावदाह — **यदा विधाशब्द इति**। **तस्यानेकार्थत्वादिति**। विधाशब्दस्यान्ने प्रकारे च वर्तनात्। **तस्यैकार्थत्वादिति**। विधशब्दस्य हि प्रकार एवार्थः, नान्यः। **आचार्यदेशीयवचनमिति**। न तु सिद्धान्तिनो वचनम्। कथं पुनः 'धात्वर्थपृथग्भावः' इत्यनेन कारकपृथग्भावे प्राप्तिः स्यादित्यत आह — **किं धातुकृतोऽर्थ इति**। धातुशब्देन धात्वर्थ उच्यते, धात्वर्थकृतोऽर्थो धात्वर्थ इति मध्यमपदलोपी समासः। धात्वर्थो हि स्वसिद्धये कारकमाक्षिपतीति तत्कृतत्वमुच्यते। कथं पुनः क्रियापृथग्भावे विधीयमानः कालपृथक्त्वे स्यादित्यत आह — **कालपृथग्भावादिति**। एवं गुणपृथक्त्वेऽपि द्रष्टव्यम्। ननु धात्वर्थपृथग्भावविषयः प्रश्नः, धात्वर्थविषयं प्रतिवचनमिति तयोरानुरूप्याभाव इत्यत आह — **पूर्वपदार्थेति**। कथं पुनः क्रियापृथग्भावे विधीयमानेन धाप्रत्ययेन प्रकारार्थो द्योतितः स्यादित्यत आह — **तत्र पञ्चधेति**। **शब्देन निवृत्तभेदाया इति**। वस्तुतो भेदेऽप्याख्यातान्निवृत्तभेदा सर्वैव क्रिया प्रतीयते। तथा चोक्तम् —

[1]'निवृत्तभेदा सर्वैव क्रियाख्याते [2]प्रतीयते।
श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना॥' इति॥

ननु सूत्रन्यासे गुणादिपृथक्त्वेऽपि प्रत्ययः स्यात्। वार्तिकन्यासे तु तत्र न भवतीति फलभेद इत्यत्राह — **तथा हीति**। **न चेति**। वस्तुतः सत्त्वेऽपि शब्देन न किंचित् सामान्यं संगृहीतमित्यर्थः। सूत्रवार्तिकन्यासयोः फलभेदमाशङ्क्य परिहरति — **ननु सूत्रन्यास इति**। **वार्तिकन्यासे तु नेति**। क्रियाया आश्रयणात्। **एकधा भुङ्क्त इति चेति**। वार्तिकन्यास इत्यनुकृष्यते। [3]**अस्तिक्रियानुषङ्गादिति**। तेन श्लोकभवनलक्षणायाः क्रियायाः पञ्चत्वसंख्या भेदिकेति क्रियापृथग्भावोपपत्तिः। यद्यप्येकधा भुङ्क्त इत्यत्र श्रुतायाः क्रियायाः स्वगतो भेदो न प्रतिपन्नः, तथापि शब्दान्तरवाच्यक्रियापेक्षः पृथग्भावोऽस्त्येवेति तदाश्रयः प्रत्यय इत्याह — **एकधेति**। नन्वेकधा भुङ्क्त इतिवत् 'एकः पाकः' इत्यादावपि [4]लक्षणद्वयेऽपि प्रत्ययः स्यादित्यत्राह — **एकः पाक इति**। **प्रकारस्याविवक्षितत्वादिति**। पाकव्यक्तेरेकत्वमत्र विवक्षितम्, न त्ववावान्तरभेदाभावादेकप्रकारत्वमिति प्रत्ययो न भवतीत्यर्थः। **भिन्ना एव पाका इति**। शब्देन सामान्यस्यानिर्देशात् प्रकारलक्षणपृथग्भावाप्रतीतेस्तत्र प्रत्ययाभाव इत्यर्थः॥

एकद्वो ध्यमुञन्यतरस्याम् ५.३.४४.

[४, १९४]

(**उद्द्योतनम्**) पुनर्धाग्रहणस्य प्रयोजनमाह — **धाग्रहण इति**। ननु [5]'अधिकरणविचाले' इत्येवात्र प्रत्यये सति तस्य [6]'ध्यमुञादेशः सिध्यति, अत आह — **इहेति**। तर्हि सूत्रस्य को

---

[1] वाक्यपदीयम् २.४५१.
[2] 'अभिधीयते' इति वाक्यपदीये पूनामुद्रिते दृश्यते।
[3] प्रदीपे 'अस्तीति क्रियापदानुषङ्गात्' इत्यत्र 'अस्तिक्रियानुषङ्गात्' इति पाठोऽभिमतः।
[4] सूत्रवार्तिकरूपेत्यादिः।
[5] पा. सू. ५.३.४३.
[6] धमुञादेशः — लृ.

विषयः, अत आह — **वचनं त्विति**। वचनसामर्थ्यादेव विधार्थधाग्रहणे सिद्धेऽत्र धाग्रहणं व्यर्थं स्यात्, अत आह — **धाग्रहणमिति**। [1]'द्वित्र्योश्च धमुञ्' इत्यत्रानुवृत्त्यर्थमित्यर्थः। उत्तर-[2]सूत्रानुवृत्तेः प्रयोजनं दर्शयति — **द्वैधमिति**। अधिकरणविचालेऽपि तत्र प्रयोजनमित्याह — **एकं राशिमिति**। वस्तुतस्तु [3]'अधिकरणविचाले च' इति सूत्रमनेकस्यैकीकरण एव धाविधानार्थ-मिति 'सहभावे' इति न वक्तव्यमित्याह — **अनेकस्येति**॥

[४, १९४]

(नारायणीयम्) ननु प्रकरणादेव धाप्रत्ययस्य ध्यमुञ्नि सिद्धे 'धः' इति स्थानिनिर्देशोऽनर्थक इत्याशङ्क्य तत्फलमाह — **धाग्रहण इति**। ननु 'ऐकध्यं राशिं कुरु' इत्यत्र [4]'अधिकरणविचाले च' इति विहितस्य धाप्रत्ययस्य ध्यमुञ् सिद्ध इति किमर्थो वार्तिकारम्भ इत्याशङ्क्य तत्प्रयोजनं वक्तुमारभते — **इहाधिकरणेति**। ननु वचनस्य [विधार्थत्वेऽपि] 'धः' इत्यनर्थकं स्यादित्यत्राह — **धाग्रहणं त्विति**। **द्वयोरर्थयोरिति**। अधिकरणविचाले विधार्थे च धाप्रत्ययस्य द्वित्रिसंबन्धिनो धमुञ् यथा स्यादित्येवमर्थमित्यर्थः। अन्यथानन्तरस्यैव स्यात्। **अधिकरणं द्रव्यमिति**। जात्या-द्याधारत्वात्। **विचालोऽन्यथाकरणमिति**। विचालनं विचालः, ण्यन्तात् 'एरच्'[5]। तच्चेह संनिधानात् संख्यान्तरापादनेनेत्याह — **तच्चेति**। **तत्र प्रकाराभावादिति**। 'अनेकं राशिमेकधा कुरु' इत्यत्र सामान्यस्य भेदको धर्मो न प्रतीयत इत्यर्थः। **एकस्यानेकीकरण इति**। 'एकं राशिं पञ्चधा कुरु' इत्यत्रैकस्य राशेः सामान्यभूतस्य पञ्चराशित्वलक्षणभेदकधर्मसंभवात् प्रकारा-र्थविहितधाप्रत्ययस्य सिद्धत्वादित्यर्थः॥

द्वित्र्योश्च धमुञ् ५.३.४५.

[४, १९४–१९५]

(उद्द्योतनम्) ननु 'द्वैधम्' इत्यस्यासत्त्वार्थकत्वात् [6]'स्वार्थिकडान्तस्य कथं लिङ्गसंख्यायोगः, अत आह — **स्वार्थिकत्वेऽपीति**। **द्वैधानीति**। बहुवचनमेकशेषेण, न तु तत्रैवेति भ्रमः कार्य इत्याह — **तत्रेति**॥

[४, १९४–१९५]

(नारायणीयम्) ननु धमुञ्न्तात् स्वार्थविहितडप्रत्ययान्तस्य कथम[न]व्ययत्वमित्यत्राह — **स्वार्थिकत्वेऽपीति**। **स्वभावादिति**। शब्दशक्तिस्वाभाव्यात्। यथैकस्मिन्नेवार्थे विधीयमानयो-रण्तसोरेकस्याव्ययत्वमितरस्य न, 'पीलुमूलतः, पैलुमूली' इति। **तत्रैकशेषेणेति**। पथो द्वैधं पथिद्वैधम्, ततः प्रचयविवक्षायामेकशेषः॥

---

[1] पा. सू. ५.३.४५.
[2] सूत्रे यानुवृत्तिस्तस्या इत्यर्थः।
[3] पा. सू. ५.३.४३.
[4] पा. सू. ५.३.४३.
[5] पा. सू. ३.३.५६.
[6] स्वार्थिकडप्रत्ययान्तस्येत्यर्थः।

याप्ये पाशप् ५.३.४७.

[४, १९५]

(**उद्द्योतनम्**) ननु याप्यशब्दस्य कुत्सितार्थकत्वाद् वचनं व्यर्थम्, अत आह — **याप्यशब्द इति**। तर्हि शोभनेऽपि वैयाकरणे पाशप् स्यात्, अत आह — **कुत्सितत्वेनेति**। **एतच्च** प्रवृत्तिनिमित्तकुत्सितत्वम्। अन्तरङ्गत्वमेवाह — **प्रवृत्तिनिमित्तस्येति**। तर्हि [१]'कुत्सिते' इति सूत्रेण कुत्सितोऽश्वोऽश्वक इति कन्प्रत्ययो न स्यात्, अश्वत्वजातेः प्रवृत्तिनिमित्तस्य [२]कुत्सासंभवात्, अत आह — **यत्र त्विति**। अन्तरङ्गस्यासंभवे बहिरङ्गस्यापि ग्रहणं प्रयोगानुसाराद्युक्तमित्यर्थः। कुत्सने 'देवदत्तपाशः' इत्यादिप्रयोगो लोके नैवास्ति, अस्ति चेदिष्यत एवेत्याह — **एवं चेति**॥

[४, १९५]

(**नारायणीयम्**) **अस्त्यपादानसाधन इति**। ण्यन्ताद्यापेः [३]'कृत्यल्युटो बहुलम्' इत्यपादाने [४]'अचो यत्'। **गुणः** विशेषणं जात्यादिकम्, न च तन्मात्रे प्रत्यय इष्यत इत्याशङ्क्याह — **कुत्सितत्वेनेति**। कथं पुनरयं विशेषः सूत्रेण लभ्यत इत्यत्राह — **एतच्चेति**। **प्रवृत्तिनिमित्तस्येति**। शब्दवाच्यत्वात्। धर्मान्तरं तु वस्तुतः सदपि न शब्देन स्पृश्यत इति बहिरङ्गम्। तर्हि सर्वत्रायं नियम इति चेत्, नेत्याह — **यत्र त्विति**। न ह्यश्वत्वादिजातेः कुत्सितत्वम्, तस्याः सर्वत्राविशेषात्। **एवं चेति**। यत्र स्वरूपं प्रवृत्तिनिमित्तं तत्र तस्य कुत्सितत्वायोगेऽपि सहचरितगुणाद्याश्रयः स प्रत्ययः सत्यभिधाने भवतीत्यर्थः॥

एकादाकिनिच्चासहाये ५.३.५२.

[४, १९६–१९७]

(**विवरणम्**) वचनान्तरेण वचननिरासे को विशेष इत्याशङ्क्य शङ्कोत्तरत्वेनावतारयति — **कथं पुनरिति**। ननु 'एकाग्नयः' इत्यत्र यद्यसहायवाचक एकशब्दस्तदाकिनिच् प्राप्नोतीत्यत आह — **अत्रेति**॥

इति प्रदीपविवरणे पञ्चमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम्

[४, १९६–१९७]

(**उद्द्योतनम्**) असहायार्थत्वे वचनानर्थक्यादाह — **एकशब्द इति**। सूत्रे 'असहाये' इत्यभिधेयनिर्देशात् कथं संख्यावाचित्वनियमः, अत आह — **असहायेति**। **तदर्थस्य** एकशब्दार्थस्य,

---

[१] पा. सू. ५.३.७४.
[२] कुत्साया असंभवादित्यर्थः।
[३] पा. सू. ३.३.११३.
[४] पा. सू. ३.१.९७.

एकत्वयुक्तस्य। विशेषणस्य कृत्यमाह — **अविद्यमानेति**। अविद्यमानस्तुल्यजातीय एकस्मिन् कार्ये सहायो यस्यैकार्थस्य तद्वाचिन इति विग्रहः। अदृष्टेश्वरादेः सर्वत्र सहायत्वात् 'तुल्यजातीय' इति। शूरस्यायुधादिभारवाहकसजातीयसहायत्वे सत्यपि 'एकाकिना जितम्' इति प्रयोगदर्शनादाह — **एकस्मिन् कार्य इति**। **एकमाकाशमिति**। आकाशत्वेन तुल्यस्य वस्त्वन्तरस्य व्यावर्त्यस्याभावेन तत्रासहाय इति विशेषणाभावान्न प्रत्यय इत्यर्थः। अन्यथैकत्वसत्त्वात् प्रत्ययप्रसङ्ग इति भावः। पूर्वास्वरसेन 'सिद्धं तु' इति वार्तिकमित्याह — **कथं पुनरिति**। **इत्याह** इत्यत आह। षष्ठीसमासभ्रमं वारयति — **संख्यैवेति**। एकशब्दः संख्याशब्देनोक्तः। [1]'असहायस्य वा' इत्येतद् व्याचष्टे — **असहायस्य** [2]**वेति**। असहायस्यादेशपक्षे द्विबह्वादेशापेक्षया लाघवं सूचयितुमाह — **द्विबहुशब्दयोरिति**। अर्थान्तरमप्यस्तीत्याह — **उपलक्षणमिति**। [3]'एकेऽल्पप्राणाः', [4]'एको गोत्रे' इत्यत्रैकशब्दस्य प्राथम्यवाचित्वम्, [5]'एकदिक्' इत्यत्र समानवाचित्वम्, [6]'एकः पतिः' इत्यत्र साधारणवाचित्वम्। असहायप्रतीत्यर्थमाह — **आकिनिच इति**। **कनो वेति**। चकारेण कनोऽप्यनेन विधानात्। **लुगिति**। पूर्वसूत्राल्लुग्ग्रहणमनुवर्तते, [7]'विभाषा परावराभ्याम्' इत्यतो विभाषाग्रहणं च। तेन व्यवस्थितविभाषयात्र लुगित्यर्थः। भाष्यकारवचनप्रामाण्याल्लुगित्यन्ये। सूत्रेऽसहाय इति प्रकृत्यार्थनिर्देश इति समुदायतात्पर्यम्॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने पञ्चमाध्यायस्य तृतीयपादे प्रथममाह्निकम्

[४, १९६–१९७]

(नारायणीयम्) पूर्ववादिन आशयं दर्शयति — **एकशब्द इति**। 'मन्यते' इत्यनेन न्यायाभासावष्टम्भेन सर्वत्र पूर्वपक्षोत्थानमिति दर्शयति। नन्वेवमसहाय इत्यर्थनिर्देशोऽनुपपन्न इत्यत आह — **असहायेति**। विशेषणकृत्यं दर्शयति — **अविद्यमानेति**। तुल्यजातीयः **एककार्यः** एकप्रयोजनः यः सहायः सोऽविद्यमानो यस्यार्थस्य तद्वाचिन इत्यर्थः। यत्र च सहायसंभवस्तत्रैवासहायव्यवहार इति 'एकाकी देवदत्तस्तिष्ठति' इत्यादावेव प्रत्ययो भवति, न तु 'एक आत्मा' 'एकमाकाशम्' इत्यादाविति, तदाह — **एकमाकाशमिति**। 'सिद्धं तु' इति पूर्वोक्तेऽर्थे या शङ्का जायते तस्या उत्तरवचनम्, न तु सिद्धान्तोक्तिरिति दर्शयितुमाह — **कथं पुनरिति**। **संख्यैवेति**। समानाधिकरणसमासोऽयम्, न तु षष्ठीसमासः, उत्तरवार्तिकेऽनन्वयप्रसङ्गात्। उक्ते समासे त्वन्वयोपपत्तिरित्याह — **स चेति**। **असहायग्रहणं विशेषणमिति**। परस्परव्यतिरिक्तसहायाभावेनासहायत्वं द्वयोर्बहूनामप्युपपद्यते। **अत्राकिनिचः कनो वेति**। अत्र चकारेण कन्लुकोरपि[अनुवृत्त्याश्र]येण [पक्षे तयोर्लुग् भव]ति॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य
तृतीये पादे प्रथममाह्निकम्

---

[1] असहायेनेत्यतत् — लृ.
[2] चेति — लृ.
[3] महाभाष्यम् १.१.९.
[4] पा. सू. ४.१.९३.
[5] पा. सू. ४.३.११२.
[6] एकमतिः — लृ.
[7] पा. सू. ५.३.२९.

पञ्चमाध्यायस्य तृतीयपादे द्वितीयमाह्निकम्

अतिशायने तमबिष्ठनौ ५.३.५५.

[४, १९७–२०४]

(विवरणम्) किमयं ण्यन्तस्येति। ण्यर्थासंभवादिति भावः। **आहोस्विदिति**। अण्यन्तपक्षेऽतिशायनरूपासंभवादिति भावः। वाक्यभेदपरिहारायासांगत्यपरिहाराय चोक्तम् — **प्रसङ्गेनेति**। ननु मूर्तस्य परिमाणम्। ब्रूञर्थश्च क्रियात्वादमूर्तः, ततश्च तद्विशेषणाभ्यां यत्तच्छब्दाभ्यां परिमाणोपाधिकत्वाभावाद्वतुबनुपपन्न इत्यत आह — **यावदिति**। ननु यद्यत्र प्रकर्षेऽतिः, शेतिश्च स्व ने, ततोऽतिशायनाभावात् शुक्लतराद्यनुपपत्तिः। अतः शेतिः प्रकर्षे, ततः शेतिनैव गतार्थत्वादतेर्वैयर्थ्यमित्यत आह — **अनेकार्थत्वादिति**। **द्रव्यवाचिनीति**। ङ्याप्प्रातिपदिकाधिकारात् ङ्याबन्तात् तद्धितस्य विधानात् [1]तस्य ह्रस्वविधानात् सप्तम्या अलुग्विधानाच्च द्रव्यवाचिन्यपि प्रकृतिर्गृह्यत इति भावः। **द्रव्यसमवेता इति**। ततश्च द्रव्याभेदेन प्रतीयमानाः स्वप्रकर्षेण द्रव्यं रञ्जयन्तीति युक्तमिति भावः। ननु गुणादेरपि ङ्याप्प्रातिपदिकार्थभावाद् द्रव्यमित्येवं वाचोयुक्तिरयुक्तेत्यत आह — **इदमिति**। **क्रिया इति**। पाक इत्यादौ। ननु गुणस्यापि इदंतदिति सर्वनामपरामर्शयोग्यत्वेन द्रव्यत्वात् तस्य च शुक्लतर इत्यादौ प्रकर्षस्य दर्शनात् 'न वै द्रव्यस्य' इत्ययुक्तमित्यत आह — **यद्वस्त्विति**। **स्वत इति**। अशुक्लस्यापि भावात् पट इत्यतो भेदेन व्यपदेशायोगाच्च। **नापीति**। शुक्ल इति प्रतीतिव्यपदेशयोगादिति भावः। नामजात्यादिभिर्विना **अव्यपदेश्यस्य** शब्दव्यवहाराविषयस्य, **अरूपं** स्वतोऽतत्स्वरूपम्, **पररूपेण** स्वव्यतिरिक्तगुणादिरूपेण, स्वतोऽप्रकर्षं गुणस्य प्रकर्षेण प्रकृष्टमपीष्यत इति योजना। ननु तर्ह्यन्धा अपि काणा इति व्यपदिश्येरन्नित्यत आह — **न त्विति**। ननु भवितव्यमेव महीयान् हिमवानिति, अत आह — **सर्षपादिति**। कस्य गुणस्य तर्हि प्रकर्ष इति भ्रमं व्युदस्यति — **प्रश्न इति**॥

[४, १९७–२०४]

(उद्द्योतनम्) कश्चेह शेत्यर्थ इति। शीङ्धात्वर्थः क इत्यर्थः। **निपातनादिति**। अण्यन्तादेव ल्युटि निपातनाद्दीर्घ इत्यर्थः। [2]'यत्तदेतेभ्यः' इति परिमाणविहितवतुबन्तस्य परिमाणरहिते कथं प्रयोगः, अत आह — **यावदिति**। स्वप्नार्थस्य शीङः प्रकर्षार्थित्वं कथम्, अत आह — **अनेकेति**। निपातानां वाचकत्वाभावादाह — [3]**अतिशब्द इति**। धातोर्विरुद्धानेकार्थत्वमपि दृश्यते, किमुताविरुद्धानेकार्थत्वमित्याह — **यथेति**। **द्रव्यवाचिनीति**। 'शुक्लतमः पटः' इत्यादौ। **सुबन्तेति**। सुबन्तार्थवृत्तिभिरित्यर्थः। **यदुक्तमिति**। [4]"स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्। समवेतस्य च वचने लिङ्गं संख्यां विभक्तिं च। अभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानम्। प्रियकुत्सनादिषु ततः प्रवर्ततेऽसौ विभक्त्यन्तः॥' इत्यत्रेत्यर्थः। सूत्रकृतोऽपि

---

[1] घरूपेत्यादिना ङ्यन्तस्य ह्रस्वविधानादित्याशयः।

[2] पा. सू. ५.२.३९.

[3] प्रशब्द इति — लृ.

[4] महाभाष्यम् ५.३.७४.

सुबन्तादेवातिशायनिकोत्पत्तिरभिमतेत्याह — **घकालेति**। घे परतः सप्तम्या अलुग्विधानात् सुबन्तादेव तमबाद्युत्पत्तिरित्यर्थः। ङ्याप्प्रातिपदिकग्रहणं प्रकृतिमात्रोपलक्षणमिति समाधानम्। शब्दस्यापि प्रकर्षसत्त्वात् 'न च' इत्ययुक्तम्, अत आह — **शब्दस्येति**। अभिधेयप्रतिपत्त्यर्थत्वाच्छब्दस्याभिधेयं प्रधानम्, शब्दो गुणभूतः, प्रधानप्रकर्षे प्रत्ययः, नोपसर्जनस्य, तस्य प्रकर्षानाकाङ्क्षत्वादित्यर्थः। **उपकारं** प्रकर्षरूपम्। शब्दस्य प्राधान्ये प्रकर्षयोगो भवत्येवेत्याह — [1]**यदेति**। ननूपसर्जनशुक्लादिप्रकर्षाश्रयेण यथा प्रत्ययः शुक्लतर इति तथा शब्दप्रकर्षाधीनद्रव्यप्रकर्षेऽप्यस्त्विति शङ्कते — **ननु चेति**। शब्दस्य शुक्लादिगुणवैषम्येणोत्तरम्। तार्किकद्रव्यग्रहणे जातिगुण [क्रिया] प्रतिपादकानां संग्रहो न स्यादिति सत्त्वं द्रव्यमित्याह — **यत्किंचिदिदमिति**। **स्वातन्त्र्येण** प्राधान्येन। ननु 'शुक्लतरं रूपम्' इत्यत्र गुणस्य प्रधानस्य प्रकर्षो दृश्यते, अत आह — [2]**तथा हीति**। **निमित्तान्तरात्** शुक्लत्वावान्तरजातिविशेषात्। गुणशब्दस्य रूपादिपरत्वे 'पाचकतमः' इति न स्यात्, अतो धर्ममात्रपरत्वमित्याह — **आश्रित इति**। वाहदोहादीनामप्रवृत्तिनिमित्तानां 'गोतरा, गोतमा' इत्यादौ प्रत्ययनिमित्तत्वदर्शनादाह — **स च कश्चिदिति**। गुणस्य पटे शुक्लशब्दप्रवृत्तिनिमित्तत्वमाह — **पटस्येति**। यथा रूपस्य शुक्लत्वं स्वतस्तथा न पटस्येत्यर्थः। **नाप्यशुक्लत्वमिति**। अशुक्ल [रूप]मित्यर्थः। [3]'नञ्निवयुक्त'न्यायेन शुक्लसदृशमुच्यते। न च द्रव्यस्य गुणसादृश्यमिति शुक्लरूपाभावेनाशुक्लशब्दः पटे प्रयुज्यत इति भावः। [4]**व्यपदेशहेतुः** व्यपदेशयोर्हेतुः। व्यपदेशस्येव प्रकर्षस्यापि हेतुरित्येवंशब्दार्थः। **द्रव्यस्याव्यपदेश्यस्येति**। शब्दस्य निर्विकल्पकजनकत्वाभावात् किंचिद्धर्मविशिष्टमेव द्रव्यं सर्वत्र शब्देनोच्यत इत्यर्थः। **भेदकः** व्यावर्तकः। अनेन गुणशब्दो व्यावर्तकधर्ममात्रपर इति सूचितम्। **अभिधीयते** प्रत्ययेन। ननु गुणस्योपसर्जनत्वात् कथं तत्प्रकर्षप्रत्ययः, अत आह — **अरूपमिति**। **पररूपेण** शुक्लादिस्वरूपेण, [5]'स्वयमेवाप्रकर्षमपि गुणस्य प्रकर्षेण युक्तमभिधीयते, गुणद्रव्ययोरत्यन्तभेदाभावात्। गुणप्रकर्ष एव द्रव्यप्रकर्ष इति भावः। भाष्ये 'गुणस्य' इति सामान्योक्त्या तटस्थगुणप्रकर्षेऽपि प्रत्ययप्रसङ्गः, अत आह — [6]**इहेति**। प्रकृत्योपस्थितत्वम् **अन्तरङ्गत्वम्**। क्रियाशब्दानां क्रियाप्रकर्षे प्रत्यय इत्याह — **पाचकादिभ्य इति**। जातिशब्देषु प्रवृत्तिनिमित्तप्रकर्षाभावात् बहिरङ्गप्रकर्षे प्रत्यय इत्याह — **जातिशब्देभ्य इति**। सहचरितमात्रप्रत्ययप्रसङ्गं निराह — **प्रसिद्धेति**। उक्तमेवार्थं संमत्यन्तरेण द्रढयन्नाह — **उपाधीति**। **सर्वस्य** रूपादेरपीत्यर्थः। ननु गुणवत् द्रव्यस्यापि स्वरूपेण प्रकर्षसंभवाद् यत्नेनोपाधिप्रकर्षाधीनः प्रत्ययः कथमुच्यते, अत आह — **तत्र वास्तव इति**। द्रव्यस्वरूपप्रकर्षे [7]प्रयोगादर्शनादिति भावः। ननु 'प्रकर्षे प्रत्ययानङ्गीकारे [8]'किमेत्तिङव्यय' इत्यत्र 'अद्रव्यप्रकर्षे' इति व्यर्थम्, अत आह — **अद्रव्येति**। तत्र द्रव्यशब्देन तार्किकाभिमतं द्रव्यं गृह्यते, न तु सत्त्वं द्रव्यम्। ततश्च 'उच्चैस्तमस्तरुः' इत्यत्रोच्चैस्त्वगुणगतप्रकर्षो यदा द्रव्ये विवक्ष्यते तदा [9]नामित्यर्थः। ननु द्रव्यस्य स्वतः प्रकर्षो नास्तीत्युक्तम्, ततश्च 'कुत

---

[1] यथेति — लृ.
[2] तदा हीति — लृ.
[3] परिभाषा ७५.
[4] प्रदीपे 'व्यपदेशे हेतुः' इत्यत्र 'व्यपदेशहेतुः' इत्यन्नंभट्टपाठः।
[5] स्वयमेवेत्यत्र एवकारोऽधिको भाति।
[6] प्रदीपे 'यद्यपि तत्र द्रव्ये' इत्यत्र 'इह यद्यपि' इति पाठोऽन्नंभट्टाभिमत इति भाति।
[7] प्रयोगदर्शनादिति — लृ.
[8] द्रव्यप्रकर्ष इत्यर्थः।
[9] पा. सू. ५.४.११.
[10] आम् नेत्यर्थः।

एतत्' इत्ययुक्तम्, अत आह — **यथेति**। नित्यगुणस्य स्वत एव प्रकर्षवत् द्रव्यस्यापि स्वतः प्रकर्षोऽस्तीति शङ्कित्राशय इत्यर्थः। द्रव्यस्य स्वतः प्रकर्षे विद्यमानेऽप्यनभिधानात् तत्र प्रत्ययो न भवतीत्युक्तत्वात् 'मन्यते' इत्युक्तम्। ननु द्वयोः साधारणधर्मवत्त्वेनोपस्थितयोरवान्तर-विशेषातिशये प्रत्ययः। शुक्लकृष्णयोः साधारणधर्मवत्त्वेनानुपस्थितत्वात् कथं प्रकर्षप्रत्यय-प्राप्तिः, अत आह — **द्वयोरिति**। परिपूर्णत्वं समानधर्मः। यद्यपि शब्दात् तत्प्रतीतिर्नास्ति, तथाप्यर्थात् प्रतीत्या प्रत्ययप्रसङ्गं मन्यते। समानगुणग्रहणेऽव्याप्तिशङ्कार्थम् 'अध्वर्युः' इति भाष्यम्। तस्याशयमाह — **अध्वर्योरिति**। अत्र समानगुणत्वं वर्तत इति प्रतिपादनाय 'समानगुणे' इति भाष्यम्। तत्र बहुव्रीहिः, सप्तम्यन्तं च पदमित्यभिप्रेत्य व्याचष्टे — **समानगुण इति**। लोक-प्रसिद्धम् एकनेत्रत्वम्। **राजा** श्रेष्ठः। अत्र किमनिष्टम्, अत आह — **महीयानिति**। जातेः प्रकर्षाभावात् प्रतिषेधो व्यर्थः, अत आह — **आश्रयेति**। नन्वयं गुणः शब्दप्रवृत्तिनिमित्तं न भवतीति कथं तत्प्रकर्षे प्रत्ययः, अत आह — **अभिधेयेति**। गवादिशब्दानां गुणसमुदायवाचित्व-मते शब्दार्थस्यैव प्रकर्षः संभवतीत्याह — **केचित्त्विति**। प्रधानगतप्रकर्षसंभवे गुणगतो न ग्राह्य इति शङ्कते — **नन्विति**। **एवं मन्यत इति**। 'शुक्लतरः' इत्यादावुपसर्जनगुणप्रकर्षेणापि प्रत्यय-दर्शनान्न प्रधानगतप्रकर्षनियम इति भावः। 'नैते दोषाः' इति वक्तव्ये नैष इति कथम्, अत आह — **बहूनामपीति**। **उपाधिनिर्देशस्य** प्रकर्ष इति विशेषणनिर्देशस्य। 'गुणान्तरं [च] खल्वपि' इत्यस्य पूर्वस्माद् भेदमाह — **पूर्वमिति**। 'कृष्णे' इत्यस्य प्रत्ययार्थत्वनिषेधभ्रमं वारयति — **कृष्ण इति**। तयोरपि श्रेयस्त्वादिधर्मान्तरेण स्पर्धा संभवति, अत आह — **स्पर्धाहेतोरिति**। **शब्दाश्रितः** शब्दोपात्तः। 'शुक्लात् कृष्णे' इत्यत्रापि स्पर्धाहेतुगुणस्य शब्दोपादाने प्रत्ययो भव-त्येवेत्याह — **शुक्लकृष्णयोरपीति**। शुक्लतरशब्दात् कृष्णादतिशयाप्रतीतिमुपपादयति — **शुक्ल-तर इत्युक्त इति**। [1]शुक्लगुणान्तरापेक्षः प्रकर्षो यस्य शुक्लगुणस्य तन्निमितद्रव्यप्रकर्षोऽवगम्यते, न तूज्ज्वलत्वनिमित्त इत्यर्थः। **अदूरं** संनिकृष्टम् अन्तरं तारतम्यं ययोरिति विग्रहः। यथा-श्रुतेऽनुपपत्तिमाह — **नित्यानामिति**। अयत्नलभ्यत्वं तु तत्राप्यस्ति, तस्य न प्रकर्षादियोग इत्याह — **अयत्नलभ्यश्चेति**। घटत्वादीनामप्ययत्नलभ्यत्वमाह — **घटादिके चेति**। **जातयः** सत्ता-घटत्वादयः। **आयान्ति** व्यक्तिसंबद्धा भवन्ति। अयत्नसिद्धेऽपि गुणे प्रकर्षो दृश्यते, न जाता-वित्यत्र नियामकमाह — **यद्यपीति**। ननु शक्तिः कारकम्, न द्रव्यम्, तस्याः प्रकर्षोऽस्त्येव, [2]'साधकतमम्' इति निर्देशात्। अतः 'साधनं वै द्रव्यम्' इत्ययुक्तमिति शङ्कते — **नन्विति**। **नैष इति**। शक्तिशक्तिमतोरभेदविवक्षया साधनं द्रव्यमित्युक्तमित्यर्थः। ननु शक्तिद्वारा द्रव्य-स्यापि प्रकर्षसत्त्वात् प्रत्ययप्रसङ्गः, अत आह — **न च प्रधानस्येति**। अप्रधानगुणप्रकर्षेऽपि प्रत्ययदर्शनात्, साधनप्रकर्षाधीनक्रियाप्रकर्षेऽपि स्यात्, अत आह — **पचतितरामिति**। साधन-प्रकर्षात् क्रियाप्रकर्षोऽनुमीयताम्, अत आह — **प्रकर्षयुक्तेऽपीति**। साधनप्रकर्षस्य त्वनुमानं सं-भवतीत्याह — **क्रियाप्रकर्षे त्विति**। एकादिशब्दानां गुणवाचित्वेऽपि जातिवत्प्रकर्षाभावान्न प्रत्यय इत्याह — **एको द्वाविति**। आदिना चतुरादिपरार्धपर्यन्तसंख्याशब्दग्रहः। बहुत्वस्य तु प्रकर्षोऽस्तीत्याह — **बहुत्वेति**। उन्मानादिगुणानामपि प्रकर्षो नास्तीत्याह — **एवमुन्मानेति**। तथा च 'प्रस्थतरः' इत्यादि न भवतीत्यर्थः। एतस्य भाष्यकारानुक्तौ हेतुमाह — **भाष्यकारेणेति**॥

---

[1] प्रदीपे 'शुक्लगुणान्तरापेक्षः प्रकर्षः, शुक्ल-गुणनिमित्त' इत्यत्र 'शुक्लगुणान्तरापेक्ष-प्रकर्षशुक्लगुणनिमित्त' इति समस्ततयान्नं-भट्टपाठ इति प्रतीयते।

[2] पा. सू. १.४.४२.

[४, १९७–२०४]

(नारायणीयम्) किमर्थमिति। णिचः [1]श्रवणाण्ण्यन्तस्यायं निर्देश इति प्रतिभाति, ण्यर्थस्येहा[संगत्या च सं]देहः। **कश्चेति**। स्वप्नार्थस्येहासंभवात्। 'देश्याः' इत्यनूद्य 'सूत्रनिबन्धाः' इति विधीयत इति व्याचष्टे — **देष्टव्या इति**। एवमुक्ते यत् फलितं तद्दर्शयति — **तत इति**। अण्यन्तस्यायं निर्देशः, निपातनाच्च दीर्घत्वमित्युत्तरमुक्तं भवति। **परिमाणोपाधिकाविति**। [2]'यत्तदेतेभ्यः परिमाणे वतुप्' इति व्युत्पन्नत्वात्। **अन्यत्रापीति**। आरोहपरिणाहलक्षणस्य परिमाणस्य यत्रासंभवस्तत्रापीत्यर्थः। ननु स्वप्नार्थे पठितस्य शेतेः कथं प्रकर्षार्थत्वमित्यत आह — **अनेकार्थत्वादिति**। **द्रव्यवाचिनीति**। अन्तरङ्गत्वात् प्रकृत्यर्थस्य प्रकर्षे प्रत्ययैर्भाव्यम्। न चात्र प्रकृत्यर्थस्य प्रकर्षयोगोऽस्तीत्याशयेन प्रश्न इत्यर्थः। **सुबन्तसमानाधिकरणवृत्तिभिरिति**। **सुबन्तेन** सुबन्तार्थेन **समानम्** ऐक्यमापन्नं यदधिकरणं योऽर्थः, तत्र वृत्तिः स्वार्थिकत्वाद्येषाम्। यथा याप्यो वैयाकरणो वैयाकरणपाशः, प्रकृष्टः शुक्लः शुक्लतर इति। **घकालेति**। अन्यदा घादौ परतः सप्तम्या अलुग्विधानमनुपपन्नं स्यात्। ननु शब्दस्यापि प्रकर्षयोगो दृश्यते 'उच्चतरः शब्दः' इत्यादाविति, तत्राह — **शब्दस्याभिधानत्वादिति**। 'गुणस्य स्वोपकारं प्रत्यनपेक्षत्वात्' इत्युक्तमसहमानश्चोदयति — **ननु [च] यथेति**। एवं शब्दस्य शुक्लादिसाम्यमाश्रित्य चोदिते वैधर्म्यप्रदर्शनेन परिहरति — **नैतदिति**। गुणद्रव्ययोः समवायः संबन्ध इति तत्र गुणप्रकर्षाश्रयो द्रव्यप्रकर्ष उपपन्नः। शब्दार्थयोस्तु वाच्यवाचकभावः संबन्धः, न समवायः। तत्र वाचकस्य प्रकर्षेण वाच्यस्य प्रकर्षयोगो नोपपद्यते, अत्यन्तभेदात्। **तत्प्रकर्षं प्रत्यनपेक्ष एवेति**। स्वगतेन धर्मेण प्रधानस्योपकाराभावात् [3]'गुणः कृतात्मसंस्कारः' इति न्यायस्यात्रानवतारात्। ननु द्रव्यस्य प्रातिपदिकार्थत्वे गुणादिष्वव्याप्तिरित्याशङ्क्य स्वमतेन द्रव्यलक्षणमाह — **यत्किंचिदिति**। यत्र वस्तूपलक्षणार्थं सर्वनाम प्रयुज्यते, तत् सर्वं द्रव्यमित्यस्माकं द्रव्यलक्षणम्, न तु वैशेषिकादीनामिव गुणानामाश्रयो द्रव्यम्। तत्र 'इदम्' इति प्रत्यक्षार्थवाचकम्, 'तत्' इति प्रमाणान्तरावगतपरोक्षार्थाभिधानम्। तेन प्रत्यक्षपरोक्षार्थाकारपरामर्शेन वस्तुमात्रं लक्षितं भवति। 'विवक्षितम्' इत्यनेन न वस्त्वर्थस्येदं लक्षणम्, अपि तु शब्दार्थस्येति दर्शयति। तेन व्याप्तिसिद्धिरित्याह — **तेन जातीति**। कथं पुनर्द्रव्यस्य प्रकर्षाभाव इत्यत्राह — **यद्वस्त्विति**। यद्वस्तु विशेष्यत्वेन प्राधान्येन शब्देनाभिधीयते तद् द्रव्यम्, तस्य जात्युपाधिसंसर्गं विना व्यपदेशोऽपि न शक्यते कर्तुम्। [भाष्ये 'गुणः' इति न शुक्लादिविवक्षितः,] किं तर्हि, प्रधानस्य शब्दवाच्यस्य द्रव्यस्य यो भेदको धर्मः, **तदाश्रितः** तेन द्रव्येणाधाररूपेण संसृष्टः, रूपसंभेदेन वर्तमानो न संबन्धमात्रेण, स इह गुणो विवक्षितः। [4]यथोक्तम् — संसर्गिभेदकं यद्यत् सव्यापारं प्रतीयते। गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम्॥ इति। स च प्रायेण शब्दप्रवृत्तिनिमित्तं भवति। क्वचिदन्यथेत्याह — **स चेति**। कथं पुनर्द्रव्यस्य सतः प्रकर्षो नास्ति। कथं च गुणे प्रकृष्यमाणे द्रव्यस्य प्रकृष्टता। न ह्यर्जुनशौर्येण चै[द्य]श्शूरो भवतीत्याशङ्कां निवर्तयितुमाह — **यथा पटस्येति**। 'स्वतो न शुक्लस्य नाप्यशुक्लस्य' इत्यनेनोपाधिसंसर्गं विना द्रव्यस्याव्यपदेश्यत्वं दर्शयति। **द्रव्यस्याव्यपदेश्यस्येति**।

---

[1] वृद्धचा तच्छ्रवणमूह्यत इत्याशयः।
[2] पा. सू. ५.२.३९.
[3] 'गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तदा भूयसि वर्तते॥' इति न्यायाकारः शब्देन्दुशेखरभैरव्यां यस्मात्प्रत्ययविधिरिति सूत्रव्याख्यायां प्रतिपादितः।
[4] वाक्यपदीयम् ३.५.१.

उपाधियोगमन्तरेण स्वतो व्यपदेष्टुमशक्यस्येत्यर्थः। एवंभूतं द्रव्यं **व्यपदेष्टुं** निरूपयितुं **भेदकः** अन्यस्माद् व्यवच्छेदको यो धर्म उपादीयते शब्देन, तत्कृतः प्रकर्षः प्रत्ययेनाभिधीयते द्रव्यस्य वास्तवप्रकर्षासद्भावेऽपीत्यर्थः। अन्यस्य प्रकर्षेणान्यस्य प्रकृष्टतामुपपादयति — **अरूपमिति**। यथा नीरूपस्य निरुपाधिनो द्रव्यस्योपाधिरूपेण व्यवहारो भवति, अन्यथा शाब्दव्यवहारोत्सादप्रसङ्गात्। तथा **अप्रकर्षं** स्वतोऽप्रकृष्टं द्रव्यं गुणस्य प्रकर्षेण [1]**आदिश्यते** व्यवह्रियते। ततश्च व्यवहारे गुण-प्रकर्षो गुणिनि विश्राम्यति, न गुणात्मन्येव, नापि गुण्यात्मन्येव निष्कृष्टगुण इत्यर्थः। नन्वेक-स्मिन्नर्थे बहुतरोपाधिसंभवान्नियमेनैकस्योपादानमयुक्तमित्याशङ्क्य परिहरति — [2]**इह यद्यपीति**। यत्र प्रवृत्तिनिमित्तस्य प्रकर्षासंभवस्तत्र किंनिबन्धनः प्रकर्ष इत्यत्राह — **जातिशब्देभ्यस्त्विति**। 'प्रसिद्ध' इति नियमहेतुं दर्शयति। तथा च भाष्यकारो वक्ष्यति 'गौरयं यः शकटं वहति, गोतरोऽयं यः शकटं वहति सीरं च' इत्यादि। उक्तमर्थं व्यतिरेकप्रदर्शनेन विशदयति — **उपा-धिसंसर्गेण त्विति**। **सर्वस्यैवेति**। 'शुक्लतरं रूपम्, इत्यादौ गुणादेरपि प्राधान्येन शब्देनाभि-धीयमानस्य द्रव्यत्वादव्यपदेश्यस्य यदुपाधिर्व्यपदेशस्तन्निमित्तप्रकर्षे प्रत्यय इत्यर्थः। [सर्व]स्यै-वेत्यनेनोक्तस्यार्थस्य व्याप्तिरुक्ता। तथा हि — 'शुक्लतरं रूपम्' इत्यत्र भासुरत्वादिधर्माश्रयः प्रकर्षः। भासुरत्वादयोऽपि यदा प्राधान्येन व्यपदिश्यन्ते तदा तदाश्रितधर्मान्तराश्रयं 'भासुरतरम्' इति। एवं तत्रापीति यावत् संभवति शब्दव्यवहारस्तावदपर्यवसानमेव धर्माणाम्। उक्तं च —

[3]गुणः प्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते।
तस्याश्रिताद् गुणादेव प्रकृष्टत्वं प्रतीयते॥ इति।

एतच्च शाब्दप्रतीत्यनुसारेणोच्यते, न तु वास्तवरूपाश्रयेणेत्याह — [4]**तत्र वास्तवेति**। ननु द्रव्यस्य स्वतः प्रकर्षाभावे कथम् 'अद्रव्यप्रकर्षे' इति प्रतिषेध इत्यत आह — **अद्रव्यप्रकर्ष इति**। गुणक्रियागतः प्रकर्षो यदा द्रव्य उपचर्यते तन्निष्ठोऽभिधीयते तदायं प्रतिषेध इत्यर्थः। ननु गुणस्यैव प्रकर्षः शब्देनाभिधीयते [न तु द्रव्यस्येति 'एवमपि' इति चोद्यम]युक्तमित्याशङ्क्य वास्तवप्रकर्षाश्रयेणैतच्चोद्यमित्याह — **यथा गुणस्येति**। कथं पुनर्गुणस्य नित्यत्वमित्यत्राह — **नित्यद्रव्यसमवेतस्येति**। आत्माकाशादिसमवेतस्येत्यर्थः। **अनित्यस्य त्विति**। यथा पटादिगतस्य शौक्ल्यादेः क्षालनकृतः प्रकर्षस्तथेति। नित्यद्रव्यस्य स्वतः प्रकर्षः, अनित्यस्य तु कारणकृतः। तथा च देवदत्तो यज्ञदत्ताद्विद्यादिना प्रकृष्ट इत्यादिव्यवहारो दृश्यते। **द्वयोः परिपूर्णयोरिति**। यथा कस्यचित् पटस्य काष्ण्यं परिपूर्णम्, कस्यचित्तु शौक्ल्यम्, तत्र काष्ण्यापेक्षया शौक्ल्यस्य परिपूर्णत्वातिशयविवक्षायां प्रत्ययो मा भूदिति समानगुणग्रहणमर्थवदित्यर्थः। **तयोः परस्परापेक्ष इति**। पापात् प्रतिप्रस्थातुः प्रशस्यतरोऽध्वर्युः, प्रशस्यादध्वर्योः पापीयान् प्रतिप्रस्थाता, इति। 'इति मन्यते' इत्यनेन नैवमत्रार्थः प्रतीयत इति दर्शयति। अन्धानां काणस्य च भिन्नजातीयत्वं कथमित्यत्राह — **अन्धा इति**। **तदपेक्षमिति**। विजातीयान्धापेक्षमित्यर्थः। 'समानगुणे' इति कर्मधारयो न बहुव्रीहिरित्याह — **समाने गुण इति**। 'भिन्नाश्रयवर्तिनि' इत्यर्थसिद्धि [रुक्ता।] न ह्येकाश्रयवर्तिनि गुणे स्पर्धोपपत्तिः। **तदाश्रयेति**। समानगुणापेक्षेत्यर्थः। एतद्दर्शितं भाष्ये 'अध्वर्युर्वै श्रेयान्' इत्यादिना। 'कणिरयम्' इत्यादिभाष्यस्य फलितमर्थमाह — **ततश्चेति**। सौ-

---

[1] 'गुणस्यापीष्यते तथा' इति प्रदीपे दृश्यते। वाक्यपदीये तु 'गुणस्याविश्यते तथा' इत्युप-लभ्यते। 'गुणस्यादिश्यते तथा' इति पाठो-ऽत्राभिमतः।

[2] प्रदीपे 'यद्यपि तत्र द्रव्ये' इत्यत्र 'इह यद्यपि तत्र द्रव्ये' इति पाठोऽभिमतः।

[3] वाक्यपदीयम् १.६४.

[4] 'तत्र वास्तवः प्रकर्षः' इत्यत्र प्रदीपे 'तत्र वास्तवप्रकर्षः' इति पाठोऽभिमतः।

क्ष्म्यमल्पत्वं दर्शनस्य। किंचिद्दर्शनं हि काणत्वम्, तच्चान्धानामप्यस्ति। वस्तुतः काणशब्दवाच्यत्वं [तु] तेषां नास्ति, दर्शनाधिके [1]तस्य रूढत्वात्। ततश्च किंचिद्दर्शनस्य गुणस्य समानत्वात् तत्र च काणस्य प्रकृष्टत्वात् तद्द्योतनाय तमपः प्रयोग इत्यर्थः। उक्तमर्थं लोकरूढचाप्युपपादयति — **तथा चेति**। 'महान् [2]सर्षपात्' इति वस्तुकथनम्, महच्छब्दात् प्रत्ययनिवृत्तिर्वचनस्य प्रयोजनमित्याह — **सर्षपादिति**। ननु गोत्वादिजातेः सर्वव्यक्तिषु समानत्वात् प्रकर्षायोगात् प्रत्ययो न भविष्यतीति किं वचनेनेत्यत आह — **आश्रयेति**। 'कस्य तर्हि गुणस्य' इत्येकग्रन्थ इत्याशङ्क्यां परिहरति — **कस्य तर्हीति**। ननु जातेः शब्दप्रवृत्तिनिमित्तत्वात् कथं गुणप्रकर्षाश्रयः प्रत्ययः स्यात्, कथं वा तत्र नियमलाभ इत्यत आह — **अभिधेयसहचरितेति**। जातेः स्वतः प्रकर्षायोगेऽपि जात्याधारद्रव्यसहचरिता ये धर्मा लोके रूढा वाहदोहादयस्तत्प्रकर्षाश्रय इत्यर्थः। **केचित्तु गुणसमुदाय इति**। तथा चोक्तम् [3]'सर्व इमे शब्दा गुणसमुदाये वर्तन्ते' इति। अस्मिन् पक्षे वाहदोहादीनां शब्देन संग्रहात् तत्प्रकर्षाश्रयः प्रत्ययो युक्त एवेत्यर्थः। ननु [4]'प्रधानाप्रधानसंनिधौ प्रधाने कार्यसंप्रत्ययः' इति न्यायात् प्रधानस्य क्रियायाः प्रकर्षसंभवे तत्रैव प्रत्ययो युक्त इति क्रियाग्रहणं न कर्तव्यमिति चोदयति — **नन्विति**। **प्रधानानि स्वगतेनेति**। यथा, 'शुक्लः पटः' इति। **गुणगतेनापीति**। यथा गोयुक्तपुरुषादिस्वामिनो गोमद्व्यपदेशः। यथोक्तं भाष्ये — [5]'यस्य गोमन्तः सन्ति, गावोऽपि तस्य सन्ति' इति। ननु 'नैते दोषाः' इति वक्तव्यमित्यत्राह — **बहूनामपीति**। **संभवेति**। गुणस्यैव प्रकर्षसंभवाद्विशेषणोपादानमन्तरेणापि तस्य प्रकर्षे प्रत्ययः सेत्स्यतीत्यर्थः। **प्रयत्नेति**। शुद्धधौतकादयः पटविशेषाः शिल्पिभिः प्रयत्नभेदान्निष्पाद्यन्ते। सोपस्कारं भाष्यं योजयति — **कृष्णे प्रतियोगिनीति**। नन्वाढ्याभिरूपयोः स्पर्धोपपद्यत एव, द्वयोरपि प्रशस्यत्वादित्यत्राह — **स्पर्धाहेतोरिति**। यदा स्पर्धाहेतुर्धर्मः शब्देनाभिधीयते तदैव प्रत्ययो नान्यदेत्यर्थः। अत एव पूर्वं व्याख्यातम् 'समाने गुणे भिन्नाश्रयवर्तिनि विवक्षिते' इति। एतदेव स्फोरयति — **शब्दाश्रितेति**। शब्देनाश्रितः स्पर्धाहेतुर्यो धर्मस्तस्य प्रकर्ष इत्यर्थः। अयं न्यायः सर्वत्र द्रष्टव्य इत्याह — **शुक्लकृष्णयोरपीति**। 'वाचकेन खलु' इत्यादिना शब्दशक्त्यनुसारेण प्रत्ययो विधेय इत्युक्तम्। तदुपपादयति — **शुक्लतर इत्युक्त इति**। शब्दस्य प्रवृत्तिनिमित्तभूतः, अत एव प्रत्यासन्नश्च यः, शुक्लगुणान्तरमाश्रयान्तरगतं तदपेक्षया प्रकृष्टश्च यः शुक्लगुणस्तत्प्रकर्षनिमित्तो यो द्रव्यप्रकर्षस्तस्यावगतेरित्यर्थः। निष्कधनशतनिष्कधनयोर्धननिमित्ता स्पर्धा नास्ति, अतिविप्रकृष्टत्वात्, समानविषयत्वाच्च स्पर्धाव्यवहारस्येति भाष्याशयं दर्शयति — **अदूरेति**। 'जननेन प्राप्यते' इति भाष्यस्यायमर्थः — जन्मकालसंबन्धा जातिः, न तूत्पन्ने द्रव्ये कारणान्तरसंनिधानायत्तो निवेशोऽस्याः, यतः शुक्लादिवत् प्रकृष्येतेति। एतच्च नित्यद्रव्यगतायां जातौ न व्याप्नोतीत्याशङ्क्य तात्पर्यमाह — **अयत्नलभ्यत्वेति**। **तद्गताया इति**। वैशेषिकादिभिः कारणेषु परमाणुषु जातिरभ्युपगम्यते। तत्र हि संनिहिता जातिः कार्योत्पत्तौ सहकारिणी। अत एव निमित्तकारणत्वं जातीनामुच्यते। अनित्यद्रव्यगताया जातेः कथमयत्नलभ्यत्वमित्यत आह — **घटादिके चेति**। 'नित्याः' इति हेतुगर्भमभिधानम्। नित्यत्वाज्जातेः कारणेषु सत्त्वात् कार्येषु घटादिषु यत्नमन्तरेणाभिव्यक्तिरुपपद्यतेतरामित्यर्थः। तथा चोक्तम् —

---

[1] काणशब्दस्येत्यर्थः।
[2] 'महान् हिमवान्' इत्यत्र सर्षपापेक्षया महत्त्वमित्याशयेन 'महान सर्षपात्' इत्युक्तम्।
[3] महाभाष्यम् २.२.६.
[4] परिभाषा १०६.
[5] महाभाष्यम् ५.२.९४.

[1]कारणेषु पदं कृत्वा नित्यानित्येषु जातयः।
क्वचित् कार्येष्वभिव्यक्तिमुपयान्ति पुनः पुनः॥ इति।

नन्वयत्नलभ्यस्यापि कस्यचित् प्रकर्षादिदर्शनादयत्नलभ्यत्वमनैकान्तिको हेतुरित्याशङ्क्यायत्नलभ्येऽपि यत्र भेदोपलब्धिस्तत्र प्रकर्षोऽस्त्येवेत्यभेदे सत्ययत्नोपलभ्यत्वं हेतुरित्याह — **यद्यपीति**। ननु जातेरभेदोऽसिद्ध इति चेन्नेत्याह — **जातेस्त्विति**। व्यक्तीनां भेदेऽपि जातिरभिन्नैव प्रतीयत इत्यर्थः। **ननु च शक्तिरिति**। तथा चोक्तम् —

[2]स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥ इति।

साधकतममिति। [अत्र] प्रकर्ष[वत]त्वं करणशक्तेस्तमपा द्योत्यते। यद्यपि शक्तिः साधनम्, तथापि शक्तिमद्द्रव्यमेवाख्यातेनाभिधीयत इति भाष्याशयं दर्शयन् परिहरति — **नैष इति**। साधनस्य प्रकर्षयोगेऽपि न तदाश्रयप्रकर्षे तिङन्तात् प्रत्य[यः, स्वतः प्रकर्ष]योगादित्याह — **न चेति**। यथा शुक्लतर इत्युक्ते गुणप्रकर्षद्वारको द्रव्यप्रकर्षः प्रतीयते, न तथा पचतितरामित्युक्ते साधनप्रकर्षद्वारकक्रियाप्रकर्षप्रतीतिरित्याह — **पचतितरामिति चेति**। यथा च गुणप्रकर्षो द्रव्यप्रकर्षहेतुः न तथा साधनप्रकर्षः क्रियाप्रकर्षहेतुः। क्रियाप्रकर्षे तु प्रत्यये तेनैव साधनस्याप्यनुग्रह इत्युभयानुग्रहाय क्रियाप्रकर्ष एव प्रत्यय इत्याह — **प्रकर्षयुक्तेऽपीति**। **कार्यस्य कारणाव्यभिचारादिति**। कारणं तु कार्यं व्यभिचरति, सत्यपि कारणे कदाचित् कार्यादर्शनात्। कार्यस्य तु कारणाभावे सत्तास्फूर्ती नैव स्त इत्यर्थः। यथा जातेः प्रकर्षाभावस्तथा संख्याया अपीति संख्यावाचिभ्यः प्रकर्षप्रत्ययो न भवतीत्याह — **एको द्वौ त्रय इति**। क्वचित्तु भवतीत्याह — **बहुत्वेति**। **एवमिति**। परिच्छेदकत्वाविशेषात् सर्वेषां सुवर्णतरः, प्रस्थतरः, अरत्नितरः, इत्यादिप्रयोगो न भवतीत्यर्थः। कस्मात् पुनरेतत् सर्वं भाष्यकृता नोक्तमित्यत्राह — **भाष्यकारेण त्विति**॥

[४, २०४–२१२]

(विवरणम्) विशेषाग्रहणाच्चेति। चकारेणात्ममनःसंयोगादिर्गृह्यते। भेदव्यवहारनिबन्धनत्वमेकानेकयोः समानो धर्मः, तथाभेदव्यवहारविषयत्वं चेत्यभिप्रेत्याह — **नैष इति**। **उपचरितभेदमिति**। यथैकमपि सामान्यमुपचरितभेदं गौर्गौरित्याश्रयद्वारा। [**अल्पम्**] अल्पद्वारत्वादि[ति] द्रष्टव्यम्। गुणान्तरेण प्रच्छादनं चेन्नोपलभ्येतेत्यत्राह — **संभेदादिति**। नन्वतिशायनशब्दस्य कृदन्तत्वात् तद्योगे षष्ठ्या भाव्यमिति 'द्वितीयान्तात्' इत्यनुपपन्नमित्यत्राह — **यदेति**। ननु सूत्रानुसारित्वात् षष्ठ्यैव विग्रहो न्याय्य इत्यत्राह — [3]**तदा त्विति**। ननु बहुलग्रहणात् कर्तरि ल्युटो विधानान्नैव संदेह इत्यत्राह — **करण इति**। ननु प्रकरणादिना संदेहो निवर्तिष्यत इत्यत्राह — **अथवेति**। ननु स्त्रियामिति तरपोऽविधानात् कथं स्त्रियास्तरपोक्तत्वमित्यत्राह — **तरप इति**। **अन्ये त्विति**। स्त्रीत्वविशिष्टार्थवाचिनः सुबन्तादुत्पन्नः स्वार्थिकोऽस्त्रियामपि वर्तते कुटीर इत्यादाविति स्त्रीप्रत्ययमन्तरेण तन्न प्रतीयेतेति युक्ता तरबन्ताट्टाबुत्पत्तिः। स्त्रीत्वावच्छिन्नप्रथमवयोविशिष्टार्थवाचिनस्तूत्पन्नः स्वार्थिकोऽप्रथमे वयसि वर्तमानो न दृष्टः, येन वयो-

---

[1] वाक्यपदीयम् ३.१.२६.
[2] वाक्यपदीयम् ३.७.१.
[3] प्रदीपे 'तदा षष्ठ्यादौ' इत्यत्र 'तदा तु षष्ठ्यादौ' इति पाठोऽभिमतः।

विशेषद्योतनाय पुनरपि ङीप् प्रार्थ्येतेति भावः। [ननु न] त्रलन्ताद्विभक्त्युत्पत्तिरित्याशङ्क्योक्तम् — **सामयिकीति**। [1]ततश्च 'चेलं तत्र ते दास्यामि' इत्यादौ [2]'सपूर्वायाः प्रथमाया विभाषा' इति तेमयादयो भवन्तीति भावः। **भाष्यकारस्त्विति**। न्याय्यमप्येतत् पक्षान्तरपरिग्रहवैयग्र्येण नालोचितवानिति भावः। **ततो व्यतिरिक्तेति**। वय एव तरपोच्यते, न तु तद्विशिष्टोऽर्थः स्त्रीत्वावच्छिन्न इति भावः। 'कुमारितरा' इत्यत्र कुमारशब्दाद्वयोलक्षणङीब्भावात् 'घान्तात्' इत्युक्तम्। [3]**पञ्चलादिवदिति**। क्षत्रियवाची बहुवचनान्तक्षत्रियसंबन्धाज्जनपदे वर्तमानो दृष्टान्तितः। ननु कर्तृसमवेतत्वात् शेत्यर्थस्य कर्मण्यसमवायात् कथमुभौ समवायिनावित्यत्राह — **उभयोरिति**। आश्रयशब्दो निर्वर्तकाभिप्राय इति मन्यत इति भावः। ननु कर्तृस्थभावकत्वेऽपि देवदत्तमतिशेते यज्ञदत्त इति कर्मापदिष्टद्वितीयादर्शनात् कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वेति नियमाभावाद् द्विवचनं प्राप्नोतीत्यत्राह — **अतिशयेति**। **पूर्वेति**। स चेष्टिरूपो [3]'वर्णो वर्णेन' इत्यत्र प्रतिपादितः। **परेति**। एतदपीष्टिरूपमेव। ननु किमित्यवयवधर्मेण समुदायो व्यपदिश्यत इत्यत आह — **तत्र प्रथममिति**। **शुक्लशब्दादेवेति**। एवकारो भिन्नक्रमः, उत्पत्स्यत एवेत्यर्थः। ननु शुक्लतरशब्दे समुदायरूपेऽवयवो यः शुक्लशब्दस्तस्मादुत्पत्तावपि शुक्लतरतर इति प्राप्नोतीत्यत आह — **शुक्लतर इति**। 'वाचकश्चेत् प्रयोक्तव्यः' इति व्याचष्टे — **इति त्वमिति**। द्वितीयं 'वाचकश्चेत्' इति व्याचष्टे — **तदेति**॥

[४, २०४–२१२]

(उद्द्योतनम्) नन्विति। साधारणधर्मनिश्चयः संशयहेतुः। न च शुक्लत्वं साधारणधर्मः, भेदाभेदसमानाधिकरणत्वेनानिश्चयात्। न चैक[त्व]मनेकत्वं वा साधारणधर्मः, तत्तद्ग्रहे विशेषस्य निश्चयादित्यर्थः। **नैष इति**। आश्रयभेदेन प्रतीयमानः शौक्ल्यभेदः किमौपाधिकः स्वाभाविको वेति संशयः। साधारणधर्मस्य [4]भेदत्वस्य निश्चयः स्वाभाविकत्वौपाधिकत्वरूपविशेषस्य चानिश्चयोऽस्तीति संशयोपपत्तिः। भेदत्वस्य साधारणधर्मत्वमुपपादयति — **एकस्यापीति**। पूर्वस्मिन् संवत्सरे **परुत्**, अस्मिन् संवत्सरे **एषमः**। पटुत्व[5]पटुतरत्वभेदेनैकस्मिन्नपि देवदत्ते भेदव्यवहार इत्यर्थः। वास्तवभेदं दर्शयति — **तत्त्वत इति**। आख्याताभिहिते एकत्वव्यवहारः क्व दृष्टः, अत आह — **एकत्वं चेति**। एवमेकत्वानेकत्वयोर्वास्तवत्वौपाधिकत्वे उपपाद्य संशयोपपत्तिमाह — **एवं चेति**। एकस्य प्रकर्षाभावे दृष्टान्तः — **जातिवदिति**। भेदपक्षे शुक्लकृष्णयोः साम्यमाह — **तुल्ये भेद इति**। शौक्ल्याभेदवादिनोऽपि वक्तव्यसाम्यं शङ्कते — **ननु यस्यापीति**। स्वतः प्रकर्षरहिते विजातीयादपि प्रकर्षाभावे दृष्टान्तः — **यथेति**। यद्यपि 'गोतरः' इतिवत् सहचरितधर्मप्रकर्षात् 'शुक्लतरः' इत्यपि संभवति, तथापि शौक्ल्यप्रकर्षादेव प्रत्ययोपपादनायायं यत्नः। **सर्वत्र** सजातीये विजातीये च। 'विशेषवत्' इत्यनेनैकस्मिन् प्रकर्षाभावे किमुत्तरमुक्तम्, अत आह — **ततो विशेषेति**। औपाधिकभेदेनौपाधिकप्रकर्षसंभव इत्यर्थः। **क्वचिदिति**। आश्रयाल्पत्वमहत्त्वाभ्यां शौक्ल्येऽपि [6]'ते, न तु स्वरूपत इति भावः।

---

[1] ततश्च केवलं तत्र — व.
[2] पा. सू. ८.१.२६.
[3] प्रदीपे 'मञ्चादिवत्' इत्यत्र 'पञ्चालादिवत्' इति पाठोऽभिमत इति भाति।
[4] पा. सू. २.१.६९.
[5] भेदकत्वस्य — लृ.
[6] पटुतमत्व — लृ.
[7] अल्पत्वमहत्त्वे इत्यर्थः।

प्रच्छादनं मिश्रणमित्याह — **संभेदादिति**। गुणान्तरमिश्रणादुत्कर्षे दृष्टान्तः — **यथेति**। ननु प्रत्ययार्थे निर्णीते तदनुसारिणी विभक्तिर्भविष्यतीति किमनेन विचारेण, अत आह — **अतिशायन इति**। ननु शुक्लस्यातिशायन इति विग्रहे [1]'कर्तृकर्मणोः' इति षष्ठ्या भाव्यम्। कथं द्वितीयान्तादित्युक्तम्, अत आह — **यदेति**। कृदन्तेन विग्रहे संदेहमाह — **कृदन्तेन त्विति**। षष्ठ्यादावित्यादिना ल्युड्ग्रहणम्। **कर्तरि वेति**। [2]'कृत्यल्युटो बहुलम्' इति कर्तर्यपि ल्युड्विधानात्। तिङन्तेन तु विग्रहे कर्मणि षष्ठी कर्तरि ल्युडिति निश्चयो भवतीति भावः। स्वपदविग्रहसंभवेऽस्वपदविग्रहो न युक्तः, व्याख्यानाच्च संदेहनिवृत्तिर्भविष्यति, अन्यथा तिङन्तविग्रहोऽपि कथं लभ्येत, अत आह — **अथवेति**। ननु 'शुक्लमतिशेते' इत्युक्ते षष्ठी कथं लभ्यते, अत आह — **प्रत्ययार्थेति**। ल्युडन्तेन विग्रहे तत्संभव इत्यर्थः। ननु वृत्तौ संख्याविशेषानवगमात् कथं बहुवचनान्तात् प्रत्ययः, अत आह — **वृत्तावपीति**। प्रकरणादिना संख्याविशेषप्रतिपत्तौ बहुवचनान्तादपि प्रत्ययोत्पत्तिः। ननु वृत्तौ प्रत्ययस्य कथं लुक्, अत आह — [3]**लुग्विधानादिति**। [4]'यञञोश्च' इति सामान्येन लुग्विधानादित्यर्थः। यथाश्रुते लुग्विधानाद् बहुत्वावगतौ बहुवचनान्तात् प्रत्ययः, प्रत्ययविध्यनन्तरं च लुग्विधानमित्यन्योन्याश्रयप्रसङ्ग इति ज्ञेयम्। ननु प्रकर्षस्य प्रत्ययार्थत्वपक्षेऽपि प्रत्ययान्तस्य वयोवाचित्वान्ङीप्प्रसङ्गस्तुल्यः, अत आह — **प्रत्ययार्थपक्ष इति**। आर्थिकत्वमेवाह — **वयःप्रकर्षेणेति**। ननु गुणान्तरप्रकर्षेऽपि प्रत्ययसंभवेन प्रकर्षप्रत्ययात् कथमर्थाद्वयःप्रतिपत्तिः, अत आह — **न त्विति**। प्रतीतगुणप्रकर्षमपहायाप्रतीतगुणप्रकर्षग्रहणायोगादित्यर्थः। भवत्वर्थात् प्रतीते वयस्यपि ङीप्, अत आह — [5]**शब्देन त्विति**। अन्तरङ्गत्वाच्छब्दात् प्रतीतवयस्येव ङीबित्यर्थः। ननु प्रकर्षमात्रे तरप्, स्वार्थिकस्य वाचकत्वमपि नास्ति, अतः 'तरपोक्तत्वात्' इत्ययुक्तम्, अत आह — **तरप इति**। [6]'टापोक्तत्वात् ङीप् कथम्, अत आह — **टाबपवादत्वादिति**। टाबेवात्र भवति, न ङीबित्याह — **अन्ये त्विति**। एकेनाभिव्यक्तेऽर्थे प्रत्ययान्तरानपेक्षायां दृष्टान्तः — **यथा यत्रेति**। **सामयिकीति**। 'नापदं प्रयुञ्जीत' इति नियमात् [7]'प्रातिपदिकार्थ' इति प्रथमा भवतीत्यर्थः। भाष्यस्य तात्पर्यमाह — **भाष्यकार इति**। **निमित्तस्य** वयसः। 'यत्र' इत्यत्र सप्तम्युत्पद्यताम्, तस्या एव लोपोऽस्तु। यद्वा, अधिकरणत्वस्य प्रातिपदिकार्थत्वात् प्रातिपदिकार्थमात्रे प्रथमा युक्ता। तरपः स्वार्थिकत्वेन प्रकृष्टवयोविशिष्टस्त्रीत्वद्योतकत्वात् तदन्तात् तद्द्योतकतया टाबपवादङीपैव भवितव्यम्, [8]'ङीपा वयोविशिष्टगतस्त्रीत्वद्योतनेऽपि प्रकृष्टवयस्संबन्धिस्त्रीत्वद्योतनाय ङीपैव भाव्यम्। भाष्ये 'अपि'शब्दश्चैवकारार्थ इति भावः। सूत्रेण गुणे प्रत्ययलाभं दर्शयति — **अतिशेतेऽनेनेति**। अस्मिन् पक्षे 'कुमारितरा' इत्यत्रातिप्रसङ्गो नास्तीत्याह — **तत इति**। अस्मिन् पक्षेऽनिष्टं शङ्कते — **गुणाभिधान इति**। 'ब्राह्मण्याश्चेलम्' इत्यत्र ह्रस्वाभावार्थं सामानाधिकरण्यं तत्र विवक्षणीयमिति भावः। नन्वस्मिन् पक्षे 'पटस्य शौक्ल्यम्' इतिवत् 'पटस्य शुक्लतरः' इति प्रयोगप्रसङ्गः कुतो न शङ्कितः, अत आह — **षष्ठीप्रसङ्गःस्विति**। **द्रव्यवचनात्** पटादेः। तत्र हेतुः — **सोऽयमिति**। तर्ह्यभेदाद् द्रव्यलिङ्गसंख्याग्रहणं भविष्यतीति न तदपि चोदनीयम्, अत आह — **सत्या-**

---

[1] पा. सू. २.३.६५.
[2] पा. सू. ३.३.११३.
[3] वृत्तावपीति — लृ.
[4] पा. सू. २.४.६४.
[5] प्रदीपे 'शाब्दी तु वयःप्रतिपत्तिः' इत्यत्र 'शब्देन तु वयःप्रतिपत्तिः' इत्यन्नंभट्टपाठ इति भाति।
[6] टाबन्तात् ङीप् — लृ.
[7] पा. सू. २.३.४६.
[8] कुमारशब्दादुत्पन्नङीपेत्यर्थः।

मयीति। **मञ्चादिवदिति**। 'मञ्चाः क्रोशन्ति' इत्यत्र मञ्चस्थस्त्रीनपुंसककर्तृकक्रोशेनेऽपि 'मञ्चाः' इत्येव प्रयुज्यते, तद्वदित्यर्थः। 'आश्रयतः' इत्येतत् [1]"विशेषणानां चाजातेः' इति सूत्रसिद्धमिति तत्रैव सूत्र उक्तम्। तदाह — **विशेषणानां चेति**। करणे ल्युडन्तेन क्रिया न प्राप्यते, अत आह — **अतिशय इति**। अतिशयनक्रियायाः कर्त्राश्रयत्वमेव, न कर्माश्रयत्वम्, अत आह — **उभयोरिति**। नन्वर्थस्याकर्मकत्वम्, तस्योपसर्गेण सकर्मकत्वं न संभवति, अत आह — **अर्थान्तरेति**। अनेन द्विवचनप्रसङ्गस्य किं समाधानमुक्तम्, अत आह — **अतिशयक्रियेति**। नन्वत्र कर्मापदिष्ट्रविधेरभावात् तत् समाधानमयुक्तम्, अत आह — **द्विवचनमिहेति**। तर्हि कर्मणोऽपि निर्वर्तकत्वेनातिशयक्रियाश्रयत्वात् कथं तत्समाधानम्, अत आह — **आश्रयत इति**। गुणानां गुणिप्रयोजकत्वप्रकारमाह — **अस्माभिरिति**। अचेतनानां कथं प्रयोजकत्वम्, अत आह — **तत्समर्थेति**। ततश्च 'कारीषोऽग्निरध्यापयति' इत्यादिसिद्धिरिति भावः। **अनेकेति**। स्थानप्रकर्षस्वापाद्यनेकार्थत्वमित्यर्थः। 'यो यत्र' इत्यनेन स्थानार्थकत्वं शेतेरुक्तमित्याह — **स्थानार्थ इति**। तत्र प्रयोगमाह — **यथेति**। 'शेरते' इत्यस्यार्थमाह — **अवतिष्ठन्त इति**। ननु 'गुणाश्च' इत्यनेन गुणानां प्रयोज्यत्वमुक्तम्, प्रयोजकव्यापारो नोक्तः, अत आह — **तान् गुणानिति**। स्वस्मिन् स्थितान् गुणानित्यर्थः। **अर्थः** 'गुणाश्च' इत्यस्य तात्पर्यार्थः। ननु गुणिनः प्रयोज्यत्वं किमिति नोक्तम्, अत आह — **पूर्वमिति**। **पश्चादिति**। ततश्चाव्यवधानात् तदेवोदाहृतमित्यर्थः। शेत्यर्थं प्रकर्षं गृहीत्वा ण्यन्ताल्लुडिति 'शेत्यर्थः' इति श्लोकः। **तस्येति**। अतिपूर्वस्य शेतेः प्रकर्षार्थत्वं प्रसिद्धमित्यर्थः। 'सूक्ष्मवस्त्रतरः' इतीष्यत एव, किमनिष्टमापाद्यते, अत आह — **सूक्ष्मतरेति**। ननु सूक्ष्मार्थस्य प्रकर्षविवक्षायां तरप्, अन्यपदार्थविशेषणत्वविवक्षायां बहुव्रीहिरिति युगपत्प्राप्त्यभावात् कथं विप्रतिषेधः, अत आह — **प्रकर्षस्येति**। अत्र रूपे विशेषाभावादाह — **तत्रेति**। तमेवाह — **तरबन्तेनेति**। **बहोरिति**। उत्तरपदार्थबहुत्वे वर्तमानाद्बहोः परपदस्यान्तोदात्तत्वम्। विशेषान्तरमाह — **तथेति**। **बह्वाढ्यकतर इति**। परत्वात् [2]"शेषाद्विभाषा' इति के कृते पश्चात् तरबित्यर्थः। 'उत्तरपदातिशये' इत्यत्रोत्तरपदग्रहणस्य व्यावर्त्यमाह — **यदेति**। **अत्रैव** 'बह्वाढ्यतरः' इत्यत्रैव। **बहुव्रीहौ कृत इति**। 'पूर्वपदातिशये' इत्यनेनेति भावः। अस्मिन् पक्षे मध्योदात्तत्वं 'बह्वाढ्यकतरः' इति च भवतीति ज्ञेयम्। नन्वाद्यस्याप्रकृष्टत्वादन्त्यस्य प्रकृष्टत्वात् 'त्रीणि प्रकर्षाप्रकर्षयुक्तानि' इत्ययुक्तम्, अत आह — **अवयवधर्मेणेति**। त्रीणीत्युद्भूतावयवभेदसमुदाय उच्यते। समुदायस्य समुदायित्वारोपेणोभययोगोऽस्तीत्यर्थः। अवयवानां प्रकर्षादियोगं विविनक्ति — **तत्र प्रथममिति**। उत्तरयोः शुक्लतरत्वमाह — **पूर्वेति**। शुक्लतरशब्दात् प्रत्ययप्रसङ्गमाह — **तयोरिति**। शुक्लतरयोरित्यर्थः। ननु शुक्लतरशब्दार्थप्रकर्षद्योतकः प्रत्ययः शुक्लशब्दात् कथं स्यात्, अत आह — **न्यूनेति**। 'शुक्लतरशब्दः' इत्यस्य बहुव्रीहिणा मत्वर्थीयाकारेण चार्थपरत्वमङ्गीकृत्य तात्पर्यार्थमाह — **शुक्लतरः शब्द इति**। भाष्ये [3]**तदन्ताच्चेति**। **मध्यमवाचिन इति**। प्रथमापेक्षयोत्कृष्टस्य तृतीयापेक्षया निकृष्टस्य च वाचकादित्यर्थः। **अन्त्येऽभिधेय इति**। शुक्लत्वेनान्त्यस्यापि शुक्लशब्दाभिधेयत्वात्। अनेन शुक्लशब्दादुत्पत्तिः कथं निरस्ता, अत आह — **अनेन चेति**। ननु प्रथमापेक्षयोत्कृष्टस्य मध्यमस्य शुक्लतरशब्द एव वाचक इति तत एवोत्पत्तिः प्राप्नोति, अत आह — **मध्यमश्चेति**। शुक्लशब्दादेव तृतीयप्रकर्षेऽपि प्रत्ययो वक्तव्य इति तु फलितार्थः।

---

[1] पा. सू. १.२.५२.
[2] पा. सू. ५.४.१५४.
[3] अत्र प्रतीकमात्रमेवोपलभ्यते 'लृ' मातृकायाम्, न विवरणम्।

न्यूनस्यैव प्रवर्तनात् 'न च न्यूनः' इत्ययुक्तम्, अत आह — **स्वगतेति**। शुक्लतरशब्दादन्त्येऽभिधेये प्रत्ययाङ्गीकारे तृतीयान्न्यूनत्वं न स्यात्, प्रकर्षयुक्तत्वेन साम्यात्। ततः केवलशुक्लशब्दादेव प्रत्यय इत्यर्थः। फलितमुपसंहरति — **ततश्चेति**। लुको विधायकाभावादाह — **गतार्थत्वादिति**। तदेवाह — **एकेनेति**। अवाचकत्वे हेतुः — **शुक्लतरेति**। त्रयापेक्षप्रकर्षे तरप्प्रत्ययो नास्तीत्याह — **यदि तावदिति**। [1]"द्विवचनविभज्य" इति द्वयोर्निर्धारणे तरब्विधानात्। द्वयोर्निर्धारणे तु तरबन्तात् प्रत्ययप्रसङ्गो नास्तीत्याह — **यदा पूर्वमिति**। 'अपेक्ष्य' इत्यस्य पूर्वेण पौनरुक्त्यं निराह — **अपेक्ष्येति**। तरबन्तात् तरपि कथं नापशब्दत्वम्, अत आह — **गतार्थत्वादिति**। 'वाचकश्चेत्' इत्यस्य सिद्धान्तत्वभ्रमं वारयति — **यदि त्वं मन्यस इति**॥

[४, २०४–२१२]

(नारायणीयम्) ननु [2]समानधर्मोपलम्भादिति। यथा स्थाणुपुरुषयोः साधारणधर्मस्योर्ध्वतादेरुपलम्भाद् विशेषधर्मस्याष्टाश्रित्वकरचरणादिमत्त्वादेरग्रहणाच्च संशयः — 'स्थाणुर्वा पुरुषो वा' इति, नैवमत्र संशयोपपत्तिरित्यर्थः। विप्रतिपत्तेः संशयहेतुत्वमुपपादयन् परिहरति — **नैष इति**। 'स्वसमवेतानि' इति कर्तृभेदात् क्रियाभेदे हेतुं दर्शयति। **आश्रयभेदात्त्विति**। यथैकस्य मुखस्य खड्गतैलमुकुराद्यालम्बनभेदाद् भेदावभासः। **उतानेकमिति**। वस्तुतोऽनेकमेवेत्यर्थः। ननु पूर्वमेव समानगुणग्रहणस्य कर्तव्यतामुद्भाव्य परिहृतत्वात् किमर्थमिह तत्प्रसञ्जनमित्याशङ्क्य भेदपक्षे सजातीयविजातीययोर्भेदस्य तुल्यत्वात् सर्वत्र प्राप्नोतीत्याशयेन चोद्यमित्याह — **तुल्ये भेद इति**। पक्षान्तरेऽप्यस्य दोषस्य समानत्वमाशङ्क्य परिहरति — **ननु यस्येति**। नन्वभेदे कथं 'विशेषवत्' इत्यत आह — **ततो विशेषाश्रयादिति**। आश्रयभेदनिबन्धनशौक्ल्यभेदाश्रयणादित्यर्थः। एतदेवोपपादयितुमुक्तं भाष्ये 'अल्पत्वमहत्त्वकृतः' इतीत्याह — **क्वचिदिति**। ननु प्रच्छादनं मूर्तधर्मः कथममूर्ते गुणे स्यादित्यत आह — **संभेदादिति**। **यथा जात्युत्पलेति**। एवं वस्तुत एकस्यापि शौक्ल्यस्य संस्कारवशादवस्थाभेदात् प्रकर्षापकर्षयोगोपपत्तिरित्यर्थः। ननु सुबन्तात् तद्धितोत्पत्तिरिति स्थितत्वात् 'किमन्तात्' इति प्रश्नोऽयमसमञ्जस इत्याशङ्क्य समर्थविभक्तिप्रश्नद्वारेणार्थनिर्देशविषयो विचारः क्रियत इत्याह — **अतिशायन इति किमिति**। ननु यद्यतिशायनशब्देन कर्ता प्रत्ययार्थो निर्दिश्यते तदा कर्मणि [3]"कर्तृकर्मणोः कृति' इति षष्ठ्या भाव्यमिति षष्ठ्यन्तादेव प्रत्ययो युक्त इति 'द्वितीयान्तात्' इत्यनुपपन्नमित्यत आह — **यदेति**। **विस्पष्टार्थमिति**। संदेहानुत्पत्त्यर्थमित्यर्थः। अन्यथा तु संदेहः स्यादित्याह — [4]**तदा त्विति**। यदा करणे ल्युट् तदा कर्तरि षष्ठी। यदा तु [5]"कृत्यल्युटो बहुलम्' इति वचनात् कर्तरि ल्युट् तदा कर्मणीति विभागः। द्वितीयाग्रहणं कर्मविभक्त्युपलक्षणमिति पक्षान्तरमाह — **द्वितीयाग्रहणमिति**। ननु समर्थविभक्तिः सूत्रे नोपात्तेति कथं षष्ठ्यन्तादिति लभ्यत इत्यत आह — **प्रत्ययार्थेति**। ननु वृत्तावभेदैकत्वसंख्याप्रादुर्भावात् कथं बहुवचनान्तात् तरबुत्पद्यत इति, तत्राह — **वृत्तावपीति**। एवमतिशय्यमानार्थवाचिनोऽतिशयितरि प्रत्यय इति पक्षस्य दुष्टत्वात् प्रकृत्यर्थविशेषणपक्षोऽभ्युपगतो भाष्ये 'एवं तर्हि' इत्यादिना। अस्मिन्नपि पक्षे कर्तृसाधन एवातिशायनशब्दः। एवं च सति पूर्वोक्तदोषानवतार इति दर्शितम् 'कालोऽतिशेते' इत्यादिना। तत्रा-

---

[1] पा. सू. ५.३.५७.

[2] सामान्यधर्मोपलम्भादिति — घ.

[3] पा. सू. २.३.६५.

[4] प्रदीपे 'तदा षष्ठ्यादौ' इत्यत्र 'तदा तु षष्ठ्यादौ' इति पाठोऽभिमतः।

[5] पा. सू. ३.३.११३.

परं दूषणमुक्तम् 'यदि प्रथमान्तात्' इत्यादिना। नन्वयं दोषः प्रत्ययार्थपक्षेऽपि तुल्य इत्याशङ्क्य विशेषमाह — **प्रत्ययार्थपक्षे त्विति**। एतदेवोपपादयति — **वयःप्रकर्षेणेति**। वयसः प्रवृत्तिनिमित्तत्वादन्तरङ्गत्वात्, गुणान्तरं तु बहिरङ्गमिति तत्प्रकर्षेण नातिशेत इति, तदाह — **तस्य विप्रकर्षादिति**। **ङीपोऽप्रसङ्ग इति**। प्रथमवयोविशिष्टार्थवाचिनः प्रातिपदिकान्ङीब्विधानात्। **सर्वः प्रकृत्यर्थ इति**। स्त्रीत्वविशिष्ट इत्यर्थः। **तेनेति**। स्त्रीत्वमपि तरपा द्योतितं भवतीति ङीपोऽप्रसङ्गः। अत्र पक्षे ङीप्प्राप्तिदोषस्य भाष्योक्तस्य केचित् समाधानं कुर्वन्तीत्याह — **अन्ये त्विति**। **स्त्रीत्वमात्रमिति**। प्रथमवयोविशिष्टस्त्रीत्वद्योतनायैव ङीब्भवति। स्त्रीत्वमात्रद्योतनार्थं टाबेव न्याय्य इत्यर्थः। **सामयिकीति**। [1]'न केवला प्रकृतिः प्रयोक्तव्या' इति नियमानुपालनार्थं प्रथमातिक्रमे कारणाभावात् प्रथमैव भवति। तस्याश्च लुक्। किमर्थं तर्हि भाष्यकृतेमं पक्षं परित्यज्य पक्षान्तरमाश्रितमित्यत्राह — **भाष्यकारस्त्विति**। **निमित्तस्येति**। प्रकृतेः प्रथमवयोविशिष्टार्थवृत्तित्वस्येत्यर्थः। ततश्च प्रक्रमाभेदार्थं ङीबेव न्याय्य इत्युक्तं भवति। एवं सति 'यत्र, तत्र' इत्यादावपि सप्तम्येव न्याय्या। कथं पुनर्गुणस्य प्रत्ययार्थत्वं सूत्रेण सिध्येदित्यत्राह — **अतिशेतेऽनेनेति**। येन गुणेन प्रकृष्यमाणेन [द्रव्यस्य] समानगुणाद् द्रव्यान्तरात् प्रकर्षो भवति तस्मिन् प्रत्यय इत्यर्थः। तेन गुणेन स्वाश्रयसमवायिना स्वाश्रये व्यतिरेकोपजनात् प्रकृतिर्गुणाश्रयवाचिनी षष्ठ्यन्ता संपद्यत इत्याह — **आश्रयेति**। ततश्च शुक्लस्यातिशायनो गुणः शुक्लतरः। एवं च [पूर्वोक्तदोषो न भव]तीत्याह — **तत इति व्यतिरिक्तेति**। गुणमात्रस्य निष्कृष्टस्य प्रत्ययेनाभिधानादित्यर्थः। वयोविशिष्टार्थवाचिनो हि ङीब्विधिः। अस्मिन् पक्षे दोषमुद्भाव्य परिहरति — **गुणाभिधान इति**। ननु गुण[ाभिधाने द्रव्यवचनात् षष्ठी प्राप्नो]तीति भाष्ये किं न चोदितमित्यत आह — **षष्ठीप्रसङ्गःस्त्विति**। **सर्वदेति**। न कदाचिद् भेदविवक्षा, यतः पाक्षिकषष्ठीप्रसङ्गः स्यादित्यर्थः। नन्वभेदविवक्षायां लिङ्गवचनासिद्धिदोषोऽपि न स्यादित्यत्राह — **स[त्यामपीति**। यथा स्त्र्यभि]धानेऽपि मञ्चान् पश्येति पुंल्लिङ्गतैव, यष्टीः प्रवेशयेति पुरुषाभिधानेऽपि स्त्रीलिङ्गता तथैकमञ्चस्थबहुपुरुषक्रोशनेऽपि मञ्चः क्रोशतीत्येकवचनमेव भवतीत्यादि द्रष्टव्यम्। 'गुणवचनानामाश्रयतः' इत्यस्य सूत्रेण सिद्धिं दर्शयति — **विशेषणानां चेति**। क्रियायाः प्रत्ययार्थत्वमुपपादयति — **अतिशय इति**। कथं पुनरुभयोराश्रयत्वमित्यत्राह — **उभयोरिति**। 'गुणवचनानामाश्रयतः' इत्यत्राश्रयशब्देन निमित्तमात्रमुच्यते। अतिशयक्रियायाश्चात्मलाभे कर्तृकर्मणी निमित्तमित्याशयेन चोद्यमित्यर्थः। कर्तृकर्मस्थत्वेन क्रियायाः प्रसिद्धत्वात् करणाद्यपेक्षया बहुवचनप्रसङ्गो न चोदितः। अत्रोत्तरम् — 'शेतिरकर्मकः' इति। 'अकर्मकाः' इत्यादि चोदकवचनम्। तत्र धातुरेव क्रियावाची, उपसर्गस्तु द्योतक इति सिद्धान्तस्थितिं दर्शयति — **अर्थान्तरेति**। सिद्धान्तवादिना तु येनाभिप्रायेण 'शेतिरकर्मकः' इत्युक्तं तमाविष्कर्तुं 'कर्मापदिष्टाः' इत्याद्यभिहितम्। तत्राशयमाह — **अतिशयक्रियेति**। यद्वा, 'शेतिरकर्मकः' इत्यादि 'कर्तृस्थभावकः शेतिः' इत्यन्त [2]एकग्रन्थः। **समवाय्याश्रय इति**। क्रिया यत्र समवैति स तस्या आश्रयो युक्तः। अभिभवनं ह्यत्र शेत्यर्थः, स कर्तरि समवैतीत्येकवचनमेव भवतीत्यर्थः। **कर्तृसाधन इति**। पूर्वस्मिन् पक्षद्वये कर्तरि ल्युडित्यर्थः। **अचेतनत्वादिति**। न ह्यचेतनानां प्रेषणमध्येषणं वा संभवतीत्यर्थः। प्रेषणाद्यसंभवेऽपि तत्समर्थाचरणस्याचेतनेष्वपि 'भिक्षा वासयति' इत्यादाविव संभवात् प्रयोज्यप्रयोजकभावं दर्शयितुमाह — **अस्माभिरिति**। गुणा हि स्वप्रकर्षद्वारा गुणिनं प्रकृष्टं कुर्वन्तीत्येतदेव प्रयोजकत्व-

---

[1] महाभाष्यम् १.२.६४.

[2] एकस्य ग्रन्थ इत्यर्थः।

मित्यर्थः। एतच्चान्यत्र समर्थितमित्याह — **तत्समर्थेति**। **यथा जलाशय इति**। जलं यत्र तिष्ठति स जलाशयः। **अवतिष्ठन्त इति**। आधेयभावेन गुणिनि गुणानामवस्थानात्, यथा वृक्षे तिष्ठति देवदत्त इति। अस्मिन् पक्षे गुणिनः प्रयोजकत्वमित्याह — **तान् गुणानिति**। गुणी स्वातिशयसिद्ध्यर्थं गुणानात्मन्यवस्थापयतीत्यर्थः। **पूर्वं गुणानामिति**। अस्मिन् पक्षेऽण्यन्तात् करणे ल्युटि यो दोषः स एवात्रापि। परिहारोऽपि स एव। **पश्चात्तु गुणिन इति**। अत्र पक्षे त्वण्यन्तात् कर्तरि ल्युटि यो दोषः स आपतति। ततश्च गुणो वा क्रिया वा प्रत्ययार्थ इति पक्षद्वयं स्थितम्। प्रकृत्यर्थविशेषणपक्षोऽपि युक्त एव, तत्रापि दोषपरिहारस्य टीकाकृता दर्शितत्वात्। अत एव [1]'प्रशंसायां रूपप्' इत्यत्र वक्ष्यते [2]'अयमेव परिहारः' इत्यादि। उक्तार्थसंग्रहाय भाष्ये श्लोकद्वयं पठितम्, तद् व्याचष्टे — **प्रकृत्यर्थं इति**। **ण्यर्थं इति**। 'कारितम्' इति णेः पूर्वाचार्यसंज्ञा। **गुणिसंबन्धादिति**। गुणिना संयोगादित्यन्वयं दर्शयति। **प्रकृष्टत्वेनेति**। न स्वरूपेण। ण्यर्थं विशदयति — **गुणो गुणिनमिति**। आतिशायिकस्य पूर्व प्रवृत्तौ दोषमाह — **सूक्ष्मतरेति**। कथं पुनर्बहुव्रीह्यातिशायिकयोर्युगपत्प्राप्तिः स्यादित्यत्राह — **प्रकर्षस्येति**। अतिशयेन सूक्ष्माणि वस्त्राण्यस्येति विग्रहे द्वयोः प्राप्तौ विप्रतिषेधः। **पूर्वविप्रतिषेधेनेति**। तेन 'सूक्ष्मवस्त्रतरः' इति सिध्यति। **परविप्रतिषेधेनेति**। बहवोऽतिशयेनाढ्या यस्मिन्निति विग्रहे परत्वात् तरप्। तदन्तेन बहुव्रीहिः। यद्यप्यत्र रूपे विशेषो नास्ति, स्वरे तु स्यादित्याह — **तरबन्तेनेति**। **मध्योदात्तप्रसङ्ग इति**। ढ्यशब्दाकारस्योदात्तत्वं स्यादित्यर्थः। रूपेऽपि भेदमाह — **तथा कपीति**। [3]'शेषाद्विभाषा' इति पाक्षिके कपीत्यर्थः। **यदा त्वत्रैवेति**। अतिशयेन बहव आढ्या यस्मिन्निति विग्रहे पूर्वं बहुव्रीहिः पश्चात् तरप्। ततश्चात्र पक्षे तरपः पूर्वस्य कप्स्वरौ भवतः। ननु त्रयाणां समुदितानां प्रकृष्टत्वमपकृष्टत्वं च युगपन्न संभवतीत्यत्राह — **अवयवधर्मेणेति**। कथं पुनरवयवानां प्रकर्षापकर्षयोग इत्याशङ्क्य विवक्षितं प्रकारमाह — **तत्रेति**। भाष्योक्तं दोषं विशदयति — **पूर्वापेक्षयेति**। **एकतरस्येति**। मध्यमापेक्षयान्त्यस्येत्यर्थः। **शुक्लशब्दादेवेति**। अन्त्यस्यापि शुक्लव्यपदेशसद्भावान्मध्यमापेक्षया प्रकर्षे विवक्षिते शुक्लशब्दादेव तरबुत्पत्ताविष्टं सिद्धमित्यर्थः। शुक्लतरशब्देऽवयवः शुक्लशब्दोऽस्तीत्यर्थप्रतीतिं निराकुर्वन् व्याचष्टे — **शुक्लतरः शब्द इति**। **अनिष्टमपीति**। शुक्लशब्दादुत्पत्ताविष्टसिद्धावपि शुक्लतरशब्दात् तरप्यनिष्टमपि स्यादिति भाष्यार्थः। 'श्रेष्ठतमाय' इत्यत्र स्वार्थ एव तमबिति दर्शयति — **श्रेष्ठायेत्यर्थं इति**। प्रशस्यतरं कर्म कर्तुमित्यर्थः। **शुक्लमतिशेत इति**। पूर्वापेक्षया प्रकृष्टमपि स्वापेक्षया न्यूनं शुक्लं योऽतिशेते स शुक्लतर इत्यर्थः। **तत्रकौण्डिन्यन्यायेनेति**। प्रथमापेक्षया प्रकृष्टस्य तृतीयस्य शुक्लस्य वाचकाच्छुक्लतरशब्दात् मध्यमापेक्षे प्रकर्षे विवक्षिते प्रत्ययान्तरप्रसङ्गे तस्मिन्नर्थे मध्यमाद्विधीयमानेनासौ बाध्यत इत्यर्थः। ननु मध्यमोऽपि प्रथमापेक्षया प्रकृष्टत्वात् शुक्लतर एवेति तस्मादुत्पत्तिविधानेऽप्यनिष्टं स्यादिति शङ्कते — भाष्ये **मध्यमश्चेत्यादि**। तद् व्याचष्टे — **मध्यमश्चेति**। 'न च न्यूनः प्रवर्तते' इति भाष्यं वाक्यशेषप्रदर्शनेन पूरयति — **स्वगतेति**। फलितमर्थं स्फोरयति — **ततश्चेति**। [4]**पूर्ववदिति**। पूर्वोक्तेन न्यायेनेत्यर्थः। केन पुनर्लुग् भवेदित्यत्राह — **गतार्थत्वादिति**। **शुक्लतरतरशब्दस्येति**। ततश्चानभिधानाच्छुक्लतरशब्दादुत्पत्तिर्न भविष्यतीत्युक्तं

---

[1] पा. सू. ५.३.६६.

[2] प्रशंसायां रूपबिति सूत्रे प्रदीपे इदम्।

[3] पा. सू. ५.४.१५४.

[4] प्रदीपे 'पूर्वमतद्धितान्त एव' इत्यत्र 'पूर्ववदतद्धितान्त एव' इति पाठोऽभिमत इति भाति।

भवति। 'न खल्वपि' इत्यादिभाष्यस्य तात्पर्यमाह — **यदि तावदिति**। पौनरुक्त्यशङ्कां परिहरति — **पूर्वोक्तेति**। लभत इत्यस्य [कर्माकाङ्क्षायामाह — **प्रकर्षमिति**। पूर्वश्लो]कोक्तस्यैवार्थस्य द्वितीयश्लोकेन कथनात् पौनरुक्त्यं स्यादित्याशङ्क्य 'यथामात्यः स्थिते नृपे' इति दृष्टान्तकथनाय पूर्वोक्तानुवादः क्रियत इत्याह — **पूर्वेणेति**। ननु तरबन्तात् तरप्यपशब्दत्वमेवेत्यत्राह — **गतार्थत्वादिति**। पूर्वोत्तरपादयोरभिन्नार्थत्वमाशङ्क्यान्वयं दर्शयति — **वाचकश्चेदिति**॥

द्विवचनविभज्योपपदे तरबीयसुनौ ५.३.५७.

[४, २१२–२१५]

(विवरणम्) तिङग्रहणात् सुबधिकारो निवर्तत इत्याशङ्क्याह — **सुबन्तादिति**। [1]'समर्थानाम्' इत्यधिकारात् [2]'घकाल' इत्यलुग्विधानाल्लिङ्गाच्चेति भावः। **तिङन्ताच्चेति**। [3]'तिङश्च' इत्यधिकारात्। **नावश्यमिति**। लाघवानादरेण क्वचिद् गतार्थोऽपि प्रयुज्यत इत्यर्थः। नन्वर्थाश्रयेऽपि कथम् 'अस्माकं च देवदत्तस्य च' इत्यत्र प्रत्ययः, द्व्यर्थत्वाभावादित्यत आह — **अस्मद इति**। ननु यतो निर्धारणं तद्वाचिनः षष्ठ्या भवितव्यम्। यच्चात्र षष्ठ्यन्तं न तन्निर्धारणवाचि, सांकाश्यकपाटलिपुत्रकसमुदायस्यावधित्वात्। यच्च समुदायवाचि न तत् षष्ठ्यन्तं गृह्यते, प्रत्येकं षष्ठीदर्शनात्। अतः 'सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमाः' इत्यनुपपन्नमित्यत आह — **सांकाश्यकावयव इति**। **ततोऽन्येति**। 'एवंजातीयिका'शब्दस्य प्रकारवाचिनः प्रयोगादिति भावः। प्रासङ्गिकं किंचिदाह — **यस्मादिति**। समुदायस्य प्रतिपादने हेतुमाह — **विभज्यमानस्येति**। यदुक्तम् 'स एव च विभज्योपपदनिमित्तस्य' इति, तत्र युक्तिमाह — **प्रतियोगीति**॥

[४, २१२–२१५]

(उद्द्योतनम्) सूत्रार्थमाह — **द्विवचनं चेति**। ण्यप्रसङ्गं निराह — **निपातनादिति**। **नावश्यमिति**। कदाचित् स्पष्टप्रतिपत्त्यर्थं प्रयोगः, उदीच्याः पटीयांस इत्युक्तावर्थाद् दाक्षिणात्येभ्य इति प्रतीतेरित्यर्थः। नन्वावश्यकत्वाभावे **उप** समीपे प्रयोज्यं पदमुपपदमित्युपपदग्रहणं व्यर्थं स्यात्, अत आह — **एवं चेति**। अस्माकमित्यत्रार्थाश्रयमेकत्वं वर्तत इत्याह — **अस्मद इति**। **क्वचिदिति**। दन्तराशिरोष्ठसमुदायश्चेति राशिद्वयम्। एवं पाणिपादस्य। 'अस्माकं देवदत्तस्य' इत्यत्रार्थद्वयम्। सांकाश्यकानामिति बह्वर्थत्वात् कथं तरप्प्रसङ्गः, अत आह — **सांकाश्यकेति**। ननु बहुवचनान्तात् समुदायप्रतीतिः कथम्, अत आह — **सांकाश्यकेति**। उद्भूतावयवभेदः समुदाय इत्यर्थः। समुदायपरत्वे हेतुः — [4]**एवं हीति**। **निर्धारणं** द्वयोरित्यादिः। ननु बहूनामपि राशीकरणे द्वित्वमुक्तम्, अत आह — **बहूनां राशीनामिति**। यत्र राशिबहुत्वं तदर्थं विभज्यग्रहणं कर्तव्यमित्यर्थः। **नन्विति**। दूषितपक्षस्य सिद्धान्तिनोऽनभिमतत्वात् 'तर्तर्हि' इति गौरव-

---

[1] पा. सू. ४.१.८२.
[2] पा. सू. ६.३.१७.
[3] पा. सू. ५.३.५६.
[4] प्रदीपे 'एवं निर्धारणम्' इत्यत्र 'एवं हि निर्धारणम्' इत्यन्नंभट्टपाठ इति भाति।

शङ्का तत्परिहारश्च न युक्ताविति्यर्थः। **नैष इति**। 'यदि पुनः' इत्यादेराचार्यवचनत्वाभावान्न विरोध इत्यर्थः। **अर्थ इति च** उक्तमित्यनुषङ्गः। 'न वक्तव्यम्' इति प्रतिज्ञासूचितामाचार्याभिमतां द्वयर्थतामाह — **इयमिति**। राशिद्वयापेक्षा द्वयर्थता नाभिमता, किं तु शब्दात् स्वरसतः प्रतीता द्वयर्थतेत्यर्थः। दन्तोष्ठस्येत्यादौ [सा] नास्तीत्याह[1] — **इहेति**। समूहस्य समासार्थत्वेऽपि वर्तिपदस्य बह्वर्थतास्तु, अत आह — **तत्रेति**। [2]**अस्यां वृत्तौ** समाहारद्वन्द्वे। यद्यपि 'दन्ताः स्निग्धतराः' इति दर्शनाद् वर्तिपदस्य बह्वर्थत्वं प्रतीयते, तथापि वर्तिपदस्य सामान्येनैकत्वप्रतिपादकत्वेऽपि व्यक्तिविवक्षया प्रत्ययान्तस्य बहुवचनोपपत्तिरिति भावः। **अस्माकमिति**। तत्र वास्तवमेव द्वित्वमस्तीत्यर्थः। अतिप्रसङ्गस्तु नास्तीत्याह — **सांकाश्यकानामिति**। तत्रापि राशिद्वये द्वित्वमस्ति, अत आह — **न चेति**। शब्दात् प्रतीतं द्वयर्थत्वं विवक्षितम्, तच्च तत्र नास्तीत्यर्थः। अत्र षष्ठ्यनुपपत्तिं शङ्कते — **अथेति**। **सर्वत्रेति**। निर्धार्यमाणस्य तत्प्रतियोगिनश्च भेदाभावे निर्धारणासंभवात्। **विभाग एवेति**। एवकारेणाविभागव्युदासः। **समुदायेति**। निर्धार्यमाणघटितसमुदायेत्यर्थः। **विभागाविभागेति**। समुदायशब्दप्रयोगादविभागः, निर्धारणस्य विभागसापेक्षत्वादुभयसंभवः। पञ्चम्यभावे [3]'यतश्च निर्धारणम्' इति षष्ठीसप्तम्यौ भवत इत्याह — **निर्धारणेति**। प्रसङ्गात् 'नागोत्तमः' इत्यत्र [4]"न निर्धारणे' इति षष्ठीसमासनिषेधो न भवतीत्याह — **यस्मादिति**। **त्रयसंनिधानेति**। निर्धार्यमाणस्य शब्देनानुपादानादुत्तमत्वहेत्वनुपादानाच्चेत्यर्थः। **संबन्धसामान्य इति**। निर्धारणाभावेन [5]'यतश्च निर्धारणम्' इति षष्ठ्यभावादित्यर्थः। **शब्देन** 'पाटलिपुत्रकाणाम्' इत्यनेन। **द्विरिति**। 'पाटलिपुत्रकाणाम्' 'पाटलिपुत्रकाः' इति च द्विरुपादानम्। **विभागविषयकार्यं** पञ्चमी तरप् च। ननु विभागाविभागसत्त्वे पञ्चमीविधौ विभक्तिग्रहणसामर्थ्यात् पञ्चमी मास्तु, विभागसद्भावाद् विभज्योपपदनिमित्तस्तरप् किं न स्यात्, अत आह — **प्रतियोगीति**। **इहापि** तरब्विधावपि। **अवधारणमिति**। विभज्यशब्द एवोच्चार्यमाणे प्रत्ययः, न तु साधारणशब्दोच्चारणेऽपीत्यवधारणमित्यर्थः। अवधारणप्रयोजनमाह — **तेनेति**। परुत्पटुरित्यादौ सूत्रेण प्रत्ययाप्राप्तिमाह — **पाटवस्येति**। तस्य वयोऽवच्छेदेन भेदात् प्रकर्षसंभवेऽपि तन्निमित्तप्रकर्षस्य द्रव्येऽपि संभवे द्रव्यस्यैकत्वात् प्रतियोग्यनुयोगिभावो न संभवतीत्यर्थः। ननु पटुरित्यत्र पाटवस्योपसर्जनत्वात् कथं प्राधान्यमिति शङ्कते — **यद्यपीति**। प्रत्ययोत्पत्तिनिमित्तप्रकर्षं प्रति गुणस्य प्राधान्यं द्रव्यस्य स्वतः प्रकर्षाभावादिति परिहरति — **तथापीति**। तथापि गुणिन एकत्वात् प्रकर्षप्रतियोगित्वं न संभवतीत्यस्य किमुत्तरम्, अत आह — **तत्रेति**। वास्तवभेदाभावेऽप्यौपाधिकभेदोऽस्तीत्यर्थः॥

[४, २१२–२१५]

(नारायणीयम्) सूत्रार्थस्य दुर्ज्ञानत्वात् तत्प्रदर्शनायाह — **द्विवचनं च विभज्यं चेति**। विभक्तव्यं पृथक्कर्तव्यम्, तच्चातिशय्यमानम्। तस्यैव ह्युपपदत्वम्, यथा 'माधुरेभ्यः पाटलिपुत्रका आढ्यतराः' इत्यत्र माधुराः। न त्वतिशयितुरुपपदत्वं युक्तम्, ततः प्रत्ययविधानात्। **निपात-**

---

[1] इत्यत आहेत्यर्थः।
[2] प्रदीपे 'एतस्यां वृत्तौ' इत्यत्र 'अस्यां वृत्तौ' इति पाठोऽन्नंभट्टाभिमतः।
[3] पा. सू. २.३.४१.
[4] पा. सू. २.२.१०.
[5] पा. सू. २.३.४१.

नादिति। [1]'ऋहलोर्ण्यत्' इति ण्यति प्राप्ते तदपवादोऽयं निपात्यते। तेन 'विभाज्यम्' इति न भवति। **तन्वेति**। 'अनयोराढ्ययोरयमतिशयेनाढ्यः' इत्यादौ। **वृत्तौ त्विति**। 'आढ्यतरः' इत्यादौ तरपैव तदर्थाविगमात्। 'नावश्यं प्रयुज्यते' इत्यनेन 'क्वचिद्विस्पष्टप्रतिपत्त्यर्थं वृत्तावपि प्रयुज्यत इति दर्शयति। **एवं चेति**। प्रयोगनियमाभावादुपोच्चारिपदस्योपपदत्वात्। **पारिभाषिकेति**। [2]'कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः' इति न्यायात्। [3]**अन्वर्थेति**। लक्ष्यानुसारेण क्वचिदकृत्रिमस्यापि ग्रहणदर्शनात्। **क्वचिद्राशिद्वयेति**। दन्तोष्ठस्येत्यत्र दन्तराशिरोष्ठराशिश्च द्वावर्थौ। एवं पाणिपादस्येति। **क्वचिदर्थद्वयेति**। 'अस्माकं च' इत्यत्र। राशिद्वयसद्भावमुपपादयति — **सांकाश्यकेति**। **एवं** द्वयोः समुदाययोर्मध्यादेकदेशस्य पृथक्करणात्। **तरब्न स्यादिति**। द्वयर्थोपपदत्वाभावात्। **कथं पुनरङ्गीकरणमिति**। येन यः पक्षो दूषितस्तेनैव तस्याङ्गीकरणमयुक्तमिति चोद्यम्। कर्तृभेदाश्रयेण परिहारमाह — **नैष इति**। **तिरोहितेति**। समाहारे द्वन्द्वविधानात् तस्य च तिरोहितावयवभेदसमूहरूपत्वात्। नन्वेवमपि समासार्थस्य प्रधानस्यैकत्वाद् गुणभूतवर्तिपदार्थानां बहुत्वाच्च कथं द्वयर्थोपपदाश्रयस्तरप् स्यादित्यत आह — **तत्रैतस्यामिति**। **परित्यक्तभेदेति**। परित्यक्तो भेदो येन। अत एवाङ्गीकृता अभेदलक्षणा एकत्वसंख्या येन तथाविधं दन्तोष्ठलक्षणं यदर्थद्वयं तदाश्रयेत्यर्थः। **अवयवार्थभेदेति**। उद्भूतावयवभेदस्य समुदायस्य समासार्थत्वात्। अत एव बहुवचनम्। **अर्थद्वयसद्भावादिति**। 'अस्माकम्' इत्येकस्मिन् बहुवचनविधानात्। ननु राशिद्वयोपादाने तदपेक्षया तरप् कस्मान्न भवतीत्यत आह — **सांकाश्यकानां चेति**। **शब्देन प्रतिपादितेति**। राशिद्वयस्य वस्तुतः सद्भावेऽपि शब्देन तन्न प्रतिपाद्यते, बहुवचनेनावयवभेदस्यावगमात्। तदाह — **राशिशब्देति**। राशिवाचिनः शब्दस्य प्रयोगाभावादित्यर्थः। **अथात्रेति**। 'सांकाश्यकानां च पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमाः' इत्यत्र। **यत्र विभाग एवेति**। [4]'सिद्धे सत्यारम्भो नियमार्थः' इति न्यायात्। निर्धारणे तु न केवलं विभाग एव, किं तर्हि, अविभागोऽपि शब्देन प्रतिपाद्यते। तदेतदाह — **समुदायशब्देति**। समुदायवाचिना गोशब्देन निर्धार्यमाणायाः कृष्णाया अप्यभिधानादविभागोऽपि प्रतीयत इत्यर्थः। प्रसङ्गान्निर्धारणस्वरूपं प्रतिपादयन् 'नागोत्तमः' इत्यादौ [5]'न निर्धारणे' इति षष्ठीसमासप्रतिषेधाभावं दर्शयति — **यस्मान्निर्धार्यत इति**। **त्रयसंनिधानाभावादिति**। निर्धारणहेतोर्धर्मस्य शब्देनाप्रतिपादनान्निर्धारणाभावान्न निर्धारणे षष्ठीति षष्ठीसमासप्रतिषेधाभावः। **शब्देन समुदायस्येति**। सांकाश्यकपाटलिपुत्रकलक्षणस्य। अत्र हेतुः — **विभज्यमानस्य द्विरुपादानादिति**। यत्र तु [विभागमात्रसद्भावस्तत्रैव प्रत्यय इत्याह —] **प्रतियोग्यपेक्षत्वादिति**। ननु कालान्तरे पाटवस्यातिशयप्रतिपत्तेस्तदाश्रयस्तरबादिप्रत्ययः कथमत्र न भवेदित्यत आह — **पाटवस्येति**। एकत्वे हेतुः प्रत्यभिज्ञानम्। **तस्यैवेति**। न ह्येकस्यैव वस्त्रस्य प्रतियोगित्वमतिशयितृत्वं चोपपद्यते, कर्तृकर्मणोरभेदायोगात्। एतमर्थं हेतुत्वेन गर्भीकृत्योक्तम् — वार्तिके **एकद्रव्यस्येति**। ननु गुणस्य प्रधानत्ववचनमयुक्तमिव भातीत्याशङ्क्य परिहरति — **यद्यपीति**। 'गुणान्तरयोगाच्चान्यत्वम्' इति वाक्यं व्याचष्टे — **तत्र गुणभेदेनेति**। यद्यपि गुणिनो वस्तुतो भेदो नास्ति, तथापि गुणभेदाद् भेद आरोप्यत इति भेदाश्रयप्रकर्षोपपत्तिरित्यर्थः। अत एवोक्तं भाष्ये 'तमेव गुणान्तरयुक्तम्' इत्यादि॥

---

[1] पा. सू. ३.१.१२४.
[2] महाभाष्यम् १.१.२३.
[3] प्रदीपे 'अर्थाश्रयस्तु' इत्यत्र 'अन्वर्थाश्रयस्तु' इति पाठोऽभिमत इति भाति।
[4] महाभाष्यम् २.२.२०.
[5] पा. सू. २.२.१०.

अजादी गुणवचनादेव ५.३.५८.

[४, २१५]

(**उद्द्योतनम्**) **अन्यथा** नियमार्थस्यैवकारस्याभावे। अप्रकर्षे विध्यर्थमेतत् स्यादित्युक्तम्, अत आह — **स्वरितत्वादिति**। अत्रातिशायन इत्यनुवृत्तावप्रकर्षे विध्यसंभवान्नियमार्थत्वोपपत्तिरित्यर्थः ॥

[४, २१५]

(**नारायणीयम्**) **अप्रकर्षे विधिः स्यादिति**। [1]विधिनियमसंभवे विधेर्ज्यायस्त्वात्। **तत्रैवेति**। विधेरसंभवान्नियमार्थत्वं विनाप्येवकारेण सिद्धमित्यर्थः ॥

प्रशस्यस्य श्रः ५.३.६०.

[४, २१५–२१७]

(**विवरणम्**) ननु तरप्तमपावप्यनुवर्तिष्येते, ततश्च व्यञ्जनादी भविष्यत इत्यत आह — **यदीति**। ज्ञापकेनापूर्वमजादिप्रत्ययविधायकं लक्षणं यद्यनुमीयते ततो व्यञ्जनादी न स्यातामिति पूर्वोक्तो दोषः प्रसरेदित्यत आह — [**नियमेति**।] ननु पूर्वरूपपरित्यागेन रूपान्तरप्राप्तिः परिणामः। न चासौ विभक्तेः संभवतीत्यत आह — **विभक्तिशब्देनेति** ॥

[४, २१५–२१७]

(**उद्द्योतनम्**) **अन्यथा** तयोरित्यनुक्तौ। प्रशस्यस्य तरप्तमपोः परतः श्रादेशविधानं स्यादित्यजादिप्रत्ययज्ञापकं न स्यात्। तयोरित्युक्तावजाद्योः परत आदेशविधानं तज्ज्ञापकं संपद्यत इत्यर्थः। अत्रैवाजाद्योर्विधिरस्तु, किं ज्ञापकाश्रयणेनेति शङ्कार्थं 'यदि पुनः' इति भाष्यम्। तद् व्याचष्टे — **अजादी इति**। ननु ज्ञापकस्यापि विधिपर्यवसानाद् बाधस्तुल्यः, अत आह — **ज्ञापकत्व इति**। **नियमेति**। 'अजादी गुणवचनादेव' इति नियमस्य प्रशस्यादावप्रवृत्तिरादेशविधानेन ज्ञाप्यत इत्यर्थः। **स्वशास्त्रेणेति**। [2]'अतिशायने तमबिष्ठनौ' [3]'द्विवचनविभज्योपपदे तरबीयसुनौ' इत्येताभ्यामेव। विधिपक्ष उपाधिसंकर उक्तः — **उपाधीनां चेति**। सोऽपि ज्ञापनपक्षे नास्तीत्याह — **द्विवचनेति**। विधिपक्षेऽप्युपाधीनां सांकर्यनिरासार्थं 'ननु च' इति भाष्यं व्याचष्टे — **अतिशायन इति**। व्यञ्जनादी अप्यनुवर्तनात् स्याताम्, अत आह — **यदीति**। **तयोरपीति**। सप्तमी। ज्ञापनस्याप्यप्राप्तप्रापकत्वेन विधिवद् बाधकत्वं तुल्यम्, अत आह — **नियमेति**।

---

[1] 'विधिनियमसंभवे विधिरेव ज्यायान्' इति परिभाषयेति भावः।

[2] पा. सू. ५.३.५५.

[3] पा. सू. ५.३.५७.

[1]'अजादी गुणवचनादेव' इति नियमस्य प्रशस्यादावप्रवृत्तिर्ज्ञाप्यते, स्वशास्त्रेणैव तु प्रत्ययो भवतीत्यर्थः। **अन्यथा** साक्षादेव प्रत्ययज्ञापने। अजाद्योः प्रकृतत्वात् प्रश्नायोगः, अत आह — **अजाद्योरिति**। अर्थशब्दस्य नानार्थत्वादाह — **सामर्थ्यादिति**। प्रथमाया अन्वयासंभवेऽपि विपरिणामो न युक्त इति शङ्कते — **ननु चेति**। **प्रत्यययोरिति**। तयोरपि प्राधान्ये आदेशप्रत्यययोर्द्वयोरपि विधाने वाक्यभेदप्रसङ्ग इति भावः। प्रथमायाः सप्तमीत्वेन विपरिणामासंभवाद् विभक्तिविपरिणामं व्याचष्टे — **तत इति**। प्रथमान्तस्यादेशनिमित्तत्वेनान्वयसंभवादित्यर्थः। ननु विभक्त्यन्तार्थानां भेदात् कस्य को विपरिणामः, अत आह — **प्रातिपदिकार्थ एवेति**। द्रव्यादिरूप इत्यर्थः। एवं प्रातिपदिकार्थस्य शक्त्यन्तरयोगो विभक्तिविपरिणाम इत्युक्तम्। इदानीं प्रातिपदिकार्थस्य विपरिणाममाह — **अथवेति**। **तात्त्विक इति**। विभक्त्यन्तशब्दस्येत्यर्थः। **शब्दस्य** प्रातिपदिकांशस्य। तर्हि विभक्तिविपरिणाम इति कथम्, अत आह — **विभक्तेस्त्विति**। विपरिणतप्रातिपदिकसंबन्ध उपचारनिमित्तम्। मुख्यासंभवे हेतुः — **न हीति**॥

[४, २१५–२१७]

(**नारायणीयम्**) किमर्थं 'तयोः' इति वचनमित्यत्राह — **अन्यथा तरप्तमपोरिति**। यौ प्रत्ययौ प्रशस्यशब्दात् संभवतस्तयोः परत आदेशः स्यादित्यन्यथोपपन्नत्वात् तद्विधानमुक्तेऽर्थे न ज्ञापकं स्यादित्यर्थः। **विशेषविहितभ्यामिति**। ङ्याप्प्रातिपदिकात् तिङन्ताच्च सामान्येन प्रत्ययचतुष्टये प्राप्ते प्रशस्यशब्दादजादी विधीयमानौ [2]तक्रकौण्डिन्यन्यायेन तरप्तमपौ बाधेयातामित्यर्थः। ननु ज्ञापनपक्षेऽपि व्यञ्जनाद्योर्बाधनं स्यादिति चेन्नेत्याह — **ज्ञापकत्वे त्विति**। नियमाप्रवृत्तिरेव ज्ञाप्यते, न त्वजाद्योर्विधिरित्यर्थः। **उपाधिसंकरोऽपि न भवतीति**। [अत्रापि नियमाप्रवृत्तिज्ञापनात्' इत्येव हेतुः।] ननु व्यञ्जनाद्योरप्यनुवर्त्य विधानात् कथं तौ न स्यातामित्यत आह — **यदि तरप्तमपा[विति**। **नियमाप्र]वृत्तीति**। [3]'अजादी गुणवचनादेव' इति नियमोऽत्र न प्रवर्तत इत्येवमादेशविधा[नेन ज्ञाप्य]ते। तेन स्वशास्त्रेणाजाद्यो [विधानान्न] दोषः। नन्वजाद्योः पूर्वत्र प्रकृतत्वात् किं प्रश्नेनेत्यत्राह — **अजाद्योरिति सप्तम्यन्तमिति**। [विभक्तिविपरिणामं] समर्थयितुं चोदयति — **ननु चेति**। **प्रशस्यस्येति षष्ठीश्रवणादिति**। यद्यजाद्योर्विधिरत्रेष्टः स्यात् तर्हि पञ्चम्या निरदेक्ष्यत, संनियोगार्थश्चकारोऽप्यकरिष्यत। तदभावात्तु स्थान्यादेशभाव एवावगम्यत इत्यर्थः। **तत इति**। प्रत्यययोरादेशविधौ निमित्तत्वेनैवान्वययोग्यत्वादित्यर्थः। नन्वेकस्यैव वस्तुनः पूर्वावस्थात्यागेनोत्तरावस्थासादनं विपरिणाम उच्यते। एवंभूतो विपरिणामो विभक्तेर्न संभवति, प्रथमासप्तम्योरत्यन्तभेदात् प्रथमायाः सप्तमीरूपेण विपरिणामायोगादित्यत आह — **विभक्तिशब्देनेति**। **स एवेति**। प्रातिपदिकार्थ एव विभक्त्यन्तस्याप्यर्थः। विभक्तिस्तु कर्मादिशक्तेर्द्योतिका। ततश्चात्रैक एव प्रातिपदिकार्थः कर्तृशक्तियुक्तत्वावस्थां विहायाधिकरणशक्तिविशिष्टतालक्षणमवस्थान्तरमुपादत्त इति युक्त एव विपरिणामव्यवहारः। **विभक्तिप्रत्ययेति**। एकमेव प्रातिपदिकं प्रथमाविभक्तिं परित्यज्य सप्तमीविभक्तिमुपादत्त इति तस्यैव मुख्यो विपरिणामः। विभक्तेस्तु तन्निमित्तत्वात् तदुपचाराद् भाष्ये तद्व्यवहार इत्यर्थः॥

---

[1] पा. सू. ५.३.५८. भाष्ये प्रतिपादितः।
[2] अयं न्यायो 'मिदचोऽन्त्यात् परः' इति सूत्रे
[3] पा. सू. ५.३.५८.

प्रशंसायां रूपप् ५.३.६६.

[४, २१७–२२२]

(**विवरणम्**) भाष्ये **स्त्रीलिङ्गादेवेति**। अयमर्थः — स्त्रीलिङ्गवाचिरूपबन्तादेव विभक्त्युत्पत्तिः स्यादिति। **एकवचनान्ताच्च** एकस्य वचनमेकवचनमित्येकत्वविशिष्टार्थवाचिरूपबन्तादेकवचनस्यैवोत्पत्तिः स्यादित्यर्थः। **उभयानुग्रहादिति**। वाचकद्योतकत्वाभ्यां प्रकृतिप्रत्ययोभयानुग्रहादित्यर्थः। 'प्रकृतेर्लिङ्गवचनाभावात्' इति वार्तिकस्यायमर्थः — 'पचतिरूपम्' इत्यादेरेकवचनप्रकृतिकरूपबन्तात् परस्य स रम्भावो वक्तव्यः, कुतः, प्रकृतेस्तिङरूपाया नपुंसकलक्षणलिङ्गाभावात् तत्प्रकृतिकस्वार्थिकरूपबन्तस्यापि तदभावे नपुंसके विधीयमानस्य [१]'अतोऽम्' इत्यम्भावस्याप्रसङ्गात्। सत्यपि रूपबन्तार्थस्य नपुंसकत्वे 'पचतोरूपम्' इत्यादौ प्रकृतेस्तिङरूपायाः क्रियाद्वित्वबहुत्वनिबन्धनद्विवचनबहुवचनदर्शनात् तत्प्रकृतिकस्वार्थिकरूपबन्तस्यापि द्वित्वबहुत्ववाचित्वाद् द्विवचनबहुवचनयोः सतोः [२]सुलक्षणवचनाभावात् सोर्विधीयमानोऽम्भावो न प्राप्नोतीति स वक्तव्य [३]इति। भाष्ये लिङ्गाभावादम्भावस्य वक्तव्यत्वे प्रथमोदाहरणम्। द्वितीयतृतीये वचनाभावादम्भावस्य वक्तव्यत्वे। वचनाभावेनाम्भावस्य वक्तव्यत्वं परिहर्तुं 'सिद्धं तु' इति वार्तिकम्। ननु क्रियाया एकत्वं जात्यभिप्रायेण वोच्यते व्यक्त्यभिप्रायेण वा। आद्ये व्यक्तिद्वित्वबहुत्वनिबन्धनं द्विवचनाद्यपि दृश्यत इत्यत्राह — **पचत इति**। ननु करोतीति क्रियावगमपूर्वकानुवादे किं करोतीति प्रश्नानुपपत्तिरित्यत आह — **करोतिरिति**। सर्वनामपरामर्शेन को विशेषो लभ्यत इत्यत्राह — **पदान्तरेण हीति**। ननु 'पचतोरूपम्' इत्यादौ न तिङैकत्वमुक्तमित्यत्राह — **पचतिरूपमित्यत्रेति**। ननु 'द्व्येकयोर्द्विवचनम्' इत्युच्यमाने संख्यारहिताव्ययादेकवचनस्य चरितार्थत्वादेकत्वे द्विवचनमपि प्राप्नोतीत्यत्राह — **द्वयोर्द्विवचनमित्येवेति**॥

[४, २१७–२२२]

(**उद्द्योतनम्**) ननु प्रशंसायाः प्रकृत्यर्थत्वे 'स्त्रीलिङ्गेन' इत्याद्ययुक्तम्, अत आह — **इहेति**। स्त्रियामेकवचनान्ताच्चोत्पत्तौ कीदृशं प्राप्तम्, अत आह — **ततश्चेति**। प्रशंसायाः प्रकृत्यर्थत्वे प्रत्ययान्तस्य द्रव्यसामानाधिकरण्यं स्यादिति कस्मान्नोक्तमिति शङ्कते — **अथेति**। **अभेदविवक्षायां** प्रशंसातद्वतोः। ननु भेदविवक्षायां 'देवदत्तस्य पटुरूपा' इत्यपि प्रयोगप्रसङ्गः, अत आह — **भेदविवक्षा त्विति**। प्रयोगमूलत्वाद्व्याकरणस्य तादृशप्रयोगाभावेनाभेदविवक्षैव कार्येत्यर्थः। **यद्येवम्** अभेदविवक्षायां सामानाधिकरण्यसंभवे सतीत्यर्थः। **प्रत्ययान्तवदिति**। यथा — [४]'पटुतरः, पटुतरम्' इत्यादौ प्रकर्षप्रत्ययस्य तदाश्रयलिङ्गानुविधानं तथा प्रशंसाप्रत्ययस्यापि तदाश्रयलिङ्गानुविधानं स्यादिति प्रत्ययार्थत्वपक्षे न कश्चिद् दोष इत्यर्थः। उभयोः प्रकृतिप्रत्ययय्योरनुग्रहः प्रशंसार्थकत्वम्, प्रत्ययस्य स्वार्थिकत्वेन प्रशंसार्थकत्वादित्यर्थः। ननु प्रत्ययस्य प्राधान्यात्

---

[१] पा. सू. ७.१.२४.

[२] 'सु' इत्येतद्रूपप्रथमैकवचनाभावादित्यर्थः।

[३] इतिशब्दानन्तरम् 'अर्थः' इत्यधिकम् — व.

[४] 'पटुतरः' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — लृ.

तेनैव संबन्धो युक्तः, अत आह — **अन्ये त्विति**। मात्रशब्देन द्रव्यव्यवच्छेदः। प्रत्ययार्थवृत्तित्वेन प्रकृत्यर्थनिरपेक्षतया स्त्रीत्वमन्तरङ्गम्। पश्चात् पुंनपुंसकद्रव्याभिधानेऽपि वरणादिवत् स्त्रीप्रत्ययो न निवर्तेत। अतः प्रकृत्यर्थविशेषणत्वमेव युक्तमिति भावः। प्रकृत्यर्थविशेषणत्वपक्षेऽप्यनिष्टं शङ्कते — [1]**अथेति**। **अव्यतिरिक्तमिति**। रूपपः स्वार्थिकत्वात् [2]'वयसि प्रथमे' इति ङीप् स्यादित्यर्थः। प्रत्ययानां स्वार्थिकत्वात् 'द्योतितत्वात्' इत्युक्तम्। **तत्** स्त्रीत्वम्। **कुटीरेति**। 'कुटीरः, शमीरः' इत्यत्र प्रत्ययार्थस्य पुंस्त्वम्, तद्वदत्र लिङ्गान्तरनिरासाय टाबेष्टव्य इत्यर्थः। **अयमेवेति**। कुटीरादिवल्लिङ्गान्तरपरिहाराय टाबेष्टव्य इति परिहार इत्यर्थः। स्त्रीत्वद्योतकप्रत्ययमात्रमनेन लभ्यते, न तु टाब्नियमः। प्रकृष्टवयोविशिष्टस्त्रीत्वद्योतनाय ङीपैव भाव्यम्[3]। अत्र [4]'वयसि प्रथमे' इत्यत्र वयोमात्रवाचिनो ङीप् विधीयत इति प्रकर्षविशिष्टवयोगतस्त्रीत्वाभिधानाय टाबेव भवतीति समाधानमाहुः। **अम्भाव इति**। क्लीबत्वे [5]'अतोऽम्' इत्यम् सिध्यति, तदभावात्तु वक्तव्यमित्यर्थः। क्रियैकत्वं वचनभेदाभावे हेतुः। तदुपपादयति — **आख्यातशब्दादिति**। भेदानवगमे हेतुः — **भवद्भिरिति**। कर्तृभेदेऽपीत्यर्थः। क्रियैकत्वोक्तेः कृत्यमाह — **एकत्वाच्चेति**। ननु करोतिक्रियां निश्चित्य कर्मविशेषं पृच्छति, न क्रियाम्, अत आह — **करोतिरत्रेति**। तर्हि किमिति कथम्, अत आह — **क्रियाविशेषणत्वादिति**। ननु क्रियाप्रश्नत्वे सिद्धे तद्विशेषणत्वं भवेत्, तदेव कुतः, अत आह — **प्रकरणेति**। प्रकरणादिकं विना निर्णयो नास्तीत्याह — **गुणद्रव्येति**। क्रमेण द्वयमुदाहरति — **वाक्य इति**। क्रियामात्रस्य न प्रश्नः, किं तु क्रियोत्पत्तिप्रश्न इति प्रकारान्तरमाह — **केचित्त्विति**। नन्वाख्यातादनेकार्थावगमात् कथं क्रियाया एव प्राधान्यावगमः, अत आह — **तत्राख्यातेति**। **उपग्रहः** आत्मनेपदपरस्मैपदार्थः। आख्यातान्तोपात्तार्थापेक्षया क्रियायां प्राधान्यम्, न पदान्तरोपात्तार्थापेक्षयेत्याह — **एकपदेति**। **व्रीहीनिति**। तदुक्तं जैमिनिना — [6]'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत, तस्य द्रव्यप्रधानत्वात्' इति। अत्रापि शब्दतः प्राधान्यं क्रियाया एवेत्याह — **अथवेति**। [7]'कर्तुरीप्सिततमं कर्म' इति क्रियासाध्यस्य कर्मसंज्ञत्वात् पूर्वकल्प एव सम्यगित्याहुः। आख्यातेनापि द्रव्यप्रश्नोत्तरं शङ्कते — **यद्यपीति**। नन्वत्र क्रियायाः कर्तृविशेषणत्वात् कथं क्रियाप्राधान्यम्, अत आह — **पदान्तरेणेति**। 'पाकक्रियायाः कर्ता' इत्यनेन स्वतस्तु क्रियैवात्रापि प्राधान्येन गम्यत इत्यर्थः। शङ्काशयमाह — **क्रियागतेति**। '**नियमस्य** [8]'न केवला प्रकृतिः प्रयोक्तव्या' इति नियमस्य। **प्राथम्यादिति**। एकत्वस्य संख्यामात्रं प्रति

---

[1] निर्णयसागरमुद्रिते प्रदीपे 'स्त्रीप्रत्ययो न निवर्तेत। प्रत्ययार्थविशेषणपक्षे 'कुमारिरूपा' इति दृश्यते। चौखाम्बामुद्रिते न निवर्तेत' इत्यत्र समाप्तिचिह्नाभावेऽपि स एव पाठोऽनुसृत इति प्रतीयते। हरयाणामुद्रिते तु प्रदीपे "स्त्रीप्रत्ययो न निवर्तेत प्रत्ययार्थविशेषणपक्षे। प्रकृत्यर्थविशेषणपक्षे 'कुमारिरूपा'" इति दृश्यते। इदमेव समीचीनमिति भाति॥ अत्र 'प्रकृत्यर्थविशेषणपक्षे' इत्यतः प्राक् 'अथ' इत्यन्नंभट्टपाठ इति प्रतीयते।

[2] पा. सू. ४.१.२०.

[3] एतावत्पर्यन्तं शङ्का, उपरि समाधानम्।

[4] पा. सू. ४.१.२०.

[5] पा. सू. ७.१.२४.

[6] मी. सू. २.१.८.

[7] पा. सू. १.४.४९.

[8] प्रदीपे 'समयस्य परिपालनम्' इत्यत्र 'नियमस्य परिपालनम्' इत्यन्नंभट्टपाठ इति भाति।

[9] महाभाष्यम् १.२.६४.

प्रथमत्वाद् द्वित्वादेस्तदपेक्षत्वाच्च। [1]'द्व्येकयोः' इत्युक्तेः कथमुत्सर्गः, अत आह — **द्व्येकयोरिति**। **एकत्ववति** राम इत्यादौ। **अभेदैकत्ववति** समासादिवृत्तौ। सूत्रेणाप्राप्तिमाह — **वृषलादीनामिति**। सूत्रेणैव सिद्धेर्न्यासान्तरवैयर्थ्यं शङ्कते — **नन्विति**। वैस्पष्ट्यस्य व्यापकत्वमाह — **सत्येवेति**। नन्वेकस्यैव रूपप्प्रत्ययस्य निन्दाप्रशंसार्थद्वयद्योतकत्वं कथम्, अत आह — **विवक्षेति**। तमबादीनां रूपपश्च विषयविभागं शङ्कापूर्वकं सुहृद्भावेनाह — **अथेति**। 'अप्ययम्' इत्यत्रापिशब्दार्थमाह — **गर्हायामिति**। [2]'अपिः पदार्थसंभावना' इत्यनेन॥

[४, २१७–२२२]

(**नारायणीयम्**) प्रशंसायाः प्रत्ययार्थत्वमाश्रित्यात्र पूर्वः पक्ष इत्येतत् प्रतिपादयितुं तत्र हेतुमाह — **इह प्रत्ययस्येति**। यद्यप्यभेदविवक्षायां सामानाधिकरण्यमुपपद्यते, भेदविवक्षायां तु वैयधिकरण्यमपि कदाचित् स्यादिति चेन्नेत्याह — **भेदविवक्षा त्विति**। **अतिशायनप्रत्ययान्तवदिति**। यथातिशायनप्रत्ययान्तानां गुणस्य क्रियाया वा प्रत्ययार्थत्वे आश्रयतो लिङ्गवचनसिद्धिरुक्ता तद्वदिहापीत्यर्थः। **उभयानुग्रहादिति**। प्रकृतेस्तावत् स्वार्थविशेषणत्वानुग्रहो भवति। प्रत्ययस्यापि स्वेन द्योत्यत्वात्। स्वार्थिका हि प्रत्ययाः प्रकृत्यर्थविशेषणस्य द्योतका भवन्ति। प्रत्ययार्थपक्षे तु प्रकृतेरनुग्रहो न स्यात्। **स्त्रीप्रत्ययो न निवर्तेतेति**। यथा 'यष्टीः प्रवेशय' इति पुरुषाभिधानेऽपि स्त्रीलिङ्गता। **ङीप् कस्मादिति**। अपवादत्वाट्टापं बाधित्वा ङीप् प्राप्नोतीति [भावः]। चोद्यं परिहरति — **कुमारशब्दादिति**। **ननु ङीपैवेति**। पूर्वोत्पन्नेन ङीपेति भावः। [3]**अवश्याभिव्यङ्क्तव्यं स्त्रीत्वमिति**। वयोविशिष्टार्थगतस्त्रीत्वद्योतनाय ङीप् क्रियते। तच्च कुमारशब्दादुत्पन्नेन ङीपा कृतम्। ततो लिङ्गान्तरप्रतीतिनिवारणाय स्त्रीत्वमात्रद्योतनमवशिष्यते। तच्च टापा कर्तुमुचितमिति टाबेवोत्पद्यते, न त्वपवादो ङीप्, निमित्ताभावादित्यर्थः। अनेनैव न्यायेन[4] [5]'अतिशायन' सूत्रे भाष्यकृता स्वार्थिकत्वपक्षो निरस्तोऽप्यभ्युपगत एवेति वक्तव्यमित्याह — **अयमेवेति**। तत्रापि प्रकृत्यर्थविशेषणपक्षस्योभयानुग्रहान्न्याय्यत्वात्। अत एव वृत्तिकारेणायं पक्षोऽङ्गीकृतः। 'तिङप्रकृतेः' इति समानाधिकरणसमासशङ्कानिराकरणायाह — **तिङः प्रकृतिर्यस्येति**। पञ्चमी चेयम्, न षष्ठीत्याह — **ततः परस्या इति**। ननु क्रियाया एकत्वमसिद्धम्, कर्त्रादिसाधनभेदेनासनादेर्भेदानवगमादित्याशङ्क्य वस्तुतो भेदेऽप्याख्यातशब्दाद् भेदो न गम्यत इत्याह — **आख्यातशब्दादिति**। उक्तं च —

[6]"निवृत्तभेदा सर्वैव क्रियाख्यातेऽभिधीयते।
श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना'॥ इति।

ननु 'पचतः पचन्ति' इति द्विवचनबहुवचनान्यथानुपपत्त्या क्रियाभेदोऽवगम्यत इत्याशङ्क्य तयोरन्यथोपपत्तिं प्रदर्शयन्नेकत्वं क्रियायाः समर्थयते — **पचत इति**। एवं च प्रकृते दोषाभावः सिद्ध इत्याह — **एकत्वाच्चेति**। **प्रसङ्गेनोक्तमिति**। आख्यातार्थकथनप्रसङ्गेन सुहृद् भूत्वा नामपदस्यार्थमपि प्रसङ्गाद्दर्शितवान् भाष्यकार इत्यर्थः। कथं पुनः 'किं करोति' इति प्रश्ने 'पचति' इति भाति।

---

[1] पा. सू. १.४.२२.
[2] पा. सू. १.४.९६.
[3] प्रदीपे 'अवश्यमभिव्यङ्क्तव्यम्' इत्यत्र 'अवश्याभिव्यङ्क्तव्यम्' इति पाठोऽभिमत
[4] अस्य 'अभ्युपगत एव' इत्यनेनान्वयो बोध्यः।
[5] पा. सू. ५.३.५५.
[6] वाक्यपदीयम् २.४५१.

इत्युत्तरदानात् क्रियाप्रधानत्वमवगम्यत इत्यत्राह — **करोतिरत्रेति**। ननु 'किं करोति' इत्युक्ते गुणादिविषयस्यापि प्रश्नस्य संभवान्नियमेन क्रियाविशेषप्रश्नप्रतीतिः कथमित्यत आह — **प्रकरणादिवशाच्चेति**। गुणद्रव्यविषयं प्रश्नं क्रमेणोदाहरति — **वायक इति**। **कालेति**। **कालः** वर्तमानादिः, **संख्या** एकत्वादिः, **साधनं** कर्त्रादि, **उपग्रहः** कर्त्रभिप्रायक्रियाफलादिः। एतानप्यर्थानाख्यातोऽभिधत्ते, तथापि क्रियैव प्राधान्येनावगम्यत इत्यर्थः। **एकपदोपात्तार्थापेक्षमिति**। प्राधान्यस्यान्यापेक्षत्वादाख्यातपदोपात्तानामर्थानां मध्ये क्रियायाः प्राधान्यमुच्यते, न तु पदान्तरोपात्तार्थापेक्षया, तदाह — **व्रीहीनवहन्तीत्यादाविति**। यथा सक्तून् जुहोतीत्यत्र होमेन सक्तुषु संस्काराभावः, भस्मीभूतानां तेषामन्यत्रोपयोगाभावात्। तथा चाहुः — [१]'भूतभाव्युपयोगं हि द्रव्यं संस्कार्यमिष्यते। सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित्॥' इति। नैवमत्र, तुषविमोकलक्षणस्य दृष्टस्य संस्कारस्यावघातेन व्रीहिषु संभवात् तण्डुलीकृतानां तेषां पुरोडाशयोग्यस्वभावातिशयप्रतिलम्भादुत्तरत्रोपयोगात्। ततश्चावहननक्रियात्राप्रधानम्, संस्कार्या व्रीहय एव प्रधानमित्यर्थः। पदान्तरोपात्तार्थापेक्षयापि क्रियायाः शाब्दं प्राधान्यमविहतमितीदमाह — **अथवेति**। ['क्रियाप्रधानम्' इत्यत्र शाब्दं प्राधान्यमेव विवक्षित] मित्याशयः। ननु 'कतरो देवदत्तः' इति पृष्टे 'यः पचति' इत्युत्तर[स्यापि संभवात्] साधनद्रव्यप्राधान्यमप्या[ख्यातादवगम्यत इत्याशङ्क्य परिहरति — **यद्यपीत्यादिना**। **पचति[रूपमित्यत्रेति**।] पचतोरूप[मित्यादौ तु तिङानुक्तत्वेऽप्यनन्वितार्थकत्वान्नैकवचनं स्यादिति भावः। समयश[ब्देन नियमो विवक्षित इत्याह — **परश्चेति नियमादिति**। **यद्यपि प्राथम्यादिति**। [२]कपिञ्जलाधिकरणन्यायेन प्रथमातिक्रमे कारणाभावादेकवचनेनैव समयपरिपालनं युक्तमिति यद्यपि परिहार इत्यर्थः। कथं पुनरेकवचनस्योत्सर्गत्वं द्विवचनबहुवचनयोश्चापवादत्वं यथान्यासे सिध्येदित्याशङ्क्य न्यासान्तराश्रयेण परिहरति — **द्व्येकयोरिति**। एकवचनग्रहणाकरणे एकग्रहणमपि न कर्तव्यमित्यर्थसिद्धमिति, तदाह — **द्वयोर्द्विवचनमित्येवेति**। **एकत्ववतीति**। वृक्षः प्लक्ष इत्यादौ। **अभेदैकत्ववतीति**। राजपुरुष इत्यादौ। अन्यथा समासे सति संख्याविशेषाप्रतीतेर्वचननिवृत्तौ प्रत्ययलक्षणेन नलोपादिकार्यं न स्यात्, लुगलुग्विधानं चानुपपन्नं स्यात्। 'अव्ययादि' इत्यादिशब्देनोपसर्गादयो गृह्यन्ते। 'तिङोक्तार्थाभ्याम्' इत्यनेनापवादनिमित्ताभावादुत्सर्गप्रवृत्तिं दर्शयति। कथं पुनर्वृषलादिभ्यः सूत्रेण प्रत्ययासिद्धिः, यत उपसंख्यानं क्रियत इत्यत्राह — **वृषलादीनामिति**। **न्यासान्तरेति**। प्रशंसाग्रहणमपनीय वैस्पष्ट्यग्रहणं कर्तव्यमित्यर्थः। **वृषलादीनामपीति**। कश्चिद् वृषलः पलाण्डुं भक्षयति, कश्चित् सुरां पिबति। यस्तूभयं करोति तस्य स्वव्यापारेऽतिशय इति प्रशस्तोऽयमित्युच्यते। ननु पटुरूप इत्यादौ प्रशंसैव न वैस्पष्ट्यमिति कथं व्यापकत्वमित्यत्राह — **सत्येवेति**। वैस्पष्ट्यं प्रकृत्यर्थस्य परिपूर्णता, तस्यां सत्यामेव सर्वत्र प्रशंसा भवति। निन्दापि वैस्पष्ट्यादेव क्रियत इति व्यापकमेतदित्यर्थः। कथं पुनः 'वृषलरूपः' इत्यादेः प्रशंसावचनत्वं निन्दावचनत्वं चोपपद्यत इत्यत्राह — **विवक्षावशाच्चेति**। 'अप्ययम्' इत्यादौ प्रशंसाया अभावं दर्शयति — **अप्ययमिति**॥

---

[१] तन्त्रवार्तिके अध्याय २. पाद १. अधिकरणे ४. उद्धृतमिदं वचनम्।

[२] मीमांसायामेकादशाध्यायप्रथमपादाष्टमाधिकरणेत्यर्थः।

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५.३.६७.

[४, २२२–२२६]

(विवरणम्) टापो लिङ्गाभिधायिन एकवचनस्य च सिद्धेः 'लिङ्गवचनानुपपत्तिरित्ययुक्त-मित्यत्राह — **यथेष्टेति**। ननु समाप्तौ सामान्ये विशिष्टसमाप्तेरन्तर्भावात् सामान्येन सह विशेषस्य विकल्पायोग इत्याशङ्क्याह — **नञर्थ इति**। वर्तमानक्तान्तोदाहरणमपि संभवतीत्याह — **जीत इति** ॥

[४, २२२–२२६]

(उद्द्योतनम्) प्रकृत्यर्थत्वे नायं दोषः, अत आह — **प्रत्ययानामिति**। स्त्रीलिङ्गैकवचनयोः सिद्धत्वादाह — **यथेष्टमिति**। ईषदसमाप्तं पटुत्वमित्यर्थे 'देवदत्तस्य पटुकल्पा' इति प्रयोगप्रसङ्गः कथं नोक्तः, अत आह — **षष्ठीति**। तर्हि लिङ्गवचनानुपपत्तिरपि नास्तीति शङ्कते — **यद्येव-मिति**। [1]**बहुगुडा द्राक्षेति**। [2]"विभाषा सुपो बहुच् पुरस्तात्तु' इति बहुच्प्रत्ययः। गुडस्येषद-समाप्तेर्द्राक्षावृत्तित्वं कथमिति शङ्कते — **का पुनरिति**। 'येन माधुर्येण' इत्युत्तरम्। प्रधान-प्रत्ययान्वयो न्याय्य इत्युक्तम्, अत आह — **उभयेति**। तमेवाह — [3]**एवं हीति**। अस्मिन् पक्षे लिङ्गवचनसिद्धिरित्याह — **एवं चेति**। **यत्र त्विति**। 'गुडकल्पा द्राक्षा' इत्यादौ। **वक्ष्यते** अनुपदम्। लिङ्गवचनोपपत्तिं शङ्कते — **ननु गुडकल्पेति**। लिङ्गसंख्यापरित्यागस्य[4] प्रयोजन-माह — **तत्र बहुगुड इति**। प्रकृत्यर्थविशेषणत्वपक्षे 'पटुकल्पः' इत्यादौ लिङ्गसंख्यानुपपत्ति-र्नास्तीत्याह — **गुणशब्देभ्यश्चेति**। गुडकल्पादौ त्वनुपपत्तिरित्याह — **जातिशब्देभ्यस्त्विति**। शास्त्रे प्रसिद्धेरुत्तरपदत्वाभावादाह — **यद्यपीति**। **यौगिक इति**। उत्तरार्थवाचिपदत्वमुत्तरपदत्वम्। प्रत्ययान्तस्यार्थमाह — **गुड इवेयमिति**। ननु सूत्रवार्तिकयोरिवशब्दाभावात् तदर्थवृत्तेः कथं प्रकृतित्वम्, अत आह — **यद्यपीति**। **सामर्थ्यादिति**। अन्यथा गुडशब्दस्योत्तरपदार्थे वृत्त्यसंभ-वादिति भावः। **तत्रैव** उपमानोपमेयभाव एव। पटुरिवायं पटुकल्प इति प्रतीतेरिति भावः। तदेवाह — **यस्येति**। वार्तिकस्थ 'तत्संबन्धे' इत्यस्य प्रयोजनमाह — **तत्संबन्ध इति**। 'गुड-कल्पा द्राक्षा' इति प्रयोगसिद्धावपि 'बहुगुडो द्राक्षा' इत्यस्यासिद्धेः 'सिध्यति' इत्ययुक्तमिति शङ्कते — **यद्यपीति**। **उक्तदोषेति**। प्रकृत्यर्थे चेत् 'गुडकल्पा द्राक्षा' इत्यादौ लिङ्गवचनानुपपत्तिरित्युक्त-दोषेत्यर्थः। ज्ञापकत्वमुपपादयति — **कर्मव्यतिहार इति**। अनतिवृत्तौ हेतुमाह — **उत्तरेति**। [5]"विभाषा सुपो बहुच् पुरस्तात्तु' इति तुग्रहणस्य नियमार्थत्वं 'पुरस्तादेव सर्वं भवति' इति।

---

[1] भाष्ये 'बहुगुडो द्राक्षा' इति पुंल्लिङ्गप्रयोगो दृश्यते। प्रदीपे 'बहुगुडा द्राक्षा' इत्युपलभ्यते। अयं पाठः काशिकायां मूले विद्याविलास-मुद्रितेऽपि दृश्यते। भाष्यविरोधादयं पाठः प्रामादिक इति विभाषा सुप इति सूत्रे पद-मञ्जर्यामुक्तम्।

[2] पा. सू. ५.३.६८.

[3] प्रदीपे 'उभयानुग्रहादेव हि' इति दृश्यते। 'उभयानुग्रहात्। एवं हि' इत्यन्नंभट्टपाठ इति भाति।

[4] अपरित्यागस्येति छेदः।

[5] पा. सू. ५.३.६८.

तेन लिङ्गसंख्ये प्रकृतिगते एव भवत इति वक्ष्यत इत्यर्थः। भाष्यकृता तन्न वक्ष्यते, अत आह — **अथवेति**। **अनुवृत्तीति**। स्वार्थिकानां प्रकृतिलिङ्गवचनानुवृत्तिनियमाभाव इत्यर्थः। 'यथाप्रयोगम्' इत्यतिप्रसङ्गनिरासः। अतिवृत्तिज्ञापकत्वमेव भाष्ये उक्तमित्यत्रापि तद्विरोधं मन्वान आह — **अथवेति**। **अनुवृत्तिः** प्रकृतिलिङ्गानुवृत्तिः। प्रकृतिलिङ्गाननुवृत्तौ प्रत्ययान्तस्य कुटीरादिवत् स्त्रीवृत्तित्वाभावात् षित्करणं व्यर्थं स्यादिति भावः। **अनक्तेति**। एतावत् पाटवमिति क्वचिदपि विशेषेणानिश्चितविषयत्वादित्यर्थः। **गुणेति**। पाटवमात्रं पटुशब्दार्थः। तस्य सर्वत्र संपूर्णतैवेत्यर्थः। पटुत्वं निर्ज्ञातमेव, अत आह — **अयमेवेति**। पटुशब्दार्थ इयानित्यर्थः। सौत्रासमाप्तिपरत्वमाह — **नञर्थ इति**। पौनरुक्त्यशङ्कां निराह — **द्रव्यमिति**। गुडादेः प्रत्ययोत्पत्तिमाक्षिपति — **नन्विति**। ईषदसमाप्तिः प्रकृत्यर्थविशेषणम्, गुणादिश्च मुख्यार्थ इति शङ्काशयः। **नैष इति**। मुख्यार्थाद् गुडादेर्न प्रत्ययः। किं तु गौण्या द्राक्षादिवृत्तेः। तथैव प्रत्ययान्तेन गुडमाधुर्यादीषन्न्यूनमाधुर्यस्य द्राक्षायां प्रतीतिः, 'द्राक्षाकल्पो गुडः' इत्युक्ते वैपरीत्यप्रतीतिरिति भावः। गुडत्वारोपो निमित्तं यस्य माधुर्यस्येति विग्रहः। गुडत्वजात्या द्रव्यस्य निश्चयोऽस्त्येव, अत आह — **इयत्तेति**। द्रव्यशब्देन माधुर्यविशिष्टं द्राक्षारूपप्रकृत्यर्थद्रव्यं विवक्षितमित्यर्थः। ननु गुडगतमाधुर्यस्यैकरूपत्वादियत्तानिश्चयः स्यात्, अत आह — **देशभेदेनेति**। भूतस्येषदसमाप्त्यसंभवात् कथमयं प्रयोगः, अत आह — **आशंसायामिति**। ननु क्रियाया अतीन्द्रियायाः कथं भूतत्वनिश्चयः, अत आह — **क्रियाफलेति**। आशंसाविषयाया ईषदसमाप्तत्वं कथम्, अत आह — **भविष्यत्कालाया इति**। यदेषदसमाप्ताशंस्यते तदा कृतकल्पमित्यादिप्रयोग इति भावः। 'क्तान्तात्' इति दूषणं [न] सर्वक्तान्त [विषय] मित्याह — **अत इति**। 'किमुदाहरणम्' इति प्रश्नोऽप्ययुक्त इत्याशयेनाह — **तथा तिङन्तादपीति**। प्रत्ययैर्भाव्यमित्यनुषङ्गः। पचत्येव देवदत्ते 'अपाक्षीत्, पचति, पक्ष्यति' इति प्रयोगदर्शनादेकदेशभूतत्वे यत्र क्तस्तत्रापि 'क्तान्तात्' इति दूषणं नास्तीत्याह — **यदा [पि] क्रियेति**। एकदेशभूतत्वे क्तोऽवश्यमभ्युपेय इत्याह — **एवं च कृतेति**। शङ्कासमाधानयोर्विषयमाह — **सकलेति**। **एवं च कालत्रयेति**। यत्र पचत्येव देवदत्ते कालत्रयप्रयोगस्तत्रेत्यर्थः। इयता माधुर्येणेत्युक्तानुपपत्तिं निराह — **यावतेति**। गुडशब्दस्य गुणसमुदायवाचित्वाश्रयेणेषदसमाप्तिमाह — **अथवेति**॥

[४, २२२–२२६]

(नारायणीयम्) पूर्वसूत्रवदत्र पूर्वोत्तरपक्षावित्याह — **प्रत्ययानामिति**। [1]**यथेष्टेति**। न तु लिङ्गं वचनं च किंचिन्न सिध्यतीति, स्त्रीलिङ्गस्यैकवचनस्य च प्राप्तत्वात्। ननु प्रत्ययार्थपक्षे गुडस्येषदसमाप्तिः, [ततश्च] गुडकल्पा द्राक्षाया इति षष्ठीप्रसङ्गः कस्मान्न चोदित इत्यत्राह — **षष्ठीप्रसङ्गं त्विति**। **सर्वेति**। न तु कदाचिद् भेदविवक्षा क्रियते, यतः पाक्षिकषष्ठीप्रसङ्गः स्यादित्यर्थः। **बहुगुड इति [न] सिध्यतीति**। द्राक्षागतलिङ्गप्रसङ्गात्। **अथ गुडाश्रयत्वमिति**। ईषदसमाप्तः स्तोकेनासंपूर्णो गुड एव द्राक्षा, [तदा] 'गुडकल्पो द्राक्षा' इति [स्यादित्यर्थः] नन्वीषदसमाप्तेर्गुडाश्रयत्वमेव युक्तम्, न तु द्राक्षाश्रयत्वमित्याशयेन चोदयति — **का पुनरिति**। परिहरति — **येनेति**। माधुर्येण गुणेन गुडसादृश्यात् तत्त्वारोपाद् द्राक्षायां गुड-

---

[1] प्रदीपे 'यथेष्टं लिङ्गवचनासिद्धिरित्यर्थः' इत्यत्र 'यथेष्टलिङ्गवचनासिद्धिरित्यर्थः' इति पाठोऽभिमत इति भाति।

शब्दो वर्तते। ,स गुणो यदा द्राक्षायामसंपूर्णस्तदा 'गुडकल्पा द्राक्षा' इत्युच्यत इति द्राक्षाश्रयत्वमीषदसमाप्तेरित्यर्थः। **प्रकृतितो लिङ्गवचनानि सिध्यन्तीति**। 'बहुगुडो द्राक्षा' 'पटुकल्पो देवदत्तः' इत्यादौ। **यत्र त्विति**। 'गुडकल्पा द्राक्षा' इत्यादौ। **गुडादयः शब्दा इति**। गुडसादृश्यात् तत्त्वारोपाद् गुडशब्दो द्राक्षायां वर्तते। आरोपविषये चापरित्यक्तस्वलिङ्गसंख्या एवार्थान्तरे वर्तन्ते — यष्टीः प्रवेशय, मञ्चान् स्त्रियः पश्य, इति। एवं च क्वचिदेवेष्टं सिध्यति। क्वचित्त्वनिष्टं स्यादित्याह — **तत्र बहुगुड इति**। **जातिशब्देभ्यस्त्विति**। एतदेवाभिप्रेत्य भाष्यकृता 'गुडकल्पा द्राक्षा' इत्याद्युदाहृतम्। **यौगिक इति**। उत्तरं पदमुत्तरपदमिति। [1]'रूढियौगमपहरति' इति न्यायः सामर्थ्यादत्र नाश्रीयत इत्यर्थः। फलितमर्थमाह — **तेनेति**। **तथापि सामर्थ्यादिति**। उत्तरपदार्थे द्राक्षादौ गुडादिभ्यः प्रत्ययविधिरुपमानोपमेयभावमन्तरेण न संभवति। इवार्थाभ्यन्तरीकरणेन तत्त्वारोपेण गुडादीनां द्राक्षादिषु वर्तनादित्येतत् सामर्थ्यम्। **पट्वादिभ्योऽपि तत्रैवेति**। उपमानवाचिभ्यः पट्वादिभ्य उपमेये देवदत्तादौ प्रत्यया उत्पद्यन्ते। तदेवाह — **यस्य परिपूर्णमिति**। **तेन तुल्य ईषदसमाप्त इति**। तुल्यत्वादेवेषदसमाप्तत्वम्। न्यूनगुणं ह्युपमेयं भवति। **तत्संबन्ध इति वचनादिति**। ईषत्सादृश्येनापि यद्यपि गुडादयो द्राक्षादिषु वर्तन्त एव, तथापि तत्र कल्पादयो न भवन्ति, ईषदसमाप्त्या विशेषणादितीममर्थं प्रतिपादयितुं तत्संबन्ध इत्युक्तमित्यर्थः। **उक्तदोषपरिहारादिति**। 'गुडकल्पा द्राक्षा' इत्यादौ लिङ्गवचनासिद्धिदोषः प्रकृतः, तस्य परिहारादित्यर्थः। स्त्रीग्रहणस्योक्तेऽर्थे ज्ञापकत्वमुपपादयति — [2]**स्त्रीलिङ्ग एवेति**। [3]'कर्मव्यतिहारे णच् स्त्रियाम्' इति स्मरणात्। ननु ज्ञापकेन 'स्वार्थिका लिङ्गवचनान्यतिवर्तते' इति ज्ञापितत्वादनतिवृत्तिः केन प्रमाणेन ज्ञायत इत्याशङ्क्याह — **उत्तरसूत्रे तुग्रहणादिति**। पुरस्तादेव सर्वं भवतीत्येवंरूपान्नियमात्। बहुच्येवायं परिहारः। अन्यत्राप्यनतिवृत्तिरिष्यते, कथं तत्सिद्धिरित्याशङ्क्य पक्षान्तरमाह — **अथवा स्त्रीग्रहणेनानुवृत्तिनियमाभाव इति**। स्वतः प्राप्ताया अनुवृत्तेर्निय न प्रवृत्तिर्नास्ति, क्वचिदतिवृत्तिरपि भवतीत्येवं ज्ञापकं व्याख्यायत इत्यर्थः। स्त्रीग्रहणेनातिवृत्तिरेव ज्ञाप्यते। ज्ञापकान्तरेणानुवृत्तिरपि सिध्यतीति पक्षान्तरमाह — **अथवेति**। **षित्करणेनेति**। अन्यथा कासूगोण्योर्यत् स्त्रीत्वं तस्यातिवृत्तौ स्त्रियां ङीषर्थं षित्करणमनर्थकमेव स्यात्। तत् क्रियमाणं 'स्वार्थिका लिङ्गवचनान्यनुवर्तन्ते' इति ज्ञापयतीत्यर्थः। **अनक्तपरिमाणेति**। प्रस्थादीनामिव परिच्छिन्न [परिमाणविषयत्वाभावादित्यर्थः। **अयमेवेति**। अ]यमियानिति, न तु स्वरूपेण निश्चितस्येत्यर्थः। तदुक्तेः प्रकृतानुपयोगात्। **नञर्थ इति**। यथा विगार्दभरथिकः इति। एवं गुणानामीषदसमाप्त्ययोगमुपपाद्य द्रव्यस्यापि तदभावं दर्शयितुमारभत इति संगतिमाह — **द्रव्यमिदानीमिति**। **किं तर्हि द्राक्षादय इति**। द्राक्षादिषु माधुर्यस्य न्यूनत्वात्। **यदपेक्षयेति**। गुडाद्यपेक्षया द्राक्षादेरीषदसमाप्तिः, तद्वाचिनो गुडादिवाचिनः कल्पबादिना भवितव्यम्। तस्यैवेषदसमाप्तिविशिष्टार्थवृत्तित्वसंभवात्। तदेतद् दर्शयति — **तत्रेवार्थमिति**। **आरोपनिमित्तस्येति**। न त्वारोप्यमाणस्य द्राक्षादिगतस्य, तत्र संपूर्णत्वात् तस्य। 'गुडकल्पा द्राक्षा' इत्युक्ते गुडसमाना द्राक्षा, न तु गुडत्वं संपूर्णमिति ह्यर्थः प्रतीयते। **गुडस्य भेदादिति**। गुडगतमाधुर्यस्य भेदादित्यर्थः। स्वरूपभेदस्तु भवतु मा भूत्। ननु करणस्य भूतकालविशिष्टत्वमीषदसमाप्तत्वं चैकस्य विरुद्धमिति कथमिदमुदाहरणं

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ७०.

[2] प्रदीपे 'स्त्रीलिङ्गे भावे णचो विधानात्' इत्यत्र 'स्त्रीलिङ्ग एव णचो विधानात्' इति पाठोऽभिमत इति भाति।

[3] पा. सू. ३.३.४३.

स्यादित्यत आह — **आशंसायामिति**। कथं तर्हि क्तान्तात् प्रत्ययविधानानुपपत्तिश्चोद्यत इत्याह — **यथोक्तमिति**। **क्रियापवर्गः** क्रियाया भूतत्वम्। **भविष्यदिति**। भविष्यत्कालाया एवाशंस्यमानत्वम्। अप्राप्तस्य प्रियस्याप्तुमिच्छा ह्याशंसा, तस्या भविष्यत्काल एव विषयः। तेन भविष्यति भूतवत् प्रत्यया अतिदिश्यन्ते। तत्रेषदसमाप्ताया आशंस्यमानत्वे क्तान्तात् कल्पबादयोऽप्युपपद्यन्त इत्यर्थः। उपलक्षणं चेदमित्याह — **ओतः क्त इति**। **क्रियैकदेशापवर्गाश्रयेणेति**। समूहरूपायाः क्रियायाः समूहिषु प्रत्यवयवं परिसमाप्तत्वावगमात्। एतच्च प्रयोगान्तरेऽपि सिद्धमित्याह — **एवं चेति**। [1]'क्तेन नञ्विशिष्टेनानञ्' इति समासविधानात् कृताकृतादयः प्रयोगाः साधवः। तेऽप्येवमेवोपपद्यन्त इत्यर्थः। नन्वेवं कालत्रयविषयेभ्यः क्तान्तेभ्यः कल्पबादेरुपपन्नत्वादत्र चोद्यपरिहारौ न संगताविवत्याह — **सकलेति**। अयं न्यायस्तिङन्तेष्वपि द्रष्टव्य इत्याह — **एवं चेति**। पाटवादेर्गुणस्येयत्तापक्षे द्राक्षायां स्वगतमाधुर्यस्य संपूर्णत्वप्रतिपादनार्थः प्रयोग उपपन्नो भवति॥

विभाषा सुपो बहुच् पुरस्तात्तु ५.३.६८.

[४. २२६–२३०]

(**विवरणम्**) **तस्याप्रत्ययान्तत्वादिति**। प्रत्ययग्रहणपरिभाषयेति भावः। **अप्रत्यय इति प्रतिषेध इति**। प्रत्ययग्रहणेऽप्यसंज्ञाविधित्वात् ज्ञापकनिबन्धनप्रतिषेधाप्रवृत्तौ प्रत्ययग्रहणपरिभाषया 'अप्रत्ययः' इति प्रतिषेधः प्रकृतिप्रत्ययसमुदायस्येति भावः। कल्पबादिभिर्बाधितत्वात् तमबाद्यप्रसङ्गः, किं प्रकर्षस्यावगतत्वात् किं वा [2]'सकृद्गतौ' इति परिभाषया। नाद्य इत्याह — **कल्पबादिभिरिति**। द्वितीयं प्रत्याह — **पुनरिति**। सूत्रसमाप्तिगतफक्किकामुपादत्ते — **प्रकृतेरेवेतीति**। नन्वर्थपदार्थकाद् भवन् कथं प्रकृतेः प्रकर्षे स्यात्। प्रकृतिशब्देन तदर्थविवक्षायां तरबादेः कल्पबाद्यन्तस्य प्रकृतित्वाद् द्योत्यतया च प्राधान्यादीषदसमाप्तेः प्रकर्षे स्यात्। ततश्चेषदसमाप्त्यभावेन निमित्ताभावात् कल्पबादि निवर्तेतेत्यत आह — **कल्पबादीनामिति**॥

[४, २२६–२३०]

(**उद्द्योतनम्**) [3]**सुबन्तस्यैवेति**। [4]"प्रियकुत्सनादिषु [5]"ततः प्रवर्ततेऽसौ विभक्त्यन्तः' इति वचनादित्यर्थः। **अन्वयेति**। शब्दानामन्वयव्यतिरेकगम्यार्थवत्ता, न वाचनिकी, तत्र स्वार्थादाविव प्रियकुत्सनादावपि प्रातिपदिकमेव वर्तताम्, [6]"स्वार्थमभिधाय' इत्यादिक्रमेऽपि मानाभाव इति भावः। विशेषं शङ्कते — **नन्विति**। **बहुसेच इति**। ईषदूनः सेक्, तस्य बहुसेचः। **कुत्वादीति**। 'बहुसेचः' इत्यत्र कुत्वम्, 'बहुलिहा' इत्यत्र ढत्वम्। यत्नमेवाह — **बहुच्पूर्वस्येति**। कथमे-

---

[1] पा. सू. २.१.६०.

[2] परिभाषा ४०.

[3] प्रदीपे 'सुबन्तस्यैव प्रियकुत्सनादिषु वर्तनात्' इत्यन्नंभट्टपाठ इति प्रतीयते। प्रदीपपुस्तकेषु त्वेवकाररहित एव पाठ इदानीमुपलभ्यते।

[4] महाभाष्यम् ५.३.७४.

[5] 'पुनः' इति भाष्ये पाठः।

[6] महाभाष्यम् ५.३.७४.

तावता कुत्वादिनिवृत्तिः, अत आह — **तन्नियमार्थमिति**। **पदादीति**। [1]"सात्पदाद्योः' इति षत्वनिषेधार्थमित्यर्थः। **न पदान्तेति**। तेन कुत्वादीनि न। अयं प्रकारः [2]"न लुमताङ्गस्य' [इति सूत्र]भाष्य एवोक्तः। प्रातिपदिकादुत्पत्तौ तु षत्वनिवृत्तये यत्नान्तरं कर्तव्यमित्याह — **एवं चेति**। **बहुचश्चेति**। बहुचश्च परस्य सस्य षो न भवतीत्यर्थः। 'यद्येवम्' इत्यस्य प्रकृतानुपयोगात् प्रसङ्गादुक्तिरित्याह — **तुल्येति**। **अस्यैव** पूर्वं त्वसुबन्ताद् भवतीत्यस्यैव। असुबन्तं च तिङन्तं प्रातिपदिकं चेत्युभयस्मात् कल्पबादिसिद्धेरित्यर्थः। **जस इति**। सुबन्तस्य प्रकृतित्वे [3]"चितः सप्रकृतेः' इति वचनात् [4]"चितः' इत्यन्तोदात्तत्वं जसः स्यात्। प्रातिपदिकस्य प्रकृतित्वे टकारोकारस्येति ज्ञेयम्। तिङनिवृत्त्यर्थं सुप इत्यवश्यवाच्ये स्वरो न सिध्यतीति प्रश्नार्थं 'स्वरः कथम्' इति भाष्यम्। तस्योत्तरम् 'स्वरः प्रातिपदिकत्वात्' इति। तद् व्याचष्टे — **बहुचि कृत इति**। अर्थवत्सूत्रेण 'बहुपटवः' इत्यस्य प्रातिपदिकत्वम्। 'अप्रत्ययः' इति निषेधोऽत्र नास्तीत्याह — **समुदायाच्चेति**। पटुशब्दाज्जस् विहितः, न तु 'बहुपटु' इति समुदायात्। **तस्य** 'बहुपटवः' इति समुदायस्य। **लुकि कृत इति**। [5]"सुपो धातु' इत्यनेन। **उकारस्येति**। जसो लुकि बहुपटुशब्दस्यैव प्रातिपदिकत्वात् [6]"फिषः' इति तस्यैवान्तोदात्तत्वमित्यर्थः। पश्चात् समुदायादुत्पन्नस्य जस उदात्तत्वं किं न स्यात्, अत आह — **या त्विति**। **न सेति**। तदन्तस्य च 'अप्रत्ययः' इति निषेधात् प्रातिपदिकसंज्ञा नास्तीति भावः। **नन्विति**। अर्थवत्संमुदायस्य नियमार्थं समासग्रहणमिति मन्यते। **नैष इति**। ज्ञापकात् प्रकृतिप्रत्ययसमुदायव्यतिरिक्तस्यैव नियम इत्यर्थः। **अन्यथा** समासग्रहणेन प्रत्ययान्तस्यापि निवृत्तौ। ननु विभाषाग्रहणं प्रधानेन प्रत्ययेनान्वेति, न पूर्वत्वेनेति नित्यपूर्वत्वमयत्नसिद्धम्, अत आह — **अन्यथेति**। [7]**उत्तरदेशेति**। प्रत्ययत्वेन परदेशे प्राप्ते तन्निवृत्तये पूर्वदेशो विशेषणत्वेन विधीयते, [न तु] प्राधान्येन। ततश्च विभाषापुरस्ताद्ग्रहणयोः प्रत्ययाङ्गत्वान्न परस्परान्वय इत्यर्थः। **गुणानां चेति**। आधानस्य पवमानेष्टीनां चाग्न्यङ्गत्वान्न परस्परमङ्गाङ्गिभावसंबन्ध इति सूत्रार्थः। उक्तनियमस्तुशब्दात् कथं लभ्यते, अत आह — **तुशब्द इति**। तमेवाह — **पुरस्तादेवेति**। **पुरस्तात्तु** पुरस्तादेवत्यर्थः। एतावता लिङ्गसंख्यानियमः कथम्, अत आह — **सर्वमिति**। प्रत्ययात् पूर्वं प्रकृतेर्ये लिङ्गसंख्ये प्रत्ययान्तस्यापि ते भवतः प्रत्ययश्च प्रकृतेः पूर्व इति तुशब्दसामर्थ्याल्लभ्यत इत्यर्थः। 'एतदपि नास्ति' इत्यादिभाष्यं पूर्वसूत्रोक्तमेवाभ्युच्चयतया वक्तीति भावः। **नन्विति**। व्यक्तिपक्षाश्रयेण सकृत्प्रवृत्तौ यद् बाधितं तद्बाधितमेवेति शङ्का। प्रयोगानुसारात् जातिपक्षाश्रयेण परिहारः। ईषदसमाप्तेरपि प्रकर्षसंभवात् 'प्रकृतेरेव' इति कथम्, अत आह — **न त्विति**। **असमाप्तीति**। असमाप्तेः प्रकर्षो नाम पटुत्वादेः सर्वात्मनाभावः। तत्र संपूर्ण [ा] समाप्तिरेव वर्तते, नेषदसमाप्तिरितीषदसमाप्तेः प्रकर्षो न संभवतीत्यर्थः। 'यद्येवम्' इत्यादि 'प्रकृतेरेव' इत्यन्तेन भाष्येण 'पटुकल्पतरः' इत्यत्र प्रकृत्यर्थप्रकर्ष एव तरप्प्रत्ययः, न कल्पान्तप्रकर्ष इति वस्तुकथनमिति ज्ञेयम्॥

---

[1] पा. सू. ८.३.१११.
[2] पा. सू. १.१.६३.
[3] का. वा. ६.१.१६३–१.
[4] पा. सू. ६.१.१६३.
[5] पा. सू. २.४.७१.
[6] फिट्सूत्रम् १.
[7] प्रदीपे 'परदेशव्यावृत्तये' इत्यत्र 'उत्तरदेशव्यावृत्तये' इत्यन्नंभट्टपाठ इति भाति।

[४, २२६–२३०]

(**नारायणीयम्**) [1]**सुबन्तस्यैवेति**। तथा च भाष्यकारो वक्ष्यति [2]'प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः' इति। **प्रातिपदिकमपीति**। दृषदित्यादौ विभक्तिमन्तरेण प्रातिपदिकस्यैव स्वार्थादिपञ्चके वृत्तिदर्शनात् समाप्तार्थत्वात् प्रियकुत्सनादिभिर्योग उपपद्यते। विभक्तिस्तु क्वचिद् द्योतिकापेक्ष्यते। **ततोऽपीति**। न तु नियोगतः सुबन्तादेवेत्यर्थः। **षत्वप्रसङ्ग इति**। सकारस्य पदादित्वाभावात् प्रतिषेधाभावात्। **पदादीति**। पदादिविधेराङ्गत्वाभावात् [3]प्रतिषेधाप्रवृत्तेः सिद्धे प्रत्ययलक्षणे तस्यारम्भात्। **एवं चेति**। पक्षान्तरेऽपि यत्नस्य कर्तव्यत्वात्। **अत एवेति**। प्रातिपदिकात् सुबन्ताद्वोत्पत्तौ विशेषाभावादेवेत्यर्थः। इह सुब्ग्रहणेन पूर्वसूत्रे तिङग्रहणानुवृत्तिर्ज्ञाप्यत इति वार्तिकार्थं दर्शयति — **अस्यैवेति**। **ज्ञापकमन्तरेणेति**। शास्त्रान्तरेणानुवृत्तौ सिद्धायां ज्ञापकेन नार्थं इत्यर्थः। **जस इति**। तस्य प्रकृत्येकदेशत्वात्। **पटुशब्दोकारस्य चेति**। [4]'चितः सप्रकृतेः' इति वचनेन टशब्दोकारस्योदात्तत्वे गुणावादेशयोरप्यान्तरतम्यात् तस्यैव स्वरस्य सिद्धत्वात्। कथं प्रातिपदिकत्वम्, कथं वा तेन स्वरसिद्धिरित्यत आह — **बहुचि कृत इति**। प्रकृतिप्रत्ययसमुदायस्यार्थवत्त्वात् [5]'अर्थवत् प्रातिपदिकम्' इति प्रातिपदिकसंज्ञायां सत्यामित्यन्वयः। ननु 'अप्रत्ययः' इति प्रतिषेधात् कथं जसन्तस्य प्रातिपदिकसंज्ञा स्यादित्यत आह — **समुदायाच्चेति**। [6]'प्रत्ययग्रहणे यस्मात्' इति परिभाषया जसन्तस्याप्रत्ययान्तत्वादित्यर्थः। 'ननु समासग्रहणस्य' इत्यादिचोद्यपरिहारौ स्पष्टौ। **अवधारणार्थमिति**। अनेकार्थत्वान्निपातानां तुशब्दोऽत्रावधारणे वर्तत इत्यर्थः। नन्ववधारणेन नार्थः, विधानादेव तत्फललाभादित्यत आह — **अन्यथेति**। **बहुजेवेति**। ननु पूर्वत्वस्यापि विधेयत्वात् प्राधान्यमिति चेन्नेत्याह — **तस्य त्विति**। **ततश्चेति**। प्रत्ययविधिशेषत्वाद् गुणत्वात्। **गुणानां चेति**। यथाधानस्य पवमानेष्टीनां चाग्न्यर्थत्वात् परस्परेणासंबन्धः, एवमिहापीत्यर्थः। कथं पुनस्तुशब्देन प्रकृतेर्लिङ्गवचनानि प्राप्यन्त इत्यत्राह — **तुशब्दो नियमार्थ इति। ननु परत्वादिति**। [7]'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायात्। न्यायान्तरेण परिहरति — **नैष इति**। प्रकृतिशब्देन प्रकृत्यर्थं उच्यत इत्याह — **तदर्थस्यैवेति**। एतदेवोपपादयति — **असमाप्तिप्रकर्ष इति**। यद्यसमाप्तेः प्रकर्षस्तदात्यन्तासमाप्त्येषदर्थाभावः स्यात्। अथेषदर्थस्य प्रकर्षः, तथापीषदसमाप्त्यभाव इति भावः॥

अव्ययसर्वनाम्नामकच् प्राक् टेः ५.३.७१.

कस्य च दः ५.३.७२.

[४, २३०–२३२]

(**उद्द्योतनम्**) [भाष्ये] **उभयमिति**। [8]'ङ्याप्प्रातिपदिकात्' इति [9]'विभाषा सुपः' इत्यतः

---

[1] प्रदीपे 'सुबन्तस्यैव प्रियकुत्स्नादिषु वर्तनात्' इति पाठोऽभिमतः। इदानीन्तनप्रदीपपुस्तकेष्वेवकारो न दृश्यते।

[2] महाभाष्यम् ५.३.७४.

[3] न लुमताङ्गस्येति निषेधाप्रवृत्तेरित्यर्थः।

[4] का. वा. ६.१.१६३–१.

[5] पा. सू. १.२.४५.

[6] परिभाषा २३.

[7] परिभाषा ४०.

[8] पा. सू. ४.१.१.

[9] पा. सू. ५.३.६८.

'सुप' इति चेत्यर्थः। नन्वन्यतरेणापि विशेषयितुं शक्यत इत्यर्थे 'अन्यतरत्' इति कथम्, अत आह — **प्रातिपदिकस्येति**। टेर्विशेषकत्वाभिप्रायेणैतदुक्तिरित्यर्थः। भाष्ये **अनोकारेति**। ओकारसकारभकारादिप्रत्यये सुबन्तप्रतिषेधात् प्रातिपदिकस्य भविष्यतीत्यर्थः। उभयानुवृत्तौ प्रयोगतो व्यवस्थेत्यत्र तात्पर्यम्। मस्य कृत्यमाह — **मित्त्वादिति**। 'अकच्प्रकरणे' इत्यस्य [1]तदाह — **अज्ञातेति**। शील एवायं विधिर्नाज्ञातादावित्याह — **अज्ञाताद्यपवादः शीलमिति**। स्वभाववाचकस्य तद्वति प्रयोगः कथम्, अत आह — **शब्दशक्तीति**। अभेदोपचारादनभिधानाच्च केवलस्वभावे प्रयोगाभावः। एकस्मिन्नर्थेऽनेकप्रत्ययवैयर्थ्यम्, अत आह — **अनेकेनापीति**। शास्त्रीयमप्युदाहरति — **गार्ग्यायणयामिति**। एतेन 'प्राप्नुवन्ति' इत्यनन्तरं भाष्ये क्वचित् 'न वोक्तत्वात्, उक्तार्थानामप्रयोगः, इति श्नम्बहुजकञ्भिरुक्तत्वात् तस्यार्थस्य पुनरुक्तिर्न भविष्यति' इति ग्रन्थः केनचित् प्रक्षिप्त इति निश्चीयते। भाष्यकारस्तु [2]तक्रकौण्डिन्यन्यायेन सत्यपि संभवे बाधसंभवात् प्रतिषेधस्य वक्तव्यत्वं न ममृष इत्याह — **भाष्यकारस्त्विति**। **अन्यत्र** [3]'मिदचोऽन्त्यात्परः' इत्यादौ। उभयसंभवं दर्शयति — **अज्ञात इति**। **अनत्यन्तेति**। क्रियाया अशेषव्याप्तिरत्यन्तगतिः। तदभावे गम्यमाने क्तान्तात् कन्। विप्रतिषेधसिद्ध्यर्थं कन्समासयोर्युगपत्प्राप्तिमाह — **कुत्सितमिति**। अत्र पूर्वं प्रत्यये 'अर्धकपिप्पली' इति स्यात्। समासात् प्रत्यये 'अर्धपिप्पलिका' इति सिध्यतीति रूपभेदः। [4]'दिक्संख्ये संज्ञायाम्' इति नवशब्दस्य ग्रामादिना समासः, नूतनार्थस्य वेत्याहुः। अत्र रूपभेदाभावादाह — **समासादिति**। अत्रापि विप्रतिषेधसिद्ध्यर्थं युगपत्प्राप्तिमाह — [5]**अत्रापीति**॥

[४, २३०–२३२]

(नारायणीयम्) 'अन्यतरच्छक्यं विशेषयितुम्' इत्यनेनान्यतरस्य विशेष्यत्वमुक्तमिति भाति, तदयुक्तम्, तस्य विशेषणत्वादित्याशङ्क्य व्याचष्टे — **प्रातिपदिकस्येति**। 'अकच्प्रकरणे' इति विशेषणस्य फलं दर्शयति — **अज्ञातादीति**। **नियम इति**। शास्त्रसिद्धं व्रतमित्यर्थः। **तद्वानिति**। शीलवानुच्यते, न शीलमात्रमित्यर्थः। नन्वज्ञाताद्यर्थद्योतनाय बहुजादिः प्रत्ययो विधीयते। तदेकेनैव कृतमिति किमपरेण कृत्यमित्यस्त्येव विरोध इत्यत आह — **अनेकेनापीति**। अनेकेनापि प्रत्ययेनैकस्यार्थस्य द्योतनमविरुद्धमित्यन्वयः। तत्र लोकसिद्धं दृष्टान्तमाह — **प्रदीपेनेति**। अत्र 'अनेकेनापि' इत्यनुषज्यते। शास्त्रसिद्धमप्याह — **गार्ग्यायण्यामिति**। **विरोधमन्तरेणापीति**। दधितक्रयोर्विरोधाभावेऽपि बाध्यबाधकभावस्य दृष्टत्वात्। उभयप्राप्तिं दर्शयति — **अज्ञात इति**। **अनत्यन्तेति**। अनत्यन्तगतेः प्रकर्षस्य च युगपद्विवक्षायां परत्वात् कनि कृते प्रकर्षप्रत्यय इत्यर्थः। कविधेरेकदेशिसमासस्य च युगपत्प्राप्तिमुपपादयति — [6]**कुत्सितमर्धमिति**। **अन्तोदात्तत्वप्रसङ्ग इति**। सतिशिष्टत्वान्नित्स्वरं बाधित्वा [7]'समासस्य' इत्यन्तो-

---

[1] कृत्यमाहेत्यर्थः।

[2] मिदचोऽन्त्यात्सूत्रे भाष्ये उक्तोऽयं न्यायः।

[3] पा. सू. १.१.४७.

[4] पा. सू. २.१.५०.

[5] प्रदीपे 'अत्र संज्ञा कुत्सानादिहेतुका' इत्यत्र 'अत्रापि संज्ञा कुत्सनादिहेतुका' इत्यन्नंभट्ट-पाठ इति भाति।

[6] प्रदीपपुस्तकेषु 'कुत्सितमर्धपिप्पल्या इत्याद्यर्थविवक्षायाम्' इति दृश्यते। 'कुत्सितमर्धं पिप्पल्या इत्याद्यर्थविवक्षायाम्' इत्युचितम्। अत एवोद्द्योतेऽपि 'कुत्सितमर्धमिति' इत्येव प्रतीक उपलभ्यते।

[7] पा. सू. ६.१.२२३.

दात्तत्वं स्यात्। **सामानाधिकरण्यं चेति**। नवश्चासौ ग्रामश्चेति विशेषणसमासोऽत्र विवक्षितः॥

कुत्सिते ५.३.७४.

[४, २३२–२३७]

(विवरणम्) स्वार्थिकत्वात् स्वशब्देनोक्तेऽपि प्रत्ययोत्पत्तिरविरुद्धेत्यत आह — **अनिर्धारितेति**। **स्वार्थिक इति**। प्रकृत्यर्थविशेषणत्वेन कस्यचिदुपादानमिति [भावः।] 'स्वरूप' इत्यनेन शब्दस्वरूपं विवक्षितम्। ननु स्वार्थस्य द्रव्यसमवेतत्वात् 'द्रव्यं समवेतम्' इत्ययुक्तमित्यत आह — **संबद्धमिति**। द्रव्याभिधाने प्रवृत्तिनिमित्तसापेक्षत्वात् 'निरपेक्षः' इत्ययुक्तमित्यत आह — **निरपेक्ष इत्यनेनेति**। ततश्च शब्दो निरपेक्षः स्वार्थमभिधायेति योजनेति भावः। लिङ्गशब्देन क्वचिट्टाबाद्यभिधानदर्शनादाह — **स्त्रीत्वादीति**। अभिधानकोटिनिविष्टाया विभक्तेः कथमभिधेयत्वमित्यत आह — **विभक्तिः कारकमिति**। [1]'कारके' इत्यादौ क्रियाया अपि कारकशब्देनाभिधानदर्शनाद् विशिनष्टि — **कर्मादीति**। प्रवृत्तिनिमित्तव्यतिरिक्तलिङ्गाद्यभिधानं न सार्वत्रिकमित्याह — **यत्रेति**। **तुल्यजातीयापेक्षेति**। संख्यात्वोपाधाविति भावः, द्वित्वादेरेकत्वाद्यपेक्षणात्। 'स्वार्थमभिधाय' इत्याद्यभिधानस्योपयोगमाह — **तत्रेत्यादिना**। **तत्र प्रकृत्यर्थेति**। अव्ययादेः कुत्सितत्वोपलक्षणे वर्तमानत्वेन तद्विशिष्टप्रवृत्त्यभावादिति भावः॥

[४, २३२–२३७]

(उद्द्योतनम्) ननु [2]स्वार्थिकानां ज्ञातेऽपि प्रकृत्या प्रयोगो युक्तः, अत आह — **अनिर्धारितेति**। 'अश्वकः' इत्यादौ प्रकृत्या विशेषनिश्चयो नास्ति। **अनवस्थेति**। प्रत्ययमालाप्रसङ्ग इत्यर्थः। तात्पर्यार्थं तावदाह — **कुत्सितकुत्सायामिति**। अपिना कुत्सितानुकम्पायामपीति समुच्चयः। स्वशब्दस्य शब्दरूपात्मवचनत्वे जात्यादेरलाभात् क्रमानुपपत्तिः, अत आह — **स्वशब्दोऽत्रेति**। **स्वार्थः** जात्यादीनि। क्रमेणोदाहरति — **गौरिति**। 'निरपेक्षः' इत्यनेन स्वार्थाभिधानेऽर्थान्तरनैरपेक्ष्यमुच्यत इत्याह — **निरपेक्ष इत्यनेनेति**। सत्त्वं द्रव्यमुच्यत इत्याह — **द्रव्यशब्देनेति**। गोशब्दस्य जातिरूपद्रव्यप्रतिपादने शब्दस्य स्वं रूपं स्वार्थ इत्याह — **तत्रेति**। आरोपितं गोशब्दस्वरूपं यस्यां गोत्वजातौ तामिति विग्रहः। तस्यैव व्याख्यानम् — **स्वरूपेणेति**। शुक्लादिशब्दानामपि स्वार्थद्रव्यविभागमाह — **शुक्लादय इति**। **गुणजातौ** गुणत्वावान्तरजातौ। **तेषां** शुक्लादिशब्दानाम्। **गुणसामान्यं** गुणत्वावान्तरसामान्यम्। लिङ्गादित्रयस्य केषुचिच्छब्देषु स्वार्थत्वमेवेत्याह — **क्वचिदिति**। **तत्रायमेवेति**। प्रवृत्तिनिमित्तलिङ्गसंख्याभिधानानन्तरं लिङ्गसंख्यान्तराभिधानम्। **तत्र पुनरिति**। प्रकृत्यैव प्रतिपादनादित्यर्थः। उक्तक्रममाक्षिपति — **यद्यपीति**। अप्रयोगार्हस्यापीत्यपिः पूरणीयः। उक्तक्रमे न्यायमाह — **तथा हीति**। आश्रयस्येत्यनेन लिङ्गाद्यपेक्षया प्रागभिधेयत्वमुक्तम्। लिङ्गसंख्ययोः संख्याकारकापेक्षयान्तरङ्गत्वं पूर्वाभिधानप्रयोजकं क्रमेणाह — **ततो भेदापेक्षेति**। एकत्वस्यापि द्वित्वाद्यभावापेक्षित्वाल्लिङ्गा-

---

[1] पा. सू. १.४.२३.

[2] प्रकृत्या ज्ञातेऽपि स्वार्थिकानां प्रयोगो युक्त इत्यन्वयः।

पेक्षया बहिरङ्गत्वम्। कृत्स्नशब्दार्थमाह — **स्वार्थादीति**। स्वार्थादिपञ्चकप्रतिपादकं सदिति यावत्। शब्दस्य विरम्य व्यापाराभावादाह — **पुनश्शब्द इति**। 'कुत्सितकुत्सायामपि' इति यदुक्तं तदाह — **तत्रेति**। प्रकर्षस्य प्रकर्षो युक्तः, कुत्सितस्य कथं कुत्सा, अत आह — **तथेति**। कुत्सायाः सम्यक्त्वाप्रसक्तेर्निषेधा [योगा]दाह — **अन्ये त्विति**। अनुकम्पितशब्दस्यापि प्रायेण सर्वानुकम्पा प्रयोक्तृव्यतिरिक्तानुकम्पा प्रवृत्तिनिमित्तम्। प्रयोक्त्रनुकम्पायां तु प्रत्यय इत्याह — **अनुकम्पितक इति**। 'निरपेक्षः' इत्यस्य स्वार्थमात्रे निरपेक्षत्वं प्रागुक्तम्। इदानीं स्वार्थादिपञ्चकेऽपि निरपेक्षत्वमाह — **केचित्त्विति**। मुख्यसत्ता वस्तुतो विद्यमानता। अतीतानागतेष्वपि शुक्लादिशब्दप्रयोगात् तद्विद्यमानतां नापेक्षत इत्यर्थः। शब्दप्रयोगे बुद्धिस्थत्वमात्रमपेक्षितम्, सैवोपचरितसत्ता। स्वार्थादिपञ्चकवृत्तस्य कुत्सादिप्रवृत्तौ हेतुहेतुमद्भावो नियामक इत्याह — **तत्र परिसमाप्तेति**। स्वार्थादीनां कुत्साहेतुत्वं तेषां कुत्सायां प्रयोगदर्शनादित्याह — **तथा हीति**। **कौरवकानिति**। पुंस्त्वं कुत्स्यते। **धर्मान्तरं** सदाचारादि। कुत्सादेः प्रत्ययार्थत्वं प्रातिपदिकसमानाधिकरणत्वं वेति विमर्शार्थः। तत्र कोटिद्वयमुपपादयति — **यदेति**। ननु भूते क्तेन भाव्यम्, कथं वर्तमाने क्तः, अत आह — **मतीति**। [1]'मतिबुद्धिपूजार्थेभ्यश्च' इत्यत्र यदि 'शीलितः रक्षितः, क्षान्तः' इत्यादिपरिगणितानामेव समुच्चयस्तदाह[2] — **क्रियावयवेति**। 'कृताकृत' इत्येकदेशभूतत्वे क्त इत्यर्थः। ननु समानाधिकरणपक्षं दूषयित्वा प्रकृत्यर्थविशेषणत्वं सिद्धान्तयिष्यते। द्वयोरभेदात् कथमेतदिति शङ्कते — **कः पुनरिति**। **उच्यत इति**। प्रकृत्यर्थं प्रति कुत्साया विशेषणत्वोपलक्षणत्वाभ्यां पक्षभेद इत्यर्थः। प्रयोगविशेषाभावेऽयं विशेषोऽप्रयोजकः, अत आह — **तत्रेति**। **प्रत्ययेन न भाव्यमिति**। पटुशब्देनैव कुत्साया उक्तत्वात् तत्समानाधिकरणपदानां प्रत्ययं विनापि कुत्सितार्थवृत्तित्वनिश्चयादित्यर्थः। उपलक्षणत्वपक्षे तु सर्वेषां कुत्सितत्वोपलक्षितार्थवृत्तित्वात् सर्वेभ्य इति भावः। **तेभ्य एव** तेभ्यः प्रत्ययो भवत्येवेत्यन्वयः। नपुंसकत्वैकवचनयोः सिद्धत्वादाह — [3]**यथेष्टेति**। **एतच्चेति**। देवदत्तस्य पटुंकमिति प्रयोगप्रसङ्ग इत्यर्थः। दोषद्वयपरिहारं शङ्कते — **यद्यपीति**। **कुत्सितत्वयुक्तेति**। स्वयं कुत्सितत्वप्रतिपादकत्वाभावेऽपि तदुपलक्षितार्थवृत्तित्वादित्यर्थः। तैलकादिशब्दयुक्तत्वमिदंशब्दस्याप्यस्तीत्युक्तदोषानुद्धारादाह — **येन धर्मेणेति**। तैलत्वादिना कुत्सा, नेदंत्वेनेति भावः॥

[४, २३२–२३७]

(नारायणीयम्) ननु स्वशब्देनोक्त एवार्थे स्वार्थिका विधीयन्त इति स्वशब्देनोक्तत्वं स्वार्थिकप्रत्ययाप्राप्तौ हेतुर्नोपपद्यत इत्याशङ्क्य तत्राशयमाविष्करोति — **अनिर्धारितेति**। कुत्सितादिशब्दादर्थान्तरद्योतनाय प्रत्यय इत्युपपाद्य कुत्साद्यर्थेऽपि कुत्सितादिशब्दात् प्रत्ययोत्पत्तिरुपपद्यत इति प्रतिपादनाय 'अथवा' इत्यादिपक्षान्तरमित्याह — [**कुत्सित**] **कुत्सायामपीति**। **आत्मीयवचन इति**। न त्वात्मादिवचनः। **अभिधेयवचन इति**। न प्रयोजनादिवचनः। कर्मधारयश्चायम्, न बहुव्रीहिरित्याह — **स्वोऽर्थ इति**। आत्मनोऽसाधारण इत्यर्थः। जात्यादीन् क्रमेणोदाहरति — **गौः शुक्ल इति**। 'निरपेक्षः' इत्यस्य 'स्वार्थमभिधाय' इत्यत्रान्वय इति हृदि नि-

---

[1] पा. सू. ३.२.१८८.
[2] तदा, आहेति छेदः।
[3] प्रदीपे 'यथेष्टं लिङ्गवचनानुपपत्तिः' इत्यत्र 'यथेष्टलिङ्गवचनानुपपत्तिः,' इति पाठोऽभिमतः। अयं पाठः चौखाम्बामुद्रिते दृश्यते।

धाय तत्फलमाह — **निरपेक्ष इत्यनेनेति**। [1]**द्रव्यशब्देन चेति**। यद्विशेष्यत्वेन विवक्ष्यते तदिह शास्त्रे द्रव्यमित्युच्यते सर्वनामपरामर्शयोग्यम्, न तु वैशेषिकादीनामिव गुणानामाश्रयो द्रव्यमित्यस्माकं द्रव्यलक्षणम्। तेन जात्यादयोऽपि गृह्यन्त इति, तदाह — **तत्र जातिशब्द इति**। आरोपितस्वरूपत्वात् स्वरूपेणैकीकारः। अतः स्वरूपासञ्जनस्य प्रवृत्तिनिमित्तत्वादासक्तं स्वरूपं स्वार्थं इत्याह — **तदेति**। एवं पाचक इत्यादौ क्रियाकारकसंबन्धादिर्द्रष्टव्यः। **लिङ्गादीनामेवेति**। विशेषशब्देन लिङ्गादेः प्रतिपादनस्य युक्तत्वादानन्तर्याच्च। **वचनं संख्येति**। उच्यत इति कर्मव्युत्पत्त्या। **विभक्तिः कारकमिति**। विभज्यतेऽनया प्रातिपदिकार्थ इति कृत्वा। **क्वचिदिति**। तत्र स्वार्थादिचतुष्कस्यैवाभिधानं, न पञ्चकस्येत्यर्थः। एतदेवोपपादयति — **प्रवृत्तिनिमित्तेति**। 'स नपुंसकः' इति नपुंसकशब्दस्य नपुंसकत्वं प्रवृत्तिनिमित्तम्, पुंस्त्वं विभक्तिद्योत्यम्। विंशतिशब्दस्य बहुत्वं प्रवृत्तिनिमित्तम्, एकत्वं विभक्तिद्योत्यम्। **तत्रायमिति**। स्वार्थादिपञ्चके क्रमेण वृत्तिर्द्रष्टव्येत्यर्थः। स्वार्थादीनां क्रमेणाभिधानस्यायुक्ततामाशङ्क्य काल्पनिकी व्यवस्थैवमुक्ता, न तात्त्विकीति परिहरति — **यद्यपीति**। **शब्दस्य विरम्येति**। बुद्धिशब्दकर्मणां विरम्यव्यापारस्य पदार्थविद्भिः परास्तत्वात्। **कल्पिताभ्यामिति**। अखण्डस्य पदस्य वाक्यस्य वा वाचकत्वात् प्रकृतिप्रत्ययादीनां कल्पनाबुद्ध्या पृथङ्निष्कर्षादन्वयव्यतिरेकावपि न तात्त्विकावित्यर्थः। 'अप्रयोगार्हस्य' इत्यनेन प्रयोगादर्थनिर्ज्ञानाभावादर्थवत्तायाः काल्पनिकत्वमुपपादितम्। **कल्पितन्यायवशादिति**। कल्पितेष्वर्थेषु न्याया अपि कल्पिता एव, न तात्त्विकाः। तमेव न्यायं दर्शयितुमाह — **तथा हीति**। **पूर्वं स्वार्थेति**। स्वार्थस्य विशेषणत्वात्। 'लिङ्गाद्याश्रयस्य' इत्यनेन लिङ्गाद्यभिधानात् पूर्वं द्रव्याभिधानमुपपादितम्, आधारप्रतीतिपूर्वकत्वादाधेयप्रतीतेः। 'विजातीयक्रियानपेक्ष' इत्यनेन कर्मादीनां विजातीयक्रियापेक्षत्वात् संख्यापेक्षया बहिरङ्गत्वमुक्तम्। **तुशब्दस्यार्थ इति**। न तु पश्चादित्यस्यार्थे, 'अभिधाय' इति ल्यपैव तल्लाभात्। अतः स्वार्थादिवृत्तेः सकाशात् कुत्सादिवृत्तेर्वैधर्म्यं द्योतयितुं पुनश्शब्दः प्रयुक्त इत्यर्थः। अत्र फलितमर्थमाह — **तत्रेति**। का पुनः कुत्सितस्य कुत्सेत्याशङ्क्य दृष्टान्तेनोपपादयति — **यथा प्रकृष्टतम इति**। बहुषु प्रकृष्टेषु कस्यचित् प्रकर्षातिशयविवक्षायां प्रकृष्टशब्दादपि प्रकर्षप्रत्यय उपपद्यते। यथोक्तम् —

> [2]प्रकृष्ट इति शुक्लादिप्रकर्षस्याभिधायकः।
> प्रकृष्टस्य प्रकर्षे तु तरबादिर्विधीयते॥ इति।

तथा कुत्सितत्वमिति। कुत्सित इत्युक्ते किमकार्यकरणान्निन्दार्हत्वेनायं कुत्सितः, उत समीचीनकार्यपि शत्रुणा दुष्टत्वारोपेणेति विशेषो नावधार्यते। प्रत्ययान्तेन तु न सम्यगस्य कुत्सितत्वं, द्वेषेण केनचिदध्यारोपितमेवेति प्रतीयते। सैषा कुत्सितस्य कुत्सेत्यर्थः। कुत्साया अपि निन्द्यतरत्वेन कुत्साविशेषे 'कुत्सितकः' इति प्रयुज्यत इति मतान्तरमाह — **अन्ये त्विति**। उक्तं च —

> [3]कुत्सितत्वेन कुत्स्यो वा न सम्यग्वापि कुत्सितः।
> स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते॥ इति।

अनेनैव न्यायेनानुकम्पायामनुकम्पितशब्दात् प्रत्ययः समर्थनीय इत्याह — **अनुकम्पितक इत्यत्रापीति**। केचिद् बुद्धिपरिकल्पितः शब्दार्थ इति पक्षावष्टम्भेन निरपेक्ष इत्येतदन्यथा व्याचक्षत

---

[1] प्रदीपे 'द्रव्यशब्देन इदंतदिति' इत्यत्र 'द्रव्यशब्देन च इदंतदिति' इति निर्णयसागरमुद्रिते पाठः।

[2] वाक्यपदीयम् ३.१४.३.

[3] वाक्यपदीयम् ३.१४.४.

इत्याह — **केचित्त्विति**। 'स्वार्थादिपञ्चकाभिधाने' इत्यनेन 'निरपेक्षः' इति सर्वत्र संबध्यत इति दर्शयति। बाह्यसत्तानपेक्ष इति ह्यस्यार्थः। तदाह — **मुख्यसत्तेति**। कुत्सितादिप्रवृत्तेः स्वार्थादिपञ्चकापेक्षामुपपादयति — **तत्र परिसमाप्तेति**। उक्तं च —

[1]कुत्साप्रशंसातिशयैः [2]समाप्तार्थं तु युज्यते।
पदं स्वार्थादयः सर्वे यस्मात् कुत्सादिहेतवः॥ इति।

पटुक इति। अत्र पाटवादेः प्रवृत्तिनिमित्तस्यापरिपूर्णत्वाद् दुष्टत्वाद्वा कुत्स्यत्वम्। द्रव्यस्य तु विशेष्यत्वात् प्राधान्याद्धर्मान्तरमुखेनैव कुत्सेति तन्नोदाहृतम्। **कौरवकानिति**। अत्र पुंस्त्वस्य कुत्सा। गाण्डीवधन्वनः संनिधौ कौरवाणां पौरुषाभावप्रतिपादनाय प्रयोगात्। अत एव 'स्त्रियः' इति निर्वीर्यत्वात् स्त्रीसमानान् विद्धीत्यर्थः। **यत्र त्विति**। 'देवदत्तकः' इत्यादौ स्वरूपस्य प्रवृत्तिनिमित्तत्वात् तत्कुत्साया असंभवादभिधेयसहचरितब्रह्महत्यादिधर्मनिबन्धनायां कुत्सायां प्रत्ययः। भाष्योपक्षिप्तस्य पक्षद्वयस्य कथं सूत्रेण संग्रह इत्यत्राह — **यदा कुत्सितेति**। ननु भूते क्तप्रत्ययविधानात् कुत्स्यमानताप्रतिपादनाय पटुकादिशब्दप्रयोगोऽनुपपन्नः स्यादित्यत आह — **मत्यादिसूत्र इति**। **उच्यत इति**। समानाधिकरणपक्षे कुत्सितत्वमुपलक्षणम्, पक्षान्तरे तु [विशेषणमि]त्यर्थः। अङ्गीकृतकुत्सादेव प्रत्ययविधानात् प्रकृत्यर्थविशेषणपक्षो निर्दोषत्वाद् भाष्यकृताश्रित इत्याह — **तत्र प्रकृत्यर्थेति**। [अनुगृहीता वाच्यत्वेन स्वीकृता कुत्सा येन तादृशपदसामानाधिकरण्य इत्यर्थः। तेनैव कुत्साया उक्तत्वात् न]त्वव्ययादिभ्योऽपि प्रत्ययः प्राप्नोति। नन्वव्ययादेः कुत्सितप्रत्ययप्रयोगो दृश्यत इति किमुच्यते 'प्रत्ययेन न भाव्यम्' इति, तत्राह — **यदा त्विति**। [3]**यथेष्टेति**। न तु किंचिल्लिङ्गं वचनं वा न प्राप्नोतीति। **तथापि निर्दोषेति**। [4]"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायात्। **कुत्सितत्वयुक्तेति**। कुत्सितत्वयुक्ते घृतार्थे [5]वृत्तिर्यस्य तत्सामानाधिकरण्यात् तस्मादिदमादेरपि प्राप्नोतीत्यर्थः। **येन धर्मेणेति**। तेनेदमादिभ्योऽतिप्रसङ्गो न भवति॥

ठाजादावूर्ध्वं द्विजातीयादचः ५.३.८३.

[४, २३७–२३८]

(विवरणम्) 'अप्रत्यये' इति पर्युदासवृत्त्या तदन्यदभिधीयत इति भ्रमं व्युदस्यति — **प्रत्ययाभाव इति**। देवदत्तादिभ्यष्ठचि कृतेऽन्तरङ्गत्वाल्लोपे इकादेशे च 'देविका' इत्यादि भवति॥

[४, २३७–२३८]

(उद्द्योतनम्) 'अप्रत्यये' पर्युदासपक्षे 'देवदत्तः, देवः' इति न स्यात्, अत आह — **प्रत्ययाभाव इति**। 'अप्रत्यये तथैवेष्टः' इति तथाशब्देन पूर्वपद[लोप] एवोक्त इति विरोधः, अत आह — **भाष्य इति**। **भानुल इति**। भानुदत्तशब्दात् [6]"बह्वचो मनुष्यनाम्नष्ठज् वा' [7]"घनि-

---

[1] वाक्यपदीयम् ३.१४.१.
[2] समाप्तार्थात्तु — घ.
[3] प्रदीपे 'यथेष्टं लिङ्गवचनानुपपत्तिः' इत्यत्र 'यथेष्टलिङ्गवचनानुपपत्तिः' इति चौखाम्बा-मुद्रिते पाठः।
[4] लौ. न्या. साहस्री पृष्ठम् १२२.
[5] प्रवृत्तिः — घ.
[6] पा. सू. ५३.७८.
[7] पा. सू. ५.३.७९.

लचौ च' इतीलच्प्रत्ययः। तस्यादेर्लोपः। भाष्ये **उको द्वितीयत्व इति**। द्वितीयादचः परस्य लोपे यत्रोक् द्वितीयाच् तत्र [१]'इसुसुक्तान्तात् कः' इति कादेशसिद्ध्यर्थं ठग्रहणम्। अन्यथेकादेशानन्तरं लोपे कादेशो न स्यात्। तदेतदाह — भाष्ये **अजादिलक्षण इति**। नन्विकादेशानन्तरं [२]'यस्य' इति लोपे इकस्यापि स्थानिवद्भावेन ठत्वात् कादेशः कुतो न भवति, अत आह — **संनिपातेति**। अजादिसंनिपातनिमित्तकं तान्तत्वमजादित्वविघातनिमित्तं न भवति। 'माथितिकः' इत्यत्र [३]'तदस्य पण्यम्' इति ठक्। ठग्रहणस्य प्रयोजनान्तरमाह — **यदेति**। देवभानुशब्दादनुकपायां [४]'मनुष्यनाम्नष्ठज् वा' इति ठचीकादेशाभावेन द्वितीयादचो लोपाभावेन 'अनुकम्पितो देवभानुः – देविकः' इति न सिध्येत्। ठग्रहणे त्वादेशात् पूर्वं लोपे सति सिध्यतीत्यर्थः॥

[४, २३७ -२३८]

(नारायणीयम्) ननु तथाशब्दस्य प्रकृतपरामर्शित्वादयमर्थः स्यात् — यथा प्रत्यये सति पूर्वपदस्य लोपस्तथा प्रत्ययाभावेऽपि पूर्वपदस्य लोप इष्ट इति। इष्यते तूत्तरपदस्यापि, देवभीमादिशब्दानां लोके प्रयोगदर्शनादित्यत आह — **प्रत्ययाभावेऽपीति**। 'तथा' इति लोपमात्रं परामृश्यते। तत्र सर्वलोपशासनस्यायुक्तत्वादेकदेशलोपेनैव भाव्यम्। तत्रापि लक्ष्यानुविधानाल्लक्षणस्य पूर्वपदोत्तरपदयोरन्यतरस्येत्यर्थः। कथं तर्हि भाष्ये दत्तादिरेवोदाहृत इत्यत आह — **भाष्ये त्विति**। **उदाहरणमात्रमिति**। न त्वयमेवास्य विषय इति प्रदर्शनार्थमित्यर्थः। नन्विलस्य लकारादेशो विधीयत इति, नेत्याह — **लोपस्येति**। नन्विकादेशे कृतेऽपि स्थानिवद्भावाट्ठग्रहणेन ग्रहणात् [५]'इसुसुक्तान्तात् कः' इति कादेशः स्यादित्यत्राह — **संनिपातेति**। अजादिसंनिपातकृतं प्रकृतेस्तान्तत्वं कथं तस्याजादित्वं विहन्यात्। एवं प्रकृतेऽपि द्रष्टव्यम्। संनिपातपरिभाषाया अनित्यत्वात् प्रयोजनान्तरमाह — **यदा चेति**। भाष्ये प्रयोजनप्रदर्शनमुपलक्षणमिति भावः॥

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ५.३.८४.

[४, २३८–२४०]

(विवरणम्) 'वरुणादीनाम्' इत्युक्त्वा 'सुपरिकः' इत्युदाहरणप्रदानमयुक्तम्, सुपरिशब्दस्य वरुणाद्यनन्तःपातित्वादित्यत आह — **आदिशब्द इति**। **उच्चार्यमाणस्येति**। स्मर्यमाणस्यार्थप्रत्यायकत्वेऽप्युच्चारितस्यार्थप्रत्यायकत्वाभावादानर्थक्येन विभक्त्यनुपपत्तिरित्यपि द्रष्टव्यम्। [६]**ज्येद्राघा इति**। नक्षत्रवाच्येकदेशा नक्षत्र इत्यर्थः॥

---

[१] पा. सू. ७.३.५१.
[२] पा. सू. ६.४.१४८.
[३] पा. सू. ४.४.५१.
[४] पा. सू. ५.३.७८.
[५] पा. सू. ७.३.५१.

[६] पूनामुद्रिते वाक्यपदीये 'देयसो इत्यसाधवः' इत्यस्य स्थाने 'ज्ये द्रा घा इत्यसाधवः' इति पाठो दृश्यते। स पाठोऽभिमतो विवरणकृतः। ज्येष्ठा, आर्द्रा, मघा, इति नक्षत्रवाच्येकदेशा विवक्षिताः।

[४, २३८–२४०]

(उद्द्योतनम्) 'सुपरिकः' इत्युदाहरणसंगत्यर्थमाह — **आदिशब्द इति**। अतिप्रसङ्गं निराह — **एकेति**। अवचनेऽनिष्टमाह — **संहितेति**। परत्वाल्लोपात् पूर्वं संहिताकार्येऽनिष्टं स्यादिति संधेः पूर्वं लोपवचनमित्यर्थः। जश्त्वाभावे हेतुः — **भसंज्ञयेति**। **अन्तर्वर्तीति**। षट् अङ्गुलयो यस्येति समासान्तर्वर्तीत्यर्थः। तेन [1]'सुप्तिङन्तम्' इति पदसंज्ञा। **तद्धितेति**। [2]'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञा। अचः स्थानिवत्त्वे जश्त्वसिद्धिमुपपादयति — **षडङ्गुलीति**। **अनेन** [3]'ठाजादौ' इत्यनेन। **तस्य** [4]'यस्य' इति लोपस्य। षान्तस्य भत्वे कर्तव्ये स्थानिवत्त्वादकारान्तस्यैव भसंज्ञा, न षकारान्तस्येत्यर्थः। **भिन्नेति**। अकारान्तस्य भसंज्ञया षकारान्तस्य न पदसंज्ञा बाध्यत इत्यर्थः। **एकावधिकत्वादिति**। [5]'स्वादिषु' इति पदसंज्ञां प्रत्यपि [6]'यस्य' इति लोपस्य स्थानिवत्त्वादित्यर्थः। पदसंज्ञां प्रति [7]'यस्य' इति [लोपस्य] स्थानिवत्त्वाभावमाशङ्क्य निषेधति — **न चेति**। लोपस्य स्थानिवत्त्वे भसंज्ञापदसंज्ञयोर्भिन्नविषयत्वं स्यात्। तदभावात्तु षान्तस्यैव संज्ञात्रयमपीति भसंज्ञया पदसंज्ञाद्वयस्यापि बाधान्न पदकार्यप्रसङ्ग इत्यर्थः। **इहेति**। समुदायस्य पदसंज्ञात्र विधीयते, न तु पदान्तस्य विधानमिति न स्थानिवत्त्वनिषेध इत्यर्थः। अत्र "द्वितीयादचः' इत्यादिलोपविधाने एकदेशानुमितसंज्ञया संज्ञ्यवगमं निराह — **न चैकदेशेनेति**। **उच्चार्यमाणस्येति**। समुदायानुमानं विनाप्युच्चार्यमाणादेव संज्ञिप्रत्ययदर्शनादित्यर्थः। **एवं तर्हीति**। समुदाये संज्ञात्वेन विनियुज्यमानेऽवयवानामप्यनुनिष्पादिसंज्ञात्वमस्तीत्येकदेशेनापि संज्ञिप्रतीतिरुपपन्नेत्यर्थः। तर्ह्येकैकवर्णादपि संज्ञिप्रतीतेर्वर्णानामपि प्रत्येकं साधुत्वं स्यात्, अत आह — **तत्रेति**। वर्णानामसाधुत्वे संमतिमाह — [8]**तदुक्तमिति**। पदस्य वर्णानां चानुनिष्पत्तिसाम्येऽपि देवदत्तशब्दे 'दे' इत्यस्य, यज्ञदत्तशब्दस्य 'य' इत्यस्य, सोमदत्तशब्दे 'सो' इत्यस्य न साधुत्वम्। तत्र हेतुः — **न हीति**। **तेषु** वर्णेषु। **दत्तादिवत्** दत्तादिष्विव। स्मर्यत इति **स्मृतिः** साधुत्वम्। ननु प्रयुक्तानामन्वाख्यानम्, लोके चैकदेशानामप्रयोगात् तदन्वाख्यानं व्यर्थम्, अत आह — **दृष्टश्चेति**॥

[४, २३८–२४०]

(नारायणीयम्) **आदिशब्दः प्रकार इति**। न तु व्यवस्थायाम्, तथा सति शेवलादीनां ग्रहणं न स्यात्, उदाहरणं च न जाघटीतीति भावः। **प्रकारः** सादृश्यम्। तत् किंनिबन्धनमित्यत्राह — **एकसूत्रेति**। **संहिताकार्यं इति**। अनेन संधीयते प्रश्लिष्यतेऽनेनेति संधिशब्देन संहिताविषयं कार्यमुच्यत इति दर्शयति। **बाधितत्वादिति**। तत्र [10]'सुप्तिङन्तम्' इत्येषा परत्वाद् भसंज्ञया बाध्यते। [11]'स्वादिषु' इति प्राप्तापवादत्वात्। **ङगुलिशब्दस्याननेति**। अनुकम्पितः

---

[1] पा. सू. १.४.१४.
[2] पा. सू. १.४.१७.
[3] पा. सू. ५.३.८३.
[4] पा. सू. ६.४.१४८.
[5] पा. सू. १.४.१७.
[6] पा. सू. ६.४.१४८.
[7] पा. सू. ६.४.१४८.
[8] पा. सू. ५.३.८३.
[9] प्रदीपे 'यदुक्तम्' इत्यत्र 'तदुक्तम्' इति चौखाम्बामुद्रिते पाठः।
[10] पा. सू. १.४.१४.
[11] पा. सू. १.४.१७.

षडङ्गुलिरिति ठचि कृते [1]'ठाजादि'सूत्रेण ङ्गुलिशब्दस्य लोपः। **स्थानिवद्भावादिति**। [2]'अचः परस्मिन्' इत्यनेन। **भिन्नावधिकत्वादिति**। उभयोरेकत्र प्राप्तौ विरोधः, स चात्र नास्तीति बाध्यबाधकभावाभावः। **एकावधिकत्वादिति**। उभयोरप्यकारान्तस्य प्राप्तत्वात्। **पदान्तस्य कस्यचिदविधेयत्वादिति**। पूर्वमेव जश्त्वेन डकारस्य निष्पन्नत्वात् पदान्तताया अविधानात्। कर्मसाधने तु डकारस्य पदान्तत्वेन सिद्धस्य भत्वात् पदत्वनिवृत्तौ षकाररूपापत्तेर्विधेयत्वात् स्थानिवत्त्वनिषेधप्रसङ्ग इति भावः। उत्तरपदलोपवचने कथमिष्टसिद्धिरित्यत्राह — **उत्तरपदस्येति**। **संज्ञाशब्दैकदेश इति**। अक्तपरिमाणः शब्दः संज्ञात्वेन विनियुक्तः। एकदेशावगमे तु तत्स्वरूपानुपलम्भात् कथं संज्ञिनोऽवगमः स्यादित्यर्थः। तत्रैतत् स्यात् — यथा विषाणेन गौरनुमीयते तथैकदेशेन समुदायोऽनुमीयते। सोऽनुमितोऽर्थस्य वाचक इति। तदपि न युज्यत इत्याह — **न चेति**। **अनुनिष्पन्नत्वादिति**। समुदाये संज्ञात्वेन विनियुज्यमानेऽवयवानामपि संज्ञात्वमनुनिष्पद्यते। यथा आमिक्षार्थं तप्ते क्षीरे दध्यानयनं कुर्वाणे वाजिनमनुनिष्पत्तिं प्रतिपद्यते। नन्वेवं वर्णानामप्यनुनिष्पादात् [3]'ज्येष्ठा, आर्द्रा, मघा' इत्यादौ 'ज्ये, द्रा, घा' इत्यादीनामपि प्रयोगः स्यादित्यत आह — **तत्र वर्णानामिति**। वर्णानां साधुत्वनिवृत्त्यर्थमेव [4]'लोपः पूर्वपदस्य च। अप्रत्यये तथैवेष्टः' इति लोपविधानमारब्धम्। तदेतदाह — **इति लोपविधानेति**। **तुल्यायामिति**। यद्यपि दत्तादीनां ज्येप्रभृतीनां चानुनिष्पत्तिस्तुल्या, तथापि 'ज्ये' इत्यादीनां न साधुत्वम्, कुत [5]इत्याह — **न हीति**। [न हि] तेषु ज्येप्रभृतिषु शास्त्रे काचित् स्मृतिरुपदिश्यते, यतस्तेषां साधुत्वं स्यादित्यर्थः। नन्वेवं संज्ञाशब्देभ्योऽन्यत्राप्येकदेशेन समुदायार्थप्रतिपादनं स्यादित्याशङ्क्य प्रयुक्तानामन्वाख्यानात् संज्ञाशब्देष्वेवैवंविधव्यवहारदर्शनादतिप्रसङ्गो नोद्भावनीय इत्याह — **दृष्टश्चेति**॥

अल्पे ५.३.८५. ह्रस्वे ५.३.८६.

[४, २४०]

(उद्द्योतनम्) ननु द्वयस्यैकत्र समावेशादर्शनात् प्रश्नो न युक्तः, अत आह — **वंशादिष्विति**। पटेऽल्पशब्दप्रयोगं शङ्कते — **ननु चेति**। यस्मिन् पटे ह्रस्वशब्दप्रयोगस्तत्राल्पशब्दप्रयोगो नास्तीति भाष्याभिप्राय इत्याह — **तथापीति**। **आयामः** दैर्घ्यम्, **विस्तारः** विशालता। उभयहीनोऽल्पशब्देनोच्यते। विशालोऽप्यायामहीनो ह्रस्वशब्देनेति नैकविषयत्वं द्वयोरित्यर्थः। न त्वल्प उच्यते, अपि तु महानुच्यत इत्यर्थः॥

[४, २४०]

(नारायणीयम्) ह्रस्वे क्वचित् समावेशदर्शनाश्रयेणात्र पूर्वः पक्ष इत्याह — **वंशादिष्विति**।

---

[1] पा. सू. ५.३.८३.
[2] पा. सू. १.१.५७.
[3] वाक्यपदीयश्लोके "तुल्यायामनुनिष्पत्तौ 'देयसो' इत्यसाधवः।" इति प्रदीपे पाठो दृश्यते। अमुं पाठमवलम्ब्यैव नागेशेनापि विवृतम् 'देवस्याद्यं 'दे' इति, यज्ञदत्तस्य 'य' इति, सोमस्य 'सो' इति, इति। पदमञ्जर्यामप्ययमेव पाठ उपलभ्यते। पूनामुद्रिते तु वाक्यपदीयेऽत्र द्वितीयपादे 'ज्येद्राघा इत्यसाधवः' इति दृश्यते। स पाठोऽभिमतोऽत्र।
[4] महाभाष्यम् ५.३.८३.
[5] इत्यत आहेत्यर्थः।

पटादिषु यत्र ह्रस्वत्वव्यवहारस्तत्राल्पत्वव्यवहारस्य व्यभिचार इत्येवंपरमिदम् 'न कश्चिदाह्राल्पः पटः' इति, न त्वस्मिन् विषये कदाचिदप्यल्पत्वव्यवहारो नास्तीत्येतत्प्रतिपादनायाह — **ननु चोच्यत इति** ॥

कुटीशमीशुण्डाभ्यो रः ५.३.८८.

[४, २४१]

(**उद्द्योतनम्**) ननु प्रकृतेः पुंवद्वचने कुटीर इत्यत्र स्त्रीप्रत्ययनिवृत्तिः स्यात्, अत आह — **प्रकृतीति** ॥

[४, २४१]

(**नारायणीयम्**) ननु कुटचादीनां पुंवद्वचने स्त्रीप्रत्ययनिवृत्तिः स्यात् कुटीरादौ, तत्राह — **प्रकृतिप्रत्ययेति** ॥

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ५.३.९१.

[४, २४१]

(**उद्द्योतनम्**) ननु प्रवृत्तिनिमित्तस्य तनुत्वे प्रत्ययेन भाव्यमिति नातिप्रसङ्गः, अत आह — **तनुत्व इति**। **अन्तरङ्गत्वं** प्रकृत्या शीघ्रमुपस्थितत्वम् ॥

[४, २४१]

(**नारायणीयम्**) **प्रवृत्तिनिमित्तस्य तानव इति**। वत्सशब्दस्य प्रथमं वयः प्रवृत्तिनिमित्तम्। तस्य तनुत्वं द्वितीयवयःप्राप्तिः। द्वितीयं हि वयः प्राप्तवतो वत्सस्य प्रथमवयसोऽल्पत्वं भवति। एवमन्यत्रापि द्रष्टव्यम् ॥

किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ५.३.९२.

वा बहूनां जातिपरिप्रश्ने डतमच् ५.३.९३.

[४, २४२]

(**उद्द्योतनम्**) 'उपाध्यानर्थक्यम्' इति सामान्योक्तेरभिप्रायमाह — **अयं भाव इति**। **अथवेति**। द्वयोरिति निर्धारणे षष्ठी। तत्रैकस्यैव निर्धारणं भवतीति 'एकस्य' इति न वक्तव्यमित्यर्थः। 'किं कारणम्' इत्यादिभाष्यं दूषयितुं बहूनामित्यस्य वैयर्थ्यहेतुमाह — **डतमच इति**। भवतु तत्रत्य एव ग्रन्थः, प्रकृतेऽप्युपयुज्यताम्, अत आह — **न हीति**। 'द्वयेकयोः पुनर्निर्ज्ञातम्'

इत्येतद् दूषयति — **अत्यन्तासंबद्धश्चेति** ॥

[४, २४२]

(नारायणीयम्) उपाधिशब्देन प्रथमसूत्रे 'द्वयोः' इत्येतद् विशेषणं विवक्षितम्। द्वितीयसूत्रे जातिपरिप्रश्नग्रहणं चेत्याह — **द्वयोरिति**। **अजातिपरिप्रश्नेऽपीति**। कतमो भवतां देवदत्तः, इति। अत एव [1]"कतरकतमौ जातिपरिप्रश्ने' इति जातिपरिप्रश्नग्रहणं कृतम्। अन्यथा जातिपरिप्रश्नविषयेण कतमशब्देन साहचर्यात् कतरशब्दोऽपि तदर्थवृत्तिरेव ग्रहीष्यत इत्यनर्थकं तत् स्यात्। **अथवा द्वयोरिति**। अत एव भाष्ये 'बहिर्धारणम्' इत्याद्युक्तम्। ननु बहुग्रहणाभावे द्वयोरेकस्य निर्धारणेऽपि डतमः स्यात्। तच्चानिष्टमित्यत आह — **डतमच उत्सर्गस्येति**। **अत्यन्तेति**। न केवलं प्रकृतेऽनुपयोगः, किं तर्हि, अन्वयोऽपि नोपपद्यत इत्यर्थः ॥

अवक्षेपणे कन् ५.३.९५.

[४, २४३]

(उद्द्योतनम्) अर्थभेदाभावेऽपि स्वरार्थं प्रत्ययविधानमावश्यकमित्याक्षेपायोगमाशङ्क्याह — **यद्यपीति**। प्रत्ययद्वयस्य विषयविभागमाह — **येनेति**। अवक्षेपणस्य कुत्सितत्वे हेतुमाह — **न हीति**। तथा च कुत्सित एव कः कंश्चेति वक्तव्यम्, योगान्तरं व्यर्थमित्यर्थः। स्वयमकुत्सितस्यापि परकुत्साहेतुत्वसंभवाद् योगान्तरमावश्यकमित्याह — **व्याकरणादिकमिति** ॥

[४, २४३]

(नारायणीयम्) ननु कुत्सितावक्षेपणयोरर्थाभेदेऽपि प्रत्ययद्वयविध्यर्थं पृथग्योगद्वयस्य कर्तव्यत्वात् तत्सामर्थ्यादर्थभेदस्यावश्यंभावं मनसि निधाय प्रश्नोऽयमसमञ्जस इत्याशङ्क्याह — **यद्यपीति**। कुत्सितावक्षेपणयोः कर्मकरणभेदेन यो भेद उक्तस्तं विशदयति — **येनावक्षिप्यत इति**। 'यत् पर[स्य]कुत्सार्थम्' इत्यनेन स्वयमकुत्सितमप्यवक्षेपणं भवतीत्युक्तम्। तदुपपादयति — **व्याकरणादिकमिति**। व्याकरणकल्पसूत्रादिकं स्वतो न कुत्सितम्, प्र[त्युत प्रशस्तमेव। यस्य तदवलेपमावहति तस्यावक्षेपणमित्य]र्थः ॥

लुम्मनुष्ये ५.३.९८.

[४, २४३]

(उद्द्योतनम्) 'लिङ्गवचनसिद्ध्यर्थम्' इति वक्तव्ये लिङ्गमात्रग्रहणस्य प्रयोजनमाह — **वचनं त्विति**। लुप्कार्यस्य प्रकृतिवचनस्य कथमभावः, अत आह — **तदुक्तमिति**। [2]"विशेषणानां चाजातेः' इति सूत्रे इदमुक्तम्। तत्र हरीतक्यादिराकृतिगण इति भावः ॥

---

[1] पा. सू. २.१.६३.

[2] पा. सू. १.२.५२.

[४, २४३]

(**नारायणीयम्**) 'लिङ्गसिद्ध्यर्थम्' इति विशेषणस्य फलमाह — **वचनं त्विति** ॥

जीविकार्थे चापण्ये ५.३.९९.

[४, २४४]

(**उद्द्योतनम्**) गृहे याः पूज्यन्ते तत्र प्रत्ययप्रसङ्गं निराह — **याः परिगृह्येति**। **अटन्ति** जीविकार्थम् ॥

[४, २४४]

(**नारायणीयम्**) **याः परिगृह्येति**। याः प्रतिमा उपादाय भिक्षमाणाः प्रतिगृहमटन्ति ता इहोदाहरणम्। ता हि जीविकार्था भवन्तीत्यर्थः। 'अपण्ये' इति प्रतिषेधस्य विषयं दर्शयति — **यास्त्विति**। याः पुनरभ्युदयनिःश्रेयसार्थिभिः प्रतिष्ठाप्यन्ते पूज्यन्ते च, तासु [१]'अर्चासु पूजनार्थासु' इति देवपथादिपाठाद् भवति ॥

समःसाच्च तद्विषयात् ५.३.१०६.

[४, २४४–२४५]

(**विवरणम्**) इवार्थे समासविधानात् 'समासात्तद्विषयात्' इति सामानाधिकरण्यानुपपत्तिमाशङ्क्याह — **अस्मादेवेति**। **उपमेयप्रधानानामिति**। उपमेयपराणामित्यर्थः ॥

[४, २४४–२४५]

(**उद्द्योतनम्**) प्रधानत्वेन प्रत्ययस्यैव परामर्शो युक्तः, नोपसर्जनस्यार्थस्य, अत आह — **प्रधानस्यापीति**। इवार्थे समासविधायकाभावादाह — **अस्मादेवेति**। तर्हि प्रत्ययविधौ समासः, समासाच्च प्रत्ययविधिरित्यन्योन्याश्रयः, अत आह — **सुप् सुपेति वेति**। वचनादुक्तोऽपि स्यादित्याशङ्क्यातिप्रसङ्गमाह — **वचनेति**। शस्त्रीश्यामादाविवार्थद्वयाभावान्न प्रत्यय इत्याह — **शस्त्रीति**। इवार्थद्वयं काकतालीये दर्शयति — **वृत्तिविषय इति** ॥

[४, २४४–२४५]

(**नारायणीयम्**) **इवार्थ इति**। तच्छब्दः प्रकृतपरामर्शी, तत्रेवार्थप्रत्ययोः प्रकृतत्वात् संदेहात्

---

[१] अयं श्लोकः काशिकायां देवपथादिभ्यश्चेति सूत्रे दृश्यते।

प्रश्न इत्यर्थः। **आचार्यदेशीय इति**। विधीयमानत्वात् प्राधान्याच्छस्यैव सर्वत्राम्ना परामर्शो युक्त इति तस्याशयः। यद्यपि प्रत्ययः प्रधानम्, तथाप्यर्थस्यासंगतत्वात् तत्परामर्शायोग इत्याशयेन चोदकः पृच्छतीत्याह — **अनेनैवेति**। अनन्यत्र भावो हि विषयार्थ इति प्रत्ययपरामर्शेऽयमर्थः स्यात् — यः समासश्छप्रत्ययादन्यत्र न भवति ततश्छो भवतीति। एतच्च न घटते। प्रसिद्धं ह्यन्यस्य ज्ञप्तिहेतुर्भवति। छप्रत्ययोऽनेनैवेदंप्रथमतया विधीयते। न च शास्त्रान्तरं तद्विधानार्थमस्तीति प्राक्छविधेः समासस्य छविषयत्वमसिद्धं कथमनूद्येतेत्यर्थः। सिद्धान्तिन आशयं दर्शयति — **प्रधानस्येति**। नन्विवार्थपरामर्शोऽपि न युक्तः, इवार्थे लक्षणान्तरेण समासस्याविधानादिवार्थविषयत्वायोगादित्यत आह — **छे चेति**। **वचनसामर्थ्यादिति**। यथा तद्धितार्थे द्विगुर्भवतीति वचनाद् द्विगुतद्धितयोः साधारणोऽर्थः, एवमिहापि समासेनाभिहितेऽप्यर्थे प्रत्ययः स्यादिति चोद्यम्। परिहरति — **शस्त्रीश्यामादिभ्य इति**। इमेऽपीवार्थाभिधायिन इत्येभ्योऽपि स्यादित्यर्थः। **शस्त्रीश्यामादीनां त्विति**। शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्तेति देवदत्तादेरुपमेयान्तरेणानन्वयात् एक एवात्रेवार्थ इति छस्याप्रसङ्ग इत्यर्थः। **वृत्तिविषय इति**। यथा दध्योदन इत्यादौ द्रव्याणां सिद्धस्वभावानां परस्परसंबन्धायोगात् तदन्यथानुपपत्त्या दध्यादिशब्दो दध्यादिसमवेतायामुपसेकादिक्रियायां वर्तते तथात्रापि वृत्तिविषये काकादिशब्दाः काकादिसमवेतक्रियाभिधायिन इत्यर्थः। कौ पुनरत्र द्वाविवार्थावित्यत्राह — **तत्र काकागमनमिति**। उक्तं च —

[1]चैत्रस्य तत्रागमनं काकस्यागमनं यथा।
दस्योरभिनिपातस्तु तालस्य पतनं यथा॥
संनिपाते तयोर्यान्या क्रिया तत्रोपजायते।
वधादिरुपमेयेऽर्थे तया छविधिरिष्यते॥ इति।

अभिजिद्विदभृच्छालावच्छखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ५.३.११८.

[४, २४५–२४६]

(विवरणम्) गोत्रचरणाद्वुञित्यत्रेति। न तदधिकारविहितप्रत्ययः, स्वरितलिङ्गासङ्गाभावादिति भावः॥

इति प्रदीपविवरणे पञ्चमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः॥

[४, २४५–२४६]

(उद्द्योतनम्) गोत्रप्रत्ययान्ताद्योऽण् तदन्तादित्यन्वयभ्रमं व्यावर्तयति — **गोत्रेणेति**। नन्वभिजितोऽपत्यमाभिजितः, स एवाभिजित्यः। तत्र यञः स्वार्थिकत्वेन गोत्रप्रत्ययत्वादाभिजित्यस्येदमित्यर्थे [2]'गोत्रचरणाद्वुञ्' इति वुञि 'आभिजितकः' इति सिध्यत्येवेति यञन्तस्य गोत्रत्वाति-

---

[1] वाक्यपदीयम् ३.१४. ६१२, ६१३. [2] पा. सू. ४.३.१२६.

देशो व्यर्थः, अत्र आह — **एवं मन्यत इति**। **गोत्रेति**। गोत्रवाचिभ्यश्चरणवाचिभ्यश्च [1]'तस्येदम्' इति विषये वुञ्। **गोत्राधिकारेति**। स्वरितेनाधिकारावगतिर्भवतीति तस्मिन् सूत्र उक्तत्वात् [2]'गर्गादिभ्यो यञ्' इत्यस्यैव ग्रहणं स्यादित्यर्थः। समाधानाभिप्रायमाह — **अर्थो गृह्यत इति**। तत्र गोत्रग्रहणं न स्वर्यत इत्यर्थः। तद्वाचिन इति पञ्चमी। अधिकारग्रहणेऽनिष्टमाह — **गोत्राधिकारेति**॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य
सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने
पञ्चमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः ॥

[४, २४५–२४६]

(नारायणीयम्) गोत्रे [यो] विहित इति। यद्यपि गोत्रशब्देनापत्यलक्षणोऽर्थ उच्यते, तथाप्यत्र विशेषणसामर्थ्यात् तत्र विहितः प्रत्यय उपचारादुच्यत इति भावः। ननु गोत्रप्रत्ययान्तात् स्वार्थे विहितस्य यञो गोत्रार्थवृत्तित्वात् [3]'गोत्रचरणाद्वुञ्' इति वुञ्नि सिद्धे किमर्थं तस्य गोत्रत्वमतिदिश्यत इत्यत आह — **एवं मन्यत इति**। प्रत्याख्यानवादिन आशयं दर्शयति — **गोत्रचरणाद्वुञ्निति**॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य
तृतीये पादे द्वितीयमाह्निकम्

॥ पादश्च समाप्तः ॥

---

[1] पा. सू. ४.३.१२०.

[2] पा. सू. ४.१.१०५.

[3] पा. सू. ४.३.१२६.

पञ्चमाध्यायस्य चतुर्थपादे प्रथममाह्निकम्

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ५.४.१.

[४, २४७]

(विवरणम्) अपरनिमित्तकत्वे फलं दर्शयति — **तेनेति** ॥

[४, २४७]

(उद्द्योतनम्) ननु पादशतग्रहणाभावे द्वौ द्वौ माषौ ददातीत्यत्रापि प्रत्ययः स्यात्, अत आह — **द्वौ द्वाविति**। वुनोऽकादेशे [1]'यस्य' इत्यकारलोपे सिद्धे 'लोपश्च' इति व्यर्थम्, अत आह — **यस्येतीति**। द्वौ द्वौ पादौ द्विपदिका। वुन्नन्तः स्त्रियां स्वभावात् ॥

[४, २४७]

(नारायणीयम्) ननु पादशतग्रहणाभावे द्वौ द्वौ माषौ ददातीत्यादावनिष्टेऽपि विषये वुन्लोपौ स्यातामित्यत आह — **द्वौ द्वाविति**। **तेन लोपस्येति**। [2]'यस्य' इति लोपस्य त्वीति तद्धिते च विधीयमानस्य परनिमित्तकत्वात् स्थानिवत्त्वात् पादशब्दान्तत्वादङ्गस्य पाच्छब्दान्तस्य विधीयमानः पद्भावो न स्यात्। अयं त्वपरनिमित्तकः। न ह्यत्र वुञ् निमित्तम्, सहविधानादिति पद्भावसिद्धिः ॥

स्थूलादिभ्यः प्रकारवचने कन् ५.४.३.

[४, २४७]

(उद्द्योतनम्) प्रकारः सादृश्यम्, तच्च प्रातिपदिकार्थविशेषणम्। कन्प्रत्ययस्तु स्वार्थ इत्यभिप्रेत्याह — **सादृश्यस्येति**। सादृश्ये प्रयोगं दर्शयति — **अचञ्चन्नपीति** ॥

[४, २४७]

(नारायणीयम्) सादृश्यस्य द्योतक इति। अनेन प्रकारोऽत्र सादृश्यमिति दर्शयति। कथं सादृश्यमित्याह[3] — **अचञ्चन्नपीति**। अविच्छिन्नोद्गमदीप्यमानरश्मिसमूहत्वाच्चलितमूर्तिरिव दृश्य-

---

[1] पा. सू. ६.४.१४८.

[2] पा. सू. ६.४.१४८.

[3] इत्यत आहेत्यर्थः।

मानो मणिश्चञ्चत्कशब्दवाच्यः। मण्डूकखद्योतयोरप्यनेनाभिधानमिति हरिः। यथोक्तम्

[1]चञ्चत्प्रकारश्चञ्चत्को बृहत्क इति चापरे।
मणिमण्डूकखद्योतान् सादृश्येन प्रचक्षते॥
तत्रोन्मेषनिमेषाभ्यां खद्योत उपमीयते।
श्वासप्रबन्धैर्मण्डूकः स्पन्दमानप्रभो मणिः॥ इति।

अबृहन्नपीति। अतिकृशोऽपि मणिः सर्वतः प्रसरत्प्रभाजालवशेन स्थूलतरमूर्तिरवधार्यमाणो बृहत्सदृशत्वात् बृहत्क इत्युच्यते॥

अनत्यन्तगतौ क्तात् ५.४.४.

[४, २४७–२४८]

(विवरणम्) तच्छब्देन क्तान्तविहितातिशायिकपरामर्शेऽतिप्रसङ्गात् क्तान्तमात्रं तच्छब्देन परामृष्टव्यम्, परशब्दापेक्षया च पञ्चमी, परत्वं च व्यवहितमपीत्युपगन्तव्यमित्यभिप्रायेण शङ्कते — **नन्वेष इति**॥

[४, २४७–२४८]

(उद्द्योतनम्) विप्रतिषेधसिद्धये युगपत्प्राप्तिमाह — **भेदस्येति**। 'तदन्ताच्च' इत्यस्य प्रयोजनमाह — **क्तान्तत्वाभावादिति**। **इत्याह** इत्यत आह। तरबन्तात् स्वार्थमात्रेऽयं कन्विधिरिति केषांचिन्मतं निरस्यति — **स्वार्थः पुनरिति**। **न द्योतिता स्यादिति**। सा च प्रतीयत इति भावः। स्वार्थमात्रपरत्वे प्रयोजनं शङ्कते — **नन्विति**। अनत्यन्तगतिप्रतीतिबलादयमनत्यन्तगतिविशिष्ट एव स्वार्थे भवति। केवलस्वार्थेऽपि ज्ञापकात् कन्नित्याह — **एवं तर्हीति**। ज्ञापकत्वमुपपादयति — **न हीति**। ननु साम्यादिना द्योतितेऽपि स्वार्थिकत्वात् [समासात्] कन् स्यात्, अत आह — **समासेभ्यस्त्विति**। ननु [2]'कृद्ग्रहणे गतिकारकस्यापि ग्रहणम्' इति समासात् क्तविधानाभावेऽपि क्तग्रहणेनैव समासस्यापि ग्रहणं स्यात्, अत आह — **कृद्ग्रहण इति**॥

[४, २४७–२४८]

(नारायणीयम्) भेदस्येति। 'भिन्नम्' इत्यत्र प्रकृतिवाच्याया भेदनक्रियायाः स्वाश्रये कृत्स्नव्याप्त्यभावादनत्यन्तगतिर्विवक्षिता भवति, ईषद्भेदादन्यस्मात् प्रकर्षश्च, तदा युगपत्प्राप्त्या विप्रतिषेधोपपत्तिः। ननु कृते तरपि [3]'पुनःप्रसङ्गविज्ञानात् सिद्धम्' इति न्यायेन कनः सिद्धत्वात् किं वचनेनेत्यत आह — **क्तान्तत्वाभावादिति**। **असमास इति**। यदा 'सामिकृतम्' इत्यादौ [4]"सामि' इति समासो न भवति महाविभाषाधिकारात्, तदा साम्यादिशब्देनैकदेशवाचिनात्यन्तगतेः प्रतिपादनात् तद्द्योतनार्थस्य कनः प्रसङ्गाभावः। **समासेभ्यस्त्विति**। तुशब्दो

---

[1] वाक्यपदीयम् ३.१४.६१८,६१९.
[2] परिभाषा २८.
[3] परिभाषा ३९.
[4] पा. सू. २.१.२७.

विशेषद्योतकः। समासेभ्यो [न] केवलं सामिवचनेनैवानत्यन्तगतेर्द्योतनादेव[1] कनोऽप्रसङ्गः, किं तर्हि, क्तान्तत्वाभावादपीत्यर्थः। कथं क्तान्तत्वाभाव इत्यत्राह — **कृद्ग्रहण इति**॥

अषडक्षाशितङ्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ५.४.७.

[४, २४८–२५१]

(विवरणम्) सकारानुबन्धश्च माकारीत्यत आह — **पदसंज्ञेति**। 'प्राक् कनः' इत्यत्र [2]'स्थूलादिभ्यः प्रकारवचने कन्' इत्यस्य ग्रहणे 'ञ्यादयः प्राग्वुनः' इति पुनरुक्तत्वादनर्थकमित्याह — **अवक्षेपणे कन्नित्यस्मादिति। शुक्ल इत्युक्त इति**। यदा प्रकृष्टः शुक्ल इत्युच्यते तदा न शुक्लादिशब्दः प्रकर्षे वर्तत इति भावः। ननु भवन्त्वेते नित्याः, खस्य किमायातमित्यत्राह — **बहुवचनेति**। नन्वधिशब्दस्य शौण्डादिषु पाठेऽप्यभावात्[3] सप्तम्यास्तत्समासोऽनुपपन्न इत्यत्राह — **अधिरीश्वर इत्यधेरिति**॥

[४, २४८–२५१]

(उद्द्योतनम्) ननु विग्रहाभावेऽपि 'कृत्रिमम्' इत्यादौ तद्धितविधिर्दृश्यते, अत आह — **अन्यत्रेति**। नन्वत्र वाग्रहणाभावादेव नित्यत्वं स्यात्, अत आह — **इह त्विति**। 'तस्मात्' इत्यनेन शङ्कायाः किं समाधानमुक्तम्, अत आह — **सूत्रमिति**। इत्संज्ञा मास्तु, अत आह — **पदसंज्ञा चेति**। पदसंज्ञायां 'राजाधीनम्' इति नलोपः सिध्यति। अन्यथा [4]नकारसकारयोः श्रवणप्रसङ्ग इति भावः। 'प्राक् कनः' इत्यत्र विवक्षितमाह — **अवक्षेपण इति**। तेषां नित्यत्वं न्यायसिद्धं, न वाचनिकमित्याह — **शुक्ल इति**। भाष्ये बृहतीशब्देन [5]'बृहत्या आच्छादने' इति विहितकनो ग्रहणम्। जात्यन्तशब्देन [6]'जात्यन्ताच्छ बन्धुनि' इति विहितग्रहणम्। 'बृहतीजात्यन्तौ' इति वक्तव्ये 'बृहतीजात्यन्ताः' इति बहुवचनं खग्रहणार्थमित्याह — **बहुवचनेति**। प्रकृत्युपालम्भप्रकारमाह — **प्रकृत्यभावादिति**। शौण्डादिष्वधिशब्दपाठान्नायमुपालम्भः, अत आह — **एतच्चेति**। समानाधिकरणानां बहुव्रीहिः, न चात्र सामानाधिकरण्यम्, अत आह — **वृत्तिविषय इति**। विशेषणत्वस्य विवक्षाधीनत्वाद् राजशब्दस्य पूर्वनिपात इत्याह — **विशेषणत्वेति**। [7]'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति प्रादिसमासः किं न स्यात्, अत आह — **'यदि त्विति**। कपि किमनिष्टम्, अत आह — **तस्मिंश्चेति**। राजाधिकशब्दस्याध्युत्तरपदत्वाभावात् खो न स्यादित्यर्थः। वचनात् तत्संभवेऽप्यनिष्टरूपं स्यात्, 'राजाधीनम्' इति च न सिध्येदिति भावः।

---

[1] अत्रैवकारोऽधिको भाति।

[2] पा. सू. ५.४.३.

[3] सप्तम्या अभावादित्यन्वयः।

[4] राजन्शब्दनकारस्य सधीनर्प्रत्ययसकारस्य चेत्यर्थः।

[5] पा. सू. ५.४.६.

[6] पा. सू. ५.४.९.

[7] महाभाष्यम् २.२.१८.

[8] प्रदीपे 'यद्यधिखट्वादिवत्' इति हरयाणामुद्रिते दृश्यते। 'यदि त्वतिखट्वादिवत्' इति निर्णयसागरमुद्रिते पाठः। तुशब्दसहितोऽन्नंभट्टपाठः। अतिखट्वादिवत्, इत्येतदपेक्षया 'अधिखट्वादिवत्' इत्येवात्र युक्ततरं भाति।

अव्ययीभावेऽधेः पूर्वनिपाते दृष्टान्तः — **अधिस्त्रीति**। [1]'अव्ययं विभक्ति' इत्यादिना विभक्त्यर्थेऽव्ययीभावो वाच्यः। तत्राप्यव्ययस्य प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात् पूर्वनिपातप्रसङ्ग इत्यर्थः। अव्ययीभावपक्षे राजाधीनशब्देन राजाधिकृतवस्तुप्रतीतिर्न स्यादिति शङ्कते — **ननु विभक्त्यर्थेति**। **साहचर्यादिति**। अधिकरणकारकस्याधेयस्य चैकस्मिन् वृत्तेरभेदोपचारेणाधेये प्रयोगोपपत्तिरित्यर्थः। नन्वव्ययीभावेऽव्ययार्थस्य प्राधान्यात् तस्य च लिङ्गसंख्याभावात् 'राजाधीनः, राजाधीना' इत्यादि न स्यात्, अत आह — **खप्रत्यय इति**। लोकाश्रयत्वाल्लिङ्गस्येति भावः। कुटीरशब्दे स्वार्थिकत्वे[न] स्त्रीत्वमेव युक्तम्, तथापि पुंस्त्वं दृश्यत इति दृष्टान्तार्थः। नन्वधिशब्दस्य राजदन्तादिषु पाठे 'अधिस्त्रि' इत्यादावप्यधेः परनिपातप्रसङ्गः, अत आह — **राजदन्तादिष्विति**। **तेनेति**। 'राजाधीनम्' इत्यादावधेराधेयप्रधानत्वात् परनिपात इति भावः। नन्वधेः शौण्डादिपाठेऽपि तद्योगे सप्तम्यभावात् कथं सप्तमीसमासः, अत आह — **अधिरीश्वर इति**। अस्मिन् पक्षे स्वपदविग्रहोऽपि संभवतीत्याह — **एवं वाक्यमपीति**। नन्वधिशब्दस्येश्वरवाचित्वे 'राजाधीनम्' इत्यत्रेशितव्यप्रतीतिः कथम्, अत आह — **वृत्तिविषय इति**। ईशितव्यप्रतिपत्त्यर्थं प्रकारान्तरमाह — **अथवेति**। **अधिकरण एव** न [2]'अधिरीश्वरे' इति कर्मप्रवचनीययोग्यनिमित्तेत्येवकारार्थः। नन्वसत्त्वभूतार्थं प्रति कथमधिकरणत्वम्, अत आह — [3]**वृत्तिविषये चेति**। अस्मिन् पक्षेऽस्वपदविग्रह इत्याह — **इत्यस्वपदेनेति**। वाक्याभावस्य हेतुत्वमितिशब्दार्थः॥

[४, २४८–२५१]

(नारायणीयम्) ननु प्रत्ययविधानानुपपत्तौ 'विग्रहाभावात्' इति हेतुरसिद्धोऽनैकान्तिकश्चेत्याशङ्क्य तत्समर्थनायाह — **अन्यत्रेति**। ननु मा कारि सकार इत्याशङ्क्य [4]"सिति च' इति पदसंज्ञार्थं तस्य कर्तव्यत्वमाह — **पदसंज्ञा चेति**। 'राजाधीनम्' इत्यादौ। ननु तमबादिषु महाविभाषाधिकारस्य निवर्तकस्य कस्यचिदभावात् कथं ते नित्या इत्यत्राह — **शुक्ल इत्युक्त इति**। एवं [5]'त्र्यादिष्वप्यनभिधानादिको हेतुर्द्रष्टव्यः। बृहतीशब्देन [6]'बृहत्या आच्छादने' इति सूत्रविहितः कन् लक्ष्यते। जात्यन्तशब्देन [7]'जात्यन्ताच्छ बन्धुनि' इति छः। तत्र द्विवचने प्रयोक्तव्ये बहुवचननिर्देशः छसहचरितप्रत्ययान्तरसंग्रहार्थ इत्याह — **बहुवचननिर्देशादिति**। ननु प्रकृत्युपालम्भे प्रत्ययविधानानुपपत्तिरित्यत आह — **प्रकृत्यभावादिति**। कथं पुनर्बहुव्रीहौ सत्यर्थः संगच्छत इत्यत्राह — **वृत्तिविषय इति**। विशेषणविवक्षायां पूर्वनिपातोपपत्तिः। यद्यपि तत्पुरुषः संभवति, तथापि पूर्वनिपातो न सिध्यतीति स नोक्त इत्याह — [8]**यदि त्विति**। **यथाधिस्त्रीति**। [9]'अव्ययं विभक्ति' इत्यव्ययस्य प्रथमानिर्दिष्टत्वात्। **साहचर्यादाधेयप्रधान इति**। प्रत्यय [सह] भावे आधेयप्रधान एव, नाधिकरणप्रधानः, शब्दशक्तिस्वाभाव्यादित्यर्थः। **खप्रत्यये च कृत इति**। [10]'स्वार्थिकाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति ज्ञापितत्वात्। ननु

---

[1] पा. सू. २.१.६.
[2] पा. सू. १.४.९७.
[3] वृत्तिविषयत्वे चेति — लृ.
[4] पा. सू. १.४.१६.
[5] 'ड्वितः क्त्रिः' इति त्रिप्रत्ययादिष्वित्यर्थः।
[6] पा. सू. ५.४.६.
[7] पा. सू. ५.४.९.
[8] तुशब्दरहितः पाठो हरयाणामुद्रिते। तुशब्दसहितो निर्णयसागरमुद्रिते प्रदीपे।
[9] पा. सू. २.१.६.
[10] परिभाषा ८४.

राजदन्तादिष्वधेः पाठे 'अधिस्त्रि' इत्यादावपि तस्य परनिपातः स्यादित्यत आह — **राजदन्तादिष्विति**। ननु 'अधि ब्रह्मदत्ते' इत्यादौ वाक्येऽधेः स्वस्वामिभावलक्षणस्य संबन्धस्यावच्छेदकत्वात् कथमत्रेशितव्ये नियमेन वृत्तिरित्यत आह — **वृत्तिविषये चेति**। नन्वसत्त्ववाचिनाधिना योगे राजादेः कथमधिकरणत्वं स्यात्, तस्य क्रियापेक्षत्वादित्यत आह — **वृत्तिविषये चेति**।

विभाषाञ्चेरदिक्स्त्रियाम् ५.४.८.

[४, २५१]

(उद्द्योतनम्) ननु [1]'एकशालायाष्ठजन्यतरस्याम्' इत्यतोऽन्यतरस्यांग्रहणानुवृत्त्यैव सिद्धेर्विभाषाग्रहणं व्यर्थम्, अत आह — **विभाषेति**। विधेरिति सामान्येनैकवचनम्, पूर्वविधीनामित्यर्थः। **अञ्चत्यन्त इति**। अञ्चत्यन्तस्य स्त्रीलिङ्गस्य दिङ्मात्रवाचकत्वेन 'अस्त्रियाम्' इत्येव दिग्वाचिव्यावृत्तेरित्यर्थः। **क्रियेति**। प्रकर्षेणाञ्चतीति प्रागिति क्रियानिमित्तत्वम्, [2]'दिक्छब्देभ्यः' इत्यस्तात्यन्तत्वे दिग्देशकालनिमित्तत्वम्। दिग्वाचिनः प्राक्शब्दस्य कथमस्त्रीत्वम्, अत आह — **प्राचीनशब्दादिति**। **अञ्चेर्लुगिति**। ततो [3]'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक्। तर्हि 'प्राचीनम्' इति कथम्, अत आह — **खे त्विति**॥

[४, २५१]

(नारायणीयम्) ननु महाविभाषाधिकारादेव वाक्याभ्यनुज्ञानस्य सिद्धत्वात्। किमत्र विभाषाग्रहणेनेत्यत आह — **इह विभाषाग्रहणमिति**। **अञ्चत्यन्त इति**। तस्मात् स्त्रीप्रतिषेधेनैव दिक्प्रतिषेधस्य सिद्धत्वाद् दिग्ग्रहणमनर्थकमित्यर्थः। **क्रियानिमित्तक इति**। प्रकर्षेणाञ्चति गच्छतीति व्युत्पत्त्या। **दिग्देशेति**। दिगादिसंबन्धादुपचारादित्यर्थः। दिक्छब्दस्यास्त्रीविषयत्वमुपपादयितुं प्रक्रियामाह — **प्राचीशब्दादिति**। अस्तातेर्लुकि कृते [4]'लुक् तद्धितलुकि' इति ङीपोऽपि लुक्। **ततोऽव्ययत्वादिति**। [5]'तद्धितश्चासर्वविभक्तिः' इत्यनेन। नन्वव्ययात् स्वार्थिके खे सति तदन्तस्याव्ययत्वं स्यादित्यत आह — **खे तु कृत इति**॥

एकस्य सकृच्च ५.४.१९.

[४, २५२–२५६]

(विवरणम्) कथमसामर्थ्यमित्यत्राह — **पुनरिति**। क्रियायाः पुनःप्रवृत्तिरभ्यावृत्तिः, एकवारं च प्रवर्तमानायां क्रियायां गण्यमानायामेकशब्दः क्रियागणने वर्तमानोऽपि न क्रियाभ्यावृत्तिगणने वर्तते, क्रियायाः पुनःप्रवृत्त्यभावेन क्रियाभ्यावृत्तिगणनवृत्त्ययोगात्। ततश्च क्रियाभ्या-

---

[1] पा. सू. ५.३.१०९.
[2] पा. सू. ५.३.२७.
[3] पा. सू. १.२.४९.
[4] पा. सू. १.२.४९.
[5] पा. सू. १.१.३८.

वृत्तिगणनेऽनुवर्तमाने लक्षणस्यासंभवित्वप्रसङ्गः, तन्निवृत्त्यर्थमित्यर्थः। कथमेकस्य पुनःपुनरावृत्तिरित्यत आह — **एकैवेति**। 'पञ्चकृत्वः' इत्यत्र यद्यपि वर्तमान एव लः, तथापि संख्यावाचिपदसमभिव्याहारात् कालभेदावगतिरिति भावः। ननु भोक्तुं पाक इत्यादौ क्रियानिमित्ततुमुन्दर्शनेन पाकादेः क्रियावाचित्वावसायात् तदावृत्तिगणनं क्रियावृत्तिगणनमेवेति किमुच्यते 'नैतत् क्रियागणनम्' इति, अत्राह — **अभ्यावृत्तिग्रहणादेवेति**। **अन्यत्रेति**। क्रियाविशेषग्रहणहेत्वभावादित्यर्थः। संख्याग्रहणेन कथमिव ते निवर्त्यन्त इत्यत्राह — **ते हीति**॥

[४, २५२–२५६]

(उद्द्योतनम्) अर्थविशेषेऽसामर्थ्यमित्याह — **पुनःपुनरिति**। अर्थान्तरे त्वनुवृत्तावपि न दोष इत्याह — **यदा त्विति**। अस्मिन् पक्षे आङः किं प्रयोजनम्, अत आह — **अस्मिन् पक्ष इति**। अयं पक्षोऽग्रे भाष्य एव व्यक्तीभविष्यति। **आख्यातेनेति**। वस्तुतो भिन्नैवाख्यातेनाभिन्नतया प्रतीयते। [1]'न चैकस्य पुनःपुनरावृत्तिर्भवतीत्यत्रायमर्थः' इत्यन्वयः। **कालभेदादपीति**। पञ्चकृत्व इत्यत्रैकस्या अपि भुजिक्रियायाः कालभेदाद् भेदोऽस्ति, अत्र तु नास्तीत्यर्थः। तर्हि सूत्रस्य किं प्रयोजनम्, अत आह — [2]**तत्र यथेति**। एकमिति क्रियाविशेषणम्। अभ्यावृत्तिः प्रधानम्, तद्विशेषणं क्रिया। शङ्काशयं निराह — **यदीति**। एको भुङ्क्त इत्यत्रैकशब्दः कर्तृविशेषणं, न कालस्येति सकृदादेशाभावः। तत्रैकशब्दप्रयोगस्य कृत्यमाह — **अनेकोऽपीति**। कर्तृभेदेन भिन्नानां भुजिक्रियाणामेककालत्वं प्रतीयते। 'एको भुङ्क्ते' इत्युक्ते कर्त्रेकत्वमात्रं प्रतीयते, न क्रियाया एककालत्वमिति प्रत्ययाभाव इत्यर्थः। [सकृद् भुङ्क्ते इत्यत्र तु] एककालत्वं प्रतीयत इति विशेषः। ननु क्रियाशब्देन तिङन्तवाच्यासत्त्वभूतक्रियाया एव ग्रहणात् [3]पाकादिशब्दप्रयोगे कथं प्रत्ययापादनम्, अत आह — **यथेति**। ननु 'द्वौ पाकौ' इत्यत्र [4]पाक्यभेदेन पाकक्रियाभेदात् एकस्याभ्यावृत्त्यभावात् कथं प्रत्ययापादनम्, अत आह — **यदेति**। ननु पाकादिशब्दवाच्यस्यापि क्रियात्वोक्तेः 'नैतत्' इत्ययुक्तम्, अत आह — **अभ्यावृत्तिग्रहणादिति**। **न हीति**। 'द्विर्द्रव्यम्, द्विर्गुणः' इति वा 'द्रव्यमावर्तते गुणा आवर्तन्ते' इति वा प्रयोगाभावादित्यर्थः। विशेषमेवाह — **तेनेति**। **सिद्धतायामिति**। यद्यपि सिद्धे धात्वर्थे घञ्जिति विधिर्नास्ति, तथापि घञन्तेनैव साध्यरूपप्रतीत्यभिभवाद् अर्थात् सिद्धे विधानं संपद्यत इत्येवमुक्तम्। ननु घञादावपि धातुना साध्यस्वभावा प्रतीयत इत्यतिप्रसङ्गतादवस्थ्यम्, अत आह — **यद्यपीति**। **अन्यत्रेति**। [5]'तुमुन्ण्वुलौ क्रियायाम्' इत्यादावित्यर्थः। अत्रेव [6]तत्र सिद्धतायुक्ताग्रहणे यत्नाभावादिति भावः। एतावता 'एकः पाकः' इत्यत्र कः परिहारः, अत आह — **यादृशी चेति**। **ययोक्तन्यायं** क्रियाग्रहणसामर्थ्यात् साध्यभूता क्रिया गृह्यत इति न्यायम्। **घञादीनामिति**। घञादिभिः सिद्धैव क्रियाभिधीयते, अव्ययकृद्भिस्तु साध्यस्वभावा, शब्दशक्तिवैचित्र्यादित्येतं विशेषमबुद्ध्वेत्यर्थः। **दोषान्तरम्** उक्ताभ्यावृत्तिपक्षे। 'द्विरावृत्ते सकृदिति स्यात्' इत्यत्र हेतुमाह — **आद्या हीति**। अभ्यावृत्त्यनुवृत्तौ 'सकृत्' इति न स्यात्,

---

[1] प्रदीपे 'न चैककालस्य' इत्यत्र 'न चैकस्य' इति पाठो निर्णयसागरमुद्रिते।
[2] तत्र यदेति — लृ.
[3] पाकादिग्रहणप्रयोगे — लृ.
[4] पक्तव्यभेदेनेत्यर्थः।
[5] पा. सू. ३.३.१०.
[6] तत्रासिद्धता — लृ.

अत आह — भाष्ये **न त्विति**। एतल्लाभे हेतुमाह — **एतच्चेति**। आभिमुख्यं परस्परसापेक्षत्वमित्याह — **अस्ति हीति**। एकसाधनानां 'देवदत्तो द्विर्भुङ्क्ते, त्रिर्भुङ्क्ते' इत्यादावेककर्तृकाणां परस्परापेक्षां व्यनक्ति — **एतावत्य इति**। सकृदादेशेऽपीयमभ्यावृत्तिरस्तीत्याह — **सकृद् भुङ्क्त इति**। अव्ययकृत्सु घञ्यादिवैषम्यमाह — **अव्ययकृदभिहित इति**। भाष्ये क्रियायां क्रियावदतिदेशानुपपत्तिं निराह — **अविप्रतिपत्तीति**। ननु गणन इत्येव संख्याशब्दो लभ्यते, संख्याशब्दानामेव गणनार्थकत्वात्। अतः संख्याया इति व्यर्थम्, अत आह — **पूर्वसूत्र इति**। **भूरीति**। 'भूरिवारान् भुङ्क्ते' इत्यत्र 'भूरिकृत्वः' इति प्रयोगो मा भूदित्येवमर्थमित्यर्थः। ननु संख्यायतेऽनया संख्येत्यन्वर्थत्वमेकादिसंग्रहार्थं [1]'बहुगण' सूत्रे आश्रितम्। ततः कथं भूर्यादिव्यावृत्तिः, अत आह — **ते हीति**। एकादिप्रसिद्धसंख्यातिरिक्तसंख्याशब्दानां मध्ये बहुगणशब्दयोरेव संख्यासंज्ञा, न भूर्यादीनामिति नियम इत्यर्थः। प्रश्नपूर्वमभ्यावृत्तेः प्रयोजनमाह — **अभ्यावृत्तीति**। गणनग्रहणेनैवाभ्यावृत्तिलाभ इति मत्वा प्रश्नः। **क्रियामात्रेति**। अत्रानेकक्रियाणां पञ्चत्वमात्रमुच्यते, न त्वेकस्याः क्रियायाः पुनःपुनर्जन्मलक्षणाभ्यावृत्तिर्गण्यत इति प्रत्ययाभावः। अभ्यावृत्तिग्रहणस्य प्रयोजनान्तरमाह — **अभ्यावृत्तिग्रहणे चेति**। क्रियाया एवाभ्यावृत्तिरिति तद्ग्रहणेनैव क्रियालाभे क्रियाग्रहणं साध्यभूतक्रियालाभार्थमिति 'पञ्च पाकाः' इत्यत्र प्रत्ययाभावः। क्रियासामान्यग्रहणे तु तत्रापि प्रसङ्ग इत्यर्थः। उक्तप्रयोजनमुपसंहरति — **तदेवमिति**। 'एकस्या एव' इत्यभ्यावृत्तिशब्दार्थकथनम्। घञाद्यन्तात् प्रत्ययानङ्गीकारेऽनिष्टं शङ्कते — **यदि तर्हीति**। ज्ञापकात् क्वचित् तदन्तादपि प्रत्यय इत्युत्तरम्। ननु क्रियाभ्यावृत्तिप्रतिपादकात् संख्याशब्दात् प्रत्ययविधावतिप्रसङ्गाभावात् 'गणने' इति किमर्थम्, अत आह — **गणनेति**। **आभिमुख्येन** परस्परापेक्षत्वेन। अत्रालम्भनक्रियाया एकत्वात् कथमुत्पत्तिभेदः, अत आह — **साधनभेदेति**। पशुभेदेन तदालम्भनं भिन्नमित्यर्थः। इष्टापत्तिं निराह — **साधनगणनेति**। अत्र साधनमेव गण्यते, तत्सामानाधिकरण्यात् सप्तदशशब्दस्य, क्रिया त्वर्थादिति प्रत्ययाभावः। यद्यसत्त्वभूतक्रियाभ्यावृत्तौ प्रत्ययः 'पञ्चकृत्वः पाकः' इति न स्यात्, अत आह — **पञ्चकृत्व इति**। **करोत्यादीति**। 'क्रियते, उत्पाद्यते' इत्यादिबुद्धिस्थक्रियापेक्ष इत्यर्थः। **यथेति**। तत्र क्रियापदाभावेन तदध्याहारस्य सर्वसंमतत्वादिति भावः॥

[४, २५२–२५६]

(नारायणीयम्) अभ्यावृत्तिग्रहणस्य निवर्त्यत्वे हेतुमाह — **अभ्यावृत्तीति**। एतत् पूर्वसूत्रार्थवर्णनेनोपपादयति — **पुनःपुनरिति**। असकृत्प्रवृत्तिरित्यर्थः। एतच्चाभिग्रहणाल्लभ्यते। अन्यथा 'क्रियावृत्तिग्रहणे' इत्येव वाच्यं स्यात्। [2]**इह दोषाभाव इष्ट इति**। क्रियोत्पत्तेरेकत्वसंख्ययापि गणनार्हत्वात्। **सत्यमिति**। एकस्यैवाभ्यावृत्तिः संभवतीत्येतदङ्गीकरोति। कथं तर्हि भाष्यार्थ इत्यत्राह — **अयं त्विति**। भाष्ये 'एकस्य' इत्यस्य व्याख्यानम् — **एककालस्येति**। अत एवैकशब्देन तस्याभिधानमित्याह — **एकशब्दवाच्यस्येति**। **कालभेदादपीति**। यत्र तु कालभेदादेकस्यैव भोजनस्य भेदः प्रतीयते तत्राभ्यावृत्तिव्यवहारः, यथा द्विर्भुङ्क्त इति। यत्र तु तेनापि न भेदस्तत्राभ्यावृत्त्यभावात् क्रियागणनमात्रे वर्तमानात् प्रत्यय इति। तदाह — **तत्र यथेति**। **एकं भुङ्क्त इति**। एकं भोजनं करोति, एककालमित्यर्थः। ननु क्रियाग्रहणस्यात्रोपयोगात्

---

[1] पा. सू. १.१.२३.

[2] प्रदीपे 'इह दोषाभावः' इत्यत्र 'इह दोषाभाव इष्टः' इति पाठोऽभिमत इति भाति।

कथं तन्निवृत्तिरप्यशङ्क्यत इत्यत आह — **प्रधान इति**। विशेष्यस्य प्रधानस्य निवृत्तौ विशेषणस्य गुणस्यानुवृत्तिरयुक्ता, प्रधानानुरोधाद् गुणानामित्याशयेन प्रश्न इत्यर्थः। ननु न्यायाददननुवृत्तौ सिद्धायां किं प्रयोजनप्रश्नेन। न हि प्रयोजनानुयायि प्रमाणमित्यत्राह — **यदि प्रयोजनमिति**। **स्वरितत्वादिति**। स्वरितलिङ्गासञ्जनमेवानुवृत्तौ प्रमाणम्, न प्राधान्यमित्यर्थः। ननु घञाद्यन्तानां पाकादीनां सत्त्वप्रधानत्वात् क्रियाया गुणभावात् कथं क्रियागणने विधीयमानाः प्रत्ययाः प्राप्नुवन्तीत्याशङ्क्याह — **यथा तुमुन्ण्वुलाविति। सुवर्णस्य द्वौ पाकाविति**। आवृत्तिकृतं फलमिच्छतैकेन कर्त्रैकमेव सुवर्णं द्विः पच्यत इत्यर्थः। **तद्भेदाच्चेति**। आवृत्तिभेदादेव, न वस्तुत इत्यर्थः। यत्र तु कारकभेदात् क्रियाया वस्तुतो भेदस्तत्राभ्यावृत्तिव्यवहाराभाव इत्याह — **यदा त्विति**। ननु धातुवाच्यक्रियाश्रयेण पाकादिषु तुमुनादिप्रत्ययदर्शनात् 'नैतत् क्रियागणनम्' इति कोऽयं परिहार इत्याशङ्क्य भाष्याशयं दर्शयति — **अभ्यावृत्तिग्रहणादेवेति। क्रियाविशेषेति**। मुख्यक्रियाग्रहणार्थमित्यर्थः। तदेतदाह — **तेनेति। अन्यत्र त्विति**। [1]'तुमुन्ण्वुलौ क्रियायाम्' इत्यादौ। इहेव तत्रापि [मुख्या]या एव क्रियाया ग्रहणमिति नियामकाभावाद् गुणभूताया अपि लक्ष्यदर्शनवशाद् ग्रहणात् पाकादिष्वपि तुमुनादिसिद्धिरित्यर्थः। नन्वत्राभ्यावृत्तिग्रहणानुवृत्त्यभावात् कथं क्रियाविशेषप्रतिपत्तिलाभ इत्यत्राह — **यादृशी चेति**। नन्वभ्यावृत्तिग्रहणस्य क्रियाविशेषप्रतिपत्त्यर्थत्वादव्ययकृतां च साध्यस्वभावार्थवाचित्वात् 'इहापि तर्हि' इति प्रश्नोऽयमसमञ्जस इत्याशङ्क्याह — **यथोक्तमिति। आद्या हीति**। द्वितीयाद्यासु हि क्रियाप्रवृत्तिष्वभ्यावृत्तिव्यवहारो लोके दृश्यते। **अस्ति हीति**। परस्परमपेक्ष्यमाणा एव प्रवृत्तयः पञ्चत्वादिसंख्यया गण्यन्ते। तदाह — **एतावत्य इति**। अस्मिन् सूत्रार्थेऽत्राभ्यावृत्तिग्रहणानुवृत्तावपि न दोष इत्याह — **सकृद् भुङ्क्त इति**। 'द्रव्यवत्' इति वतेरर्थमाह — **यथा द्रव्यमिति**। अव्ययकृत्सु क्रियावद्भावमुपपादयति — **अव्ययकृदभिहितस्त्विति**। नन्वेवमव्ययकृदभिहितस्य भावस्य वस्तुतः क्रियात्वात् तदतिदेशोऽनुपपन्न इत्यत आह — **अविप्रतिपत्तीति**। किमर्थं पुनः पूर्वसूत्रे संख्याग्रहणं क्रियते, यावताभ्यावृत्तिगणने वृत्तिः संख्याया एव संभवतीति, तत्राह — **पूर्वसूत्र इति। भूयादिनिवृत्त्यर्थमिति**। भूरीन् वारान् भुङ्क्ते, आवृत्तानि बहूनि भोजनानि करोतीत्यर्थः। अत्राक्रियमाणे संख्याग्रहणे क्रियाभ्यावृत्तिगणने वर्तमानाद् भूरिशब्दात् प्रत्ययः स्यात्। सति तु संख्याग्रहणे न भवतीत्याह — **ते हीति**। [2]'बहुगणवतुडति' इत्यत्र बहुगणग्रहणं नियमार्थम्। अनियतप्रचयवाचिनां मध्ये एतयोरेवेति। तेन भूरिशब्दस्य लौकिकसंख्यावाचित्वेऽपीह ग्रहणाभाव इत्यर्थः। **क्रियामात्रगणन इति**। अत्र हि साधनभेदाद् भिन्ना एव पाकाः पञ्चसंख्यया गण्यन्ते, न त्वेकस्याभ्यावृत्तय इत्यभ्यावृत्तिग्रहणादेवात्र प्रत्ययो निवर्त्य इत्यर्थः। ननु 'पञ्च पाकाः' इत्यादौ क्रियाग्रहणादेव निवृत्तिरुक्तेति किमभ्यावृत्तिग्रहणेनेत्यत आह — **अभ्यावृत्तिग्रहणे चेति**। उक्तमर्थं निगमयति — **तदेवमिति**। **क्वचिदिति**। न सर्वत्रेति ज्ञाप्यते। **साधनभेदेति**। क्रिया[या] भेदाभावे साधनभेदोऽनुपपन्नः। [तत्सामर्थ्यात् प्रतिपन्नो भेदो यया सा आ]लम्भनक्रिया तस्या आवृत्तौ विषय इति सप्तम्यर्थो दर्शितः। एवं चात्रालम्भनक्रियायाः प्रतिपशु वस्तुतोऽभ्यावृत्तिरित्यत्रापि स्यात्। गणनग्रहणे तु सत्यत्र न, [क्रियाभ्यावृत्तिगणने सप्तदशश]ब्दस्य [ा]वर्तनादित्यर्थः। ननु 'पञ्चकृत्वः पाकः' इत्यादिप्रयोगो दृश्यते, कथं तदुपपत्तिरित्यत्राह — **इह पञ्चकृत्व इति। यथा पञ्चकृत्व इति**। पञ्चकृत्वः पटो रक्तः क्रियत इति प्रतीयमानकरोत्यादिक्रियापेक्षः प्रत्ययः, एवं पाक इति॥

---

[1] पा. सू. ३.३.१०.

[2] पा. सू. १.१.२३.

देवतान्तात् तादर्थ्ये यत् ५.४.२४.

[४, २५६]

(विवरणम्) देवतेति। षष्ठीसमासस्तु संबन्धाभावात् 'पितृदेवत्यम्' इत्युक्ते पित्रर्थता[न]-वगमप्रसङ्गान्नाशङ्कनीय इति भावः ॥

[४, २५६]

(उद्द्योतनम्) पितॄणां देवतात्वाभावे हेतुः — **देवताशब्दस्येति।** [1]'देवाः पितरः' इति वेदे पृथङ्निर्देशादित्यर्थः। भाष्ये 'एवं च' इत्यनेनात्र यौगिकस्यैव ग्रहणमित्युक्तम्। तत्र हेतुमाह — **जातिशब्दत्व इति** ॥

[४, २५६]

(नारायणीयम्) जातिविशेषवाचित्वादिति। तथा च श्रुतिः [2]'देवा मनुष्याः पितरस्तेऽन्यत आसन्' इति। 'देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च' इति च। **समासाभावा-दिति।** पितरश्च ते देवताश्चेति कर्मधारयोऽत्रेष्यते, स च न सिध्यतीत्यर्थः। **क्रियाशब्द इति।** दिवेरैश्वर्यकर्मणः पचाद्यचि देवशब्द ईश्वरपर्यायोऽत्र गृह्यत इति सामानाधिकरण्योपपत्तिरित्यर्थः ॥

लोहितान्मणौ ५.४.३०.

[४, २५७–२५९]

(उद्द्योतनम्) [3]'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति 'लोहिनिका' इत्यपि सिध्यति, किं वचनेन, अत आह — **प्रतिपदेति।** वार्तिके लिङ्गशब्देन लिङ्गप्रतिपादकप्रत्ययो विवक्षित इत्याह — **लिङ्गार्थप्रत्ययेति।** कना स्त्रीप्रत्ययो वा बाध्यत इत्युक्तेः रूपद्वयसिद्धिः। कना स्त्रीप्रत्ययस्य नित्यबाधे प्राप्ते इदं वावचनं कृतमिति समुदायार्थः। इदं वार्तिकं कुत्रत्यम्, अत आह — **वसोः समूह इति।** तत्र वसोः स्वार्थे यत्प्रत्यय इत्युक्तम्। 'अपस्यः' इति रूपं साधयति — **अप्छब्दादिति** ॥

[४, २५७–२५९]

(नारायणीयम्) प्रतिपदविधेरिति। स्त्रीत्वस्य वर्णानित्यत्वस्य च युगपद्विवक्षायां [4]'वर्णा-दनुदात्तात्' इति प्राप्तं ङीपं बाधित्वा लोहितशब्दात् पूर्वं कन् स्यात्। तदन्ताट्टापि 'लोहितिका'

---

[1] तै.सं. ५.४.११.
[2] तै. सं. २.४.१.
[3] परिभाषा ७२.
[4] पा. सू. ४.१.३९.

इत्येव स्यात्। 'लोहिनिका' इति चेष्यत इत्येतदर्थं वार्तिकम्। तत्र लिङ्गशब्देन लिङ्गाधिकार-विहितप्रत्यय उपचारादुच्यते। तस्य विकल्पेन बाधनम्, न तु नित्यमित्यर्थः। तदाह — **नित्ये लिङ्गार्थेति**। ततश्च लोहितशब्दान्ङीपि तत्संनियोगेन तकारस्य नकारे [1]'वर्णे चानित्ये' इति कनि टापि च [2]'केऽणः' इति ह्रस्वत्वे कृते 'लोहिनिका' इति सिद्धं भवति। कुत्रोक्त-मित्यत्राह — **वसोः समूहे चेति**। **विभक्तेश्चालुगिति**। छान्दसत्वाद् भाष्यकारवचनाद्वा॥

तद्युक्तात् कर्मणोऽण् ५.४.३६.

[४, २५९–२६०]

(उद्द्योतनम्) पूर्वसूत्रस्थसंदेशवाक्यपरामर्शलब्धमर्थमाह — **इदमिति**॥

[४, २५९–२६०]

(नारायणीयम्) इदं त्वयेति। अनेन तच्छब्देन व्याहृतार्था वाक् परामृश्यत इति भाष्य उक्तमिति दर्शयति। **तत् कार्मणमिति**। [3]'अन्' इति प्रकृतिभावः॥

कृद्योगे संपद्यकर्तरि च्विः ५.४.५०.

[४, २६१–२६२]

(विवरणम्) 'मूत्राय कल्पते यवागूः' इति प्रकृतेरपि संपद्यकर्तृत्वात् तद्वाचिनोऽपि च्वि यो मन्यते, तं प्रत्याह — **विकारशब्दाच्चेति**॥

[४, २६१–२६२]

(उद्द्योतनम्) सूत्रस्थस्योपसंख्यानवैयर्थ्यशङ्कां निराह — **अभूतेति**। प्रसक्तिमाह — **अभू-त्वेति**। भाष्योदाहरणं दूषयित्वोदाहरणान्तरमाह — **एतच्चेति**। [4]'अत्र संपद्यकर्तृत्वमर्थाद् गम्यते। प्रकृतिविवक्षायां नोक्तातिप्रसङ्ग इत्याह — **तेनेति**। प्रकृत्यभावे शालिसंपत्तेरभावात् प्रकृति-विवक्षात्राप्यस्ति, अत आह — **यदा त्विति**। तर्ह्येवं प्रकृतिविवक्षाव्याख्याने 'अभूततद्भावे' इति न वक्तव्यम्, अत आह — [5]**'अत्राभूतेति**। तद्व्याख्यानप्रकारमेवाह — **येन रूपेणेति**। नन्वभूततद्भावशब्देनानुत्पन्नस्योत्पत्तिर्गम्यते, न तूक्तरूपोऽभूततद्भावः, अत आह — **संपद्येति**। **लब्ध इति**। जन्मना विना संपद्यकर्तृत्वासंभवादित्यर्थः। नित्यस्यापि संपद्यकर्तृत्वसंभवान्न ततो जन्मलाभः, अत आह — **अथवेति**। अभूततद्भावः किं प्रकृत्यर्थः, उत प्रत्ययार्थः, अत आह — **विकारशब्दाच्चेति**। 'न ह्यसमीपम्' इति भाष्यतात्पर्यमाह — **प्रकृतीति**। समीपशब्देन समीपस्थितमुच्यते चेत् अतथाभूतस्य तथाभावसंभवात् सूत्रेणैव सिद्धमित्याह — **असमीपस्थस्येति**।

---

[1] पा. सू. ५.४.३१.
[2] पा. सू. ७.४.१३.
[3] पा. सू. ६.४.१६७.
[4] भवन्त्यस्मिन् क्षेत्रे शालय इत्यत्रेत्यर्थः।
[5] 'तत्राभतेति — लृ.

[४, २६१–२६२]

(नारायणीयम्) नन्वभूततद्भावग्रहणं सूत्रे श्रूयत एव, किं वार्तिकेनेत्यत आह — **अभूतेति**। 'अस्मिन् क्षेत्रे' इत्यनेनाभूततद्भावः प्रदर्श्यते, पूर्वं तत्र शालीनामसत्त्वादित्याह — **अभूत्वेति**। प्रकृतिविवक्षायां च्विप्रत्यय इत्येतदुपपादयति — **यदा त्विति**। **प्रकृतिः** उपादानकारणम्, **विकारात्मतां** कारणस्यैवोत्तरमवस्थान्तरं विकारः, तद्रूपतामित्यर्थः। तेन [1]'विकारादभेदेनेति सिद्धं भवति। कार्यकारणयोरभेदविवक्षायां च्विप्रत्यय इत्यर्थः। **व्याख्यात इति**। न त्व-पूर्वोऽर्थः कथ्यत इत्यर्थः। तत् कथमित्यत्राह — **येन रूपेणेति**। तच्छब्दोपादानादयमर्थो लभ्यते। अन्यथा 'अभूतभावे' इति वाच्यं स्यात्। तदपि वा न कर्तव्यमित्याह — **संपद्य-कर्तृत्वादेवेति**। अथ यदि विस्पष्टप्रतिपत्त्यर्थमभूततद्भावग्रहणं क्रियत इत्युच्यते, एवमपि लाघ-वार्थं जन्मग्रहणमेव कुर्यादित्यर्थः। तद्ग्रहणसामर्थ्यादेतदर्थविशेषलाभ इत्याह — **अथवा जन्मग्रहण इति**। तस्मादेवंविधे विषये प्रत्यय इत्युक्तं भवतीत्या[ह] — **विकारशब्दादिति**। पटादेः, न तन्त्वादेः, अवस्थान्तरे वर्तमानात् प्रत्ययविधानात्, तदाह — **प्रकृतौ विकारावस्थायामिति**। तात्स्थ्यात् ताच्छब्द्ये कथं सूत्रेण प्रत्ययसिद्धिरित्यत्राह — **असमीपस्थस्येति**॥

समासान्ताः ५.४.६८.

[४, २६३–२६५]

(उद्द्योतनम्) [2]अवयवत्वसिद्धयेऽन्तग्रहणमावश्यकम्, अत आह — **समीपेति**॥

[४, २६३–२६५]

(नारायणीयम्) प्रश्नप्रतिवचनयोराशयं दर्शयति — **समीपेति**। **अवयववचनाश्रयेणेति**। अवयववचनमन्तशब्दमाश्रयता समासार्थादुत्तरपदादकृत एव समासे समासान्ता भवन्तीत्युक्तं भवति। एवं हि ते समासस्यैकदेशा भवन्ति, यदि प्राक् समासाभिनिर्वृत्तेः [तान् प्रत्य]यान् कृत्वा पश्चात् तदन्तेन समासः क्रियते। एवं हि तैः सह समाससंज्ञा भवति॥

ऋक्पूरब्धूःपथामानक्षे ५.४.७४.

[४, २६६–२६७]

(विवरणम्) ननु 'अक्षस्य धूरक्षधूः' इत्यस्य समासात्मकत्वेन समासस्याक्षधूरन्तत्वाभावात् 'सिध्यति' इत्यभिधानमयुक्तमित्याशङ्क्य तदनुगुणतया व्याचष्टे — **अस्यायमर्थ इति**। अनक्ष-

---

[1] प्रदीपे 'विकारभेदेन' इति पाठो दृश्यते। 'विकाराभेदेन' इति पाठोऽत्राभिमत इति प्रतीयते। नागेशेन "'विकाराभेदेन' इति पाठ उचितः" इत्युक्त्वा पाठान्तरं च समर्थितम्।

[2] अवयवप्रसिद्धये — लृ.

स्येति षष्ठीनिर्देशः कर्तुमुचितः, न सप्तमीनिर्देशः, अर्थाभावादित्यत्राह — **अक्षस्येति** ॥

[४,२६६–२६७]

(उद्द्योतनम्) सूत्रात् पक्षद्वयप्रतिभासमाह — **यद्यक्ष इति** । 'अक्षधूरन्तः' इत्येतत् स्वोक्तार्थे योजयति — **अक्षेति** । अक्षस्य धूरिति तात्पर्यकथनं भाष्ये । तत्र सूत्रं योजयति — **अक्षस्येति** । अक्षशब्दार्थमाह — **चक्रेति** ॥

[४, २६६–२६७]

(नारायणीयम्) भाष्योपक्षिप्तं पक्षद्वयं स्फोरयति — **यद्यक्ष इति** । **अक्षे पूर्वपदे धूरन्तादिति** । धुर एवाक्षेण संबन्धसंभवात् तस्या एवानक्ष इति विशेषणम्, न त्वृगादीनामिति भावः । प्रसज्यप्रतिषेधाश्रयणान्नञो भवतिनान्वय इत्याह — **न भवतीति** । उक्तेऽर्थे भाष्यं योजयति — **अक्षधूरन्त इत्यस्येति** । ननु 'न चेदक्षस्य धूः' इति सूत्रार्थेऽनक्षस्येति षष्ठ्या भाव्यमित्यत आह — **अक्षस्येति** । अक्षशब्दस्यानेकार्थत्वादिह विवक्षितमर्थमाह — **चक्रसंबद्ध इति** ॥

अक्ष्णोऽदर्शनात् ५.४.७६.

[४, २६७]

(उद्द्योतनम्) सूत्रार्थमाह — **अदर्शनादिति** । लवणमक्षीव लवणाक्षम्, अक्षिसमानाकारलवणखण्ड उच्यते । प्रत्युदाहरणमाह — **दर्शनेति** । दृश्यतेऽनेनेति दर्शनम् । **एवमिति** । तस्यापि दर्शनसाधनत्वेन समासान्ताप्रसङ्ग इत्यर्थः । गवाक्षादिसिद्धये 'अप्राण्यङ्गात्' इति वक्तव्यमित्याह — **तेनेति** ॥

[४, २६७]

(नारायणीयम्) नन्वक्षिशब्दो दर्शन एव रूढ इति 'अदर्शनात्' इति पर्युदासोऽनुपपन्न इत्यत आह — **अदर्शनादिति** । **लवणाक्षमित्यादीति** । लवणमक्षीवेति [1]"उपमितं व्याघ्रादिभिः' इति समासः । अदर्शनादिति पर्युदासस्य विषयमाह — **दर्शनवाचित्वे त्विति** । कबराक्षादेर्दृशि[2]साधनत्वं दर्शयितुमाह — **अश्वानामिति** । 'अदर्शनात्' इत्यपनीय 'अप्राण्यङ्गात्' इति वक्तव्यम्, तेनाव्याप्तिनिराससिद्धिरित्याह — **तेनेति** ॥

---

[1] पा. सू. २.१.५६.

[2] दृशिक्रियासाधनत्वमित्यर्थः ।

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तं-दिवरात्रिंदिव.ह.र्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्ष-वृद्धोक्षोपशुनगोष्ठश्वाः ५.४.७७.

[४, २६८]

(उद्द्योतनम्) भाष्येऽर्थप्रदर्शनम्, विग्रहवाक्यं त्वन्यदित्याह — **अर्थेति। अदृश्यानीति।** विदृश्यानि सुदृश्यानीत्यपि ज्ञेयम्॥

[४, २६८]

(नारायणीयम्) अर्थप्रदर्शनमिति। न तु विग्रहप्रदर्शनम्, बहुव्रीहावेवं विग्रहस्यायुक्तत्वात्। कथं तर्हि विग्रह इत्यत्राह — **अदृश्यानीति।** एवं 'विचतुरः, सुचतुरः' इत्यत्र विगतानि चत्वार्यस्य, शोभनानि चत्वार्यस्येति विग्रहो द्रष्टव्यः॥

अह्नोऽह्न एतेभ्यः ५.४.८८.

[४, २६९]

(विवरणम्) ननु कथं विशेषाभावः, टचि सति स्त्रियां ङीपा भाव्यम्, न त्वचीत्यत्राह — **रात्रेति॥**

[४, २६९]

(उद्द्योतनम्) अत्र न सर्वस्य सूत्रस्य प्रत्याख्यानम्, किं त्वह्नादेशमात्रस्येत्याह — **अह्न एतेभ्य इति।** ननु [1]"राजाहःसखिभ्यष्टच्' इति टज्विधास्यते, अत आह — **टजचोरिति।** अत्राह्न-ग्रहणं न कर्तव्यमिति भावः। ननु टचि ङीपा भाव्यम्, अचि टापेति कथं विशेषाभावः, अत आह — **रात्रेति।** अह्नादेशाभावे 'पूर्वाह्णः' इत्यादिरूपसिद्धिः कथम्, अत आह — **तत्रेति॥**

[५, २६९]

(नारायणीयम्) अहन्शब्दस्य योऽह्नादेशविधिष्टचि परभूते तस्यानर्थक्यमित्यादेशस्यैवानर्थक्य-मुच्यते। समासान्तविधानार्थं तु 'अह्न एतेभ्यः' इति वक्तव्यमेवेत्याह — **अह्न एतेभ्य इति। अज्विधानार्थमिति।** टचोऽपवादोऽज्विधीयते प्रकृतः। नन्वचि सति स्त्रियां टापा भाव्यम्। टचि तु ङीपेति विशेषोऽस्त्येवेत्यत आह — **रात्राह्नाहा इति।** कथं पुनरचि सति 'द्व्यह्नः' इत्यादिरूपसिद्धिरित्यत्राह — [2]**तत्राचीति।** तत्र प्रथमम् [3]"अल्लोपोऽनः' इत्यल्लोपः प्राप्तः। तस्य [4]"नस्तद्धिते' इति टिलोपोऽपवादः, तत्रापवादाभावे उत्सर्गो भविष्यतीत्यर्थः॥

---

[1] पा. सू. ५.४.९१.

[2] प्रदीपे 'तत्राह्नष्टखोरेवेति' इत्यत्र 'तत्राच्य-ह्नष्टखोरेव' इति पाठोऽभिमत इति भाति।

[3] पा. सू. ६.४.१३४.

[4] पा. सू. ६.४.१४४.

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ५.४.११३.

[४, २६९–२७०]

(विवरणम्) ननु बहुव्रीहौ पूर्वपदप्रकृतिस्वरस्य नियतत्वादन्तोदात्ते मानाभावात् तद्वचावर्तनं मुधा। सत्यप्यन्तोदात्तत्वे षच्टच्निबन्धनङीष्ङीपोः स्वरकृतो विशेषोऽस्त्येवेत्यत्राह — **सक्थं चेति** ॥

[४, २६९–२७०]

(उद्द्योतनम्) अनन्तोदात्तार्थत्वमुपपादयति — **सक्थमिति**। क्रवर्णोऽन्ते यस्य तत् क्रान्तम्, अक्रान्तशब्दात् परः सक्थशब्दो वान्तोदात्तः। अविशेषे हेतुः — **ङीप इति**। [१]'अनुदात्तस्य च यत्रोदात्तलोपः' इति ङीप उदात्तत्वम्, ङीषः प्रत्ययस्वरेणेति विशेषाभावः। अनुदात्तान्ते विशेषमाह — **यदा त्विति**। चक्रमिव सक्थि यस्याः सा चक्रसक्थी। इदमुदाहरणं दूषयति — **अयुक्तोऽयमिति**। उदाहरणमाह — **तस्मादिति**। **उदात्तत्वाभावेति**। [२]'सक्थं चाक्रान्तात्' इत्युदात्तत्वपक्षे ङीप्ङीषोर्विशेषाभावादनुदात्तत्वपक्षे विशेष उक्तः ॥

[४, २६९–२७०]

(नारायणीयम्) नन्वनन्तोदात्तानां प्रत्ययान्तरकरणप्रयोजकत्वमयुक्तम्, सर्वत्रैव चित्करणादन्तोदात्तत्वादित्यत आह — **सक्थं चाक्रान्तादिति**। **विभाषान्तोदात्तत्वमिति**। [३]'विभाषोत्पुच्छे' इत्यतो विभाषाग्रहणानुवृत्त्या अक्रान्तादुत्तरस्य कृतसमासान्तस्य सक्थशब्दस्य विकल्पेनान्तोदात्तत्वं विधीयते। **उदात्तनिवृत्तिस्वरेणेति**। [४]'अनुदात्तस्य च यत्र' इत्यादिना। ङीषस्तु प्रत्ययस्वरेणोदात्तत्वम्। **यदा त्विति**। कदाचित् [५]'बहुव्रीहौ प्रकृत्या' इति पूर्वपदप्रकृतिस्वरे [सति शेषनिघातेनोत्तरपदान्तस्यानुदात्त] त्वादिति भावः। षित्करणं तु षचोऽक्ष्यर्थं [यः क्रान्तात् प] रः सक्थशब्दस्तदर्थं च, अत एवाह — **अत्र हीति**। **गौरसक्थीति**। गौरं सक्थि यस्या इति बहुव्रीहिः ॥

द्वित्रिभ्यां ष मूर्धनः ५.४.११५.

[४, २७०]

(उद्द्योतनम्) स्वरभेदं दर्शयति — **यद्यत्रेति**। ननु [६]'द्वित्रिभ्याम्' इत्यनेन विकल्पः सेत्स्यति, अत आह — **द्वित्रिभ्यामिति**। आभ्यां पादादिषु परेषु यो बहुव्रीहिस्तस्यान्तोदात्तो वा स्यात्।

---

[१] पा. सू. ६.१.१६१.
[२] पा. सू. ६.२.१९८.
[३] पा. सू. ६.२.१९६.
[४] पा. सू. ६.१.१६१.
[५] पा. सू. ६.२.१.
[६] पा. सू. ६.२.१९७.

अनित्यत्वादिति। कृतसमासान्तपात्साहचर्यात् 'मूर्धेषु' इति वक्तव्ये 'मूर्धसु' इति वचनं समासान्तविधेरनित्यत्वज्ञापनार्थम्। **सावकाशमिति**। षचश्चित्त्वसार्थक्यायैवं व्यवस्था कल्प्यत इति भावः। **समासान्तपक्षेऽपीति**। बहुव्रीहेः कार्यित्वात् तदेकदेशत्वात् समासान्तस्य मूर्धान्तबहुव्रीहिग्रहणेन ग्रहणात् प्रत्ययान्तस्यापि विकल्प इति भावः॥

[४, २७०]

(नारायणीयम्) 'अनन्तोदात्तार्थम्' इत्यस्यान्तोदात्तत्व[ाभावपक्षे] पूर्ववदनन्तोदात्ताः प्रयोजयन्तीत्यर्थं दर्शयितुमाह — **यद्यत्रेति**। चित्करणात् [१]'द्वित्रिभ्याम्' इति विकल्पं बाधित्वा नित्यमन्तोदात्तं स्यादित्यर्थः। तर्हि विकल्पविधानं निरवकाशं स्यादिति चेन्नेत्याह — **द्वित्रिभ्यामिति**। **समासान्तविधेरनित्यत्वादिति**। [२]'द्वित्रिभ्याम्' इत्यत्र 'मूर्धसु' इति नकारान्तनिर्देशात् समासान्तविधेरनित्यत्वमवसीयते। अन्यथा [३]'सक्थं चाक्रान्तात्' इतिवदकारान्तमेव निर्दिशेत्। प्रत्ययान्तरस्य षस्य करणाद्वा। अन्यथा प्रकृते षच्यपि विहिते [४]'द्वित्रिभ्याम्' इति स्वरः प्राप्तविभाषारूपेण चित्स्वरं बाधिष्यते, विषयान्तराभावात्। अनित्यत्वे तु समासान्ताभावपक्षे सावकाशं [५]'द्वित्रिभ्याम्' इति स्वरं चित्स्वरो बाधेतेति प्रत्ययान्तरकरणमर्थवद् भवति। **समासान्तपक्षेऽपीति**। ननु [६]'द्वित्रिभ्याम्' इत्यत्र नकारान्तनिर्देशात् कथं समासान्तपक्षे स्वरः स्यात्। नैतत्, बहुव्रीहेः कार्यित्वात् तदेकदेशत्वात् समासान्तस्योदात्तत्वस्य सिद्धत्वात्॥

अप्पूरणीप्रमाण्योः ५.४.११६.

[४, २७१]

(विवरणम्) 'कल्याणपञ्चमीकः' इत्यत्र पुंवद्भावप्रतिषेधे प्रधानपूरणीग्रहणात् पुंवद्भावप्रतिषेधाभावः॥

[४, २७१]

(उद्द्योतनम्) ननु पूरण्या अन्यपदार्थान्तर्भूतत्वेन प्राधान्यम्, तच्चात्राप्यस्तीति कथं तेन तन्निरासः, अत आह — **अत्रेति**। **तिरोहितेति**। उद्भूतावयवभेदसमुदायाभिधाने तु 'पक्षाः' इति बहुवचनं स्यादिति भावः। तिरोहितावयवभेदसमुदायवाचिनोऽवयवानभिधायकत्वे दृष्टान्तः — **यथेति**। **अनुमीयमानस्येति**। वृक्षप्रतीत्यनन्तरं शाखादीनामनुमानम्, न तु वृक्षशब्दार्थत्वम्, तद्वत् पक्षशब्दस्यापि पूरण्यर्थत्वं नास्ति, किं त्वनुमानमित्यर्थः। अत्र रात्रिशब्दार्थे पूरण्या अन्तर्भावोऽस्तीत्याह — **अत्रावयवेनेति**। अन्यपदार्थसंपादनायावयवसमुदायभेद उक्तः। [७]भृतिप्रत्यय-

---

[१] पा. सू. ६.२.१९७.
[२] पा. सू. ६.२.१९७.
[३] पा. सू. ६.२.१९८.
[४] पा. सू. ६.२.१९७.
[५] पा. सू. ६.२.१९७.
[६] पा. सू. ६.२.१९७.
[७] भृतिरूपार्थे विहितप्रत्ययेत्यर्थः।

पूर्वकत्वमाह — **पञ्चेति**। **स इति**। प्रथमासमर्थादस्येत्यर्थे यथाविहितं प्रत्ययः स्यात्, तच्चेत् प्रथमासमर्थमंशादिकम्। **कन्निति**। [1]'संख्याया अतिशदन्तायाः' इत्यनेन। बहुव्रीहिणोक्त एवार्थे प्रत्ययः, नार्थान्तर इत्याह — **स्वार्थ इति**। समासान्तप्रकरणात्। [2]स्वरसिद्धये ठचश्चित्त्वमिति ज्ञेयम्॥

[४, २७१]

(नारायणीयम्) ननु 'कल्याणपञ्चमीकः पक्षः' इत्यत्र कथं पूरण्या अप्राधान्यम्, यतः प्रधानग्रहणेन समासान्तस्यापो निवृत्तिर्भवेदित्यत आह — **अत्र वर्तिपदार्थ एव पूरणीति**। समासावयवभूतं पदं वर्तिपदम्, तस्यार्थो वर्तिपदार्थः, पूरणी स्त्रीलिङ्गपूरणप्रत्ययान्तवाच्य इत्यर्थः। 'तिरोहितावयवभेदस्य' इत्यनेन पूरण्याः शब्दतोऽन्यपदार्थे प्रधानेऽनुप्रवेशाभावं दर्शयति। एतदेव दृष्टान्तमुखेनोपपादयति — **यथा वृक्ष इति**। अत एव वृक्ष इत्येकवचनमुपपन्नं भवति। **अनुमीयमानस्येति**। समुदायस्यावयवाविनाभावादवयवा अनुमीयन्त इति न ते शब्दार्थाः। अतोऽन्यपदार्थत्वाभावात् पूरण्या अप्राधान्यमित्यर्थः। ननु 'कल्याणीपञ्चमा रात्रयः' इत्यत्रापि पूरण्या वर्तिपदार्थत्वं समानमिति किंकृतं प्राधान्यमुच्यत इत्यत आह — **अत्रावयवेनेति**। **रात्रिषु पञ्चम्या इति**। कृतैकशेषेण रात्रिशब्देन पञ्चम्यप्यभिधीयते, न त्वनुमीयत इत्यन्यपदार्थत्वं तस्या इत्यर्थः। भृत्यर्थे यः प्रत्ययः स भृतिप्रत्ययः, तदन्तं पूर्वपदं यस्य बहुव्रीहेस्तस्मान्मासशब्दान्तात् स्वार्थे ठञ्विधेय इति वार्तिकार्थं दर्शयितुं प्रक्रियामाह — **पञ्च भृतिरिति**। ठचश्चित्करणं बहुव्रीहिस्वरबाधनार्थम्॥

अञ् नासिकायाः संज्ञायां नसं चास्थूलात् ५.४.११८.

[४, २७२]

(उद्द्योतनम्) नन्वनयोरपि संज्ञात्वेन सूत्रेणैव सिद्धेर्वचनं व्यर्थम्, अत आह — **आदेशेति**॥

[४, २७२]

(नारायणीयम्) ननु सूत्रेणैव नसादेशः सिद्धः, किं वचनेनेत्यत्राह — **आदेशेति**॥

उपसर्गाच्च ५.४.११९.

[४, २७२]

(उद्द्योतनम्) वेः परस्य नासिकाशब्दस्य ग्रादेश इत्याह — **विगतेति**॥

---

[1] पा. सू. ५.१.५६.

[2] अर्थसिद्धये च स्वार्थत्वमिति — लृ.

[४, २७२]

(**नारायणीयम्**) विशब्दात् परस्य नासिकाशब्दस्य ग्रादेशो विधीयते। प्रत्ययस्त्वजेवेत्येतद् दर्शयति — **विगतेति** ॥

गन्धस्येदुत्पूतिसुसुरभिभ्यः ५.४.१३५.

[४, २७२–२७३]

(**विवरणम्**) गुणगुणिनोरवयवावयविभावाभावादवयववाच्यन्तशब्दोऽनुपपन्न इत्यत्राह — **रूपादीति** ॥

[४, २७२–२७३]

(**उद्द्योतनम्**) अत्र 'गन्धस्य' इत्येकवचनेन निर्देशाद् गुणवाचिनो ग्रहणम्, न द्रव्यवाचिन इति भाष्यार्थमाह — **गन्धशब्द इति**। नन्वन्तशब्दोऽवयववाची, ततो गुणस्य कथं द्रव्यावयवत्वम्, अत आह — **रूपादीति**। अतिरिक्तावयविपक्षे द्रव्यनिष्ठत्वं तदेकान्तत्वमुच्यत इत्याह — **रूपादीति** ॥

[४, २७२–२७३]

(**नारायणीयम्**) तदेकान्तग्रहणेन व्यावर्त्यं विषयं दर्शयितुमाह — **गन्धशब्दोऽस्तीति**। तच्छब्देन गन्धशब्दवाच्यं द्रव्यं विवक्षितम्। तस्यैकान्त एकदेशः। कथं पुनरेकान्तग्रहणे गुणवाचिग्रहण-सिद्धिरित्यत्राह — **रूपादीति**। सांख्यमते रूपादिगुणसमुदाय एव घटादिद्रव्यमिति तत्र गुणस्यै-कान्तत्वमवयवत्वमुपपन्नं [भवति।] नैयायिकादिमते तु गुणाश्रयो द्रव्यं गुणेभ्यो व्यतिरिक्तमिति तत्र गुणस्यैकान्तत्वमसिद्धमित्याशङ्क्य तत्रापि योजयति — **रूपादीति**। **एकान्त एवेति**। यथा करचरणादेरवयवत्वं तथा तत्स्थत्वेनोपलम्भाद् गुणस्याप्येकान्तत्वारोपेणायं व्यपदेश इत्यर्थः। अनेन तात्स्थ्यादविभागापन्नो यो लक्ष्यते स एवेहैकान्तत्वेन विवक्षितः, न तु तद्गुणत्वमिति दर्शितम्। तेन 'सुगन्धिर्वायुः, उद्गन्धिर्वायुः' इति सिद्धं भवति। न हि गन्धो वायोर्गुणः। एतदेव प्रति-पादयितुं भाष्ये चोद्यप्रतिसमाधाने — [1]**अथ स्नातानुलिप्त इति**। तत्र 'यदनुगतम्' इत्यादिनोक्तं विषयविभागं स्फोरयितुमाह — **अनुगतं निलीनमिति** ॥

शेषाद्विभाषा ५.४.१५४.

[४, २७३–२७५]

(**विवरणम्**) प्रतिपदविधेर्बलीयस्त्वात् डजादिः परमपि कपं बाधिष्यत इत्यत्राह — **उपदशा इति** ॥

---

[1] भाष्ये 'अथानुलिप्ते कथम्' इत्यत्र 'अथ स्नातानुलिप्ते कथम्' इति पाठोऽभिमत इति भाति।

[४, २७३–२७५]

(**उद्द्योतनम्**) **अनेकस्येति**। कब्विधावितरसमासान्तविधौ चेत्यर्थः। **सामान्येन** उपयुक्तप्रकृतिमात्रापेक्षयेत्यर्थः। सामान्यशब्दार्थमेवाह — **समासान्तविशेष इति**। ननु डजादीनां पाक्षिकत्वमेवास्तु, सर्वत्र च पक्षे कबस्तु, अत आह — **उपदशा इति**। [1]'बहुव्रीहौ संख्येये डजबहुगणात्' [2]'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इत्यादयो नित्या एवेति तेषां पाक्षिकत्वं नेष्यत इति शेषग्रहणं कर्तव्यमित्यर्थः। **यद्यपीति**। [3]'उरःप्रभृतिभ्यः कप्' इति सूत्रत्रयविषये नित्य एव कप् विधानसामर्थ्यादित्यन्यत्रैव विभाषा भविष्यतीति शेषग्रहणं व्यर्थमित्यर्थः। [4]**'विचारमात्रमिति**। संभावनामात्रेणाप्यन्यस्य दोषाभिधानमित्यर्थः। [5]'ऋक्पूरब्धूःपथामानक्षे' इति नित्यमप्रत्ययः। तस्य कबपेक्षया शेषत्वात् पाक्षिकत्वप्रसङ्गमाह — **ऋगन्तादिति**। समासान्तरं चावकाश इत्यन्वयः। 'अर्धर्चाः' इत्यादितत्पुरुषोऽवकाश इत्यर्थः। अनेन कथं कबभावसिद्धिः, अत आह — [6]**तत एवेति**। अपिशब्दार्थमाह — **अक्रियमाण इति**। **पुंनपुंसकेति**। न तु कब्निवर्तकत्वमित्यर्थः। विशेषविषयत्ववचनात् 'अनृचः' इत्यादाविव कप् न भविष्यति, अत आह — **एतच्चेति**। मुख्यं दोषमाह — **उपदशेति**। ततः कब्विधानाभावेन कबपेक्षया शेषत्वादित्यर्थः। कबपेक्षत्वपक्षे प्रागुक्तशेषग्रहणानर्थक्यं हेतुमाह — **शेषग्रहणेति**। आनर्थक्ये हेतुः — **यस्मादिति**। समासान्तापेक्षत्वमप्युक्तदोषान्न संभवतीत्याह — **समासान्तेति**। अनेनानन्तरोक्तदोषपरिहार इत्याह — **एवं चेति**। **बहुव्रीहीति**। अनन्तरेत्यादिः। समासान्तापेक्षत्वपक्षे दोषमुद्धरति — **यद्येवमिति**। बहुव्रीहिमात्रापेक्षया तत्पुरुषव्यावृत्तेर्वानन्तर्यविशेषणं व्यर्थमित्याह — — **बहुव्रीह्यधिकारादिति**। आनन्तर्यविशेषणेऽनिष्टमप्याह — **किं चेति**। आनन्तर्यविशेषणेऽन्यत्रापि कप्प्रसङ्गमाह — **तथेति**। अचोऽप्यनन्तरे बहुव्रीह्यधिकारेऽविधानादनन्तरबहुव्रीह्यपेक्षत्वे दोषसद्भावात् ॥

[४, २७३–२७५]

(**नारायणीयम्**) **अनेकस्येति**। किमनन्तरोक्तकबपेक्षं शेषत्वम्, उत [7]'बहुव्रीह्यधिकारापेक्षम्, आहोस्वित् सामान्येन समासान्तापेक्षत्वमिति संदेहात् प्रश्न इत्यर्थः। उत्तरवादिन आशयमाह — **इतर इति**। **समासान्तविशेषस्त्विति**। इह विशेषो न प्रदर्शितः, उत्तरत्र तु भविष्यतीत्यर्थः। ननु समासान्तविषये कदाचित् कबपि भवतु, को दोष इति वादिनं प्रत्याह — **उपदशा इति**। ननु शेषग्रहणं प्रति पूर्वं विचारितत्वात् पुनः प्रश्नोऽनुपपन्न इत्याशङ्क्याह — **पूर्वं याभ्य इति**। [8]**'नित्यकब्विधानसामर्थ्यादिति**। न हि नित्यकब्विषये विकल्पप्रसङ्गः, नित्यविधेरानर्थक्यप्रसङ्गादित्यन्तरेण शेषग्रहणं शेषादेव कपो विकल्पः सेत्स्यतीत्यर्थः। **विचारमात्रमिति**।

---

[1] पा. सू. ५.४.७३.
[2] पा. सू. ५.४.११३.
[3] पा. सू. ५.४.१५१.
[4] विचारान्तरमात्रमिति — लृ.
[5] पा. सू. ५.४.७४.
[6] अत एवेति — लृ.
[7] अस्यानन्तरेत्यादिः।
[8] प्रदीपपुस्तकेषु 'नित्यं कब्विधान' इति दृश्यते।

संभवमात्रापेक्षयास्य पक्षस्योपक्षेपः। पक्षाभासस्यापि निराकार्यत्वादित्यर्थः। नन्वृगन्तात् कपि सति [1]'ऋक्पूरब्धूः' इत्यकारवचनमनवकाशं स्यादित्यत्राह — [2]**कबभावेति**। **समासान्तरं चेति**। बहुव्रीहेः कब्विहित इति तत्पुरुषादिरकारस्यावकाशः स्यात्। विशेष एतद्वचनेन प्रकृते किमायातमित्यत्राह — **तत एवेति**। 'क्रियमाणेऽपि' इत्यपिशब्देनैतदुक्तम् — अक्रियमाणे यथा कप्प्राप्तिस्तथास्मिन् पक्षे क्रियमाणेऽपीति। तदेतदाह — **अक्रियमाण इति**। **पुंनपुंसकनिवृत्त्यर्थत्वादिति**। 'महोधाः पर्जन्यः, कुण्डोधो धैनुकम्' इति पुंनपुंसकयोरनङनिवृत्तिः स्त्रीग्रहणस्य प्रयोजनं स्यात्। 'कुण्डोध्नी' इत्यादौ तु कबपेक्षशेषत्वपक्षे कप् स्यादेवेत्यर्थः। **उपदशादिष्विति**। डजादी[नां कबपेक्षया शेषत्वात् तत्र कब्विकल्पप्रसङ्गादित्यर्थः। तथा सति शेषग्रहणस्य चानर्थक्यमित्याह — **शेषग्रह]णेति**। एतदेवोपपादयति — **यस्माद्धीति**। 'नापि' इत्यादिभाष्यं व्याचष्टे — **समासान्तेति**। अनन्तरबहुव्रीह्यधिकारापेक्षे शेषत्वे सति [उक्तदोषो नास्तीत्याह — **एवं]चेति**। 'शेषाद्विभाषा' इत्यत्र [ब]हुव्रीहेर[धिकारादित्यर्थः] एवं समासान्तापेक्षे शेषत्वे सर्वेष्टसिद्धिमुपपाद्यानन्तरबहुव्रीह्यधिकारापेक्षे दोषप्रसङ्गं दर्शयति — **किं चेति**॥

ईयसश्च ५.४.१५६.

[४, २७५–२७६]

(विवरणम्) यदि पुंवद्भावः स्त्रीप्रत्ययो निवर्तेतेत्यत्राह — **अन्ये त्विति**॥

इति प्रदीपविवरणे पञ्चमस्य चतुर्थे प्रथममाह्निकम्

पादोऽध्यायश्च समाप्तः

[४, २७५–२७६]

(उद्द्योतनम्) ह्रस्वेति। [3]'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वापवादः। पुंवद्वचनेन दीर्घः कथं सिध्येत्, अत आह — **गोस्त्रियोरिति**। निवृत्तिप्रकारमाह — **यथेति**। हल्ङ्यादिलोपो न संभवतीति तावद् दर्शयति — **केचिदिति**। **स्त्रीप्रत्यय इति**। [4]'ष्यङः संप्रसारणम्' इति सूत्रस्थमिदं वार्तिकम्। अनुपसर्जने स्त्रीप्रत्यये तदादिनियमो नास्ति। [5]'प्रत्ययग्रहणे यस्मात् स तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषा न प्रवर्तते। उपसर्जने त्वस्ति। बहुश्रेयसी। तत्र स्त्रीप्रत्ययस्य समुदायादविहितत्वेन ङ्यन्तत्वाभावात् हल्ङ्यादिलोपो नास्तीत्यर्थः। सिद्धान्तमाह

---

[1] पा. सू. ५.४.७४.
[2] तदभावेऽति — घ.
[3] पा. सू. १.२.४८.
[4] पा. सू. ६.१.१३.
[5] परिभाषा २३.

— **अन्ये त्विति**। **तत्र** ह्रल्ङ्यादिसूत्रे। **ह्रस्वनिवृत्त्यर्थं** ह्रस्वाल्लोपनिवृत्त्यर्थम्। ज्ञापकत्वमुपपादयति — **यदि चेति**॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावतंसश्रीमत्तिरुमलाचार्यवर्यस्य
सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने पञ्चमस्याध्यायस्य
चतुर्थपादे प्रथममाह्निकम्

॥ पादश्च समाप्तोऽध्यायश्च ॥

[४, २७५–२७६]

(नारायणीयम्) ननु स्वतः प्रा[प्तस्य दीर्घस्य किमर्थं विधानमित्यत आह — **ह्रस्वे**]**ति**। अन्यथा [1]'गोस्त्रियोः' इति ह्रस्वत्वं स्यात्। ननु पुंवद्भावात् स्त्रीप्रत्ययस्य निवृत्तिः स्यात्, न तु दीर्घ इत्याशङ्क्य प्रकरणवशाद्ध्रस्वनिवृत्तिरेव पुंवद्भावेन प्रतिपाद्यत इति दर्शयति — **गोस्त्रियोरिति**। **यथा पुंविषयस्येति**। 'ग्रामणीर्ब्राह्मणः' इत्यादौ। [2]**ह्रल्ङ्यादिलोपस्याप्रसङ्गादिति**। यस्मात् सुविहितस्तस्य ङ्यन्तत्वाभावात्। **तदा ह्रस्वादिति**। निष्कौशाम्बिरित्यादौ [3]'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनत्वात् तदादिनियमाद्ध्रस्वात् परस्य सोर्लोपस्य प्रसङ्ग एव नास्तीति दीर्घग्रहणमनर्थकमेव स्यादित्यर्थः। **इति बहुश्रेयसीति सिद्धमिष्टमिति**। अनेनायमेव पक्षो युक्त इति दर्शयति। भाष्ये उदाहृतस्येष्टस्य रूपस्य सिद्धत्वात्॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे पञ्चमस्याध्यायस्य
चतुर्थे पादे प्रथममाह्निकम्

॥ **पादश्चाध्यायश्च समाप्तः** ॥

---

[1] पा. सू. १.२.४८.

[2] प्रदीपे 'हल्ङ्यादिलोपस्य प्रसङ्गाभावात्' इत्यत्र 'हल्ङ्यादिलोपस्याप्रसङ्गात्' इति पाठोऽभिमतः।

[3] पा. सू. १.२.४४.

आकरग्रन्थानां सूची

ऋ. सं — ऋक्संहिता.
का. वा. — कात्यायनवार्तिकम्.
चौ. — चौखाम्बामुद्रितं महाभाष्यं नवाह्निकपर्यन्तं प्रदीपोद्द्योतसहितम्, उपरि प्रदीपमात्रसहितम्.
तै. आ. — तैत्तिरीयारण्यकम्.
तै. ब्रा. — तैत्तिरीयब्राह्मणम्.
तै. सं. — तैत्तिरीयसंहिता.
नि. — निर्णयसागरमुद्रितं महाभाष्यं प्रदीपोद्द्योतसहितम्.
परिभाषा — परिभाषेन्दुशेखरः चौखाम्बा १९४५ विद्याविलासमुद्रितः.
पा. शि. — पाणिनीयशिक्षा.
पा. सू. — पाणिनिसूत्रम्.
पू. — पुण्यपत्तन [पूना] प्रकाशितं महाभाष्यम् F. Kielhorn. महाशयशोधितम्.
प्रवर्तकीयम् — प्रवर्तकोपाध्यायकृतमहाभाष्यप्रदीपप्रकाशः आस्माकीनकोशालये T. No. 99 अङ्कितः
रामायणम् — मद्रपुरी-ला-जर्नल-मुद्रणालये मुद्रितम्.
लौ. न्या. — लौकिकन्यायाञ्जलिः.
लौ. न्या. साहस्री — (भुवनेश) लौकिकन्यायसाहस्री.
श. कौ. — शब्दकौस्तुभः.
श्लो. वा. — श्लोकवार्तिकम्. महाभाष्यस्थम्.
ह — हरयाणासाहित्यसंस्थानप्रकाशितं प्रदीपोद्द्योतसहितं महाभाष्यम्.

पञ्चमाध्यायप्रथमपादादिचतुर्थपादान्तविषयसूचिका

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१.	प्राक् क्रीताच्छः ५.१.१.	...	९
२.	उगवादिभ्यो यत् ५.१.२.	...	११
३.	कम्बलाच्च संज्ञायाम् ५.१.३.	...	१५
४.	विभाषा हविरपूपादिभ्यः ५.१.४.	...	१५
५.	शरीरावयवाद्यत् ५.१.६.	...	१५
६.	खलयवमाषतिलवृषब्रह्मणश्च ५.१.७.	...	१६
७.	आत्मन् विश्वजनभोगोत्तरपदात् खः ५.१.९.	...	१७
८.	सर्वपुरुषाभ्यां णढञौ ५.१.१०.	...	२०
९.	तदर्थं विकृतेः प्रकृतौ ५.१.१२.	...	२१
१०.	छदिरुपधिबलेर्ढञ् ५.१.१३.	...	२१
११.	तदस्य तदस्मिन् स्यादिति ५.१.१६.	...	२४
१२.	आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ५.१.१९.	...	२७
१३.	असमासे निष्कादिभ्यः ५.१.२०.	...	३०
१४.	शताच्च ठन्यतावशते ५.१.२१.	...	३२
१५.	संख्याया अतिशदन्तायाः कन् ५.१.२२.	...	३४
१६.	वतोरिड् वा ५.१.२३.	...	३५
१७.	विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ५.१.२४.	...	३६
१८.	कंसाट्टिठन् ५.१.२५.	...	३७
१९.	अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ५.१.२८.	...	३७
२०.	विभाषा कार्षापणसहस्राभ्याम् ५.१.२९.	...	३९
२१.	द्वित्रिपूर्वान्निष्कात् ५.१.३०.	...	३९
२२.	बिस्ताच्च ५.१.३१.	...	३९
२३.	खार्याः ईकन् ५.१.३३	...	४०
२४.	शाणाद्वा ५.१.३५.	...	४०
२५.	तेन क्रीतम् ५.१.३७.	...	४०
२६.	तस्य निमित्तं संयोगोत्पातौ ५.१.३८.	...	४१
२७.	गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ५.१.३९	...	४२
२८.	तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ५.१.४७	...	४२
२९.	पूरणार्धाट्ठन् ५.१.४८.	...	४३
३०.	संभवत्यवहरति पचति ५.१.५२.	...	४३
३१.	कुलिजाल्लुक्खौ च ५.१.५५.	...	४३
३२.	तदस्य परिमाणम् ५.१.५७.	...	४४
३३.	संख्यायाः संज्ञासंघसूत्राध्ययनेषु ५.१.५८.	...	४४

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
३४.	पञ्चविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीति-नवतिशतम् ५.१.५९.	...	४७
३५.	छेदादिभ्यो नित्यम् ५.१.६४.	...	५५
३६.	पन्थो ण नित्यम् ५.१.७६.	...	५५
३७.	यज्ञर्त्विग्भ्यां घखञौ ५.१.७१.	...	५७
३८.	पारायणतुरायणचान्द्रायणं वर्तयति ५.१.७२.	...	५८
३९.	उत्तरपथेनाहृतं च ५.१.७७.	...	५९
४०.	तमधीष्टो भृतो भूतो भावी ५.१.८०.	...	५९
४१.	अवयसि ठंश्च ५.१.८४.	...	६०
४२.	षष्टिकाः षष्टिरात्रेण पच्यन्ते ५.१.९०	...	६०
४३.	तदस्य ब्रह्मचर्यम् ५.१.९४.	...	६१
४४.	तस्य दक्षिणा यज्ञाख्येभ्यः ५.१.९५.	...	६२
४५.	तत्र च दीयते कार्यं भववत् ५.१.९६.	...	६३
४६.	व्युष्टादिभ्योऽण् ५.१.९७.	...	६४
४७.	अनुप्रवचनादिभ्यश्छः ५.१.१११.	...	६५
४८.	ऐकागारिकट् चौरे ५.१.११३.	...	६५
४९.	आकालिकडाद्यन्तवचने ५.१.११४.	...	६६
५०.	तेन तुल्यं क्रिया चेद्वतिः ५.१.११५.	...	६७
५१.	तत्र तस्येव ५.१.११६.	...	७७
५२.	तदर्हम् ५.१.११७.	...	७९
५३.	उपसर्गाच्छन्दसि धात्वर्थे ५.१.११८.	...	८१
५४.	तस्य भावस्त्वतलौ ५.१.११९.	...	८३
५५.	आ च त्वात् ५.१.१२०.	...	९५
५६.	न नञ्पूर्वात् तत्पुरुषादचतुरसंगतलवणवटबुध-कतरसलसेभ्यः ५.१.१२१.	...	९७
५७.	पृथ्वादिभ्य इमनिज्वा ५.१.१२२.	..	९९
५८.	गुणवचनब्राह्मणादिभ्यः कर्मणि च ५.१.१२४.	...	१००
५९.	स्तेनाद्यन्नलोपश्च ५.१.१२५.	...	१०१
६०.	हायनान्तयुवादिभ्योऽण् ५.१.१३०.	...	१०१
६१.	विभाषा तिलमाषोमाभङ्गाणुभ्यः ५.२.४.	...	१०३
६२.	यथामुखसंमुखस्य दर्शनः खः ५.२.६.	...	१०४
६३.	अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ५.२.९.	...	१०५
६४.	परोवरपरम्परपुत्रपौत्रमनुभवति ५.२.१०.	...	१०६
६५.	समां समां विजायते ५.२.१२.	...	१०७
६६.	आगवीनः ५.२.१४.	...	१०७
६७.	शालीनकौपीने अधृष्टाकार्ययोः ५.२.२०.	...	१०८

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
६८.	व्रातेन जीवति ५.२.२१.	...	१०९
६९.	हैयङ्गवीनं संज्ञायाम् ५.२.२३.	...	१०९
७०.	पक्षात्तिः ५.२.२५.	...	११०
७१.	विनञ्भ्यां नानाञौ नसह ५.२.२७.	...	११०
७२.	वेः शालच्छङ्कटचौ ५.२.२८.	...	१११
७३.	संप्रोदश्च कटच् ५.२.२९.	...	११२
७४.	इनच्पिटच्चिकचि च ५.२.३३.	...	११४
७५.	प्रमाणे द्वयसज्दघ्नञ्मात्रचः ५.२.३७.	...	११५
७६.	यत्तदेतेभ्यः परिमाणे वतुप् ५.२.३९.	...	११७
७७.	किमिदंभ्यां वो घः ५.२.४०	...	११८
७८.	किमः संख्यापरिमाणे डति च ५.२.४१	...	११९
७९.	संख्याया अवयवे तयप् ५.२.४२.	...	११९
८०.	उभादुदात्तो नित्यम् ५.२.४४.	...	१२१
८१.	तदस्मिन्नधिकमिति दशान्ताड्डः ५.२.४५.	...	१२२
८२.	शदन्तविंशतेश्च ५.२.४६.	...	१२४
८३.	संख्याया गुणस्य निमाने मयट् ५.२.४७.	...	१२५
८४.	तस्य पूरणे डट् ५.२.४८.	...	१२७
८५.	नान्तादसंख्यादेर्मट् ५.२.४९.	...	१२९
८६.	षट्कतिकतिपयचतुरां थुक् ५.२.५१.	...	१३०
८७.	बहुपूगगणसंघस्य तिथुक् ५.२.५२.	...	१३१
८८.	षष्टचादेश्चासंख्यादेः ५.२.५८.	...	१३१
८९.	मतौ छः सूक्तसाम्नोः ५.२.५९.	...	१३३
९०.	अध्यायानुवाकयोर्लुक् ५.२.६०.	...	१३५
९१.	धनहिरण्यात् कामे ५.२.६५	...	१३६
९२.	शीतोष्णाभ्यां कारिणि ५.२.७२.	...	१३६
९३.	अधिकम् ५.२.७३.	...	१३७
९४.	पार्श्वेनान्विच्छति ५.२.७५.	...	१३८
९५.	अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ५.२.७६.	...	१३८
९६.	तावतिथं ग्रहणमिति लुग् वा ५.२.७७.	...	१३८
९७.	शृङ्खलमस्य बन्धनं करभे ५.२.७९.	...	१३९
९८.	तदस्मिन्नन्नं प्राये संज्ञायाम् ५.२.८२.	...	१३९
९९.	श्रोत्रियंश्छन्दोऽधीते ५.२.८४.	...	१४०
१००.	श्राद्धमनेन भुक्तमिनिठनौ ५.२.८५.	...	१४१
१०१.	साक्षाद् द्रष्टरि संज्ञायाम् ५.२.९१.	...	१४१
१०२.	क्षेत्रियच् परक्षेत्रे चिकित्स्यः ५.२.९२.	...	१४२
१०३.	तदस्यास्त्यस्मिन्निति मतुप् ५.२.९४.	...	१४३
१०४.	रसादिभ्यश्च ५.२.९५.	...	१५५

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१०५.	प्राणिस्थादाचो लजन्यतरस्याम् ५.२.९६.	...	१५५
१०६.	सिध्मादिभ्यश्च ५.२.९७.	...	१५६
१०७.	लोमादिपामादिपिच्छादिभ्यः शनेलचः ५.२.१००.	...	१५७
१०८.	प्रज्ञाश्रद्धार्चाभ्यो णः ५.२.१०१.	...	१५८
१०९.	तपस्सहस्राभ्यां विनीनी ५.२.१०२.	...	१५८
११०.	अण् च ५.२.१०३.	...	१५८
१११.	ऊषसुषिमुष्कमधो रः ५.२.१०७.	...	१५९
११२.	केशाद्वोऽन्यतरस्याम् ५.२.१०९.	...	१६०
११३.	रजःकृष्यासुतिपरिषदो वलच् ५.२.११२.	...	१६१
११४.	स्वामिन्नैश्वर्ये ५.२.१२६.	...	१६१
११५.	पुष्करादिभ्यो देशे ५.२.१३५.	...	१६२
११६.	प्राग् दिशो विभक्तिः ५.३.१.	...	१६४
११७.	किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ५.३.२.	...	१६५
११८.	एतदोऽन् ५.३.५.	...	१६५
११९.	पञ्चम्यास्तसिल् ५.३.७.	...	१६७
१२०.	सप्तम्यास्त्रल् ५.३.१०.	...	१६७
१२१.	तसेश्च ५.३.८.	...	१६८
१२२.	दानीं च ५.३.१८.	...	१६९
१२३.	तदो दा च ५.३.१९.	...	१६९
१२४.	तयोर्दार्हिलौ च च्छन्दसि ५.३.२०.	...	१६९
१२५.	दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ५.३.२७.	...	१७०
१२६.	दक्षिणोत्ताराभ्यामतसुच् ५.३.२८.	...	१७२
१२७.	दक्षिणादाच् ५.३.३६.	...	१७५
१२८.	संख्याया विधार्थे धा ५.३.४२.	...	१७६
१२९.	एकाद्धो ध्यमुञन्यतरस्याम् ५.३.४४.	...	१७७
१३०.	द्वित्र्योश्च धमुञ् ५.३.४५.	...	१७८
१३१.	याप्ये पाशप् ५.३.४७.	...	१७९
१३२.	एकादाकिनिच्चासहाये ५.३.५२.	...	१७९
१३३.	अतिशायने तमबिष्ठनौ ५.३.५५.	...	१८१
१३४.	द्विवचनविभज्योपपदे तरबीयसुनौ ५.३.५७.	...	१९४
१३५.	अजादी गुणवचनादेव ५.३.५८.	...	१९७
१३६.	प्रशस्यस्य श्रः ५.३.६०.	...	१९७
१३७.	प्रशंसायां रूपप् ५.३.६६.	...	१९९
१३८.	ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५.३.६७.	...	२०३
१३९.	विभाषा सुपो बहुच् पुरस्तात्तु ५.३.६८.	...	२०६
१४०.	अव्ययसर्वनाम्नामकच् प्राक् टेः ५.३.७१.	...	२०८

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१४१.	कस्य च दः ५.३.७२.	...	२०८
१४२.	कुत्सिते ५.३.७४.	...	२१०
१४३.	ठाजादावूर्ध्वं द्वितीयादचः ५.३.८३.	...	२१३
१४४.	शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ५.३.८४.	...	२१४
१४५.	अल्पे ५.३.८५.	...	२१६
१४६.	ह्रस्वे ५.३.८६.	...	२१६
१४७.	कुटीशमीशुण्डाभ्यो रः ५.३.८८.	...	२१७
१४८.	वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ५.३.९१.	...	२१७
१४९.	किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ५.३.९२.	...	२१७
१५०.	वा बहूनां जातिपरिप्रश्ने डतमच् ५.३.९३.	...	२१७
१५१.	अवक्षेपणे कन् ५.३.९५.	...	२१८
१५२.	लुम्मनुष्ये ५.३.९८.	...	२१८
१५३.	जीविकार्थे चापण्ये ५.३.९९.	...	२१९
१५४.	समासाच्च तद्विषयात् ५.३.१०६.	...	२१९
१५५.	अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ५.३.११८.	...	२२०
१५६.	पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ५.४.१.	...	२२२
१५७.	स्थूलादिभ्यः प्रकारवचने कन् ५.४.३.	...	२२२
१५८.	अनत्यन्तगतौ क्तात् ५.४.४.	...	२२३
१५९.	अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ५.४.७.	...	२२४
१६०.	विभाषाञ्चेरदिक्स्त्रियाम् ५.४.८.	...	२२६
१६१.	एकस्य सकृच्च ५.४.१९.	...	२२६
१६२.	देवतान्तात् तादर्थ्ये यत् ५.४.२४.	...	२३०
१६३.	लोहितान्मणौ ५.४.३०.	...	२३०
१६४.	तद्युक्तात् कर्मणोऽण् ५.४.३६.	...	२३१
१६५.	कृद्योगे संपद्यकर्तरि च्विः ५.४.५०.	...	२३१
१६६.	समासान्ताः ५.४.६८.	...	२३२
१६७.	ऋक्पूरब्धूःपथामानक्षे ५.४.७४.	...	२३२
१६८.	अक्ष्णोऽदर्शनात् ५.४.७६.	...	२३३
१६९.	अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनुड्दुहर्वसामवाङ्मनसाक्षिभ्रुवदार-गवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषा-युषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ५.४.७७.	...	२३४
१७०.	अह्नोऽह्न एतेभ्यः ५.४.८८.	...	२३४
१७१.	बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ५.४.११३.	...	२३५
१७२.	द्वित्रिभ्यां ष मूर्ध्नः ५.४.११५.	...	२३५
१७३.	अप्पूरणीप्रमाण्योः ५.४.११६.	...	२३६

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१७४.	अञ् नासिकायाः संज्ञायां नसं चास्थूलात् ५.४.११८.	...	२३७
१७५.	उपसर्गाच्च ५.४.११९.	...	२३७
१७६.	गन्धस्येदुत्पूतिसुसुरभिभ्यः ५.४.१३५.	...	२३७
१७७.	शेषाद्विभाषा ५.४.१५४.	...	२३८
१७८.	ईयसश्च ५.४.१५६.	...	२४०

पञ्चमाध्यायव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका

सूत्राणि		पृष्ठाङ्क
अक्ष्णोऽदर्शनात् ५.४.७६.	...	२३३
अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनड्वहर्क सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीव-पदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यं-जुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ५.४.७७.	...	२३४
अजादी गुणवचनादेव ५.३.५८.	...	१९७
अञ् नासिकायाः संज्ञायां नसं चास्थूलात् ५.४.११८.	...	२३७
अण् च ५.२.१०३.	...	१५८
अतिशायने तमबिष्ठनौ ५.३.५५.	...	१८१
अधिकम् ५.२.७३.	...	१३७
अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ५.१.२८.	...	३७
अध्यायानुवाकयोर्लुक् ५.२.६०.	...	१३५
अनत्यन्तगतौ क्तात् ५.४.४.	...	२२३
अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ५.२.९.	...	१०५
अनुप्रवचनादिभ्यश्छः ५.१.१११.	...	६५
अप् पूरणीप्रमाण्योः ५.४.११६.	...	२३६
अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छुमदणो यञ् ५.३.११८.	...	२२०
अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ५.२.७६.	...	१३८
अल्पे ५.३.८५.	...	२१६
अवक्षेपणे कन् ५.३.९५.	...	२१८
अवयसि ठंश्च ५.१.८४.	...	६०
अव्ययसर्वनाम्नामकच् प्राक् टेः ५.३.७१.	...	२०८
अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ५.४.७.	...	२२४
असमासे निष्कादिभ्यः ५.१.२०.	...	३०
अह्नोऽह्न एतेभ्यः ५.४.८८.	...	२३४
आकालिकडाद्यन्तवचने ५.१.११४.	...	६६
आगवीनः ५.२.१४.	...	१०७
आ च त्वात् ५.१.१२०.	...	९५
आत्मन्विश्वजनभोगोत्तरपदात् खः ५.१.९.	...	१८
आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ५.१.१९.	...	२७
इनच्पिटच्चिकचि च ५.२.३३.	...	११४
ईयसश्च ५.४.१५६.	...	२४०
ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५.३.६७.	...	२०३
उगवादिभ्यो यत् ५.१.२.	...	११

सूत्राणि		पृष्ठाङ्काः
उत्तरपथेनाहृतं च ५.१.७७.	...	५९
उपसर्गाच्च ५.४.११९.	...	२३७
उपसर्गाच्छन्दसि धात्वर्थे ५.१.११८.	...	८१
उभादुदात्तो नित्यम् ५.२.४४.	...	१२१
ऊषसुषिमुष्कमधो रः ५.२.१०७.	...	१५९
ऋक्पूरब्धूःपथामानक्षे ५.४.७४.	...	२३२
एकस्य सकृच्च ५.४.१९.	...	२२६
एकादाकिनिच्चासहाये ५.३.५२.	...	१७९
एकाद्धो ध्यमुञन्यतरस्याम् ५.३.४४.	...	१७७
एतदोऽन् ५.३.५.	...	१६५
ऐकागारिकट् चौरे ५.१.११३.	...	६५
कंसाट्टिठन् ५.१.२५.	...	३७
कम्बलाच्च संज्ञायाम् ५.१.३.	...	१५
कस्य च दः ५.३.७२.	...	२०८
किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ५.३.९२.	...	२१७
किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ५.३.२.	...	१६५
किमः संख्यापरिमाणे डति च ५.२.४१.	...	११९
किमिदंभ्यां वो घः ५.२.४०.	...	११८
कुटीशमीशुण्डाभ्यो रः ५.३.८८.	...	२१७
कुत्सिते ५.३.७४.	...	२१०
कुलिजाल्लुक्खौ च ५.१.५५.	...	४३
कृद्योगे संपद्यकर्तरि च्विः ५.४.५०.	...	२३१
केशाद्वोऽन्यतरस्याम् ५.२.१०९.	...	१६०
क्षेत्रियच् परक्षेत्रे चिकित्स्यः ५.२.९२.	...	१४२
खलयवमाषतिलवृषब्रह्मणश्च ५.१.७.	...	१६
खार्या ईकन् ५.१.३३.	...	४०
गन्धस्येदुत्पूतिसुसुरभिभ्यः ५.४.१३५.	...	२३८
गुणवचनब्राह्मणादिभ्यः कर्मणि च ५.१.१२४.	...	१००
गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ५.१.३९.	...	४२
छदिरुपधिबलेर्ढञ् ५.१.१३.	...	२१
छेदादिभ्यो नित्यम् ५.१.६४.	...	५५
जीविकार्थे चापण्ये ५.३.९९.	...	२१९
ठाजादावूर्ध्वं द्वितीयादचः ५.३.८३.	...	२१३
तत्र च दीयते कार्यं भववत् ५.१.९६.	...	६३
तत्र तस्येव ५.१.११६.	...	७७
तदर्थं विकृतेः प्रकृतौ ५.१.१२.	...	२१
तदर्हम् ५.१.११७.	...	७९

सूत्राणि		पृष्ठाङ्काः
तदस्मिन्नधिकमिति दशान्ताड्डः ५.२.४५.	...	१२२
तदस्मिन्नन्नं प्राये संज्ञायाम् ५.२.८२.	...	१३९
तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ५.१.४७.	...	४२
तदस्य तदस्मिन् स्यादिति ५.१.१६ .	...	२४
तदस्य परिमाणम् ५.१.५७.	...	४४
तदस्य ब्रह्मचर्यम् ५.१.९४.	...	६१
तदस्यास्त्यस्मिन्निति मतुप् ५.२.९४.	...	१४३
तदो दा च ५.३.१९.	...	१६९
तद्युक्तात् कर्मणोऽण् ५.४.३६.	...	२३१
तपःसहस्राभ्यां विनीनी ५.२.१०२.	...	१५८
तमधीष्टो भृतो भूतो भावी ५.१.८०.	...	५९
तयोर्दार्हिलौ च च्छन्दसि ५.३.२०.	...	१६९
तसेश्च ५.३.८.	...	१६८
[1]तस्य दक्षिणा यज्ञाख्येभ्यः ५.१.९५.	...	६२
तस्य निमित्तं संयोगोत्पातौ ५.१.३८.	...	४१
तस्य पूरणे डट् ५.२.४८.	...	१२७
तस्य भावस्त्वतलौ ५.१.११९.	...	८३
तावतिथं ग्रहणमिति लुग् वा ५.२.७७.	...	१३८
तेन क्रीतम् ५.१.३७.	...	४०
तेन तुल्यं क्रिया चेद्वतिः ५.१.११५.	...	६७
दक्षिणादाच् ५.३.३६.	...	१७५
दक्षिणोत्ताराभ्यामतसुच् ५.३.२८.	...	१७२
दानीं च ५.३.२८.	...	१६९
दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ५.३.२७.	...	१७०
देवतान्तात् तादर्थ्ये यत् ५.४.२४.	...	२३०
द्वित्रिपूर्वान्निष्कात् ५.१.३०.	...	३९
द्वित्रिभ्यां ष मूर्ध्नः ५.४.११५.	...	२३५
द्वित्र्योश्च धमुञ् ५.३.४५.	...	१७८
द्विवचनविभज्योपपदे तरबीयसुनौ ५.३.५७.	...	१९४
धनहिरण्यात् कामे ५.२.६५.	...	१३६
न नञ्पूर्वात् तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः ५.१.१२१.	...	९७
नान्तादसंख्यादेर्मट् ५.२.४९.	...	१२९
पक्षात्तिः ५.२.२५.	...	११०
पक्तिंविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ५.१.५९.	...	४७
पञ्चम्यास्तसिल् ५.३.७.	...	१६७

---

[1]काशिकायां कौमुद्यां च 'तस्य' इत्यस्यानन्तरं चकारोऽधिकः ।

सूत्राणि		पृष्ठाङ्काः
पन्थो ण नित्यम् ५.१.७६.	...	५५
परोवरपरम्परपुत्रपौत्रमनुभवति ५.२.१०.	...	१०६
पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ५.४.१.	...	२२२
पारायणतुरायणचान्द्रायणं वर्तयति ५.१.७२.	...	५८
पार्श्वेनान्विच्छति ५.२.७५.	...	१३९
पुष्करादिभ्यो देशे ५.२.१३५.	...	१६२
पूरणार्धाट्ठन् ५.१.४८.	...	४३
पृथ्वादिभ्य इमनिज् वा ५.१.१२२.	...	९९
प्रज्ञाश्रद्धार्चाभ्यो णः ५.२.१०१.	...	१५८
प्रमाणे द्वयसज्दघ्नञ्मात्रचः ५.२.३७.	...	११५
प्रशंसायां रूपप् ५.३.६६.	...	१९९
प्रशस्यस्य श्रः ५.३.६०.	...	१९७
प्राक् क्रीताच्छः ५.१.१.	...	९
प्राग् दिशो विभक्तिः ५.३.१.	...	१६४
प्राणिस्थादाचो लजन्यतरस्याम् ५.२.९६.	...	१५५
बहुपूगगणसंघस्य तिथुक् ५.२.५२.	...	१३१
बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ५.४.११३.	...	२३५
बिस्ताच्च ५.१.३१.	...	३९
मतौ छः सूक्तसाम्नोः ५.२.५९.	...	१३३
यज्ञर्त्विग्भ्यां घखञौ ५.१.७१.	...	५७
यत्तदेतेभ्यः परिमाणे वतुप् ५.२.३९.	...	११७
यथामुखसंमुखस्य दर्शनः. खः ५.२.६.	...	१०४
याप्ये पाशप् ५.३.४७.	...	१७९
रजःकृष्यासुतिपरिषदो वलच् ५.२.११२.	...	१६१
रसादिभ्यश्च ५.२.९५.	...	१५५
लुम्मनुष्ये ५.३.९८.	...	२१८
लोमादिपामादिपिच्छादिभ्यः शनेलचः ५.२.१००.	...	१५७
लोहितान्मणौ ५.४.३०.	...	२३०
वतोरिड् वा ५.१.२३.	...	३५
वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ५.३.९१.	...	२१७
वा बहूनां जातिपरिप्रश्ने डतमच् ५.३.९३.	...	२१७
विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ५.१.२४.	...	३६
विनञ्भ्यां नानाञौ न सह ५.२.२७.	...	११०
विभाषा कार्षापणसहस्राभ्याम् ५.१.२९.	...	३९
विभाषाञ्चेरदिक्स्त्रियाम् ५.४.८.	...	२२६
विभाषा तिलमाषोमाभङ्गाणुभ्यः ५.२.४.	...	१०३
विभाषा सुपो बहुच् पुरस्तात्तु ५.३.६८.	...	२०६

सूत्राणि		पृष्ठाङ्काः
वेः शालच्छङ्कटचौ ५.२.२८.	...	१११
व्युष्टादिभ्योऽण् ५.१.९७.	...	६४
व्रातेन जीवति ५.२.२१.	...	१०९
शताच्च ठन्यतावशते ५.१.२१.	...	३२
शदन्तविंशतेश्च ५.२.४६.	...	१२४
शरीरावयवाद्यत् ५.१.६.	...	१५
शाणाद्वा ५.१.३५.	...	४०
शालीनकौपीने अधृष्टाकार्ययोः ५.२.२०.	...	१०८
शीतोष्णाभ्यां कारिणि ५.२.७२.	...	१३६
शृङ्खलमस्य बन्धनं करभे ५.२.७९.	...	१३९
शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ५.३.८४.	...	२१४
शेषाद्विभाषा ५.४.१५४.	...	२३८
श्राद्धमनेन भुक्तमिनिठनौ ५.२.८५.	...	१४२
श्रोत्रियंश्छन्दोऽधीते ५.२.८४.	...	१४०
षट्कतिकतिपयचतुरां थुक् ५.२.५१.	...	१३०
षष्टिकाः षष्टिरात्रेण पच्यन्ते ५.१.९०.	...	६०
षष्टचादेश्चासंख्यादेः ५.२.५८.	...	१३१
संख्याया अतिशदन्तायाः कन् ५.१.२२.	...	३४
संख्याया अवयवे तयप् ५.२.४२.	...	११९
संख्यायाः संज्ञासंघसूत्राध्ययनेषु ५.१.५८.	...	४४
संख्याया गुणस्य निमाने मयट् ५.२.४७.	...	१२५
संख्याया विधार्थे धा ५.३.४२.	...	१७६
संप्रोदश्च कटच् ५.२.२९.	...	११२
संभवत्यवहरति पचति ५.१.५२.	...	४३
सप्तम्यास्त्रल् ५.३.१०.	...	१६७
समां समां विजायते ५.२.१२.	...	१०७
समासाच्च तद्विषयात् ५.३.१०६.	...	२१९
समासान्ताः ५.४.६८.	...	२३२
सर्वपुरुषाभ्यां णढञौ ५.१.१०.	...	२०
साक्षाद्द्रष्टरि संज्ञायाम् ५.२.९१.	...	१४१
सिध्मादिभ्यश्च ५.२.९७.	...	१५६
स्तेनाद्यन्नलोपश्च ५.१.१२५.	...	१०१
स्थूलादिभ्यः प्रकारवचने कन् ५.४.३.	...	२२२
स्वामिन्नैश्वर्ये ५.२.१२६.	...	१६१
हायनान्तयुवादिभ्योऽण् ५.१.१३०.	...	१०१
हैयङ्गवीनं संज्ञायाम् ५.२.२३.	...	१०९
ह्रस्वे ५.३.८६.	...	२१६

TABLE DES MATIÈRES

उपोद्घातः		...	५
पञ्चमाध्यायप्रथमपादे	प्रथममाह्निकम्	...	९
	द्वितीयमाह्निकम्	...	४७
पञ्चमाध्यायद्वितीयपादे	प्रथममाह्निकम्	...	१०३
	द्वितीयमाह्निकम्	...	१४४
पञ्चमाध्यायतृतीयपादे	प्रथममाह्निकम्	...	१६४
	द्वितीयमाह्निकम्	...	१८१
पञ्चमाध्यायचतुर्थपा	प्रथममाह्निकम्	...	२२२
आकरग्रन्थानां सूची		...	२४२
पञ्चमाध्यायप्रथमपादादिचतुर्थपादान्तविषयसूचिका		...	२४३
पञ्चमाध्यायव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका		...	२४९

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

Nos.

1. Kārāvelane —*Kāreikkālammeiyār*, œuvres éditées et traduites. Introduction par Jean Filliozat. Nouvelle édition. Postface et Index-glossaire par François Gros. 1982.
2. Jean Filliozat — *Les relations extérieures de l'Inde* (1)
   1. *Les échanges de l'Inde et de l'Empire Romain aux premiers siècles de l'ère chrétienne.*
   2. *La doctrine brahmanique à Rome au IIIème siècle.* 1956.
3. Madeleine Biardeau — *Le Tattvabindu de Vācaspatimiśra.* Édition critique, traduction et introduction. 1956. 2ème tirage, 1979.
4. J. Monchanin, J. Filliozat, A. Bareau — *Entretiens* 1955. 1956.
5. Louis Renou — *Etudes sur le vocabulaire du Ṛgveda.* Première série. 1958.
6. Suzanne Siauve — *La voie vers la connaissance de Dieu* (*Brahma-Jijñāsā*) *selon l'Anuvyākhyāna de Madhva.* 1957.
7. Dev Raj — *L'esclavage dans l'Inde ancienne d'après les textes palis et sanskrits.* Avec une préface du Dr. Jean Filliozat. 1957.
8. Alain Daniélou — *Tableau comparatif des intervalles musicaux.* 1958.
9. Alain Daniélou — *La musique du Cambodge et du Laos.* 1957.
10. André Bareau — *La vie et l'organisation des communautés bouddhiques modernes de Ceylan.* 1957.
11. Alain Daniélou et N.R. Bhatt — *Textes des Purāṇa sur la théorie musicale.* Vol. I, Édition critique, traduction française et introduction. 1959.
12. Charlotte Vaudeville —*Kabīr Granthāvalī* (*Dohā*). Avec introduction, traduction et notes. 1957.
13. Madeleine Biardeau — *Sphoṭa Siddhi* (*La Démonstration du Sphoṭa*) *par Maṇḍana Miśra.* Introduction, traduction et commentaire. Texte sanskrit établi par N.R. Bhatt avec la collaboration de T. Ramanujam. 1958.
14. Suzanne Siauve — *Les noms védiques de Viṣṇu dans l'Anuvyākhyāna de Madhva* (*Brahma-Sūtra* I, 1, *adhikaraṇa* 2 *à* 12). Texte avec traduction et notes. 1959.
15. Charlotte Vaudeville — *Etude sur les sources et la composition du Rāmāyaṇa de Tulsī-Dās.* Traduction en hindi par J.K. Balbir. तुलसीदास रचित रामचरितमानस का मूलाधार व रचनाविषयक समालोचनात्मक एक अध्ययन, fasc. I. 1959, fasc. II. 1965.
16. Alain Daniélou et N.R. Bhatt — *Le Gītālaṃkāra.* L'ouvrage original de Bharata sur la musique. Édition critique, traduction française et introduction. 1959.
17. Rasik Vihari Joshi — *Le rituel de la dévotion kṛṣṇaïte.* Préface par Jean Filliozat. 1959.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

18. N.R. Bhatt — *Rauravāgama*, édition critique, Vol. I. Introduction : Les Āgama çivaïtes, par Jean Filliozat. 1961. Vol. II, 1972.
19. R. Dessigane, P.Z. Pattabiramin et J. Filliozat — *La légende des jeux de Çiva à Madurai d'après les textes et les peintures*. Vol. I Texte — Vol. II Planches. 1960.
20. Claude Jacques — *Gayāmāhātmya*. Introduction, édition critique et traduction française. 1962.
21. Charlotte Vaudeville — *Les duhā de Dhola Mārū*. Avec introduction, traduction et notes. 1962.
22. Sayida Surriya Hussain — *Garcin de Tassy, Biographie et étude critique de ses œuvres*. 1962.
23. N.R. Bhatt — *Mṛgendrāgama* (*Kriyāpāda et Caryāpāda*) *avec le commentaire de Bhaṭṭa Nārāyaṇakaṇṭha*, édition critique. 1962.
24. N.R. Bhatt — *Ajitāgama*, édition critique. Vol. I. 1963. Vol. II. 1967.
25. Hélène Brunner-Lachaux — *Le rituel quotidien dans la tradition śivaïte de l'Inde du Sud selon Somaśambhu — Somaśambhupaddhati*, Introduction, traduction et notes. Vol. I : Le Rituel quotidien. 1963. Vol. II : Rituels occasionnels I. 1968. Vol. III : Rituels occasionnels II. 1977.
26. Pierre-Sylvain Filliozat — *Le Pratāparudrīya de Vidyānātha* — avec le commentaire *Ratnāpaṇa* de Kumārasvāmin. Traduction, introduction et notes. 1963.
27. Dessigane, P.Z. Pattabiramin et J. Filliozat — *Les légendes çivaïtes de Kāñcipuram*. 1964.
28. Ch. Vaudeville — *Bārahmāsā*. Les chansons des douze mois dans les littératures indo-aryennes. 1965.
29. J. Filliozat et P.Z. Pattabiramin — *Parures divines du Sud de l'Inde*. 1966.
30. Michèle Lupsa — *Chants à Kālī de Rāmprasād*. Introduction, texte bengali, traduction et notes. 1967.
31. R. Dessigane et P.Z. Pattabiramin — *La légende de Skanda*. 1967.
32. M.E. Adicéam — *Contribution à l'étude d'AiyaNār-Śāstā*. 1967.
33. J. Filliozat — *Un catéchisme tamoul du XVI^e siècle en lettres latines*. 1967.
34. P. Joshi — *Industrialisation et Société dans l'Inde du Nord*. Introduction par J. Filliozat : Observations sur l'étude des sociétés et de l'économie de l'Inde. 1967.
35. F. Gros — *Le Paripāṭal*, Texte tamoul, introduction, traduction et notes. 1967.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

36. P.S. Filliozat — *Œuvres poétiques de Nīlakaṇṭha Dīkṣita*. I. Texte, traduction et notes. 1967.
37. *Index des mots de la littérature tamoule ancienne*, Vol. I. 1967; Vol. II. 1968; Vol. III. 1970.
38. Suzanne Siauve — *La Doctrine de Madhva*. 1968.
39. François Gros et R. Nagaswamy — *Uttaramērūr*. Légendes, Histoire, Monuments, avec le *Pañcavaradakṣetramāhātmya* édité par K. Srinivasacharya. 1970.
40. B. Dagens — *Mayamata*. Traité sanskrit d'architecture. Édition critique, traduction et notes. 1ère partie 1970. 2ème partie 1976.
41. N.S. Shukla — *Le Karṇānanda de Kṛṣṇadāsa*. Édition et traduction annotée. 1971.
42. P.Z. Pattabiramin — *Sanctuaires rupestres du Sud de l'Inde*. Vol. I. Andhra. 1971. Vol. II. Tamilnad et Kerala. 1975.
43. Suzanne Siauve — *Les hiérarchies spirituelles selon l'Anuvyākhyāna de Madhva*. 1971.
44. Capitaine de Vaisseau Cordier — *Historique et Statistique de Karikal*. Texte rédigé en 1825. Présentation par François Gros. Vol. I. 1971.
45. Jean Filliozat — Un texte tamoul de dévotion vishnouïte. *Le Tiruppāvai d'Āṇṭāḷ*. 1971.
46. Marie-Claude Porcher — *Rāghavayādavīya* par Veṅkaṭādhvarin. Texte sanskrit édité par M.S. Narasimhacharya. Etude et Traduction. 1972.
47. Neelakanta Sarma — *Textes sanskrits et tamouls de Thailande*. Introduction par Jean Filliozat. 1972.
48. Marie-Claude Porcher — Un poème satirique sanskrit, la *Viśvaguṇādarśacampū*. Introduction, traduction et notes. 1972.
49. Jean Filliozat — Un texte de la religion kaumāra, le *TirumurukāRRuppaṭai*. 1973.
50. Association Internationale des études Tamoules. Compte rendu de la IIIème Conférence Internationale (Proceedings of the Third International Conference Seminar, Paris 1970) édité par François Gros et X.S. Thani Nayagam. 1973.
51. *Mahābhāṣyapradīpavyākhyānāni*, Commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa, édition critique par M.S. Narasimhacharya. Présentation par P.S. Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1973. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1975. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1976. Vol. IV. : Adhyāya I, Pāda 2-4. 1977. Vol. V. : Adhyāya 2. 1978. Vol. VI. : Adhyāya 3. 1979. Vol. VII. : Adhyāya 4. 1980. Vol. VIII. : Adhyāya 5. 1981.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

52. Alix Raison — *La Hārītasaṃhitā* : Texte médical sanskrit avec un Index de nomenclature âyurvédique. 1974.
53. Tara Michaël — Le joyau du Śiva-yoga, *Śivayogaratna* de Jñānaprakāśa. Édition, traduction et notes. 1975.
54. *Le Mahābhāṣya de Patañjali* avec le Pradīpa de Kaiyaṭa et l'Uddyota de Nāgeśa. Traduction par Pierre Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1975. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1976. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1978. Vol. IV. : Adhyāya I, Pāda 2. 1980.
55. Vasundhara Filliozat — *Le Temple de TirumaṅkaiyāLvār à Hampi*. 1976.
56. N.R. Bhatt — *Mataṅgapārameśvarāgama*, avec le commentaire de Bhaṭṭa Rāmakaṇṭha, Édition critique, Vol. I. : *Vidyāpāda*, 1977.
57. B. Dagens — *Les Enseignements architecturaux de l'Ajitāgama et du Rauravāgama, Études sur les āgama śivaïtes*, I. 1977.
58. S. Siauve — *Aṣṭādaśabhedanirṇaya*, Explication des dix-huit différences entre les deux branches de l'École de Rāmānuja, de Śrī Vātsya Raṅganātha, Édit. critique, traduction et notes, 1978.
59. F. L'Hernault — *L'Iconographie de Subrahmaṇya au Tamilnad*, 1978.
60. B. Dagens — Le florilège de la doctrine śivaïte, *Śaivāgamaparibhāṣā-mañjarī* de Vedajñāna, Édit. critique, traduction et notes, 1979.
61. N.R. Bhatt — *Sārdhatriśatikālottara* avec le commentaire de Rāmakaṇṭha, édition critique, 1979.
62. J. Filliozat — *Yogaśataka*, Texte médical attribué à Nāgārjuna, textes sanskrit et tibétain, traduction française, notes, indices, 1979.
63. Michel Hulin — *Mṛgendrāgama*, Sections de la Doctrine et du Yoga, avec la *vṛtti* de Bhaṭṭanārāyaṇakaṇṭha et la *dīpikā* d'Aghoraśivācārya. Traduction, introduction et notes, 1980.
64. Charlotte Vaudeville—कबीर-वाणी *Kabīr-Vāṇī*, recension occidentale/ western recension, Introduction & concordances. 1981.
65. N.R. Bhatt—*Mataṅgapārameśvarāgama*, avec le commentaire de Bhaṭṭa Rāmakaṇṭha. Vol. II: *Kriyāpāda, Yogapāda et Caryāpāda*, Édition critique. 1982.